THE
RATNAVALI
A SANSKRIT DRAMA
BY
SRIHARSHA.

रत्नावली

नाटिका ।

श्रीश्रीहर्षविरचिता ।

EDITED

WITH ENGLISH AND BENGALI TRANSLATIONS, A SANSKRIT COMMENTARY, AND ANNOTATIONS IN ENGLISH AND SANSKRIT

BY

SRISH CHANDRA CHAKRAVARTI, B. A.

Senior Professor of Sanskrit, Dacca College, Dacca.

—o—

श्रीश्रीशचन्द्रचक्रवर्त्तिभट्टाचार्य्येण संस्कृता

Second Edition

BHATTACHARYYA & SON

MYMENSINGH & CALCUTTA.

1919

Price Rs. 2/8/-

CALCUTTA
PRINTED BY D. N. DE, AT THE
SWARNA PRESS
107, MACHUABAZAR STREET.
AND
PUBLISHED BY D. N. BHATTACHARYYA
FOR BHATTACHARYYA & SON,
65, COLLEGE STREET.

PREFACE TO THE FIRST EDITION.

The *Ratnavali* has been prescribed as a text book for the B. A. Examination of the Calcutta University. It is also read by many students preparing for various Sanskrit Examinations. At the request of some friends to write a commentary on it, I make this humble attempt.

The Grammatical matters here are all, of course, in accordance with *Panini's* Grammar. The citations from the works of *Amara Sinha*, *Hemachandra*, *Halayoodha*, and *Medinikara*, have been carefully verified. Besides, *Poorboshottama's Haravoli* and *Trikanda Sesha* were consulted. Other lexical quotations are picked from the writings of *Mallinatha*, *Madhava Bhatta*, *Ujjal Dutta*, &c. &c.

The Notes on Grammar, Lexicon, Rhetoric, Prosody, &c have been divided into separate paragraphs with a view that the students may easily select or omit what they require, for their preparation. Their predilections had also to be considered, as in fact, to compare great things with small, "स्तुवन्ति गुर्व्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः । इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्व्वमनोरमा गिरः ॥"

It is needless to say I undertook the task with diffidence. Moreover, the book is printed at Calcutta and the editor has to correct the press at Dacca, over a distance of about 260 miles. So corrections and suggestions from teachers and students, will be thankfully accepted.

January 1, 1902.
DACCA.

SRISH CHANDRA CHAKRAVARTI.

PREFACE TO THE SECOND EDITION.

The copies of the first edition having been all kindly taken in by the public, its second edition has long become necessary. The editor has revised the contents and some additions have occasionally been made to important passages in the notes. The serious rise in the price of paper is the cause of the slight increase of the price of the book.

July 1, 1919.
CALCUTTA.

D. N. BHATTACHARYYA.

INTRODUCTION.

शेषाशेषार्थविद् यो मां शेषाशेषगवीः स्फुटम् ।
शिशिष्याध्यापयद् वन्दे तं शेषभूषणोपमम् ॥१॥

I. THE DRAMA.

(1) The Author.

The prologue of the *Ratnávali* declares *Sriharsha*, a king, to be its author (*a*). According to H. H. Wilson, this *Harsha* reigned over Kasmir. The *Rajatarangini* calls him a poet (*b*). But it does not name any of his compositions. Besides, he flourished about 1100 A. D. whereas illustrative passages from the *Ratnavali* are quoted in the rhetorical work *Saraswati-Kanthabharana* by *Bhoja Deba* who was a contemporary of *Harsha's* grandfather *Ananta Deba*. Extracts from the *Ratnávali* are also found in the *Dasa Rupaka* by *Dhanika* and *Dhananjaya* courtiers of *Munja*, king of *Malava*. *Munja* preceded *Bhoja* who was reigning in 1042 A. D. (*c*). So the opinion that *Harsha* of Kasmir composed the *Ratnávali*, seems to be untenable.

Another *Harsha* reigned in Konouj about 625 A. D. to 650 A. D. The Chinese traveller Hiouen Thsang came to his court in 638 A. D. *Bána Bhatta* the author of the *Kadambari*,

(*a*) "...षद्...पाम: श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः यथावत्-स्वामिना श्रीहर्षदेवेन...रत्नावली नाम नाटिका कृता...तत् तस्यैव राज्ञो बहुमानात्...नाटयितव्या ।" Again—'श्रीहर्षो निपुणः कविः—"

(*b*) "सोऽशेषदेशभाषाज्ञः सर्व्वभाषासु सत्कविः ।
कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ।" (रा० त० ७।६११)

(*c*) Some assign 469 A. D., some 585 A. D., to Bhoja, others 665 A. D. If this be true, the contemporary of *Ananta Deba* must be another Bhoja.

Parbatiparinaya and *Chandisataka*, composed a work, *Hurshacharita*, on this king who subsequently became a Buddhist. The *Ratnavali* is according to some, connected with this *Harsha*. *Madhoosoodana*, a commentator of the *Mayoorasataka*, who flourished about 1658 A. D. mentions in his commentary, called *Bhabahodhini*, that *Sriharsha* described by *Bana*, was the author of the *Ratnavali*.

On the other hand *Sriharsha's* authorship is questioned on *Mammata's* remark—"श्रीहर्षादे धांवकादीनामिव धनम्—" on the dictum काव्यं यशसेऽर्थकृते &c. &c....in his *Kabydprakasa*. It means that *Dhavaka* and others got money from persons like Sriharsha *for composition*, upon which, many of *Mammata's* commentators (e. g. नागोजिभट्ट in his काव्यप्रकाशोद्योत: वैद्यनाथपायगुण्ड in his काव्यप्रकाशप्रभा, महेश्वर in his काव्यप्रकाशादर्श, and जयराम in his काव्यप्रकाशतिलक) assert that *Dhavaka* composed the *Ratnavali* and sold it to *Sriharsha*.

The passage has different readings. One is श्रीहर्षादेर्बाणादीनामिव धनम्, which is adopted by another commentator of *Mammata*, in his work named काव्यप्रकाशनिदर्शन। But he does not speak of any thing regarding the *Ratnavali*. Another reading is श्रीहर्षादेर्भासकादीनामिव धनम्। This *Bhasaka* is likely the same as *Bhasa* mentioned by *Bana* (*d*) and the writer of the *Sarngadharapaddhati* (*e*). A passage in the *Malavikagnimitra* (मालविकाग्निमित्र) contains according to some, the name of *Bhasaka*, viz.—"प्रथितयशसां भासकसौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य

(*d*) "सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव॥"

(*e*) "भासो रामिलसौमिलौ वररुचिः श्रीसाहसाङ्कः कवि-
र्मेंठो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्च यः।
दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवती के तस्य सर्व्वेऽपि ते॥"

वसंतमासकवं: कामिदासस्य क्षतौ किं क्षतौ बहुमान: ?" Though others read it as प्रथितयशसां भासकसौमिल्लकविपुत्रादीनाम् &c. &c....

Some say that as the stanza द्वीपादन्यस्मात् &c. (*f*) of the *Ratnavali* occurs in the *Harshacharita*, it is *Bana* who composed that drama and passed it off in the name of his hero *Harsha*.

This *Sriharsha* of the *Ratnavali*, is, of course different from *Sriharsha* the writer of the *Naiskadhacharita*. The latter describes himself as the son of *Srihira* and *Mamalla Debi* and says he was honoured by the king of *Kanouj*, with a roll of betel leaves at audience, supplied with a horse, and allowed a seat near the king. This surely ill befits the wearer of a crown.

(2) The Author's other Works.

Sriharsa is introduced also in the prologue (प्रस्तावना) of two other dramas as their author. These are the *Nagananda* (नागानन्द) and the *Priyadarsika* (प्रियदर्शिका). Their antiquity is indisputable as they have been referred to in the *Dasarupaka* more than once But tradition again ascribes them, like the *Ratnavali*, to *Dhavaka*. Judging from the thoughts and expressions common to all, the style, internal structure, and other evidence, it is certain that the *Ratnavali*, *Nagananda* and *Priyadarsika* are the works of the same poet.

In the *Nágananda*, Buddha instead of *Siva* and his consort, is invoked in the Benediction (नान्दी) । *Sriharsha* is mentioned in the prologue almost in the same words as in the *Ratnavali*. The story of *Jimootabáhana* (जीमूतवाहन) and *Malayabati* (मलयवती), rendered familiar by the *Katha-saritságara* (कथासरित्सागर, B. IV. Ch. 22) supplies the dramatic

(*f*) In some printed editions the stanza is not given.

incidents. Buddhistic sentiments based on kindness, pervade its description. This probably indicates a religious change which might subsequently come upon *Harsha*.

The *Priyadarsika* is founded on the love of *Udayana* king of *Batsha* and *Priya Darsana* (प्रियदर्शना) or *Priya Darsika* (प्रियदर्शिका) daughter of *Dridha Barman* (दृढवर्म्मन्) king of *Proyaga* (प्रयाग). She happens to be one of the maid servants of *Basabadatta* wife of *Udayana* and queen of *Batsha* and is called *Aranyika* (आरण्यिका). The king gains her company by a stratagem. An underplot (गर्भाङ्क) is introduced in Act III. (*g*) in which *Basabadatta's* maids *Manorama* (*h*) (मनोरमा), *Aranyika*, *Kanchanamala* (काञ्चनमाला) and *Indibarika* (इन्दीवरिका) are to entertain her by acting before her, some of the scenes of her unmarried state, when she was under the tuition of *Udayana* who had been captured and kept a prisoner by her father, in his court until her elopement and marriage. *Manorama* acts the part of *Udayana* and *Aranyika*, on account of her superior beauty, personates *Basabadatta*, the others representing the servants. Now the king having secretly arranged with *Manorama*, boldly appears in the scene assuming her *role*, to enjoy *Aranyika's* company. The jester *Basantaka* blurts out the secret and *Basabadatta* detects the king while he is with his new sweet heart. She restrains and secludes *Aranyika* who drinks poison. The queen is afterwards pacified by her friend *Sankrityayani* (सांकृत्यायनी) a female ascetic and comes to know that *Aranyika* is no

(*g*) "—अद्य रात्रावस्माभि रुदयनचरितं नाम नाटकं देव्याः पुरतो नर्त्तितव्यम्। तत्र आरण्यिका वासवदत्ता भविष्यति। अहमपि वत्सराजः—" (प्रियदर्शिका, Act III.)

(*h*) The *Dasarupaka* puts the name *Soosangata* (सुसङ्गता) for *Manorama*.

other than her cousin, *Priyadarsana*, daughter of her maternal aunt. She is then rescued and formally given in marriage to the king.

The piece was probably the author's first attempt at a dramatic composition. It is, as it were, the shadow of the *Ratnavali*. The plot is weak and unimproved whereas in the *Ratnavali*, it is more vividly and powerfully expanded and the poet shows his skill more strikingly. The incidents of the *Priyadarsika* are, in many points, the same as those in the *Ratnavali*. Its prologue is almost an extract from that of the latter. In the benediction, *Gouri* and her spouse are invoked. The concluding stanza (भरतवाक्य) is identical in both. *Udayana* is the hero and his first wife *Basaba-datta* keeps unknowingly the heroine *Priyadarsana* under her, with the name *Aranyika*, like *Ratnavali* with the name *Sagarika*. Both *Aranyika* and *Sagarika* attempt to commit suicide and are secluded by the queen. They turn to be relations to her and are married to the king by the queen herself.

The story is also recounted in the *Katha-Sarit-Sagara* (B. II. Ch. 14) in which *Gopaloka* (गोपालक) brother to *Basaba Datta*, is described to have captured a certain princess *Bandhoomati* (बन्धुमती) and sent her as a present to his sister. The queen changed her name to *Manjoolika* (मञ्जुलिका) and concealed her from the king's view. *Udayana* helped by *Basantaka* his confidant, saw and made love to her. At the request of the king, *Sankrityayani*, a female ascetic and friend to the queen, who had come to her from her father's court, interceded and appeased *Basaba-datta's* anger. She was then induced to formally present *Bandhoomati* to her husband as his new wife.

(3) The Source of the Play.

Basabadatta the queen, *Jougandharayana* (यौगन्धरायण) the minister, *Roomanwat* (रुमण्वत्) the General, *Basantaka* (वसन्तक) the boon companion and *Kanchanamala* (काञ्चनमाला) the maid, are all generally found assigned, as companions to *Udayana* the king of *Batsha* with its capital *Kousambi*, almost in all works where he is the main subject for description. These personages occur in the *Katha-Sarit-Sagara* which was compiled, about 1088 A. D., by *Shoma Deba* for *Surjabati*, a queen of Kasmir, grandmother to *Harsha* who flourished about 1100 A. D. as stated before. Its materials were taken from the *Brihat-Katha* (*i*), the oldest collection of tales then extant, from which the subject-matter of the *Ratnavali*, *Nagananda* and *Pria Darsika* might have been drawn. This may explain why the name *Pradyota* stands in the *Ratnavali* (*j*), *Priya Darsika* (*k*) and *Megha Doota* (*l*), for the father of *Basabadatta* and the king of *Avanti* with its capital Ujjein, in opposition to what we find in the *Kathasaritsagara* in which the name of this personage is *Chanda Mahasena* (चण्डमहासेन) and *Pradyata* is the king of *Magadha* (मगध) whose daughter *Padmavati* (पद्मावती) is another wife of *Udayana*. She was

---

(*i*) *cf.* :—भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथामिति दण्डी।—अस्ति बृहत्कथालम्बैरिव शालभञ्जिकोपेतैर् वेश्मभिरुपशोभितं कुसुमपुरं नाम नगरमिति वासवदत्तायां सुबन्धुश्च।—रामायणादि च विभाव्य बृहत्कथाञ्चेति दशरूपकम्। बृहत्कथा गुणाढ्यनिर्म्मितेति तट्टीकायां धनिकः।

(*j*)—प्रद्योतस्य सुता वसन्तसमयस्त्वञ्चेति— Act I. Again—"चण्डमवन्तिनृपात्मजेयम्"—Act IV.

(*k*)—"श्रुतं मया बन्धनाद् परिभ्रष्टः प्रद्योततनयामपहृत्य वत्सराजः कौशाम्बीमागतः—"again "दोषान् पश्यसि बन्धनस्य न पुनः प्रद्योतपुत्र्या गुणान्" Act I.

(*l*) "प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे।"

procured for him by *Jougandharayana*, as it is detailed in the *Katha-sarit-sagara*, by proclaiming that *Basabadatta* was burnt to death at *Lavanaka* in a conflagration. The minister was actuated to take this step, as the king of *Magadha* had declined to make his daughter, one of *Udayana's* subordinate wives. Besides, as the husband of *Padmavati*, was destined to be an emperor in accordance with the prophecy of a seer, she must needs be obtained for his master.

So the story of the *Ratnavali* only partly tallies with that of the *Katha-Sarit-Sagara*. The herine *Ratnavali*, her father *Bikromabahoo* (विक्रमबाहु) the king of Ceylon and maternal uncle to *Basabadatta*, the incident of the ship-wreck and *Ratnavali's* dwelling with *Basabadatta*, are not mentioned here. It is *Basabadutta*, herself who, according to the *Katha-Sarit-Sagara*, resides with *Padmavati*, under the false name of *Avantika* (अवन्तिका) until *Udayana* marries *Padmavati*.

(4) Implication.

The gist of the whole drama is to be inferred from the benediction. (नान्दी काव्यार्थसूचिका ।) Hence its first stanza implies the incident described in Act I, of *Sagarika's* worshipping the king as the God of Love, throwing flowers at him from a distance, just as the daughter of the Mountain does at her husband.

In the second stanza, *Gouri*, urged by her companion, comes to her lover with hesitation. This represents that *Sagarika* urged and supported by her confidnate, lovingly advances, with hesitation, towards the king, as described in Act II.

The remonstrances of the goddesses of wealth and power in the third stanza, represent the expostulations of *Basabadatta* and *Sagarika* with the king as he is constantly oscillating between them, described in Act III.

The fourth stanza describing the hurry and confusion incidental to the sacrificial fire of *Daksha*, foreshadows the commotion occasioned by the magical fire stated in Act IV. The last containing the statement जितमुडुपतिना &c., "The moon has gained", implies the final union of *Sagarika* with the king. Some suppose either this or the privious stanza to be an interpolation, as it violates the rule that the benediction shall not contain more than sixteen poetical lines (श्लोकपाद).

(5) Similarities.

Some situations and dialogues are found similar in the *Bikromorbasi* and the *Ratnavali*. We get in the former (Acts II and III)—

"चेटी।—अलीकं किं मया भर्त्रीं विज्ञापितपूर्वा" ।

"देवी।—नास्ति प्रभवतोऽपराधः। अहमेवात्रापराद्धा या प्रतिकूलदर्शना भूत्वा अग्रतो भवामि। निपुणिके इत एहि।"

"विदूषकः।—वर्षानदीवाप्रसन्नैव तत्रभवती गता। तस्मादुत्तिष्ठोत्तिष्ठ।"

"राजा।—सर्वथोदन्विकस्याप्यवहार्य्य एव विषयः।"

Passages almost in these words occur also in the latter.

The queen (औशीनरी काशीराजदुहिता) betrays her jealousy like *Basabadatta*. A worship of the moon's rays and of the king, together with the act of offering rewards to a Brahmin (the jester), for chanting holy verses (स्वस्तिवाचन) on the occasion, is introduced in Act III, like the queen's worship of the God of love in Act I of the *Ratnavali*. The king *Poorooraba*s (पुरूरवा:) describes the queen then, as

सितांशुका मङ्गलमात्रभूषणा विचित्रदूर्वाङ्कुरलाञ्छितालका ।
व्रतोपदेशोज्झितगर्ववृत्तिना मम प्रसन्ना वपुषैव लक्ष्यते ॥

which compares well with प्रत्यग्रमज्जनविशेषविविक्तकान्तिः &c......

The plot of the *Malovikagnimitra* (मालविकाग्निमित्र) is in some details, similar to that of the *Ratnavali*. There the

heroine *Malavika* (मालविका) is thwarted in her assignations with the king *Agnimitra* (अग्निमित्र) by his second wife *Irabati* (इरावती।) She is jealous of *Malavika* who is put in fetters by the queen *Dharini* (धारिणी) the first wife of *Agnimitra*, as *Sagarika* is by *Basabadatta*. She is then released by a trick and the queen herself gives her in marriage to the king.

In the *Biddha-Sala-Bhanjika* (विद्धशालभञ्जिका,), a drama by *Rajashekhara*, the king (विद्याधरमल्ल) and the heroine (मृगाङ्कावली), daughter of the king of *Lata*, meet, and are enamoured of each other, through the contrivance of the minister. His object in effecting a marriage between them, is to secure to his master an empire, as it had been prophesied by a seer that the husband of *Mriganka vali* would be a universal monarch. The lovers meet in the garden, but the interview is broken off by a cry that the queen is coming. The queen who is the senior wife of *Bidyadhara Malla*, at last gives the girl in marriage to her husband the king.

(6) References:

उदयन is thus mentioned in the मृच्छकटिक—

"उत्तेजयामि सुहृदः परिमोचणाय यौगन्धरायण इवोदयनस्य राज्ञः।"(Act IV.)

In the मेघदूत—

"प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्"—

on which मल्लिनाथ remarks "उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भुतोपाख्यानानां कोविदाः" &c ...In another of its stanzas (said to be an interpolation by some) we have—

"प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे"—

The allusion in the मालतीमाधव is—

वासवदत्ता च राज्ञे सञ्जयाय पिता दत्तमात्मानमुदयनाय प्रायच्छदिति।"(Act II.)

There was also a drama, named तापसवत्सराज, on the marriage of उदयन and पद्मावती। It is referred to in *Ananda*

Bordana's ध्वन्यालोक (*m*) and *Bhoja's* सरस्वतीकण्ठाभरण (*n*) and appears to contain in its plot, all the incidents pertaining to that marrige, described in the कथासरित्सागर।

अभिनवगुप्त quotes in his commentary on the ध्वन्यालोक, a stanza from a drama called the स्वप्नवासवदत्ता (*o*)। He also seems to refer to the रत्नावली under the name of वत्सराजचरित viz.—"अयमपरो रसभङ्गहेतुरागन्तव्यो यदेकान्त एव विच्छित्तिव्यापारान्तरवर्णने यथा वत्सराजचरिते (*p*) चतुर्थेऽङ्के रत्नावलीनामभयमध्यगच्छतो विजयवर्मवृत्तान्त-

(*m*) We transcribe here some stanzas from the तापसवत्सराज quoted by अभिनवगुप्त in his ध्वन्यालोकटीका (लोचन)—

"(i) सर्वत्र ज्वलितेषु वेश्मसु भयादालीजने विद्रुते
श्वासोत्कम्पविहस्तया प्रतिपदं देव्या पतन्त्या तया।
हा नाथेति मुहुः प्रलापपरया दग्धं वराक्या तया
शान्तेनापि वयन्तु दहनेनाद्यापि दह्यामहे॥ (Act III).

"(ii) देवी स्वीकृतमानसस्य नियतं स्वप्नायमानस्य मे
तद्गोत्रग्रहणादियं सुवदना यायात् कथं न व्यथाम्।
इत्थं यन्त्रणया कथं कथमपि क्षीणा निशा जाग्रतो
दाक्षिण्योपहतेन सा प्रियतमा स्वप्नेऽपि नासादिता॥ (Act IV).

"(iii) तथाभूते तस्मिन् मुनिवचसि जातागसि मयि
प्रयाणेऽन्तर्गूढां कथमुपगता मे प्रियतमा।
प्रसीदेति प्रोक्ता न खलु कुपितेत्युक्तिविधुरं
समुद्भिन्ना पीतैर्नयनसलिलैः स्यास्यति पुनः॥ (Act V).

(*n*) "किञ्च दग्धायामपि वासवदत्तायां वैरप्रतिचिकीर्षया पद्मावती मयोढा। अवस्थिते च समीहिते तया विना क्षणमपि न जीवामीत्यविज्ञातवासवदत्तासन्निधेर्वत्सराजस्याग्निप्रवेशाध्यवसायः प्रियाहृदयतो व्यलीकशल्यमुद्धरामीति तापसवत्सराजे।" (सरस्वतीकण्ठाभरण)

(*o*) "संहतपक्ष्मकपाटं नयनद्वारं स्वरूपताडनेन।
उद्घाट्य सा प्रविष्टा हृदयगृहं मे नृपतनूजा॥" But this stanza does not occur in the recently discovered drama स्वप्नवासवदत्ता by the poet भास printed and published from Trivendrum, edited by M. M. Pandit T. Ganapati Sastrin.

(*p*) *cf*:—"लोके हारि च वत्सराजचरितम्—" (रत्नावलीप्रस्तावना)

कर्णे।" Besides धनिक names in his दशरूपक, a certain work as उदयनचरित—"यथोदयनचरिते किलिञ्जकिलिप्रयोगः"। This is repeated by विश्वनाथ in his साहित्यदर्पण।

वासवदत्ता is also the name, and heroine of a novel, a prose work by सुबन्धु nephew to वररुचि ? But it has nothing else in common with the story of उदयन and वासवदत्ता or any other of his wives, such as पद्मावती, बन्धुमती, विरचिता, रत्नावली and प्रियदर्शिका, described in the कथासरित्सागर or elsewhere. Of these *Birachita* (विरचिता) was an attendant of the harem, with whom उदयन had previously had an intrigue. One day, by mistake, he addressed वासवदत्ता by her name. He had thereupon to conciliate the queen by clinging to her feet.

The illustration वासवदत्तिक given by भाष्यकार (४।२।६०) and thence taken in the काशिका, कैयट, पदमञ्जरी...&c.... refers to some आख्यायिका but what it was cannot now be definitely ascertained.

(7) Opinions (on the Ratnavali).

"The story is romantic, the incidents are well contrived, the situations are eminently dramatic, and although the spectator is let into the secret of the plot from the beginning, the interest is very successfully maintained. The intrigue corresponds perfectly with the definition given by Schlegel; it is the union of unexpected combinations, resulting from the contending operation of accidental occurences and premeditated designs.

"In the circumscribed limits of the action, we have no right to expect much contrast or development of character and it is enough that all the individuals introduced preserve their indentity. This is true even of the chambermaids and the obliging confidant on the heroine is distinguishable from the termagant adviser of the queen.

"All the personages are derived from Hindu history, they are wholly of mortal mould, and unconnected with any mystical or mythological legend and the incidents are not only the pure inventions of the poet, but they are of entirely domestic nature. In this latter respect the *Ratnavali* differs from the *Mrissakatika*, *Malatimadhaba*, and *Mudrarakshas*, while its exemption from legendary allusion, distinguishes it from the *Bikramorbashi* and *Uttara-Rama-charita*.

* * * * *

"The belief in vulgar magic or common conjuring, which is repeatedly expressed in the drama, is worthy of remark, as it is something new. The supernatural powers described in *Malati-Madhab* are of a different description from the art that makes a flower blossom out of season, or covers a building with illusory flame.

* * * * *

"The author is under considerable obligation to his predecessors, and especially to *Kalidasa*, from the *Bikramorbasi*, of which writer several situations, and some of the dialogues even are borrowed. At the same time the manners described are very different, and the light and loose principles of *Batsha* are wholly unlike the deep, dignified passion of *Pooroorabas*," ——H. H. WILSON'S THEATRE OF THE HINDUS.

"The *Ratnavali* or 'Jewel-necklace' is a short play in four Acts. There is nothing of the supernatural about this drama. It may be called comedy in which the characters are all mortal men and the women and incidents quite domestic. The plot of the *Ratnavali* resembles in its love intrigues that of the *Bikramorbasi*, *Malabikagnimitra*,

&c...and in like manner presents us with a valuable picture of Hindu manners in medieval times."—MONIER WILLIAMS' INDIAN WISDOM.

II. छन्दः । (PROSODY.)

(१) पद्यं चतुष्पदी, तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसंख्यातं जाति र्मात्राकृता भवेत्।

A Sanskrit stanza (श्लोक) consists of four verses (पादाः or feet). The metres are divided into two classes वृत्त and जाति। The first is measured by अक्षर and the second by मात्रा।

(२) सममर्द्धसमं वृत्तं विषमञ्चेति तत् त्रिधा।

वृत्त is further divided into three classes viz :—समवृत्त, अर्द्धसम वृत्त and विषमवृत्त।

(3) समं समचतुष्पादं, भवत्यर्द्धसमं पुनः। आदिस्तृतीयवद् यस्य पादस्तुर्य्यो द्वितीयवत्। भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्।

The समवृत्त is what has all its four verses (feet) similar e.g. वसन्ततिलकं, शिखरिणी, शार्दूलविक्रीड़ितम् &c....

The अर्द्धसम has the first and third feet like to one another and the second and fourth like, though different from the first or third. e. g. पुष्पिताग्रा, वियोगिनी &c...

The विषमवृत्त has all its verses (पादाः) unlike to one another. e g. उद्गता।

(4) ज्ञेयः पादश्चतुर्थांशः, यतिर्विच्छेदसंज्ञिता (इति वृत्तरत्नाकरः।)

(यति र्जिह्वेष्टविश्रान्तिस्थानं कविभिरुच्यते इति छन्दोमञ्जरी) ॥

The fourth part of a श्लोक is called a पाद (foot or verse). यति (pause or cæsura) is that part of a verse where the reader is required to stop his breath and then proceed on. It serves the purpose of a comma or semicolon in the matter of punctuation.

(5) सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्। वर्णः संयोगपूर्वश्च—

The vowel followed by अनुस्वार or विसर्ग, and that preced-

ing a combination of consonants and all दीर्घ (long) vowels are गुरु (heavy).

(6) तथा पादान्तगोपि वा ।

The vowel when पादान्तग (*i. e.* at the end of a पाद) is optionally गुरु or लघु as required.

(7) प्रह्रे वा । The vowel followed by प्र वा ह्र is optionally गुरु wherever it may stand. All other vowels are ह्रस्व (light).

(8) म स्त्रिगरु स्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघु र्यः ।
जो गुरुमध्यगतो रलमध्यः सोन्तगुरुः कथितोन्तलघु स्तः ॥
गुरुरेको गकारस्तु लकारो लघुरुच्यते ।

If there be a consonant or combination of consonants with a vowel followed by two such, their contiguous position forms what is called a गण । They are म, न, भ, य, ज, र, स, त, ग and ल with respect to वृत्तच्छन्दः । Of these the last two ग and ल contain each only one vowel with a consonant or more ; e.g —म= सा म्नी का । न=न चल । भ=किं वद । य=वरा सा । ज= कदा च । र=सारसः । स=वसुधा । त—मा ते क । ग=स्त्री । ल=च ।

(9) एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम् इति श्रुतबोधे ।

As for जातिच्छन्दः a ह्रस्व (short) vowel is counted as one मात्रा, if it be लघु (light) e.g. हि । A गुरु vowel is counted as containing two मात्राs e g. भाः, कः &c... ।

There are three stanzas in the प्राकृत portion in Act I. viz:— (1) कुसुमाउह प्पिय दूअ श्रो &c...., (2) विरहिअ वउला मोअ ओ &c...and (3) इह पढमं महुमासो &c...

The first two are in शुद्धा द्विपादिका गीति । The Rule is :—
"भवेद् द्विपदिका गीति र्भरतेन प्रकीर्त्तिता । सर्व्वा चतुर्भि श्चरणैस्त्रयोदश-कलात्मकैः । शुद्धा खण्डा च मात्रा च सम्पूर्णेति चतुर्विधा । गीयते करणाख्येन तालेन द्विपदी तथा ॥" कला means मात्रा as defined above. When द्विपदी is शुद्धा, it is also called जम्भोलिका । "शुद्धा द्विपदिका गीतिः सैव जम्भोलिकोच्यते ।" It is a kind of song in which each line is

once or twice sung and no pause is to be allowed between the chorus and the next line.

The third is in what is called उद्गाथाच्छन्द: for the *Prakrita* poetry. The Rule is—

"पूर्व्वार्द्धे उत्तरार्द्धे मात्रा त्रिंशदिति उभयो: संभणिता। सा उद्गाथा वृद्ध: पिङ्गल: कथयतीष्टा षष्टिमात्राङ्गी।"

One stanza, occurs in Act II (viz दुक्खजलमणरायो &c.) in the गाथा metre In Act IV. four more stanzas are given in *Prakrita*, the two of which are in उद्गाथा and the rest in the गाथाच्छन्द:। The Rule for the गाथा is :—"प्रथमे द्वादशमात्रा द्वितीये अष्टादशेन संयुक्ता। यथा प्रथमं तथा तृतीयं दशपञ्चविभूषिता गाथा॥" The Rules for the गाथा and उद्गाथा metres are also quoted in प्राकृत। (Vide the notes on the magician's speech, P. 109 Act IV.)।

III. नाटकीय परिभाषा।

(DRAMATIC PECULARITIES.)

काव्यं द्विधा। दृश्यं श्रव्यञ्च। दृश्यं रूपकमिति (Representation) कथ्यते। रूपकं पुनर्दशधा। यथा नाटकम् (Drama)। प्रकरणम्। भाण:। प्रहसनम्। डिम:। व्यायोग:। समवकार:। वीथी। अङ्क:। ईहामृगम्।

दृश्यकाव्येषु उपरूपकञ्च अष्टादशधा। यथा—

"नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥
संलापकं श्री-गदितं शिल्पकञ्च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥"

अतेयं रत्नावली नाटिका। तल्लक्षणञ्च यथा दशरूपके—

"लक्ष्यते नाटिकाप्यत्र सङ्कीर्णान्यनिवृत्तये।
तत्र वस्तु प्रकरणाद्, नाटकाद् नायको नृप:॥
प्रख्यातो धीरललित: शृङ्गारोऽङ्गी सलक्षण:।
देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा॥
गम्भीरा मानिनी कृच्छ्रात् तद्वशान्नेतृसङ्गम:।
नायिका तादृशी मुग्धा दिव्या चातिमनोहरा॥

अन्तःपुरादिसम्बन्धादासन्ना श्रुतिदर्शनैः ।
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम् ॥
नेता तत्र प्रवर्त्तेत देवीत्रासेन शङ्कितः ।
कैशिक्यङ्गैश्चतुर्भिश्च युक्ताङ्कैरिव नाटिका ॥"

Hence नाटिका is a minor drama. In actual representation the conductor (सूत्रधार) is to recite the पूर्वरङ्ग which includes the नान्दी। Then the prologue or explication (प्रस्तावना) should be announced in which some clue to the drama, and the name of its author and the occasion of its first performance are to be stated. The play is then opened and divided into acts The drama is to be partitioned into five सन्धि (articulations) which are again to be broken into different branches. There are many canons such as वृत्ति, अवमर्श, &c...which are to be strictly observed in dramatic composition and performance. These are detailed in भरतनाट्यशास्त्र, दशरूपक, नाट्यप्रदीप, साहित्य-दर्पण &c...

वस्तु नेता रसश्चैव रूपकेऽवयवाः मताः । *i. e.* There should be a plot, a hero and some prevailing sentiment. The story of the drama need not be historical. It may be fictitious or mixed. Some technical points are noticed below :—

(1) सन्धि="अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति।" इति साहित्यदर्पणं।

(2) सन्ध्यङ्गानि=मुखं (the initial) प्रतिमुखञ्चैव (counter-initial) गर्भोऽ (the medial) विमर्श एव च (the speculative)। तथा निर्वहणञ्चेति (the completive) स्युरमी पञ्च सन्धयः॥

(3) वृत्तिः=नाटके वृत्तयः (style of procedure) प्रोक्ता चतस्रो नाट्यवेदिभिः। भारती कैशिकी चैव सात्त्वत्यारभटी तथा॥ केचित्षष्ठीं।

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः। कैशिकी स्यात् शृङ्गारे, रसे वीरे तु सात्त्वती। रौद्रबीभत्सयोर्वृत्ति र्नियतारभटी पुनः।

(4) अङ्क=An act of a drama="यदा तु सरसं वस्तु मूलादेव प्रवर्त्तते। आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः। प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः। अङ्को नानाप्रकारार्थसंविधानरसाश्रयः॥" (दशरूपकम्।)

(5) गर्भाङ्क = An underplot = "अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान्। अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि॥ (साहित्यदर्पणः)।

(6) बीजम् = Germ = "अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति। फलस्य प्रथमो हेतुर्बीजं तदभिधीयते॥" = Seed, यथा वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगन्धरायणव्यापारो विष्कम्भके कः सन्देहः। द्वीपादन्यस्मादित्यादिना स्वामिनो वृद्धिहेताविन्यस्तेन न्यस्तः।

(7) बिन्दुः = Drop = "अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।

यथा रत्नावल्यामनङ्गपूजान्ते कथाविच्छेदे "कथमेष स उदयनो यस्मै अहं तातेन दत्तेति सागरिकावाक्यम्।

(8) पताकास्थानकम् = Pro-episode = "यत्रार्थे प्रस्तुतेऽस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकन्तु तत्॥" यथा यातोऽस्मि पद्मनयन इति उद्दामोत्कलिकां विपाण्डुरुचिमिति च।

(9) पूर्वरङ्गः = Preliminary Induction (Literally play-house) = "यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये। कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते॥"

(10) नान्दी = Benediction = "आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति कथ्यते॥" नान्दी तु कथनीया—"अष्टाभिर्दशभिर्द्वादशभिः षोडशभिः पदैः।" अत्र पदशब्दस्यार्थे नैकमत्यम्।

तथाहि—"श्लोकपादं पदं केचित् सुप्तिङन्तमथापरे।
परेऽवान्तरवाक्यञ्च पदमाहुर्विशारदाः॥
अन्यच्च—"आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः।
नान्दीति कथ्यते सर्वैर्नाट्यशास्त्रविचक्षणैः॥"

(11) प्रस्तावना = Prologue = "सूत्रधारेण सहिता संलापं यत्र कुर्वते। नटी विदूषको वापि पारिपार्श्विक एव वा॥ आमुखं नाम तस्यैव नाम्ना प्रस्तावनापि सा। उद्घातकः कथोद्घातः प्रयोगातिशयस्तथा॥ प्रवर्त्तकावलगिते पञ्च प्रस्तावनाभिदाः॥ अत्र रत्नावल्यां द्वीपादन्यस्मादित्यादिभिः कथोद्घातो नाम प्रस्तावना। तथाहि—

"सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा।
भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते॥"

(12) विष्कम्भकः = Prelude or Explication = "वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः। संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः॥" (दशरूपकम्)। अयं द्वेधा। शुद्धः सङ्कीर्णश्च। "शुद्धो मध्यमपात्रेण संस्कृतोक्त्या निबध्यते।" पात्र means a "dramatic person".

(13) प्रवेशक:=Prelude (or according to some, digression) ="तद्देवानुदात्तोक्त्या नीचपात्रप्रयोजित:। प्रवेशोऽङ्कद्वयस्यान्त: शेषार्थस्योपसूचक:। नीचाभ्यामेव पात्राभ्यामङ्कादौ य: प्रवर्त्तते। प्रवेशक: स विज्ञेय: शौरसेन्यादिभाषया।" The difference between the विष्कम्भक and the प्रवेशक is also that the first may appear at the beginning or at the end of an Act, the second only between the Acts.

(14) प्रकाशम्=Aloud="सर्वश्राव्यं प्रकाशं स्यात्" - "यत्तु सर्वजनश्राव्यं प्रकाशं तन्निगद्यते।"

(15) स्वगतम्- आत्मगतम् Aside यत्तु श्राव्यं न सर्वस्य स्वगतं तदिहोच्यते।

(16) जनान्तिकम् = Aside to some one त्रिपताककरेणान्यान् अपवार्यान्तरा कथाम्। अन्योन्यामन्त्रणं यत् स्यात् जनान्ते तज्जनान्तिकम्" or "उक्तस्याश्रवणं कार्यात् पार्श्वस्थै: स्यात् जनान्तिकम्।" ऊर्द्धसर्वाङ्गुलि: वक्रानामिक: कर: त्रिपताककर:।

(17) अपवारितम्=रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम्=This also is intended for some one to be spoken to aside.

(18) आकाशभाषितम्=utterance from the void="किं ब्रवीषीत्येवमित्यादि विना पात्रं ब्रवीति यत्। श्रुत्वेवानुक्तमप्येक स्तत् स्यादाकाशभाषितम्॥" =speech from the air.

(19) सूत्रधार: = Chief actor = the stage manager = conductor="नाटकीयकथासूत्रं प्रथमं येन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधार: स उच्यते" = "रङ्गदैवतपूजाकृत् सूत्रधार उदीरित:।"="सूत्रं धारयतीत्यर्थात् सूत्रधारो मतो बुधै:।" सूत्रञ्च="नाट्योपकरणादीनि सूत्रमित्यभिधीयते"= "नाट्यस्य यदनुष्ठानं तत् सूत्रं सबीजकम्।"

(20) विदूषक=The jester=the buffoon="कुसुमवसन्ताद्यभिध: कर्मवपुर्वेशभाषाद्यै:। हास्यकर: कलहरतिर्विदूषक: स्यात् स्वकर्मज्ञ:॥"

(21) कञ्चुकी=Chamberlain ="ये नित्यं सत्त्वसम्पन्ना: कामदोषविवर्जिता:। ज्ञानविज्ञानकुशला: कञ्चुकिनस्तु ते स्मृता:॥"

(22) प्रतीहारी=दौवारिकी=Warder="सन्धिविग्रहसम्बन्धं नानाकार्यसमुत्थितम्। निवेदयन्ति या: कार्यं प्रतीहार्यस्तु ता: स्मृता:॥"

(23) नट:=Actor। नटी = Actress। वैतालिक: = Herald or

bard, Panegyrist। चेटी = A maidservant। नेपथ्यम् = The part of the playhouse behind the scene = the dressing room.

(24) The hero (नायक) can be of the following classes :— ललित (Gallant), शान्त (Placid), उदात्त (Lofty), उद्धत (Impetuous) and the heroine can be mainly either स्वकीया, परकीया, or साधारणस्त्री। "स्वान्या साधारणस्त्रीति कथ्यते नायिका त्रिधा।" अत्र रत्नावल्यां नायको वत्सराजः धीरललितः। नायिका रत्नावली। प्रतिनायिका वासवदत्ता। शृङ्गारश्च रसः अङ्गी।

(25) "नासूचितस्य पात्रस्य प्रवेशो नाटके मतः।" Before entering a character, an introduction is necessary. Dramatic matters which are unfit for representation, or insipid, may be expressed in five ways "विष्कम्भ-चूलिका-ङ्कास्या-ङ्कावतार-प्रवेशकैः।" In a drama one sentiment (रस) must be main. There may be others leading to its development. Journeys, massacres, wars, &c...are not to be represented in a Hindu drama. Nor any kind of death. "वियोगान्तं न रूपकम्।" And hence we have no tragedies in Sanskrit. The play is to end with some benedictory verses (as it has commenced) to be spoken by a principal character. The Hero, the higher and more learned characters speak in Sanskrit. Females generally and other lower or minor personages are to speak in *Prakrita* or country dialects.

IV. प्राकृतनियमाः। (RULES ON PRAKRITA.)

अथात्र कानिचित् प्राकृतव्याकरणसूत्राण्युद्ध्रियन्ते वररुचिहेमचन्द्रचण्डादिग्रन्थेभ्यः।

(1) तत्रादौ वर्णविचारः। (On letters)

(१) ऋ ऌ वर्णयोरभावः।

प्राकृते इत्यधिकारः। ऋवर्णस्य कदाचिदत्वम्। यथा तृणम् तणं। घृणा घणा। मृतम् मअं। वृद्धः वड्ढो। क्वचिदित्वम्। यथा ऋषिः इसी। दृष्टिः दिट्ठी। हृदयम् हिअअं। क्वचिदुत्वम्। यथा ऋतुः उदू। संवृतम् संवुदं। मृणालः

मुणालो। क्वचिदयुक्तस्यरि। ऋणम् रिणं। ऋद्ध: रिद्धो। ऋक्ष: रिच्छो। लृकारस्य इलि स्यात्। कॢप्तम् किलित्तं।

In प्राकृत, ऋ is sometimes replaced by अ, sometimes by इ or उ or रि। लृकार is replaced by इलि।

(2) ऐतश्च।

प्राकृते अभाव:। ऐकारस्य क्वचिदेत्त्वं क्वचिद् अइभाव: क्वचिदित्त्वम् क्वचिदीत्त्वं वा। यथा शैल: सेलो। कैलास: केलासो। दैत्य: दइच्चो। चैत्र: चइत्तो। कैतवम् कइअवो। सैन्धवम् सिंधवं। धैर्य्यम् धीरं।

There is no ऐकार in प्राकृत। It is replaced by ए, अइ, इ or ई।

(3) औतस्तथा।

औकारस्याप्यभाव:। क्वचित्तस्य ओत्वं क्वचिद् अउभाव: क्वचिदुत्वम्। यथा कौमुदी कोमुइ। यौवनम् जोव्वणं। कौशाम्बी कोसंबी। पौरः पउरो। पौरुष: पउरुसो। सौन्दर्य्यम् सुंदेरं। दौवारिक: दुव्वारिओ।

No औकार is in प्राकृत, its purpose is served by ओ, अउ or उ।

(4) न प्लुतङञा:।

प्लुता वर्णा: ङकार-ञकारौ च प्राकृते न भवन्ति। तथाहि—

"ऐ औ स्वरौ ततश्चापि ऋ ॠ लृ च त्रय: स्वरा:।
ङश्च ञश्च विसर्गश्च प्राकृते नैव कर्हिचित्॥"

तर्हि भवभूतिभाषासमावेशे "मुञ्च माहमरागं परिहर रम्भोरु मुञ्च संरम्भम्। विरहं विरञ्जायासं सोढुं तव चित्तमसहं मे" इति मालतीमाधवे (Act VI) मुञ्चइत्यत्र संस्कृते तु अनुस्वारस्य ययि परसवर्ण इति (८।४।५८) ञ एव। प्राकृते त्वनुस्वार:।

There can be no प्लुत or ङ, or ञ in प्राकृत।

(5) नो ण: सर्वत्र।

नटी णई। कनकम् कणअं। मनुष्य: माणुसो।

न is changed to ण wherever it may be.

(6) शषो: स:।

निशा णिसा। अङ्कुश: अंकुसो। षण्ड: संढो। कषायम् कसाअं।

श and ष are changed into स wherever they may stand.

(7) फो भ:।

शफरी सभरी। सफलम् सभलं।

भ replaces फ।

(8) खघथधभां हः।

मुखम् मुहं। मेखला मेहला। मेघः मेहो। जघनः जहणो। गाथा गाहा। शपथः सवहो। राधा राहा। बधिरः बहिरो। सभा सहा। रासभः रासहो। प्रायहत्येव। प्रखलः पहलो। प्रलम्बघनम् पलंघनं। अधीरः अधीरो। अधनः अधणो।

ह replaces ख घ थ ध and भ generally.

(9) टो डो बहुलम्।

नटः णडो। विटपः विडवो।

ट is generally changed to ड।

(10) ठो ढः।

मठम् मढं। जठरम् जढरं। कठोरम् कढोरं। ठ is replaced by ढ ;

(11) हरिद्रादीनां रो लः।

हरिद्रा हलद्दा। चरणः चलणो। मुखरः मुहलो। करुणम् कलुणं।

ल replaces र in such words as हरिद्रा, चरण, &c...

(12) आदेर्यो जः।

यष्टिः जट्ठी। यशः जसो। यक्षः जक्खो।

The यकार in the beginning of a word is changed into जकार।

(13) कगचजतदपयवां प्रायो लोपोऽयुक्तानामनादौ।

मुकुलः मउलो। सागरः साअरो। नगरम् णअरं। वचनम् वअणं। सूची सूई। गजः गओ। रजतम् रअदं। कृतम् कअं। वितानम् विआणं। गदा गआ। मदः मओ। कपिः कइ। विपुलम् विउलं। वायुना वाउणा। नयनम् णअणं। जीवः जीओ। दिवसः दिअहो। अयुक्तानां किम्? शक्रः सक्को। मार्गः मग्गो।

The letters क, ग, च, ज, त, द, प, य, and व generally vanish if they be not at the beginning of a word or joined with other consonants.

(14) ऋत्वादिषु तो दः।

अयुक्तस्यानादौ च। ऋतुः उदू। आगतः आअदो। निर्वृतिः णिव्वुदि। हतः हदो। संयतः संजदो। संप्रति संपदि।

त is replaced by द generally if it be not joined with any other consonant or at the beginning of a word.

(15) पो वः।

तथा। शापः सावो॥ शपथः सवहो। उपसर्गः उवसग्गो।

पकार if अयुक्त and अनादि changes generally into वकार।

(16) मो विन्दुः।

अन्त्यस्य हलो मकारस्य विन्दुर्भवति। विन्दुरित्यस्यानुस्वार इत्यर्थः। भद्रम् भद्दं। वनम् वणं। धनम् धणं। इदञ्च प्राकृत एव। संस्कृते तु "मोऽनुस्वारः" (अष्टाध्यायी ८।३।२३) इति हलि एव। न जातु वाक्यान्तविरामे नाप्यचि। अतएव "एकाकी हयमारुह्य जगाम गहनं वन"मित्यादौ वाक्यान्तेऽनुस्वारस्थापनं न साधु। "वणं वारिसमूहं संगच्छ पुराणचारुदेहावासमित्यादौ (१३।१०) भट्टिभाषासमावेशेऽपि प्राकृत एव मो विन्दुः। संस्कृते त्वनुस्वारस्य प्रयोगः अपाणिनीयः।

अनुस्वार must be substituted for a final मकार। This is to be enforced in प्राकृत and not in *Sanskrit* where the मकार at विराम or preceding अच cannot be an अनुस्वार। No such rule is there in विमुनि।

(2) संयोगः। (On combination of letters.)

(17) लोपे द्वित्वम्।

संयोगवर्णस्य लोपे अवशिष्टस्य द्वित्वं स्यात् बहुलम्। The remaining consonant, when some vanishes from a combination, is generally doubled.

(18) उपरि लोपः कगडतदपषसाम्।

युक्तस्योपरिस्थितानां कादीनामष्टानां लोपः स्यात्। भक्तम् भत्तम्। सिक्थकः सित्थओ। मुग्धः मुद्धो। स्निग्धः सिणिद्धो। खड्गः खग्गो। षड्जः सज्जो। उत्पलम् उप्पलं। उत्पातः उप्पाओ। मुद्गः मुग्गो। मुद्गरः मुग्गरो। सुप्तः सुत्तो। पर्य्याप्तः पज्जत्तो। गोष्ठी गोट्ठी। निष्ठुरः निट्ठुरो। स्खलितम् खलिअं। केह्नः णेहो।

क, ग, ड, त, द, प, ष, and स, if followed by other consonants in संयोग (combination), vanish.

(19) अधो मनयाम्।

युक्तस्याधः स्थितानां मकारनकारयकाराणां लोपः स्यात्। सौम्यः सोम्मो। रश्मिः रस्सी। युग्मम् जुग्गं। नग्नः णग्गो। योग्यः जोग्गो। म, न or य if preceded by other consonants in combination, vanishes.

(20) सर्वत्र लवराम्।

युक्तानां लोपः। उल्का उक्का। वल्कलम् वक्कलं। विक्लवः विक्कवो। लुब्धकः लोद्धओ। शाद्वलः साद्दलो। अर्कः अक्को। शक्रः सक्को।

ल, व and र vanish if joined with other consonants.

(21) ष्टस्य ठो युक्तस्य बहुलम्।

दृष्टिः दिट्ठी। निष्ठुरः णिट्ठुरो।

ष्ट changes into ट्ठ generally.

(22) स्तस्य थः।

हस्तः हत्थो। समस्तः समत्थो। स्तुतिः थुई। स्तवकः थवओ। कौस्तुभः कोत्थुहो।

The तकार of स्त is changed to थ often.

(23) त्यथ्यद्यां चछजाः।

नित्यम् णिच्चं। प्रत्यक्षम् पच्चक्खं। रथ्या रच्छा। मिथ्या मिच्छा। पथ्यम् पच्छं। विद्या विज्जा। वैद्यः वेज्जो।

चछज replace त थ द of त्य थ्य द्य respectively.

(24) ध्यह्योर्झः।

मध्यम् मज्झं। अध्यायः अज्झाओ। बाह्यम् बज्झं। गुह्यकः गुज्झओ।

झ replaces ध and ह of ध्य and ह्य।

(25) ष्कस्कक्षां खः।

निष्कः णिक्खं। स्कन्धः खंधो। स्कन्दनम् खंदणं। क्षतः खदो। यक्षः जक्खो।

The क of ष्क, स्क and क्ष changes into ख।

(26) अक्ष्यादिषु छः।

अक्षि अच्छी। लक्ष्मीः लच्छी। कुक्षिः कुच्छी। क्षीरम् छीरं। इक्षुः उच्छू। मक्षिका मच्छिआ।

But क of क्ष changes into छ in such words as अक्षि, इक्षु, &c.

(27) ह्न-स्न-ष्ण-श्नां-ण्हः।

वह्निः वण्ही। स्नानम् ण्हाणं। प्रस्नुतम् पण्हुदं; विष्णुः विण्हू। कृष्णः कण्हो। श्लक्ष्णम् सण्हं। तीक्ष्णम् तिण्हम्। प्रश्नः पण्हो।

ण्ह replaces ह्न, स्न ष्ण, क्ष्ण and श्न।

(28) ष्पस्य फः।

पुष्पम् पुप्फं। शष्पम् सप्फं।

फ replaces प of ष्प।

(29) स्पस्य सर्व्वत्र स्थितस्य।

फ: स्यात् । स्पर्शः फंसो । स्पन्दनम् फंदणं ।

फ replaces प of स्प ।

(30) श्च त्स-प्सां छो बहुलम् ।

पश्चिमम् पच्छिमं । आश्चर्यम् अच्छरं । वत्सः वच्छो । वत्सरः वच्छरो । लिप्सा लिच्छा । जगुप्सा जगुच्छा ।

छ replaces generally श्च ; त्स and प्स ।

(31) न्मो म्मः ।

जन्म जम्म । मन्मथः मम्महो ।

न्म is replaced by म्म ।

(32) म्न-ज्ञ-पञ्चाशत्-पञ्चदशसु णः ।

प्रद्युम्नः पज्जुण्णो । यज्ञः जण्णो । विज्ञानम् विण्णाणं । पञ्चाशत् पण्णासा । पञ्चदश पण्णरहो ।

ण replaces म्न and ज्ञ and ञ्च in पञ्चाशत and पञ्चदशन् ।

(3) विभक्तिः । (On case-endings.)

(33) द्विवचनस्य बहुवचनम् ।

There is no dual number in प्राकृत, plural is used for it.

(34) चतुर्थ्याः षष्ठी ।

ब्राह्मणाय देहि बम्हणस्स देहि । ब्राह्मणेभ्यो देहि बम्हणाणं देहि ।

There is no चतुर्थी विभक्ति in प्राकृत, षष्ठी replaces it.

(35) अत ओः सोः पुंसि ।

गजः गओ । पुरुषः पुरिसो ।

The affix सु of the प्रथमा विभक्ति is changed to ओ in the masculine after अकारान्त words.

(36) भिसो हिं ।

पुरुषैः पुरिसेहिं ।

The affix भिस् (plural of तृतीया) is replaced by हिं after अकारान्त words.

(37) स्सो ङसः ।

पुरुषस्य पुरिसस्स ।

स्स replaces ङस् (singular of षष्ठी) ।

(4) प्रत्ययः। (On affixes).

(38) क्त ऊण।

त्वा प्रत्ययस्य ऊण आदेशः स्यात्। शुत्वा सोऊण। कृत्वा काऊण। दत्त्वा दाऊण।

The affix क्त्वा is replaced by ऊण।

(39) तल्त्वयोर्दात्तणौ।

तल्त्वप्रत्यययोः यथासंख्यं दा त्तण आदेशौ स्तः। पीनता पीणदा। पीनत्वम् पीणत्तणं। तथाहि।

"मतुप मतोरिल्ल—उल्ल—आल—आलु—इरा—मणाः।

वन्तो—मा-मन्त—इत्ताश्च यथालक्ष्यं दश स्मृताः।"

शोभावान् सोहिल्लो। विकारवान् वियारुल्लो। श्रद्धावान् सद्धालो। इत्यादि।

The affix तल् (ता) and त्व are respectively replaced by दा and त्तण। मतुप् is replaced by इल्ल, उल्ल, &c.......।

(40) प्राकृतञ्च महाराष्ट्री—शौरसेनी—मागधी—पैशाचीप्रभृतिभि र्भेदै र्बहुधा। तत्र पैशाचीमागध्योः प्रकृतिः शौरसेनी। महाराष्ट्रीशौरसेन्योः संस्कृतम्। तथाच—

संस्कृतं प्राकृतञ्चैवापभ्रंशोऽथ पिशाचिका।

मागधी शौरसेनी च षड् भाषा हि प्रकीर्त्तिताः॥'

तत्र शौरसेन्यां तकारस्य वा दकारः, पैशाच्यां णकारस्य नकारः, रैफस्य लकारः, ज्ञस्य-ञ्ञः, क्त्वाप्रत्ययस्य तूनं, मागध्यां षसोः शः, जोर्यः, क्त्वाप्रत्ययस्य दाणिं, हृदयशब्दस्य हडक्कं, ष्टस्य स्टः, र्यर्जयो र्य्यः, रैफस्य लकारश्चेत्येते आदेशाः विशेषाः।

There are different kinds of प्राकृत e. g. महाराष्ट्री, शौरसेनी, &c. ...मागधी and पैशाची have sprung from शौरसेनी। In मागधी there is neither ष, nor स। The प्राकृत with श is sometimes called शकारभाषा। Some differences of these are noted above.

V. ব্যাকরণ (GRAMMAR.)

ভারতীয় শাস্ত্র সকলই ঋষিপ্রোক্ত। নচেৎ উহাদের প্রামাণ্য সর্ব্ববাদিসম্মত হয় না। লোকের বিশ্বাস ঋষিগণ দিব্যজ্ঞান এবং ভূতভবিষ্যদাদি বিষয়ে প্রত্যক্ষদর্শী।

"আবির্ভূতপ্রকাশানামনুপপ্লুতচেতসাম্।
অতীতানাগতজ্ঞানং প্রত্যক্ষান্ন বিশিষ্যতে॥
অতীন্দ্রিয়ানসংবেদ্যান্ পশ্যন্ত্যার্ষেণ চক্ষুষা।
যে ভাবান্ বচনং তেষাং নানুমানেন বাধ্যতে॥

(বাক্যপদীয় ভর্তৃহরিকৃত।)

অতএব তাঁহাদের বাক্য শাস্ত্ররূপে পরিগণিত হইয়াছে। এদেশের শব্দানুশাসন বা ব্যাকরণশাস্ত্রও ঋষিপ্রণীত। এখন পাণিনিপ্রণীত শব্দানুশাসন ব্যতীত অন্যান্য ঋষিদের ব্যাকরণ লুপ্ত হইয়াছে। পাণিনি নিজেই শাকল্য, কাশ্যপ, শাকটায়ন, আপিশলি, স্ফোটায়ন, চাক্রবর্মণ, গালব, ভারদ্বাজ, গার্গ্য ও সেনকের নাম করিয়াছেন। গণপাঠে তৌল্বল্যাদিগণে (২।৪।৬১) পৌষ্করসাদি, উপকাদিতে (২।৪।৬৯) কাশকৃৎস্ন, ঐষুকার্য্যাদিতে (৪।২।৫৪) দাক্ষায়ণ এবং ক্রৌড্যাদি (৪।১।৮০) গহাদি (৮।২।৬৬) ও ছাত্র্যাদিতে (৬।২।৪৮) ব্যাড়ি বৈয়াকরণের নাম আছে। পাণিনি ব্যাকরণের বার্ত্তিককার কাত্যায়ন, বাজপ্যায়ন, ব্যাড়ি ও পৌষ্করসাদির নাম করেন। পতঞ্জলির মহাভাষ্যে দাক্ষায়ণ বার্ধায়ণি, কাশকৃৎস্ন, কুণরবাড়ব, সৌনাগ, সৌর্য্যবান্, ক্রোষ্টীয়, গোনর্দ্দীয় ও গোণিকাপুত্রের উল্লেখ দৃষ্ট হয়। বোপদেব আটজন শাব্দিকের নাম করিয়াছেন—

"ইন্দ্রশ্চন্দ্রঃ কাশকৃৎস্নাপিশলী শাকটায়নঃ।
পাণিন্যমরজৈনেন্দ্রা জয়ন্ত্যষ্টাদিশাব্দিকাঃ॥

পাণিনির রচিত ব্যাকরণসূত্র অষ্টক বা অষ্টাধ্যায়ী নামে কথিত। কাত্যায়ন ইহার একজন বিবরণকার পতঞ্জলিকৃত উপহাস "প্রিয়তদ্ধিতা দাক্ষিণাত্যাঃ" হইতে অনুমিত হয় ইনি একজন দাক্ষিণাত্য। পতঞ্জলি এই গ্রন্থের ভাষ্য করেন। উহাই মহাভাষ্য নামে পরিচিত। ইহাতে কাত্যায়ননির্দ্দিষ্ট দূষণসমূহের বহুস্থলে নিরাকরণ ও পাণিনিমতের সমর্থন করা হইয়াছে। অনেকের মতে পতঞ্জলির নিবাস গোনর্দ্দ দেশে। গোণিকা ইঁহার মাতার নাম এবং গোনর্দ্দীয়ও ইঁহারই নামান্তর। অসামান্যপ্রবক্তৃত্ব হেতু ইঁহাকে সহস্রমুখ অনন্ত বা শেষ নাগের অবতার কল্পনা করা হইয়াছে। এইজন্য মহাভাষ্যকে ফণিভাষ্যও বলে। মতান্তরবাদীদের বাক্য "অত্র ভাষ্যায়িতঃ ফণী"—নৈষধীয় শ্লোক "পরিখাবলয়চ্ছলেন যা ন পরেষাং গ্রহণস্য গোচরঃ। ফণিভাষিতভাষ্যফক্কিকা বিষমা কুণ্ডলনামবাপিতা" প্রভৃতিই উহার প্রমাণ।

পাণিনিবিরচিত সূত্রপাঠ, ধাতুপাঠ, গণপাঠ ও লিঙ্গানুশাসন, কাত্যায়নের সংক্ষিপ্ত বিবরণ, বাক্য বা বার্ত্তিক ও পতঞ্জলির মহাভাষ্য একত্র ত্রিমুনি ব্যাকরণ নামে খ্যাত এবং এইরূপ ব্যাকরণের মূল বা তদ্বিষয়ক আকরগ্রন্থ।

"যদ্বিস্মৃতমদৃষ্টং বা সূত্রকারেণ তৎ স্ফুটম্॥"
বাক্যকারো ব্রবীত্যেবং তেনাদৃষ্টঞ্চ ভাষ্যকৃৎ॥"

(হরদত্ত মিশ্রের পদমঞ্জরী)

বিশেষতঃ "यथोत्तरं मुनीनां प्रामाण्यम्" স্বীকৃতি অনুসারে সূত্রকার ও বার্ত্তিক-কারের মতভেদস্থলে পরবর্ত্তী মুনি বার্ত্তিককারের এবং উক্ত উভয়ের বা একতরের সহিত ভাষ্যকারের বিরোধস্থলে ভাষ্যকারের ব্যবস্থাই বলীয়সী। এই ত্রিমুনি বাক্যের সহিত অন্যের ব্যবস্থার বিরোধ ঘটিলে উহা "অপাণিনীয়" বলিয়া উপেক্ষিত হয়। বস্তুতঃ ঋষিবাক্যব্যতীত পাণিনি-কাত্যায়ন-পতঞ্জলি-ব্যবস্থাবিরুদ্ধ প্রয়োগ অপশব্দ। কৈয়টকৃত মহাভাষ্যটীকাতে দেখা যায়—"यत्तु कैश्चिदभ्यधायि अमनुष्यग्रहणेन नाप्राप्तिरिति तदयुक्तम्। नहि भाष्यकारवार्त्तिककाराभ्यामभियुक्ततरः शब्दविषये कश्चिदस्ति।" (৪।২।১০০ সূত্রভাষ্যপ্রদীপ)। আবার ২।৪।২৬ সূত্রভাষ্য ব্যাখ্যায় বলা হইয়াছে "मुनित्रयाच्च भाष्यकारः प्रमाणतरमधिकलक्ष्यदर्शित्वात्।" পুনশ্চ ৫।২।২১ সূত্রভাষ্য-বিবরণে "आपिशलिकाशकृत्स्नयोस्त्वन्ये इति वचनादप्यत्र प्रतिषेधाभावः। नियत-कालाश्च स्मृतयो व्यवस्थाहेतव इति मुनित्रयमतेनाद्यत्वे साध्वसाधुप्रविभागः।" ভট্টোজি দীক্ষিত তাঁহার শব্দকৌস্তভে ১।১।২৭ সূত্রব্যাখ্যায় মাঘের ১২।১৩ শ্লোকে "व्यथा द्वयेषामपि मेदिनीभृताम्" স্থলে "द्वयेषाम्" পদের সর্ব্বনামতা বিচারে বলেন "यत्तु कश्चिदाह चान्द्रवर्मणव्याकरणे द्वयशब्दस्यापि सर्वनामताभ्युपगमात् तद्रीत्यायं प्रयोगः। तदपि न। मुनित्रयमतेनेदानीं साध्वसाधुविभागः। तस्यैवेदानीन्तनशिष्टैर्वेदाङ्गतया परिगृहीतत्वात्। इत्थञ्च हि नियतकालाः स्मृतयः। यथा कलौ पाराशरी स्मृतिः।" আবার প্রৌঢ়মনোরমায় যঙ্লুক্প্রক্রিয়াব্যাখ্যানে বলেন "यत्तु-प्राचीनं धातुग्रहणोक्तं यङ्लुकि वेति केचिदिति नैतत् त्रिमुनिमतमित्युपेक्षितम्। अर्वाचीनमतानामेषैव गतिः। किं बहुना काशकृत्स्नादिमतानामपि मुनित्रयविरोधे इदानीमग्राह्यत्वमेव। एतच्च कैयटहरदत्तादिग्रन्थे स्पष्टम्। मुनित्रयमध्येऽपि यथोत्तरं प्रामाण्यमाश्रित्य भाष्यानुरोधेनैव व्यवस्थेति तत्त्वम्। एतच्च भर्तृहरि-कैयट-हरदत्तादि-सकल-सम्मतम्। अतोऽर्वाचीनं यत् किञ्चिद्वचनं पुरस्कृत्यानेकरूपोत्प्रेक्षया मनो न खेदनीयम्।"

পাণিনি ব্যাকরণের সম্মান নূতন নহে। স্বয়ং পতঞ্জলি ৬।১।৭৭ সূত্রভাষ্যে বলিয়াছেন—

"नित्ये च यः शाकलभाक् समासे
तदर्थमेतद् भगवांश्चकार।
सामर्थ्ययोगान्नहि किञ्चिदस्मिन्
पश्यामि शास्त्रे यदनर्थकं स्यात्॥"

আবার ১।১।১ সূত্রভাষ্যে "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख मुपविश्य महता यत्नेन सूत्रं प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्। न पुनः साध्वनुशासनेऽस्मिन् शास्त्रेऽसाधुत्वमनेन क्रियते।" এই প্রাঙ্মুখোপবেশনাদি ভাষ্যকারের স্বমতিপরিকল্পনা নহে। এরূপ যাহাতে কাহারও আশঙ্কা না হয় এইজন্য

কৈয়ট টীকা করিতেছেন "এতচ্চ সর্ব্বমাগমাৎ।" পুনশ্চ "প্রমাদকৃতমাচার্য্যস্য শক্যমকর্ত্তুম্" (৪।১।৭০)। এই জন্যই নাগেশ ভট্ট মতে "অসত্ত্বাদমিত্যত্র নকার-প্রত্যাখ্যানপরং ভাষ্যং তু, কিমষ্টাপত্ত্যর্থমর্থং তদুচ্চারণম্ ? তৎ ইষ্টার্থমধীত্য ব বিচারপরম্। সর্বত্র প্রত্যাখ্যানমিষ্টপরমেব। অন্যথাঙ্গানামপি পারায়ণে ধর্ম্ম-স্মরণান নবতর পাণিনিন্যাসপ্রত্যাখ্যানন্যায়সঙ্গতিঃ স্যাৎ। কিঞ্চিদ্বিষ্টাদ্বিষ্টার্থ-বৎ। কিঞ্চিচ্চতুরাদ্বিষ্টার্থবৎ। সর্ব্বথানর্থকং ন কিঞ্চিৎ। (শব্দেন্দুশেখর)। এখন পাণিনিশাস্ত্রই ব্যাকরণরূপ অন্যতম বেদাঙ্গ। পাণিনিসূত্রপারায়ণেও পুণ্যঘটে, পূর্ব্বতন ব্রাহ্মণদের এই বিশ্বাস প্রবল ছিল। শুনা যায়, কাশিকা, ন্যাস প্রভৃতি বৌদ্ধ বা জৈন গ্রন্থে বহু স্থলে সূত্রভঙ্গদ্বারা বিকৃতি ঘটাতে ব্রাহ্মণেরা উহার যথারীতি অধ্যয়ন বা অধ্যাপনা করিতেন না। কাশিকাগ্রন্থের হিন্দুমতে হরদত্তমিশ্র কর্ত্তৃক পদ-মঞ্জরী টীকা বিরচিত হইলে এই আপত্তি কিয়ৎপরিমাণে দূরীভূত হয়। বস্তুতঃ পাণিনি ব্যাকরণের এই সর্ব্বোপরি প্রামাণ্যহেতুই সাহিত্য, অলঙ্কার, স্মৃতি, জ্যোতিষ, দর্শন প্রভৃতি শাস্ত্রে শব্দার্থবিষয়ক তর্কনির্ণয়ে প্রধানতঃ উহার ব্যবস্থা আশ্রিত হইয়াছে।

কাত্যায়ন, দাক্ষায়ণ, ব্যাড়ি, কুণি প্রভৃতি আচার্য্যেরা পাণিনি ব্যাকরণের টীকা করেন। শাস্ত্রকারদিগকে আচার্য্য বলা হইত। কতকগুলি অনিট্কারিকা ব্যাঘ্রভূতি নামক বৈয়াকরণের রচিত। কাশিকাতে পদশেষকার, মাধ্যন্দিনি, বৈয়াঘ্রপদ্য (৭।১।৯৪) আচার্য্যের নাম আছে। কৈয়ট ও হরদত্ত, কুণি নামক বৈয়াকরণের উল্লেখ করিয়াছেন। সায়নমাধব ও ভট্টোজির গ্রন্থে ভাগুরি ও ভীমসেনের নাম পাওয়া যায়। ধাতুপাঠে "ভূ সত্তায়াম্" প্রভৃতি অর্থনির্দ্দেশ ভীমসেনকৃত। পতঞ্জলি মহাভাষ্যের প্রারম্ভভাগ পস্পশাতে সংগ্রহ নামক গ্রন্থের মতে বহুস্থলে উল্লেখ করিয়াছেন আবার ২।৩।৬৬ সূত্রস্থিতবার্ত্তিকের "শোভনা খলু দাক্ষায়ণস্য সংগ্রহস্য কৃতিঃ।" উদাহরণ দিয়াছেন। বাক্যপদীয়কার ভর্ত্তৃহরি ব্যাড়িকেই সংগ্রহের রচয়িতা বলেন।

(১) মূলগ্রন্থ অষ্টাধ্যায়ী, বার্ত্তিক ও মহাভাষ্য।

(ক) মহাভাষ্যের টীকাকার ভর্ত্তৃহরি। ইঁহার অপর গ্রন্থের নাম বাক্যপদীয়। শ্রীভূতিরাজপুত্র হেলারাজ বাক্যপদীয়ের টীকাকার। গ্রন্থ প্রকীর্ণপ্রকাশ।

(খ) মহাভাষ্যের অপর টীকা মহাভাষ্যপ্রদীপ। রচয়িতা উপাধ্যায় জৈয়টপুত্র কৈয়ট। বা কৈয্যট। ইহার টীকাকার নাগেশ বা নাগোজি ভট্ট। গ্রন্থ ভাষ্য-প্রদীপোদ্দ্যোত। উদ্দ্যোতের ব্যাখ্যা প্রভা। গ্রন্থকার নাগেশের ছাত্র বৈদ্যনাথ পায়গুণ্ড। ভাষ্যপ্রদীপের অন্য ব্যাখ্যা ভাষ্যপ্রদীপবিবরণ। রচয়িতা ঈশ্বরানন্দ।

(গ) মহাভাষ্যের অন্য টীকা সূক্তিরত্নাকর। গ্রন্থকার শেষনারায়ণ।

(২) অষ্টাধ্যায়ীর প্রাচীন টীকা ভাগবৃত্তি। কর্ত্তা ভর্ত্তৃহরি।

(৩) অষ্টাধ্যায়ীর অন্য টীকা কাশিকা বৃত্তি। রচয়িতা বামন ও জয়াদিত্য নামক বৌদ্ধদ্বয়।

(ক) কাশিকার টীকা কাশিকাবিবরণপঞ্জিকা বা পঞ্জিকা। গ্রন্থকার বৌদ্ধ। নাম জিনেন্দ্রবুদ্ধি, জিনেন্দ্রবুদ্ধ বা জিনেন্দ্র। এই গ্রন্থের অন্য নাম ন্যাস। ইহার টীকার নাম ন্যাসোদ্যোত এবং অনুন্যাস।

(খ) কাশিকার অন্য টীকা পদমঞ্জরী। রচয়িতা হিন্দু। নাম হরদত্ত মিশ্র।

(গ) কাশিকা ও ন্যাসের টীকা তন্ত্রপ্রদীপ (বা বৃত্তিপ্রদীপ)। রচয়িতা মৈত্রেয় রক্ষিত। ইহার অন্য গ্রন্থ ধাতুপ্রদীপ।

(৪) মূলের অন্য টীকা ভাষাবৃত্তি। গ্রন্থকার পুরুষোত্তম দেব। টীকা ভাষাবৃত্ত্যর্থ-বিবৃতি। গ্রন্থকার সৃষ্টিধর।

(৫) অষ্টাধ্যায়ীর অন্য টীকা শব্দকৌস্তুভ। রচয়িতা ভট্টোজি দীক্ষিত। গ্রন্থ সম্পূর্ণ না হইতে ভট্টোজির মৃত্যু হয়। তৃতীয় অধ্যায়ের দ্বিতীয় পাদপর্য্যন্ত সম্প্রতি মুদ্রিত হইয়াছে। চতুর্থ পাদ পর্য্যন্ত পাওয়া যায়। টীকার নাম প্রভা। গ্রন্থকার বৈদ্যনাথ পায়গুণ্ড।

(৬) বৃত্তি সংগ্রহ। মূলের ব্যাখ্যা। নাগেশ-ছাত্র-রামচন্দ্র কৃত।

(৭) বৈয়াকরণসর্ব্বস্ব। মূলের ব্যাখ্যা। গ্রন্থকার ধরণীধর কাশীনাথ নামক দুই পণ্ডিত। ১৭৩১ শকে (১৮০৯ খ্রীষ্টাব্দে) কোলব্রুক সাহেবের অনুমতিতে বিরচিত।

(৮) ১৮৪২ খ্রীষ্টাব্দে বোথলিঙ্ক সাহেব দুইজন ভারতীয় পণ্ডিত দ্বারা অষ্টাধ্যায়ীর এক টীকা করাইয়াছেন। কিন্তু উহা কাশিকার বিকৃতি মাত্র।

(৯) প্রক্রিয়াকৌমুদী। অষ্টাধ্যায়ীর ব্যাখ্যা। কিন্তু ইহাতে প্রকরণানুসারে অপেক্ষিত স্থানে সূত্র উদ্ধারপূর্ব্বক ব্যাখ্যাত হইয়াছে। সূত্রকারনিবদ্ধ শ্রেণী রক্ষিত হয় নাই। রচয়িতা রামচন্দ্রাচার্য্য। টীকার নাম প্রসাদ। গ্রন্থকার রামচন্দ্রের পৌত্র বিট্ঠল। অন্য টীকার প্রক্রিয়াপ্রকাশ রচয়িতা শেষ নৃসিংহ সূরির পুত্র শেষকৃষ্ণ। ইনি ভট্টোজির গুরু এবং বারাণসীবাসী ছিলেন। অন্য টীকার নাম তত্ত্বচন্দ্র। এই গ্রন্থকারও শেষকৃষ্ণের ছাত্র, নাম জয়ন্ত। তাপ্তীতীরস্থ প্রকাশপুরীনিবাসী মধুসূদন মিশ্রের পুত্র। তত্ত্বচন্দ্র ১৬৩১ খ্রীষ্টাব্দে রচিত হয়। ভট্টোজিগ্রন্থে এই রামচন্দ্রাচার্য্যই "প্রাচা" "প্রাঞ্চঃ" ইত্যাদি নামে উল্লিখিত হইয়াছেন।

(১০) অষ্টাধ্যায়ীর অপর ব্যাখ্যা বিশ্ববিখ্যাত বৈয়াকরণসিদ্ধান্তকৌমুদী বা সিদ্ধান্ত-কৌমুদী। প্রক্রিয়াকৌমুদীর ন্যায় ইহাতেও বিপর্য্যস্তভাবে মূলের সূত্র উদ্ধৃত হইয়াছে। টীকা প্রৌঢ়মনোরমা। উভয়েরই রচয়িতা ভট্টোজি দীক্ষিত। প্রৌঢ়মনোরমার টীকা

শব্দরত্ন। টীকাকার ভট্টোজির পৌত্র হরিদীক্ষিত। মতান্তরে হরিদীক্ষিতের ছাত্র নাগোজিভট্ট। প্রৌঢ় মনোরমার অন্য টীকা ভাবপ্রকাশ। টীকাকার বৈদ্যনাথ পায়গুণ্ড। শব্দরত্নের টীকা ভৈরবী। রচয়িতা ভৈরব মিশ্র। সিদ্ধান্তকৌমুদীর অন্য টীকা শব্দেন্দু-শেখর। গ্রন্থকার হরিদীক্ষিতের ছাত্র নাগেশ বা নাগোজিভট্ট। শব্দেন্দুশেখরের টীকা চিদস্থিমালা। টীকাকার বৈদ্যনাথ পায়গুণ্ড। সিদ্ধান্তকৌমুদীর অন্য টীকা তত্ত্ববোধিনী। রচয়িতা বামনেন্দ্রস্বামিচ্ছাত্র জ্ঞানেন্দ্রভিক্ষু বা জ্ঞানেন্দ্রসরস্বতী। সিদ্ধান্তকৌমুদীর অন্য টীকা রত্নাকরী, রচয়িতা রত্নাকর মিশ্র। প্রৌঢমনোরমার সমালোচনা মনোরমাকুচ-মর্দ্দন। গ্রন্থকার জগন্নাথ পণ্ডিতরাজ।

(১১) সিদ্ধান্তকৌমুদীর সারাংশ মধ্যকৌমুদী ও লঘুকৌমুদী। গ্রন্থকার ভট্টোজির ছাত্র বরদরাজ।

(১২) পাণিনির পূর্ব্ববর্ত্তী মুনিগণের অনেক সূত্র পরিভাষা রূপে এখনও প্রচলিত। উঁহাদের যে গুলিকে ভাষ্যকার গ্রহণ করিয়াছেন তাহাই পাণিনীয়ে গ্রাহ্য হয়। উক্ত পরিভাষা সমূহের ব্যাখ্যাগ্রন্থ পরিভাষাবৃত্তি। গ্রন্থকার সীরদেব। অন্য ব্যাখ্যা পরি-ভাষেন্দুশেখর। রচয়িতা নাগেশ ভট্ট। অন্য ব্যাখ্যা ললিতপরিভাষা। কর্ত্তা পুরুষোত্তমদেব।

(১৩) ধাতুপাঠের ব্যাখ্যাকার ক্ষীরস্বামী। গ্রন্থ ক্ষীরতরঙ্গিনী। অন্যব্যাখ্যাকার মৈত্রেয় রক্ষিত। গ্রন্থ ধাতুপ্রদীপ। অন্য ব্যাখ্যাকার বেদভাষ্যকার সায়নাচার্য্য। গ্রন্থের নাম মাধবীয়ধাতুবৃত্তি। এই গ্রন্থের সম্বন্ধে ইনি মাধব নামে সাধারণতঃ উল্লিখিত হয়েন। এক সময়ে বোপদেব গোস্বামীর মুগ্ধবোধ ব্যাকরণ সর্ব্বত্র প্রচলিত হইয়া বামনের কাশিকা প্রায় লোপ করিয়াছিল। মাধবাচার্য্যের ধাতুবৃত্তি প্রকাশে আবার কাশিকার প্রচলন সংস্থাপিত হয়। এই জন্যই কিংবদন্তী

"বোপদেব-মহাগ্রাহগ্রস্তো বামন-দিগ্গজঃ।
কীর্ত্তেরেব প্রসঙ্গেন মাধবেন প্রমোচিতঃ॥"

(১৪) দুর্ঘট বৃত্তিতে (শরণ দেব কৃত) অভিযুক্তপ্রয়োগ ও কাব্য নাটকাদির আপাততঃ প্রতীয়মান অপশব্দ সমূহের ত্রিমুনি মতে যথাসম্ভব সাধুতা প্রদর্শন।

(১৫) ঔণাদিক শব্দ "উণাদয়ো বহুলম্" সূত্রদ্বারা সমর্থিত হইয়াছে। ভাষ্যে পঠিত "নাম চ ধাতুজমাহ নিরুক্তে ব্যাকরণে শকটস্য চ তোকম্।" শ্লোকার্দ্ধ হইতে

নাগেশের মতে—"এবঞ্চ কৃবাপাজিমিস্বদিসাধ্যশূভ্য উণাদিসূত্রাণি শাকটায়নস্যেতি সূচিতম্। (ভাষ্যপ্রদীপোদ্দ্যোত)। শাকটায়ন উণাদিসূত্রের প্রণেতা। তৎপর বাক্যকার কাত্যায়ন উহার উদ্ধার করেন। উজ্জ্বলদত্ত উণাদিসূত্রের টীকাকার। ইহার আর এক নাম জাজলি। অন্য টীকাকার পুরুষোত্তমদেব। গ্রন্থ পুরুষোত্তমবৃত্তি।

(১৬) গণপাঠের ব্যাখ্যা গণরত্নমহোদধি। টীকাকার বর্ধমান মিশ্র। এতদ্ভিন্ন মাধবাদির গ্রন্থে আত্রেয়, ধনপাল, সুধাকর, কেশবস্বামী, রামবেদ শাস্ত্রী প্রভৃতি গ্রন্থকারের এবং শাব্দিকাভরণ, সম্মতা, প্রভৃতি গ্রন্থের নাম পাওয়া যায়।

(17) উদাত্তাদিস্বরবিধায়ক সূত্রসমূহ শান্তনবনামক বৈয়াকরণকর্তৃক প্রণীত। তদ্ব্যতীত অষ্টাধ্যায়ীতে—বিশেষতঃ প্রথম, ষষ্ঠ ও অষ্টমাধ্যায়ের বহু সূত্রে স্বরব্যবস্থা আছে। শান্তনবের সূত্রগুলিকে ফিট্ সূত্র বলে। ফিস্ শব্দের অর্থ প্রাতিপদিক।

VI. MISCELLANEOUS NOTES.

(i) Geography.

Batsha—(वत्स) is the mame of a province—"अस्ति वत्स इति ख्यातो देशः...। कौशाम्बी नाम तत्रास्ति मध्यभागे महापुरी।" (कथासरित्सागर) It was near Modern Allahabad. Its capital *Kousambi* occurs in *Panini's* नद्यादिगण (४।२।९०) and also in the महाभाष्य (२।२।१८)—It was near the junction of the Ganges and the Jamuna and is indentified with the modern place *Kassam* or *Karra*. उज्जयिनी is Ujjein, कोशल Oude, सिंहल Ceylon. This name सिंहल occurs in श्रीमद्भागवत, महाभारत, also in some ancient works on Astronomy. *Lavanaka* (लावणक, लावाणक वा लावणिक) as mentioned in the कथासरित्सागर, was a district near *Maghadha* or Modern Behar. But no particular place can now be traced in the Map for *Lavanaka*. It was not so renowned. The poet used लावाणकेन वह्निना applying दह् to

सावाचक in सामान्य विवचा and did not apply to ह्रस्वादकेकान्त खोपधात (४।१।१४१)। श्रीपर्वत, also called श्रीशैल *i.e.* the mountain of श्री, was a locality near the river *Krisna* in the Deccan It contained a temple with an image of *Siva*, being one of the twelve celebrated ज्योतिर्लिङ्ग of the aforesaid god. The others were सोमनाथ in *Patan* (Goozrat), महाकाल in उज्जयिनी, विश्वेश्वर in Benares, ओङ्कारनाथ in अव्वलपुर, &c....

(ii) Geneaology—

The Genelagy of Udayan is thus given in the कथासरित्सागर — पाण्डु-अर्जुन-अभिमन्यु-परीक्षित्-जनमेजय-शतानीक-सहस्रानीक-उदयन agreeing with the chamberlain's statement in Act IV. "भरतकुलं संशयतुलामारोपितम्।"

(iii) The God of love.

मदनस्य पञ्च बाणा स्ते च पौष्पाः इति कविसमयः। तथाहि—"मौर्वी रोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतोर् भिन्नं स्यादस्य बाणैर्युवजनहृदयं स्त्रीकटाक्षेण तद्वदिति साहित्यदर्पणः। ते हि—"अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः" इति। केचित्त्वन्यथा वदन्ति—"अरविन्दमशोकञ्च शिरीषं नीलमुत्पलम्। चूतश्चेति प्रकीर्त्यन्ते पञ्चबाणस्य सायकाः।" क्रियाविशेषजननेन च तेषां नामान्तराणि—"उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा। सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्त्तिताः॥" "सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा। स्तम्भनश्चेति कामस्य पञ्चबाणाः प्रकीर्त्तिताः इति पाठान्तरम्।

(iv) Music.

पौराणामुच्चरति चर्चरीध्वनिः—अत्र (१) चर्चरी करशब्द इति केचित्। (२) गीतिविशेष इत्यन्ये। तथाचोक्तम् "द्रुतमध्यलयं समाश्रिता पठति प्रेमभराग्नटी यदि। प्रतिखण्डमपूरकेण वा द्रुतमध्यप्रकृता हि चर्चरी॥" इति। लयः साम्यमित्यमरः। स च त्रिविधः। "द्रुतमध्यौ विलम्बश्च लयो हि त्रिविधो मतः।"

दक्षिणात्यमिश्रास्तु पश्चार्द्धं प्रतिमल्लकरासकेषु वा द्रुतमध्या प्रथमा हि चर्चरीति पठित्वा तत्र "सोमी वा प्रतिमल्लक:। लघ्वादितालो लोकेऽसौ रास इत्यभिधीयत इति व्याचक्षते। (२) चर्चरी तालविशेष इत्येके। तथाच भरत:—विरामान्त-द्रुतद्वन्द्वं लघुन्यष्टौ च चर्चरी" ति। The term चर्चरी is differently explained :—(1) clapping noise, (2) a kind of song, (3) a musical time or measure. In the dancing scene in Act I, the jester's request to be instructed with the maids' songs erroneously supposed by him to be a चर्चरी, makes the first meaning doubtful here. According to the second sense, it is a strain sung by a female (or a chorus), under the influence of passion, in a tone either low, middle or high (or low or middle only with the chorus.)

(v) "मन्ये वदति सारिका—(Act II)

काव्येषु बहुशो हि शुकादीनामनुवादवर्णना दृश्यते—तथाहि—"चयमपि च गिरं न स्तत्प्रबोधप्रयुक्ता मनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थ" इति रघौ। "दम्पत्यो र्निशिजल्पतो र्गृहशुकेनाकर्णितं यद्वच: प्रातस्तद् गुरुसन्निधौ निगदतस्तस्यो-पहारं वधू:। कर्णालङ्कृतिपद्मरागशकलं विन्यस्य चञ्चूपुटे व्रीडार्त्ता प्रकरोति दाड़िमफलव्याजेन वाग्बन्धनम्॥' इत्यमरु:। "राधे मन्युं परिहर हरि: पादमूले तवायं जातं दैवादसदृशमिदं वारमेकं क्षमस्व। एतानाकर्णयसि नयवन् कुञ्जकी-रानुवादान् एभि: क्रूरैर्वयमविरतं वञ्चिता वञ्चिता: स्म:॥' इत्युद्भवदूते। The description of the talking of a parrot or starling, is found often in Sanskrit poems.

VII. नाटकीय वस्तु (Plot).

प्रथमाङ्के—वत्सराजमन्त्री यौगन्धरायण:, दैवानुकूल्यमनुसरन् समुद्रे यानभङ्गेन निमज्जनात् मुक्ताया: कौशाम्बीयेन वणिजा समानीताया रत्नावल्या देवीहस्ते प्रदानं

वर्णयन् प्रभोरज्ञातत्वेन स्वकर्मणि आत्मन आशङ्कां सूचयति। मदनमहोत्सवप्रवृत्तं राजानमागच्छन्तं दृष्ट्वा गृहं गच्छति च। ततः कामोत्सवरतयोः परिचारिकयोर् विदूषकस्य च नर्त्तनम्। राजा च कन्दर्पपूजादर्शनाय मकरन्दोद्यानं प्रविशति। तत्रानङ्गपूजा सागरिकाख्याया रत्नावल्या राज्ञो दर्शनञ्च। अथ वैतालिकस्तुतिं निशम्य नृपः सायन्तनं चन्द्रं वर्णयति।

द्वितीयाङ्के—सागरिकायाः कामसन्तापः। तद्विनोदाय राजप्रतिकृतेरङ्कनम्। तस्मिंश्चित्रपटे सागरिका च तस्याः सख्या चित्रिता। अथ मन्दुराभ्रष्टवानरत्रासेन पलायमानायां तस्यां नवमालिकासन्दर्शनकामो नृपः सविदूषकस्तत्रागच्छति। तत्र सारिकामुखेण सागरिकाविरहजल्पनं श्रुतवता तेन चित्रफलकस्य लाभः। सुसङ्गतया सागरिकासम्भाषणार्थमानीतेन सागरिका करेण गृहीता च। अस्मिन्नेव क्षणे आयान्त्या वासवदत्तायाः फलकदर्शनेन राज्ञः अङ्गनान्तरानुरागस्य प्रतीतिः। शिरःपीड़ाच्छलेनान्यत्र प्रस्थितिश्च।

तृतीयाङ्के—विदूषकेण सागरिकया सह नृपस्य सङ्गनमिच्छता भ्रमेण तत्समीपं वासवदत्ता आनीता। राजा तां सागरिकां मत्वा तत्प्रणययाच्ञया चात्मानुरागं प्रकटयति। अपनीतावगुण्ठना राज्ञी च तदान्यसंक्रान्तहृदयं नृपमप्रतिभं कृत्वा प्रतिष्ठते। ततः प्रविष्टा लतिकया कण्ठमुद्बध्य प्राणांस्त्यक्तुमुपक्रममाणा सागरिका राज्ञा निवारिता। पुनरपि वासवदत्ता राजानमनुनेतुमागच्छन्ती सागरिकां सप्रणयं व्याहरन्तं दृष्ट्वा क्रोधेन विदूषकमाबध्य सागरिकाञ्च गृहीत्वा स्वभवनं गता।

चतुर्थाङ्के—सागरिका उज्जयिनीं प्रेषितेति श्रवणेन राज्ञः परितापः। ततः सेनापतिभागिनेयेन विजयवर्मणा कोशला जिता तन्नृपश्च रणे हत इति राज्ञे कथितम्। अथ कश्चिदैन्द्रजालिक आगत्य बहुविधमद्भुतञ्च वस्तु दर्शयति। ततः कञ्चुकी सिंहलमन्त्रिणा वसुभूतिना सहागच्छति। वासवदत्ताया मातुलस्य सिंहलराजस्य कन्या समुद्रे यानभङ्गेन निपतितेति वसुभूतिना कथितम्। अन्तःपुरमग्निना दह्यत इति सहसा जनानां कलकलः। तत्र राज्ञः प्रवेशः। निगड़संयता सागरिका च तेन परित्राता यदा वसुभूतिना दृष्टा तदा सैव सिंहलनृपतनया रत्नावलीति परिज्ञाता। वासवदत्तया सा नृपाय दत्ता। तेन च परिणीता।

"The first scene introduces a curious description of the sports and practical jokes practised at the spring festival. *Sagarika*, otherwise called *Ratnavali* from her jewel-necklace, a princess of Ceylon, is accidentally brought to the king's court, falls in love with him and paints his picture. The king is, of course, equally struck with her. His queen's jealousy is excited by the discovery of the picture. She even succeeds in imprisoning *Sagarika* and putting fetters on her feet, and more than ordinary impediments threaten to stop the progress of the love affair. All difficulties however are eventually removed and the play ends, as usual, by the King's conciliating his first wife and gaining a second."—Monier William's Indian wisdoms.

VIII. नाटकीय पात्राणि Dramatic Persons.

पुरुषाः = **Men.**

उदयनः = राजा = वत्सराजः = The king of *Batsha.*

यौगन्धरायणः = मन्त्री = The Prime Minister.

वसन्तकः = विदूषकः = The jester.

वसुभूतिः = सिंहलराजमन्त्री = The minister to the king of Ceylon as an ambassador to *Udayana.*

बाभ्रव्यः = कञ्चुकी = *Udayana's* chamberlain sent as an envoy to the court of the king of Ceylon.

संवरसिद्धिः = ऐन्द्रजालिकः = A magician.

विजयवर्म्मा = सेनापतिभागिनेयः = An officer in the king's army, nephew to his general *Roomanwat.*

सूत्रधारः = The stage manager.

स्त्रियः = Women.

वासवदत्ता = राज्ञी = उदयनस्य पत्नी = = अवन्तिनाथस्योज्जयिनीराजस्य प्रद्योतस्य कन्या = The queen of *Batsha*, daughter to *Prodyota* king of *Ujjein* the capital of *Abanti*.

रत्नावली सा च सागरिका = सिंहलराजकन्या उदयनस्य द्वितीया भार्य्या = A princess of Ceylon, second wife of *Udayan*.

काञ्चनमाला = वासवदत्ताया दासी = A maid-servant to the queen.

सुसङ्गता = राज्ञ्याः परिचारिका = सागरिकायाः सखी = Another maid servant in charge of *Sagarika*.

निपुणिका चूतलतिका मदनिका	परिचारिकाः = Three female attendants.

वसुन्धरा = प्रतीहारी = The female warder.

नटी = The Actress, wife to the stage manager = सूत्रधारस्य पत्नी।

नाटके उल्लिखितानि पात्राणि विक्रमबाहुः सिंहलराजः। रुमण्वान् सेनापतिः। जयवर्मा रुमण्वतोऽपरो भागिनेयः। कोशलराजः। सूत्रधारस्य कन्या, भ्राता, जामाता च। नाटकीयं स्थानं कौशाम्बी। घटनाकालश्च कानिचिदहानि।

The persons spoken of are *Brikramabahoo* the king of Ceylon, *Roomanwat*, the General of *Udayan*, *Jaya Barman* the elder nephew of *Romanwat*, king of Oude, a daughter, a son-in-law, and a brother of the stage manager. The scene is *Kousambi*, kings road, garden and the harem. Time—"Three days" (Wilson).

श्रीः।

अथ

रत्नावली।

प्रथमोऽङ्कः।

नान्दी।

पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शंभोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन् कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः॥

प्रणम्याज्ञानविध्वंसि पवित्रं ब्रह्म वाङ्मयम्।
क्रियते बालतोषाय रत्नावली-प्रदीपनम्॥

(১) চরণের অগ্রভাগে ভর করিয়া (অথবা শম্ভুর পাদাগ্রে) স্থিতা, স্তনভরে পুনঃ পুনঃ অবনতা, শিবারাধনে তাঁহার সস্পৃহলোচনত্রয়পথগামিনী, সকম্পঘর্ম্মরোমাঞ্চা লজ্জাবতী পার্ব্বতী কর্ত্তৃক শম্ভুর মস্তকের জন্য অভিলষিত ও ক্ষিপ্ত পুষ্পাঞ্জলি গমনপথে বিশ্লিষ্ট (অর্থাৎ পৃথগ্‌ভাব প্রাপ্ত) হইয়া আপনাদিগকে রক্ষা করুন।

(2) May you be blessed by the flowers scattered in their way, having been intended for, and cast at, the head of *Siba* by the bashful daughter of the Mountain, who was standing, while worshipping him, on tiptoe (or at his feet) and thus exposed to his wistful glance causing her tremor, perspiration and horripilation.

(3) पादाग्रस्थितया स्तनभरेण मुहुर्नम्रतामानीतया शम्भोः सस्पृहलोचनत्रय-पथं यान्त्या, सपुलकस्वेदोद्गमोत्कम्पया व्रीडमत्या गिरिजया तदाराधने शिरसि ईहितः क्षिप्तः कुसुमाञ्जलिः अन्तरे विश्लिष्यन् वः पातु।

(4) रत्नावलीं नाम नाटिकां चिकीर्षन् कविरशेषविघ्नविघाताय मङ्गल मुद्दिशति पादेति। पादयोश्चरणयोरग्राभ्यां पूर्वभागाभ्यां अङ्गुल्यग्रपार्ष्णिभ्यां चरणाभ्यामित्यर्थः। स्थितया (यद्वा पादयोरग्रे स्थितया उपविष्टया शम्भोरितिशेषः)। तथा स्तनभरेण कुचभारेण मुहुः पुनः पुनर्नम्रतामवनतिमानीतया प्रापितया। तथा शम्भोः शिवस्य स्पृहया कामेन सह वर्त्तमानानां लोचनानां नयनानां त्रयस्य पन्थानं यान्त्या गच्छन्त्या। तथा पुलकस्य स्वेदोद्गमस्य उत्कम्पस्य तैः पुलकस्वेदोद्गमोत्कम्पैः सह वर्त्तमाना तथोक्ता तया। तथा व्रीडमत्या लज्जावत्या गिरिजया पार्वत्या तस्य शम्भोराराधने पूजायां शिरसि मूर्धनि ईहितः वाञ्छितः, ईहांद्यमवाञ्छोरिति हेमचन्द्रः। ततः क्षिप्तः शिवाय प्रहितः कुसुमानां पुष्पाणामञ्जलिः अन्तरे अवकाशे गमनपथे इति यावत् विश्लिष्यन् विभिन्दन् विस्तृतिं लभमानः शिथिलीभवन्निति यावत् वो युष्मान् पातु रक्षतु। अत्र पुलकादिभिः पार्वत्याः सात्त्विकभावाः प्रकटिताः। ते च यथा— स्तम्भ-प्रलय-रोमाञ्चाः स्वेदो वैवर्ण्य-वेपथू। अश्रु वैस्वर्य्यमित्यष्टौ सात्त्विकाः परिकीर्त्तिता इति। (अन्तरे शिवगात्रमध्ये क्षिप्त इति वान्वयः)।

(5) चरणाङ्गुष्ठद्वयमुपरि (अथवा शम्भोश्चरणसमीपवर्त्तिन्या) कुचभारेण पुनः पुनरवनतिं प्रापितया शिवोपासनायां तस्य साभिलाषनयनमार्गं गच्छन्त्या घर्म्म-रोमाञ्च-धृतियुक्तया लज्जावत्या पार्वत्या महादेवस्य मूर्धनि प्रदानाभिलाषेण समर्पितः पुष्पाञ्जलिरवकाशपथे पृथक्त्वमापद्यमानो युष्मान् रक्षतु।

(6) शम्भोः—शम् + भू + डुः। तस्य। शं मङ्गलं भावयत्युत्पादयतीति मितद्र्वादिभ्य उपसंख्यानमिति डुः (३।२।१८०, वा)। अन्तर्भावितण्यर्थोऽत्र भवतिरिति भट्टोजिः। In this case, the root भू has a causative sense. Hence literally one who causes welfare is शम्भु।

नम्रताम्— नम्र + तल् + टाप्। ताम्। There is a difficulty to derive it

from नम्रा as नम्रा + तल् + टाप् because पुंवद्भाव in such cases is objectionable. त्व-तलोर्गुणवचनस्येति वक्तव्यम् (६।३।३५, वार्त्तिक) does not apply. "शुक्लादय एव इह गुणा" इति प्रौढ़मनोरमा। हरिदीक्षित clears the point in his शब्दरत्न :—"अवाहचिवीजन्तु संज्ञा-जाति-कृदन्त-तद्धितान्तसमस्त-सर्वनाम-संख्याशब्दातिरिक्त: शब्दो गुणवचन इति" and so नागेश in the शब्देन्दुशेखर "अत्र संज्ञा-जाति-कृदन्त-तद्धितान्त-समस्तसर्वनाम-संख्याशब्दव्यतिरिक्त: शब्दो गुणवचनशब्दे नोच्यते। आकडारसूत्रभाष्यस्त्वथैव लाभात्। Hence in the Rule स्त्रियाम् (4.1 3.) कैयट uses "व्यापिनीत्वात् प्रवृत्ते:" and again in Rule पुंयोगात् &c...(4.1.48) "स्त्रिया: संविधात्रीत्वात्।" In माघ-काव्य we get नैष्टं पुरी द्वारवतीत्वमासीत् (3.69). On the other hand such प्रयोग is abundant :—"ज्ञातमन्मथरसा शनै: शनै: सा मुमोच रतिदु:ख-शीलताम्।" (कुमारसम्भव ८।१३)। "उपेत्य सा दोहददु:खशीलताम्" (रघु)। "निरीक्ष्य मेने शरद: कृतार्थता" (भारवि ४।८) चीवतामुपगतास्त्वनुवेलमिति धृष्टता रहसि भर्तृषु ताभि: (माघ)। Accordingly the grammarians justify this by सामान्ये नपुंसकमिति वाच्यम् (२।४।१७।१८ वा)। Hence here नम्रस्य भाव: नम्रता ताम्। So we have in (4.1.33) पत्न्या: फल-प्रतिग्रहीतृत्वात् used in काशिका on which हरदत्त remarks "कर्त्तृत्वमात्रं विवक्षितं नतु स्त्रीत्वम्।" In the Rule 1.4.109, वार्त्तिककार himself uses, "एकैकवर्णवर्त्तित्वाद्वाच:।" on which कैयट—"सामान्येनोपक्रमात् स्त्रीप्रत्ययाभाव:।"

सम्प्रहलोचनपथम्—"ऋक्पूरब्धू:पथामानचे" इति पथिन् शब्दे अप्रत्यय: समासान्त:। स्तनभरेण=भृ+अप्=भर:। ऋदोरबिति (३।३।५७) अप्। The roots ending in दीर्घ ऋ and उवर्ण take अप् and not घञ्। भृ भर्त्सने। भरणेऽप्येके इति क्र्यादि:। भृणाति। अभारीत्। अभारि।

यान्त्या—या + शतृ + ङीप्, तया। आच्छीनद्योर्नुमिति वा नुम्। Followed by शी (the dual of प्रथमा and द्वितीया in neuter gender) and नदी

i.e. affix ङीप्) शतृ will optionally take नुम् if it be preceded by अवर्णान्त अङ्ग। पचे याती। याति। ययौ। अयासीत्। यास्यति। यायते। अयायि। यातः। यातुम्। यात्वा। यात्।

ह्रीमत्या = ह्री + मतुप् ङीप्। तया। उगितश्चेति ङीप्। जिह्रेति अनयेति ह्रीः। ह्री + क्विप्। जिह्रेति। जिह्राय, जिह्रयाम्-बभूव-आस-चकार। ह्रेष्यति। अह्रैषीत्। ह्रीयते। अह्रायि। ह्रेपयति। अजिह्रिपत् ह्रीणम् ह्रीतम्। ह्रेतुम्। ह्रीत्वा। जिह्रियत।

ईहितः—ईह + क्तः। ईहते। ईहाम्-बभूव-आस,—चक्रे। ईहिष्यते ऐहिष्ट। ईह्यते। ऐहि। विश्लिष्यन् वि श्लिष् + शतृ। श्लिष्यति। शिश्लेष। श्लेष्टा। श्लेक्ष्यति। श्लिष्यतु। अश्लिष्यत। श्लिष्येत्। श्लिष्यासु। When आलिङ्गन is indicated, it is to be conjugated with क्स in लुङ्; otherwise पुषादित्वादङ्। अश्लिक्षत् कन्यां देवदत्तः। अश्लिषत् काष्ठं जतु। कर्मण्येकवचने सर्वत्र चिण्। अश्लेषि। आलिङ्गने क्सः। अश्लिक्षातां कन्या देवदत्तेन। अन्यत्र सिच्। समश्लिक्षत जतुनि काष्ठेन। श्लिष्टः। श्लेष्टुम्। श्लिष्ट्वा।

पातु—आशिषि लिङ्लोटाविति लिङ् in the sense of benediction. पाति। पपौ। पास्यति। अपासीत् नृपः। पायते। अपायि। पातम्। पात्वा। पातुम। पात। पा रक्षणइत्यदादिः। The भ्वादि root पा पाने has पिबति। पीत्वा। अपात्, अपाताम्, अपुः। पीतम्।

(7) मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत् समाइत्यमरः। अन्तरमवकाशावधि-परिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि चेत्यमरः।

(8) ईहितेन...चित्तेन...विश्लिष्यता कुसुमाञ्जलिना युष्मं पायध्वम्।

(9) शार्दूलविक्रीडितं नाम वृत्तम्। सूर्याश्वैर्यदिमः सजौ सततगाः शार्दूलविक्रीडितमिति लक्षणात्। *i. e.* यति (pause) shall be at the end of the twelfth (सूर्य) vowel and then again after the seventh (अश्व) and the गण shall be in the order म-स-ज-स-त-त-ग- in each line.

अपि च ।

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ॥

(১) আরও—নূতন সঙ্গমে উৎসাহহেতু দ্রুতগতি, অথচ স্বাভাবিক লজ্জাহেতু পরাবর্ত্তমানা, পশ্চাৎ সুহৃদ্বধূজনের বাক্যসমূহ দ্বারা সমীপে নীতা গৌরী অগ্রে পরিণেতাকে দর্শন করিয়া ভয়ানুরাগযুক্তহৃদয়ে হাস্যযুক্ত শিব কর্ত্তৃক আলিঙ্গিতা হইয়া জাতপুলকাবস্থায় আপনাদিগের মঙ্গলকারিণী হউন ।

(2) Moreover—may for your prosperity be *Gouri* (the goddess of power) who at the time of her first intercourse, being propelled through eagerness yet receding back for natural coyness, had to advance by the entreaties of her friend's wife and thus seeing before her the bridegroom, was attached as well as frightened, with her hairs on end, when embraced by the smiling *Siba.*

(3) अपिच—नवे सङ्गमे औत्सुक्येन कृतत्वरा सहभुवा ह्रिया व्यावर्त्तमाना पुनर्बन्धुवधूजनस्य तैस्तैर्वचनैराभिमुख्यं नीता अग्रे वरं दृष्ट्वा आत्तसाध्वसरसा गौरी हसता हरेण श्लिष्टा संरोहत्पुलका वः शिवाय अस्तु ।

(4) नवे नूतने प्रथमे इति यावत् । सङ्गमे मेलने रमण इति यावत् । औत्सुक्येन उत्साहेन कृतत्वरा दुता तथा सह भवति जायत इति सहभूस्तया स्वाभाविक्या ह्रिया लज्जया व्यावर्त्तमाना प्रत्यागच्छन्ती तथा पुनर्भूयः बन्धोः सुहृदो वधूरेव जनस्तस्य तैस्तैः समस्तैर्वचनैर्वाक्यैः आभिमुख्यं समीपं नीता प्रापिता सती अग्रे पुरस्तात् वरं वोढारं दृष्ट्वा विलोक्य आत्तौ गृहीतौ साध्वसं भयं रसो रागश्चेति तौ प्रेमानुभावादित्यर्थः । यया सा लब्धभयरागा गौरी हसता स्मयमानेन हरेण शिवेन श्लिष्टा

आलिङ्गिता सती अतएव संरोहन् जायमानः पुलको रोमाञ्चः यस्याः सा उत्पद्य-मानरोमाञ्चा वो युष्माकं शिवाय मङ्गलाय अस्तु भवतु।

(5) नूतने समागमे कौतुकेन त्वरमाना निसर्गजया लज्जया परावर्त्तमाना च पुनः सखीवाक्येन परिणायकसमीपगता लब्धभयप्रणया पार्वती स्मयमानेन हरेणो-पगूढा सञ्जातरोमाञ्चा युष्माकं मङ्गलं विदधातु।

(6) तैस्तैः—नित्यवीप्सयोरिति (८।१।४) वीप्सार्थे द्वित्वम्। तैः is doubled in the indication of वीप्सा *i.e.* pervasion, hence तैस्तैर्वचनैः=by all the words=नवोढ़ां मुग्धां पत्युः समीपं प्रेरयितुं स्त्रीभिः प्रयुक्तैः समस्तवाक्यैः। करणे तृतीया।

आत्तसाध्वसरसा—आङ्+दा+क्तः। अच उपसर्गात्तः इति (७।४।४७) तकारः *i.e.* the अच् of the root दाण् or दाञ् preceded by अजन्त उपसर्ग is replaced by त् if the root be followed by तकारादि कित् प्रत्यय। cf:—प्रत्तम् (प्र+दा+क्तः) रामप्रत्तेषु भोगेषु नाहमज्ञासिषं रत इति भट्टिः। How is the word "प्रदत्त" to be justified? प्र in प्रदत्त is to be supposed as an उपसर्गप्रतिरूपक निपात and not the उपसर्ग। The वार्त्तिक—"अवदत्तं विदत्तञ्च प्रदत्तञ्चादिकर्मणि। सुदत्तमनुदत्तञ्च निदत्तमिति चेष्यते॥" is for आदिकर्म *i. e.* commencement of action and not for other cases. In काशिका and कौमुदी "वेष्यते" is the reading. ददाति दत्ते। ददौ ददे। अदात् अदित। दीयते। अदायि। दत्तम्। दातुम् दत्त्वा। ददत् ददानः। ददती ददाना।

संरोहत्पुलका—संरोहन् पुलको यस्याः सा। सम्+रुह्+शतृ=संरोहन् But why शतृ, since the Rule is लटः शतृशानचावप्रथमासमानाधिकरणे (3. 2. 124)? Hence such समास is objected to. It is however justified thus;—"लडित्यनुवर्त्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्। तेन प्रथमासामानाधिकरण्येऽपि क्वचित् स्यादेव।" *i. e.* though लट् exists in this Rule being drawn from वर्त्तमाने लट् (3.2.124), still it is

repeated here, to indicate that sometimes शतृ and शानच् can be used also in प्रथमासमानाधिकरण। रोहति। करोह। रोक्ष्यति अरुचत्। रुह्यते। अरोहि। रूढः। रूढ्वा। रोढुम्।

वः—बहुवचनस्य वस्नसाविति (८।१।२१) पदात् परस्य अपदादौ स्थितस्य युष्मद्-शब्दस्य द्वितीयाचतुर्थीषष्ठीबहुवचनान्तस्य वस्। वस् replaces optionally युष्माकम्, युष्मभ्यम् or युष्मान् if it be after a पद and not at the beginning of a श्लोकपाद।

शिवाय—क्लृपि च सम्पद्यमान इति वक्तव्यात्चतुर्थी।

कृतत्वरः—कृता त्वरा यया सा। जित्वरा संभ्रम इति भ्वादिःषित् *i.e.*, it is a root from which षकार is supposed to have disappeared. So by the Rule षिद्भिदादिभ्यश् the affix अङ् being joined त्वरा is derived. त्वरते। तत्वरे। त्वरिष्यते। अत्वरिष्ट। त्वरयति। अतत्वरत्। त्वरितम् तूर्णम्। त्वरितुम्। त्वरित्वा। त्वर्यते। अत्वारि। णिजन्ते तु अत्वरि अत्वारि वा।

(7) वरौ जामातृवोढाराविति विश्वः। दरत्रासौ भीतिर्भीः साध्वसं भयमित्यमरः। साधूनामसमस्यतीत्यच् = साध्वसम्। पुलको रोमाञ्चे हरिताले गजान्नपिण्डे च गन्धर्वे इति मेदिनी। रसः स्वादे जले वीर्य्ये शृङ्गारादौ विषे द्रवे। बले रागे देहधातौ तिक्तादौ पारदेऽपि चेति हेमचन्द्रः।

(8) कृतत्वरया—व्यावर्त्तमानया—भीतया...प्राप्तसाध्वसरसया—गौर्य्या—संरोहत्पुलकया—स्निह्यया—भूयताम्।

(9) शार्दूल विक्रीड़ितं वृत्तम्।

अपि च—

सम्प्राप्तं मकरध्वजेन मथनं त्वत्तो मदर्थं पुरा
तद्युक्तं बहुमार्गगां मम पुरो निर्लज्ज वोढ़ुं स्तव।

तामिवानुनयस्वभावकुटिलां हे कृष्णकण्ठग्रहं
मुञ्चेत्याह रुषा यमद्रितनया लक्ष्मीश्च पायात्स वः ॥

(১) আরও—হে নির্লজ্জ নীলকণ্ঠ! পূর্ব্বে আমার উপলক্ষে তোমা হইতে কন্দর্প বিনাশ প্রাপ্ত হইয়াছে! আমার সম্মুখে গঙ্গা ধর! তোমার ইহা যুক্ত বটে!! স্বভাববক্রা তাহাকেই অনুনয় কর। আমার গ্রহণ পরিত্যাগ কর। পার্ব্বতী যাঁহাকে ক্রোধে এই রূপ বলিতেছেন তিনি আপনাদিগকে রক্ষা করুন।

(পক্ষে) হে নির্লজ্জ কৃষ্ণ! আমার জন্য সমুদ্র তোমা হইতে মন্থন প্রাপ্ত হইয়াছে! আমার সম্মুখে অনেকপথপ্রসারিণী বাণীর (সরস্বতীর) পরিণেতা (অথবা অনেকান্বেষণপরায়ণা কুব্জার নায়ক) তোমার ইহা যুক্ত বটে!! অর্থকুটিলা (অথবা গতিবিকলা) তাহাকেই অনুনয় কর। আমার কণ্ঠ গ্রহণ পরিত্যাগ কর। লক্ষ্মী যাঁহাকে ক্রোধে এইরূপ বলিতেছেন তিনি আপনাদিগকে রক্ষা করুন।

(2) Moreover—O impudent blue-necked one! It is indeed proper for you to bear the *Ganges* before me, having killed the God of love in yore, at my expense!! Do humour her who is crooked by nature and leave me. May the God who was thus spoken to by *Gauri* in anger, protect you.

(or) O impudent Krisna! It is indeed proper for you to marry the goddess of knowledge (or to lead away the humpbacked maid who goes astray) before me, having churned the ocean for my sake! Do humour her who is crooked in meanings (or crooked by body) and give up my embrace. May the god who was thus spoken to by the goddess of wealth in anger, protect you.

(3) हे निर्लज्ज कृष्णकण्ठ। पुरा मदर्थे मकरध्वजेन त्वत्तो मथनं संप्राप्तम्। मम पुरो बहुमार्गगां वोढु तव तद् युक्तम्। स्वभावकुटिलां तामेवानुनय। ग्रहं मुञ्चेत्यद्रितनया रुषा यमाह स वः पायात्।

(पक्षे) हे निर्लज्ज कृष्ण! पुरा मदर्थे मकरध्वजेन त्वत्तो मथनं संप्राप्तम्।

मम पुरो बहुमार्गगां वोढुस्तव तद् युक्तम् ! ! भावकुटिलां तामेवानुनयस्व। कण्ठ-ग्रहं मुञ्चेति लज्जोत्थ कथा यमाह स वः पायात्।

(५) हे निर्लज्ज ! स्त्रीविरहित ! कृष्णः कण्ठो यस्य स कृष्णकण्ठः तत् सम्बुद्धौ हे नीलकण्ठेत्यर्थः। समुद्रमन्थनोद्भूतहलाहलपानेन कण्ठस्य नीलत्वात्। पुरा पूर्वस्मिन् काले मम अर्थः विषयः मदर्थस्तत्र मद्विषये अथवा मन्निमित्ते। अर्थो विषयार्थ-नयोर्धनकारणवस्तुष्विति मेदिनी। मकरध्वजेन मीनध्वजेन कन्दर्पेणेति यावत् त्वत्तः भवतो मथनं विनाशः संप्राप्तं लब्धम्। अतो मम पुरः अग्रतः बहुभिर्मार्गैः स्वर्गमर्त्त्य-पातालरूपैः पथिभिर्गच्छतीति बहुमार्गगा तां त्रिस्रोतसं गङ्गामिति यावत् वोढु धार-यतः शिरसीति शेषः। तव तत् (कामेन विनाशस्य प्रापणं) युक्तमिति परिहासः। अन्यासक्तस्य तव मद्विषये तु द्वेषः सर्वथा युक्त एवेत्यर्थः। अथवा युक्तमुचितं किमिति काकुः। मद्विषये तव द्वेषः सर्वथा न युक्तइत्यर्थः। तथाच स्वभावेन कुटिलां वक्रां तां गङ्गामेवानुनय प्रीणय। ग्रहं ग्रहणं ममेति शेषः। मदालिङ्गनं मुञ्च त्यजेति अद्रेः हिमालयस्य तनया कन्या कथा क्रोधेन यं शिवमाह कथयति स वो युष्मान् पायात् रक्षतु। आशिषि लिङ्।

(पक्षे) हे निर्लज्ज कृष्ण। पुरा पूर्वस्मिन् काले मदर्थे मन्निमित्ते। समुद्रमन्थनेन समुत्थिताया लक्ष्म्या विष्णुना ग्रहणात्। मकरो ध्वजं चिह्नं यस्य स मकरध्वजः समुद्रस्तेन त्वत्तो भवतो भवत्साहाय्येनेत्यर्थः मथनं विलोडनं संप्राप्तम्। अतः मम पुरोऽग्रतः बहुभिः श्रुतिस्मृत्यादिभिः मार्गैः गच्छति विचरतीति बहुमार्गगा तां वाणीं वोढुः परिणेतुः (अथवा बहून् मार्गयति अनुसन्धत्त इति बहुमार्गः। कर्म्मण्यण्, तत्सम्बुद्धौ हे बहुमार्ग बहुविलासिन् कृष्ण ! गां भारतीम्। गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः। स्त्रीतु स्याद् दिशि भारत्यां भूमौ च सुरभावपि। पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्वाणलोमस्विति केशवः। वोढु रूपयच्छमानस्य) अथवा बहूनां मार्गः अन्वेषणं तस्मिन् गच्छतीति बहुमार्गगा तामनेकवल्लभा न्वेषिणीम्। मार्गो मृगपदे मासि सौम्यर्क्षेऽन्वेषणेऽध्वनीति यादवः। वेश्यां कुलामि-त्यर्थः। कंससैरिन्ध्रीत्वाद्बहुवल्लभामित्यर्थः। वोढुः कामेन रहसि नयतः। तव तद् युक्तमिति पूर्ववत्। अतः भावेन अभिप्रायेण अर्थेनेति यावत् पक्षे चेष्टया अङ्ग-

विक्षेपेणेति यावत् । लब्धप्रवृत्तिहेतौ च भावोभिप्रायवस्तुनोः । स्वभावजन्मसत्तात्म-क्रियालीलाविभूतिषु । चेष्टायोन्योर्बुध्रे जन्तौ शृङ्गारादेश्च कारण इति हेमचन्द्रः । कुटिलां वक्रां तां भारतीं कुर्वा वा एव अनुनयस्य प्रीणय । स्वरितञित: कर्त्रभिप्राये क्रियाफल इति तङ् । कण्ठस्य ग्रहं ग्रहणं ममेति शेषः । मुञ्च । इति लक्ष्मीः शीघ्र रुषा यं विष्णुमाह स वः पायात् ।

(5) विस्रोतसं शिरसि वहता निर्लज्जस्य तव महिताय यतमानस्य कामस्य दहनमुचित मेव । अन्यथा कथमपरस्या नायिकाया सृष्टिः स्यात, अतो वक्र-गामिनीं तामिव मां त्यजन्ननुनयेति गिरिजयाभियुक्तो भवो वः पातु । यच्च मदुङ्गाराय समुद्रमन्थने तदानीं निर्बन्धवत स्तवाधुना वाणीग्रयणम् (अथवा कुलाग्रयणं) युक्तमेव । मां विहायातो भाववक्रां तामेवानुनयेति श्रियाभियुक्तो हरि र्वो रक्षतु । तामनुसर सरसिरुहलोचन या तव हरति विषादमिति जयदेवः ।

(6) मथनम्—मथ विलोडन इति भ्वादिः । ततो भावे ल्युट् । मथति । ममाथ । मथिष्यति । अमथीत् । मथितः । The roots मथि, मन्थ and क्र्यादि मन्थ give मन्थन in ल्युट् ।

त्वत्तः—युष्मद्+तसिल् । प्रत्ययोत्तरपदयोश्चेति (७।२।९८) त्वदादेशः । The portions युष्म् and अस्म् of युष्मद् and अस्मद् are replaced by त्व and म in singular if followed by an affix or any पद । वोढुः—वह्+तृच् । तस्य । वहति—ते । उवाह ऊहे । वोढा । वक्ष्यति—ते । उह्यात् वक्षीष्ट । अवाक्षीत् अवोढ । ऊढः । वोढुम् । ऊढ्वा । वहत्—वह-मानम् । उह्यते । अवाहि । रुषा—इत्थंभूतलक्षणे तृतीया । अथवा-करणे । रुष् —क्विप्=रुट् । रुष्यति । रुरोष । अरुषत् । रुषितः रुष्टः । अयं भ्वादि श्चुरादिश्च ।

(7) ग्रहानुग्रहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्यादौ पूतनादौ च सैंहिकेयोप-रागयोरिति मेदिनी ।

(8) संग्रामवान् मकरध्वजो मथनम्—तेन युक्तेन (भयते)—सा अनुनीयताम्

भावकुटिला...गङ्गा मुच्यताम्...इति उच्यते यः अद्रितनयया सन्ध्या च पार्श्वीप्यं तेन यूयम्।

(9) शार्दूलविक्रीड़ितं वृत्तम्।

(10) अत्र श्लेषालङ्कारः। नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रित इति लक्षणात्।

(13) पुरा किल हिमालयशिखरे तपस्यतः स्थाणोः समाधिभङ्गाय प्रेषितः काम सम्मोहनं नाम सायकं सन्दधानः शिवनेत्रवह्निना भस्मावशेषमदाहीति। पुराकिलामृतलाभाय सुरैरसुरैश्च समवेतैरम्बुनिधिर्ममन्थे। मथ्यमानाच्च जलधेरुत्पन्नः कालकूटो हरेण पीतस्तत्कण्ठं नीलतां निनाय। लक्ष्मीश्चोत्थिता विष्णुमाश्रिश्रायेति च पौराणिकी वार्त्ता।

अपि च।

क्रोधेद्धैर्दृष्टिपातैस्त्रिभिरुपशमिता वह्नयोऽमी त्रयोऽपि

त्रासार्ता ऋत्विजोऽधश्चपलगणहृतोष्णीषपट्टाः पतन्ति।

दक्षः स्तौत्यस्य पत्नी विलपति करुणं विद्रुतं चापि देवैः

शंसन्नित्यात्तहासो मखमथनविधौ पातु देव्यै शिवो वः॥

(১) যজ্ঞনাশ ক্রিয়াতে ক্রোধপ্রদীপ্ত দৃষ্টিপাতত্রয় দ্বারা ঐ দক্ষিণাদি অগ্নিত্রয় উপশমিত,—উদ্ধত প্রমথ কর্তৃক হৃতকিরীটবস্ত্র অতএব ভীত যাজ্ঞিকগণ অধঃপতিত,—দক্ষ স্তবকারী,—তৎপত্নী করুণরোদননিরতা,—দেবগণ (বা বিপ্রগণ) পলায়নপরায়ণ,—দেবীর সমীপে এইরূপ বর্ণনাকারী মহাদেব আপনাদিকে রক্ষা করুন।

(২) "At the destruction of the Sacrificial ceremony, all the three sacred fires were quenched by three glances full of anger; the frightened priests fell down, their turbans (or caps) having been pulled off by the unrestrained goblins; Daksha prayed, his wife wept sorrowfully and the gods (or Brahmins) fled"—recounting this to the goddess with (loud) laugh, may the god *Siba* protect you.

(3) मखमथनविधौ क्रोधेद्धैस्त्रिभिर्दृष्टिपातै रग्नी त्रयोपि वह्नय उपशमिता:, चपलगणहृतोष्णीषपट्टा: त्रासार्त्ता: ऋत्विज: अध: पतन्ति, दक्ष: स्तौति, अस्य पत्नी करुणं विलपति, देवै अपि विद्रुतमिति देव्यै शंसन् आत्तहास: शिवो व: पातु ।

(4) मखस्य यज्ञस्य मथनमेव विधि: कर्म मखमथनविधि स्तस्मिन् यज्ञविध्वंसक्रियायां क्रोधेन रोषेण इद्धै: प्रदीप्तै स्त्रिभिर्दृष्टीनां नयनानां पातै र्निक्षेपै रग्नी वर्यो दक्षिणगार्हपत्याहवनीया अपि । एकस्यापि न निस्तार इत्यपिशब्दार्थ: । वह्नयोऽग्नय उपशमिता निरस्ता: । तथा चपलैरुद्धतै र्गणै: प्रमथैर् हृता अपनीता उष्णीषाणां किरीटानां पट्टा वस्त्राणि येषां ते तथोक्ता: उद्धतप्रमथापनीतकिरीटवस्त्रा: । त्रासेन भयेन ऋता: पीडिता ऋतं च तत्तोथा समासे इति वक्तव्यादृद्धि: । ऋतौ यजन्तीति ऋत्विज: अधो भतले पतन्ति स्खलन्ति । दक्ष: प्रजापति: स्तौति नौति । अस्य दक्षस्य पत्नी भार्य्या करुणं सशोकं यथातथा विलपति क्रन्दति : देवै: सुरैरपि विद्रुतं पलायितमिति देव्यै पार्वत्यै । ननु सत्यै दक्षतनयायै । तया तत्काल एव देहस्य त्यागात् । शंसन् कथयन् सन् आत्त: गृहीत: क्लतइत्यर्थ: हासो येन स तथोक्त: । अट्टहासइति पाठे अट्ट: अत्यर्थो हासो यस्येति विग्रह: । अट्टावतिशयक्षौमाविति यादव: । अट्टं ेक्ते च शुष्कान्ना क्षौमेत्यर्थे गृहान्तर इति मेदिनी । शिवो वो युष्मान् पातु अवतु ।

(5) महादेव: रोषप्रदीप्तनेत्रपातै र्यज्ञाग्नीनुपशमितवान् । चपलै: प्रमथै ऋत्विजां किरीटवस्त्राणि अपहृतानि । ते च भूपतिता: । दक्ष: स्तावक: । तत्पत्नी सशोकं रोदिति । देवाश्चापसृता: इत्येतत् यज्ञविनाशघटनमिति पार्व्वत्यै वर्णयित्वा शिवो युष्मान् पालयतु ।

(6) क्रोधेद्धै:—क्रोधेन इद्धा: क्रोधेद्धा स्तै: । ञिइन्धी दीप्ताविति रुधादि: । इन्धे । इन्धाञ्चक्रे इन्धामास इन्धाम्बभूव । केचिदिन्धिभवतिभ्याञ्चेति (१।२।६) इन्धे: परस्य लिट: कित्त्वविधानसामर्थ्यादामो विकल्पमिच्छन्ति । तदिन्धे श्छन्दोविषयत्वाद् भुवो वुको नित्यत्वादित्यादिभाष्यवार्त्तिकविरोधादुपेक्ष्यमिति जिनेन्द्र: । (*i.e.* According to some इन्ध् may take आम् optionally in लिट्—but

that is in the Vedas and not in the लौकिक संस्कृत, since it is so regulated in the भाष्य and वार्त्तिक)। इन्धिता। इन्धिष्यते। इन्धाम्। ऐन्ध। इन्धीत। इन्धिषीष्ट। ऐन्धिष्ट। ऐन्धिष्यत। इध्यते। ऐन्धि। इद्धः। इन्धित्वा। इन्धितुम्। इन्धानः।

विद्रुतम्—वि + द्रु + क्तः। भावे। द्रवति। दुद्राव। द्रोष्यति। अदुद्रुवत्। द्रूयते। अद्रावि। द्रोतुम्। द्रुत्वा। द्रवत्। ऋत्विजः—ऋतु + यज् + क्विन्। ते। ऋत्विग् दधृक् स्रग् दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्चेति क्विन् निपातितः।

देव्यैः—क्रियया यमभिप्रैति सोपि सम्प्रदानमिति चतुर्थी।

(7) गणाः प्रमथमत्स्योघा इति वैजयन्ती।

(8) क्रोधेद्धास्तया दृष्टिपाता उपशमितवन्तो बर्हीनमून् वीन्। त्रासार्त्तैः ऋत्विग्भिः अपलगच्छलोत्तरीयपट्टैः पत्यते। दक्षेन स्तूयते। पत्न्या विलप्यते विद्रुतवन्तः देवाः। शंसता आत्तहोमेन पायध्वं शिवेन यूयम्।

(9) स्रग्धरा नाम वृत्तम्। म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति लक्षणात्। The यति will be at the end of the seventh (मुनि) vowel and so again and again. There will be thus three pauses in each पाद. The गण will stand in this order म-र-भ-न-य-य-य।

(12) विद्रुतं क्षौणिदेवै रिति वा पाठः। तत्र क्षौणि-देवै र्भूमिदेवै र्ब्राह्मणै रित्यर्थः। मुहुरुपशमिता इति वा पाठः। तत्र मुहुः पुनः पुनरित्यर्थः। अयमेव साधीयान्।

(13) जामातरं शिवमनाहूत्य यागमनुतिष्ठता दक्षेण यदानाहूता स्वकन्या शिवपत्नी सती यज्ञस्थलं दृष्टा, तदा तेन विनिन्दितभर्त्तृका सा देहं तत्याज। तस्माच्छिवबलेन तस्य यज्ञो विध्वंसितः ऋत्विजोऽवमानिताः। स च दण्डित इति पौराणिकी वार्त्ता।

किञ्च।

जितमुडुपतिना नमः सुरेभ्यो
द्विजवृषभा निरुपद्रवा भवन्तु।
भवतु च पृथिवी समृद्धशस्या
प्रतपतु चन्द्रवपुर्नरेन्द्रचन्द्रः॥

(১) চন্দ্র জয়যুক্ত। দেবতাদিগকে নমস্কার। শ্রেষ্ঠ দ্বিজগণ নির্ব্বিঘ্ন হউন। পৃথিবী উৎকৃষ্টশস্যা হউক। রাজেন্দ্র চন্দ্রশরীর হইয়া প্রতাপ দান করুন।

(2) The lord of the stars (*i.e.* the moon) is victorious. Bow to the gods. May the great Brahmins be without any danger. May the earth be full of fertility. Let the moonlike king with a soft body as that of the moon, show his power.

(3) उडुपतिना जितम। सुरेभ्यो नमः। द्विजवृषभा निरुपद्रवा भवन्तु। पृथिवी च समृद्धशस्या भवतु। नरेन्द्रचन्द्र चन्द्रवपुः (सन्) प्रतपतु।

(4) उडूनां नक्षत्राणां पत्या चन्द्रेन जितमुत्कर्षेण वृत्तम्। पतिरसमास इति घिसंज्ञा। सुरेभ्यो देवेभ्यो नमः। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्चेति चतुर्थी। द्विजा वृषभाइव द्विजवृषभा द्विजश्रेष्ठा निर्नास्ति उपद्रवो येषां ते तथोक्ता निर्व्विघ्ना भवन्तु सन्तु। पृथिवी उर्वीच समृद्धं शस्यं यस्याः सा तथोक्ता प्रफुल्लशस्या भवतु। नरेषु इन्द्रो नरेन्द्रः स चन्द्रइवेत्युपमिततत्पुरुषः। चन्द्रवपुरिव वपुर्यस्येति चन्द्रवपुः चन्द्रदेहः। सप्तम्युपमान पूर्वपदो बहुव्रीहिरुत्तरपदलोपश्चेत्युपसंख्यानाद्बहुव्रीहिः। प्रतपतु स्निग्धं यथा तथा शास्त्वित्यर्थः।

(5) चन्द्रेणोत्कर्षेण वृत्तम्। देवान् नमस्कुर्मः। विशिष्टा द्विजा निर्विघ्ना आसताम्। पृथिवी शस्यपूर्णा जायताम्। नृपः शीतगुरिव स्वं मृदु तेजो वितरतु।

(6) द्विजवृषभाः—द्विर्जायन्ते इति द्विजाः। द्वि + जन् + डः। ते। एकं द्वि. मातृतो जन्म द्वितीयं मौञ्जीबन्धनादिति स्मृतेः। उपमितं व्याघ्रादिभिः सामान्या-

प्रयोग इति समासः। व्याघ्रादि is considered as an आकृतिगण *i.e.* according to अभियुक्तप्रयोग words besides those counted in the गण can also be reckoned as व्याघ्रादि *e.g.*, चन्द्र in नरेन्द्रचन्द्रः। Here too we take उपमित तत्पुरुष as the समास, under the above rule, which means that if सामान्यधर्म्म be not used उपमित तत्पुरुष can take place. "चन्द्रवपुष्" is not taken as an expression of सामान्यधर्म्म ; otherwise the समास will be नरेन्द्रएव चन्द्रः *i. e.* a रूपककर्म्मधारय by मयूरव्यंसकादयश्च। But the common attribute here is मनोरमत्वादि। cf.—भाष्याब्धिः क्वाति गम्भीर इति कैयटः। Though गम्भीर is used they maintain here उपमिततत्पुरुषः, भाष्यमब्धिरिवेति अतिवितततदुरवगाहत्वादि-सामान्यधर्मत्वात्। Of course नागेश makes here मयूरव्यंसकादि ; But other authorities go in the different direction.

समुद्रशस्या—सस्यशब्दो दन्त्यादिः। षस स्वप्नइत्यादादिकात्। माक्षा-सचि-सूभ्यो यइति सस्यमिति माधवः। सस्यं फले गुणे पिचेन्तुज्ज्वलदत्तः। हरदत्तश्च "षसस्ती छान्दसौ। भाषायां प्रयोगो न साधुः भाष्यवार्त्तिककारौ चेत् प्रमाणमिति" (पदमञ्जर्य्यां) ; so its conjugation is useless. But the word सस्य is permissible under the Rule "उणादयो बहुलम्।" Some derive it from शस हिंसायाम्। शस्यम्। But शंसिगुहिदुहिभ्यो वेति काशिका, thus by क्यप्, शस्यम् and by ण्यत्, शंस्यम् from शंस स्तुतौ। In Bengal they accept तालव्यादि form—"तालव्या अपि दन्त्याश्च शस्यपूकरपांशवः।"

(7) नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियामित्यमरः। वृक्षादीनां फलं शस्यमित्यमरः।

(8) जितवानुडुपतिः। विजहश्रमैः निरुपद्रवैर्भूयताम्। पृथिव्या समुद्रशस्यया। प्रतप्यतां चन्द्रवपुषा नरेन्द्रचन्द्रेण।

(9) पुष्पिताग्रा नाम अर्द्धसमं वृत्तम् । अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रेतिलक्षणात् । In odd lines the order is न-न-र-य and in even न-ज-ज-र-ग ।

इति नान्दी ।

अथ

प्रस्तावना ।

(नान्द्यन्ते)

सूत्रधारः—अलमतिप्रसङ्गेन । अद्याहं वसन्तोत्सवे सबहुमानमाहूय नानादिग्देशादागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः । यथास्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालङ्कृता रत्नावली नाम नाटिका कृता । सा चास्माभिः श्रोत्रपरम्परया श्रुता । न तु प्रयोगतो दृष्टा । तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्येति । (परिक्रम्यावलोक्य च)(तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । (परिक्रम्यावलोक्य) अये आवर्जितानीव सकलसामाजिकानां मनांसीति मे निश्चयः । यतः)

(১) সূত্রধার—(নান্দ্যন্তে) অতিবিস্তারের প্রয়োজন নাই। অদ্য বসন্তোৎসবে আমি অত্যন্ত সম্মানের সহিত আহূত হইয়া নানাদিগ্দেশ হইতে আগত রাজশ্রীহর্ষদেবের পাদপদ্মাশ্রয়জীবী রাজগণ কর্ত্তৃক উক্ত হইয়াছি যে আমাদের প্রভু শ্রীহর্ষদেব কর্ত্তৃক অদ্ভুতবিষয়রচনাদ্বারা অলঙ্কৃত রত্নাবলী নামে নাটিকা করা হইয়াছে। তাহা আমাদিগকর্ত্তৃক কর্ণপরম্পরায় শ্রুত হইয়াছে, কিন্তু অভিনয়ে দৃষ্ট হয় নাই। অতএব

সকলজনাহ্লাদক সেই রাজার আমাদের প্রতি অত্যন্ত আদর ও অনুগ্রহ-বুদ্ধি-হেতু নিয়মানুসারে তোমা কর্ত্তৃক উহা অভিনীত হউক। (পরিভ্রমণ ও অবলোকন) অতএব এখন আমি বেশরচনা করিয়া (ইহাদের) অভিলাষানুরূপ কার্য্য সম্পাদন করিতেছি। অহো সমুদয় সামাজিকের মনই যেন আকৃষ্ট হইয়াছে। ইহা নিশ্চয়। যেহেতু—

(2) Chief actor—(after benediction) No use of a long discourse. I have to-day, on the festival in honour of Spring, been with high respect called and requested by the vassals who came from different countries and quarters and who live under the protection of the king *Sriharsha*, to duly perform before them, the *Ratnabali*, a drama of unequalled plot, composed by that pleasing king of ours. It has been heard of but not yet seen acted. So now I, after dressing myself properly, am going to perform it. (Moving and seeing) O it is certain that the audience is all attentive. Since—

(3) सूत्रधारः—कथयतीति शेषः। कविवाक्यम् इदम्। एवमग्रेऽपि। अतिप्रसङ्गेन=वाक्प्रपञ्चेन गम्यमाननिषेधक्रियां प्रति करणत्वात् तृतीया। अलं भूषणपर्य्याप्तिशक्तिवारणवाचकमित्यमरः। वसन्तोत्सवे=वासन्तसमारोहे, वसन्तस्य उत्सवे प्रमोदे। अश्वघासादिवत् षष्ठीसमासः। प्रकृतिविकृतेरभावात्। सबहुमानम्—अत्यन्तसम्मानपुरःसरम्। पादेति=पादौ अधोदेव। तत्पादोपजीवतीति तयोः पादेन—चरणपङ्कजाश्रयेण सुखं निवसता। राजसमूहेन=राज्ञां नृपाणां क्षत्रियाणां वा समूहेन गणेन=नृपतिगणेन=राजकेन, in one word by the तद्धित affix वुञ्। राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोरिति विश्वः (शक्रयोरिति वा पाठः)। अपूर्वेति=अपूर्वमद्भुतं यद्वस्तु तस्य रचनया प्रबन्धेन अलंकृता=आश्चर्यवस्तुप्रबन्धभूषिता। श्रोत्रेति=श्रोत्राणां कर्णानां परम्परया श्रेण्या=एकस्मादन्यस्य श्रवणेनेत्यर्थः। परम्परा परिपाट्यां हिंसासन्तानयोरपीति मेदिनी। प्रयोगतः=अभिनयतः। नाटयितव्या=अभिनेतव्या। नेपथ्येति=नेपथ्यस्य वेशस्य रचना करणं धारणमिति यावत्। सा नेपथ्यरचना। ताम्। आकल्पो वेशो नेपथ्यं प्रतिकर्म प्रसाधनमित्यमरः। आवर्जितानि=आनमितानि=आकृष्टानि इत्यर्थः। सकलसामाजिकानाम्=सकलाश्च सामाजिकाश्चेति ते। तेषाम्। रचतीति

(४।४।२२) समवायान् समवैतीति (४।४।४३) वा ठक्। समाजं रत्नानि तं वा समवयन्तीति। रत्नावली=अभेदोपचारेण ताच्छब्द्यलाभाद् अभिधानलक्षणत्वाञ्च रत्नावलीसम्बन्धिनी नाटिका रत्नावलीति कथ्यते। ननु अधिकृत्य कृते ग्रन्थइति (४।३।८७) कस्यचित् तद्धितस्योत्पत्तिः। तस्यां तस्य लोपस्य दुर्घटत्वात्। Because रत्नावली, a female, is the subject matter, the work too is identified with the name As the word रत्नावली is of the nature of a name, it can very well be given to a book also This is the decision, in such cases, of the grammarians like हरदत्त, भट्टोजि &c.

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः॥

(১) শ্রীহর্ষ নিপুণ কবি। এই সভাও গুণগ্রাহিণী। জগতে বৎসরাজ চরিত্রও মনোহর। আমরাও অভিনয়ে দক্ষ। অতএব এস্থলে প্রত্যেক বস্তুই অভিলষিত বিষয়লাভের উপায়স্বরূপ। তাহাতে আবার আমার ভাগ্যবৃদ্ধিহেতু গুণনিচয় একত্র সমবেত হইয়াছে।

(2) *Sriharsha* is a skilful poet. This assembly is also appréciative. The character of the king of *Batsha* is also interesting and we too are experienced in acting. So each of these is quite enough for the obtainment of the desired result. What more (can be desired) when all points of excellence are combined owing to my preponderating luck ?

(3) श्रीहर्षो निपुणः कविः। एषा परिषदपि गुणग्राहिणी। वत्सराज-चरितञ्च लोके हारि। वयञ्च नाट्ये दक्षाः। इह एकैकमपि वस्तु वाञ्छितफलप्राप्तेः पदम्। किं पुनः मद्भाग्योपचयादयं सर्वो गुणानां गणः समुदितः।

(4) श्रीहर्षो निपुणः कुशलः कविर्वर्णयिता। एषा परिषीदन्ति जना अस्यामिति परिषत्। सदिरप्रतेरिति षत्वम्। संसत्र गुणानां ग्राहिणी .नन्दिग्रहिपचादिभ्यो ल्यु णिन्यच इति णिनिः। गुणबोधवती। वत्सानां राजा वत्सराजः। राजाहः॰ सखिभ्यष्टजिति टच् समासान्तः। तस्य चरितं चरित्रञ्च लोके भुवने। लोकस्तु भुवने जन इत्यमरः। हारि मधुरम्। वयञ्च नाट्ये अभिनये दक्षाः प्रवीणाः। अत इह एकैकं प्रत्येकं नित्यवीप्सयोरिति द्वित्वे एकं बहुव्रीहिवदिति (८।१।९) सुब्लोपादिकम्। अपि वस्तु विषयो वाञ्छितस्याभिलषितस्य फलस्य प्राप्तेर्लाभस्य पदं स्थानम्। पदं व्यवसितस्थानत्राणलक्ष्माङ्घ्रिवस्तुष्वित्यमरः। किं पुनर्मम भाग्यस्य भागधेयस्य उपचयाद्वृद्धेर्हेतोः अयं सर्वो गुणानां गणः समूहः समुदितः समुपस्थितः। अतः सर्वः सर्वथा सुकरः सुसाध्यश्च भविष्यतीत्यर्थः।

(5) श्रीहर्षस्य कवित्वमव्याहतम्। सभास्थिताः परिदर्शकाश्च गुणग्रहण-क्षमाः। उदयनवार्त्ता अस्माकं क्रतिता च सम्यक् परिज्ञाता। यत्र एकोपि गुण इष्टफलप्रदाने समर्थस्तदा सर्वेषां संमुदये वाञ्छासिद्धिः सर्वथैव भवितव्येति तत्र कः सन्देहः।

(6) परिषत्—परि + सद + क्विप्। सीदति। ससाद। सत्ता। सत्स्यति। सीदतु। असीदत्। सीदेत्। सद्यात्।° असदत्। असत्स्यत्। सन्नः। सत्तुम्। सत्त्वा। सीदत्। सद्यते। असादि।

ग्राहिणी—ऋन्नेभ्यो ङीबिति ङीप्। The words derived with affixes from which ऋकार disappears and the words with न at the end, take ङीप् in the feminine gender. ग्राहिन् + ङीप्।

एकैकम्—If the word एक be doubled, it will be as if in the बहुव्रीहिसमास; so the सुप् of the previous part vanishes and संहिता is compulsory.

समुदितः—सम् + उत् + इण् + क्तः। एति। इयाय। एता। एष्यति। एतु। ऐत्। इयात्। ईयात्। अगात्। ऐष्यत्। ईयते। अगायि। अगासातां ग्रामौ देवदत्तेन। इतः। एतुम्। इत्वा। यत्।

(7) प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता इत्यमरः।

(8) श्रीहर्षेण निपुणेन कविना (भूयते)...परिषदा एतया गुणग्राहिण्या... हारिणा वत्सराजचरितेन...दचैरस्माभिः...वस्तुना एकैकेन पदेन...अनेन सर्वेण गणेन समुदितम् (वा समुदितेन भूयते)।

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) अत्र समुच्चयो नामालङ्कारः। लक्षणं हि—तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करो भवेत्। समुच्चयोऽसौ सत्वन्या युगपद् या गुणक्रियेति।

(11) अत्र प्ररोचना नाम नाटकीयमङ्गम्। तस्य स्वीकरणं तत्र प्रशंसातः प्ररोचनेति लक्षणात्।

तद्यावद् गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि। (परिक्रम्य नेपथ्याभिमुखमवलोक्य च।) इदमस्मदीयं गृहम्। यावत् प्रविशामि। (प्रविश्य) आर्ये, इतस्तावत्।

(प्रविश्य)

नटी—अज्जउत्त, इयम्हि। आणवेदु अज्जो को णिओ-ओ अणुचिट्ठिअदुत्ति। (क)

सूत्रधारः—आर्ये, रत्नावलीदर्शनोत्सुकोऽयं राजलोकः। तद् गृह्यतां नेपथ्यम्।

नटी—(निश्वस्य सोद्वेगम्) अज्जउत्त, णिच्चिन्तो दाणिं सि तुमम्। ता कीस ण णच्चसि। मह मन्दभाआए उण एक्का जेव्व दुहिदा। सा वि तुए कहिंपि देसंतरे दिण्णा। कहं ता एव्वं दूरदेसट्ठिदेण जामातुणा सह से

पाणिग्गहणं भविस्सदि त्ति इमाए चिन्ताए अप्पा वि ण मे पडिभादि। किं उण णच्चिदव्वम्। (ख)

सूत्रधारः—आर्य्ये दूरस्थेनेत्यलमुद्वेगेन। पश्य

(क) आर्य्यपुत्र इयमस्मि। आज्ञापयत्वार्य्यः को नियोगोऽनुष्ठीयतामिति।

(ख) आर्य्यपुत्र, निश्चिन्त उदासीनसि त्वम्। तत् कस्मान्न नृत्यसि। मम पुनर्मन्दभाग्याया एकैवं दुहिता। सापि त्वया क्वापि देशान्तरे दत्ता। तदेवं दूरदेशस्थितेन भर्त्रा सह कथं तस्याः पाणिग्रहणं भविष्यतीत्यनया चिन्तयात्मापि मे न प्रतिभाति। तत् किं पुनर्नर्तितव्यम्।

---

(১) অতএব এখন গৃহে যাইয়া গৃহিণীকে আহ্বান পূর্ব্বক সঙ্গীতের অনুষ্ঠান করি। এই আমাদের গৃহ। প্রবেশ করি। (প্রবেশ) আর্য্যে এখন এখানে আসিতে হইবে।

নটী।—(প্রবেশ-পূর্ব্বক) আর্য্যপুত্র, এই আসিতেছি। আর্য্য, আজ্ঞা করুন কি আদেশ অনুষ্ঠান করিতে হইবে।

সূত্রধার—ভদ্রে এই রাজগণ রত্নাবলীদর্শনোৎসুক। অতএব বেশ গ্রহণ কর।

নটী।—(নিশ্বাস ত্যাগ ও উদ্বেগের সহিত) আর্য্যপুত্র আপনি এখন নিশ্চিন্ত আছেন। অতএব কেন নাচিবেন না? মন্দভাগিনী আমার কিন্তু একটী মাত্র কন্যা। তাহাও আপনা কর্ত্তৃক কোনও ভিন্ন দেশে দত্তা হইয়াছে। অতএব এইরূপ দূরদেশ-স্থিত পতির সহিত কি প্রকারে তাহার পাণিগ্রহণ হইবে এই চিন্তাতে আমার আত্মা হতবুদ্ধি হইয়াছে। অতএব আমি আবার কিরূপে নৃত্য করিব?

সূত্রধার—ভদ্রে দূরস্থিতিহেতু উদ্বেগের প্রয়োজন নাই—দেখ—

(2) So now going home I call my wife for a song. This is my house. I enter. (Entering) My dear, come here.

Actress—(Entering) Love, I am come; please to direct what is to be done.

Manager—My well-behaved dear, these princes are curious for beholding the performance of the Ratnabali. So put on your dress.

Actress—Husband, you are now without any care. So why will you not dance? But unfortunate as I am, I have only one daughter. She too is betrothed by you in a distant country. So my mind is not at ease, almost with the care as to how she will be married to a bridegroom at such a distance. How can I therefore dance?

Actor—My dear, no use of being anxious because of distance. See—

(3) सङ्गीतकम्=वादित्रादिसमन्वितं गानम्। संज्ञायां कन्। अनुतिष्ठामि =आरभे। आयदीयम्—आयद+छ:। वृद्धाच्छ इति छ:। The word with the first vowel आ, ऐ or औ take छ (i.e. ईय) after them in certain meanings, देशान्तरे=अन्यो देश: देशान्तरं तस्मिन्। भिन्नदेशे।· मधुरव्यंसकादयश्चेति तत् पुरुष:। दत्ता=वाग्दत्तेत्यर्थ:।, प्रतिभाति=स्फुरति =प्रवुद्धो भवतीति यावत्।

नर्त्तितव्यम्=नृत्+तव्य:। भावे। नृत्यति। ननर्त्त। नर्त्तिता। नर्त्तिष्यति नर्त्स्यति। नृत्यतु। अनृत्यत्। नृत्येत्। नृत्यात्। अनर्त्तीत्। अनर्त्तिष्यत् अनर्त्स्यत्। नृत्यते। अनर्त्ति। नृत्तम्। नर्त्तितुम्। नर्त्तित्वा।

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूत:॥

(1) দৈব প্রসন্ন হইলে অন্যদ্বীপ হইতে বা সমুদ্রমধ্য হইতে অথবা দিগন্ত হইতেও আনিয়া শীঘ্র অভিমত বস্তু ঘটাইয়া থাকে।

(2) If the fate be propitious, it can unite one with the desired object, bringing it even from another island or from the middle of the ocean or from the end of the quarters.

(3) विधिरभिमुखीभूत: अन्यस्मादपि द्वीपात् जलनिधेरपि मध्यात् दिशोऽपि अन्तात् आनीय झटिति अभिमतं घटयति।

(4) विधिर्दैव मभिमुखीभूत: प्रसन्न: सन् अन्यस्मादपरस्माद् द्वीपात् अपि जलनिधे: समुद्रस्यापि मध्यात् दिश आशाया अपि अन्तात् सीमाया: आनीय झटिति द्रुतम् अभिमत मुद्दिष्टं वस्तु घटयति मेलयति।

(5) प्रसन्नं दैवं सर्व्वमप्यलभ्यं घटयितुं समर्थम्।

(6) अभिमुखीभूत:=अभिमुख+च्वि+भू+क्त:। अभिगती मुखमभिमुख:। अनभिमुख: अभिमुख: सम्पद्यमानो भूत: अभिमुखीभूत:।

(7) दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर् विधिरित्यमरः। द्राग्झटित्यञ्जसाह्नाय सपदि द्राक् मङ्क्षु च द्रुतमित्यमरः।

(8) घट्यते विधिना अभिमुखीभूतेन......।

(9) आर्य्या नाम जातिच्छन्दः। यस्याः पादे प्रथमे द्वादशमात्रा तथा तृतीयेपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्येति लक्षणात्।

(10) अप्रस्तुतप्रशंसालङ्कारः। अभिमुखभूतेन विधिना अभिमतस्य घटनारूपाप्रस्तुतवर्णनेन प्रस्तुतस्य सूत्रधारकन्याया वरस्य दूरदेशादानयनसम्भावनायास्तथा-नायिकायाश्च रत्नावल्याः समुद्रमध्यादानयनस्यावगतेः। उक्तञ्च अप्रस्तुतात् प्रस्तुतचेद् गम्यते पञ्चधा ततः अप्रस्तुतप्रशंसा स्यादिति।

(नेपथ्ये) साधु भरतपुत्र साधु। एवमेतत्। कः सन्देहः (द्वीपादित्यादि पठति)।

सूत्र। (आकर्ण्य नेपथ्याभिमुखमवलोक्य) आर्य्ये किमतःपरं विलम्बसे। नन्वयं मम यवीयान् भ्राता गृहीतयौगन्धरायणभूमिकः प्राप्त एव। तदेहि वयमप्यनन्तरकरणीयवेशग्रहणेनापरभूमिकया सज्जीभवाम। (इति निष्क्रान्तौ)। इति प्रस्तावना।

(1) (নেপথ্যে) সাধু রে নট, সাধু। ইহা এইরূপই বটে। সন্দেহ কি? (দ্বীপ হইতে ইত্যাদির পুনঃ পাঠ।)

সূত্রধার—(শুনিয়া নেপথ্যের দিকে দৃষ্টিপাত পূর্ব্বক) ভদ্রে অতঃপর বিলম্ব করিতেছ কেন? ভাল, এই আমার ছোট ভাই যৌগন্ধরায়ণের বেশ গ্রহণপূর্ব্বক প্রায় উপস্থিত। অতএব এস, আমরাও অতঃপর কার্য্যানুরূপবেশ দ্বারা অপরনটভাবগ্রহণ-পূর্ব্বক সজ্জীভূত হই। (নিষ্ক্রান্ত।) ইতি প্রস্তাবনা।

(2) (Within) Well said, O actor, well said. This is really so. There is no doubt in it. (Repeats "from another Island &c.")

Manager—(Listening and looking into the dressing room) My dear, why do you delay after this? Well, my younger brother, just

after putting on the dress of the minister, is almost come. So come along. We two also shall be ready by wearing the dresses of others, suitable to the subsequent performance (Exeunt).

THE END OF THE PROLOGUE.

(3) भरतपुत्र=भरतप्रणीतशास्त्रोपजीविक=नट इति यावत्। जाया-जीवी भरतो नट इति हलायुधः। यवीयान्=कनीयान्=युवन्+ईयसुन्। स्त्रियां यवीयसी वा कनीयसी। गृहीतेति=गृहीता यौगन्धरायणस्य भूमिका वेशो येन स तथोक्तः=अवलम्बितयौगन्धरायणवेशः। युगन्धरस्यापत्यं पुमान् यौगन्धरायणः। नडादिभ्यः फगिति फक् (४।१।९९)। फकारस्यायन्नादेशः (७।१।२)। भूमिका रचनायां स्याद् वेशान्तरपरिग्रहे इति मेदिनी। प्राप्तः=उप-स्थितः। अनन्तरकरणीयवेशग्रहणेन=परवर्त्तिकार्य्यानुरूपनेपथ्यावलम्बनेन। अपर-भूमिकया=वेशान्तरेण। इति प्रस्तावना।

विष्कम्भकः।

(ततः प्रविशति हृष्टो यौगन्धरायणः।)

यौगन्धरायण :—एवमेतत्। कः संदेहः (द्वीपादिति पुनःपठित्वा) अन्यथा क्व सिद्धादेशजनितप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे यानभङ्गनिमग्नायाः फलकासादनम्। क्व च कौशाम्बीयेन वणिजा सिंहलेभ्यः प्रत्यागच्छता तदवस्थायाः संभावनम्। रत्नमालाचिह्नायाः प्रत्यभिज्ञानादिहानयनं च। (सहर्षम्) सर्वथा स्पृशन्ति नः स्वामिनमभ्युदयाः। (विचिन्त्य) मयापि चैनां देवीहस्ते सगौरवं निक्षिपता युक्तमेवानुष्ठितम्। श्रुतं च मया बाभ्र-

व्योऽपि काञ्चुकी सिंहलेश्वरामात्येन वसुभूतिना सह कथं-कथमपि समुद्रादुत्तीर्य्य कोसलोच्छित्तये गतवता रुमण्वता मिलित इति। (तदेवं निष्पन्नप्रायमपि प्रभुप्रयोजनं न मे धृतिमावहतीति कष्टोऽयं खलु भृत्यभावः।)

(১) যৌগন্ধরায়ণ—(হর্ষের সহিত প্রবেশ)—ইহা এই প্রকারই বটে। সন্দেহ কি? (দ্বীপ হইতে ইত্যাদির পুনঃ পাঠ) তাহা না হইলে সিদ্ধাজ্ঞাজনিতবিশ্বাসহেতু প্রার্থিতা, সমুদ্রে যানভঙ্গনিমগ্না সিংহলরাজকন্যার কাষ্ঠখণ্ড প্রাপ্তিই বা কোথায়, আর কৌশাম্বীনিবাসী সিংহলহইতে প্রত্যাগমনকারী বণিক্‌কর্ত্তৃক তাহার তদবস্থায় প্রাপ্তিই বা কোথায়? (উভয়ই সর্ব্বথা অসম্ভাবিত।) আর রত্নমালা-চিহ্ণ সেই কন্যার পরিচয় ও পশ্চাৎ বৎসদেশে আনয়নই বা কোথায়? অভ্যুদয় সকল প্রকারেই আমাদের প্রভুকে স্পর্শ করিতেছে। এই সিংহলরাজতনয়াকে রাজ্ঞীর হস্তে সসম্মানে নিক্ষেপ করিয়া আমিও উপযুক্তই অনুষ্ঠান করিয়াছি। আমি আরও শুনিয়াছি যে কঞ্চুকী বাভ্রব্য সিংহলরাজমন্ত্রী বসুভূতির সহিত অতি কষ্টে সমুদ্র হইতে উত্তীর্ণ হইয়া কোশলবিনাশার্থ গমনকারী রুমণ্বানের সহিত মিলিত হইয়াছে। অতএব প্রভুপ্রয়োজন প্রায় নিষ্পন্ন হইয়াও আমার সন্তোষ উৎপাদন করিতেছে না। ভৃত্যভাব যথার্থই দুঃখকর।

(2) Minister—(entering joyfully) This is so.—There is no doubt; (repeats "from an island &c.) otherwise how strange and improbable is the obtainment of a piece of wood in the ocean by the daughter of the King of Ceylon, who was drowned by ship-wreck, having been asked in marriage (for the king of *Batsha*) owing to implicit faith in the prediction of a sage and then her being overtaken by a merchant of *Kausambhi* returning from Ceylon. So being recognised by the necklace of pearls, she was brought here!! Prosperity reaches our master in every respect. I too have done well in respectfully presenting this daughter of the king of Ceylon to the queen. Besides, I hear that our chamberlain with the minister of Ceylon, after escaping with much difficulty from the ocean, has joined our general who went to invade *Kosal*. So,

almost all the desired objects for our master are accomplished Still it does not bring content to me. How hard is the lot of a servant !

(3) सिद्धादेशजनितप्रत्ययप्रार्थितायाः = सिद्धस्य संप्राप्तदैवसाक्षात्कारस्य जनस्य (अथवा देवयोनिविशेषस्य। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनय इत्यमरः) आदेशेन य इमामुपयंस्यते स सार्वभौमो भविष्यतीत्येवंरूपेण कथनेन जनित उत्पादितो यः प्रत्ययो विश्वास स्तेन प्रार्थितायाः याचितायाः। यानभङ्गनिमग्नायाः = यानस्यार्णवपोतस्य भङ्गेन निमग्नायाः जलपतितायाः। नि + मस्ज् + क्त + टाप्। तस्याः। मज्जति। ममज्ज मङ्क्ष्यति। अमाङ्क्षीत्। मज्ज्यते। अमज्जि। मङ्क्तुम्। मङ्क्त्वा मक्त्वा। प्रवहणभङ्गनिमग्नाया इति पाठे प्रोह्यतेऽनेनेति करणे ल्युट्। तस्य यानस्य भङ्गेन निम्नं गच्छतीति तथोक्ता। तस्याः। अत्र षष्ठी शेषे। अन्यथा फलकासादन मित्यत्र कर्मणि चेत्युभयप्राप्तौ समासो न स्यात्। एवञ्च नचापि वेदाध्ययनं दुरात्मनामिति बहुवर्णाति सर्गात्त्वित्यादौ बोध्यम्। कौशाम्बीयेन = कौशाम्बी निवासः अस्येति वृद्धाच्छ इति (४-२-११४) छः। कौशाम्बी was the capital of वत्स। कुशाम्बेन निर्वृत्तेति तेन निर्वृत्तमित्यण्। (४।२।६८)। It was built, according to the रामायण, by कुशाम्ब son of कुश and was a city near the modern Allahabad. फलकासादनम् = फलकस्य काष्ठखण्डस्यासादनम् प्राप्तिः। वणिजा = सार्थवाहेन। संभावनम् = समादरः संसर्गः मेलनमितियावत्। रत्नमालाचिह्नायाः = रत्नानां माला चिह्नं यस्याः सा तथोक्ता तस्याः। प्रत्यभिज्ञानात् = अवगमनात् = अवबोधात्। कोशलोच्छित्तये = कोशलानामुच्छित्तिः विनाशस्तस्यै। उत् + छिद + क्तिन् = उच्छित्तिः। छिनत्ति छिन्ते। चिच्छेद चिच्छिदे। छेत्स्यति-ते। अच्छैत्सीत् अच्छिदत् अच्छित्त। छिन्नम्। छिन्दत् छिन्दानम्। छित्त्वा। छेत्तुम्। छिद्यते। अच्छेदि। क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी। कोशलोच्छित्तिं कर्तुमिति। Some including जयमङ्गल assert तुमर्थाच्च भाववचनात् in such cases to account

for चतुर्थी। cf:—कारका. मित्रकार्य्याणि सीतालाभाय सोऽब्रवीद् इति भट्टि: (७।२९)। But मल्लिनाथ and others appear to make a distinction here reserving the latter Rule for the cases where the चतुर्थ्यन्त words are not compounded, हरिदीक्षित proceeds farther, assigning this Rule to the cases where by the substitution of तुमुन्, no other words are liable to change. So in such cases as द्विषां विघाताय विधातुमिच्छत: (भारवि), he adduces तादर्थ्ये चतुर्थी (vide मन्दरव)। कोशल=modern province of Oudh. कोशलशब्दो दन्त्यमध्यश्च। रुमण्वता=रुमण्वानिति नामधेयेन वत्सराजसेनापतिना। सहयुक्ते प्रधाने इति तृतीया। रुमण्वत् is derived by लवण + मतुप् under 8. 2. 12 आसन्दीवदित्यादि। संज्ञायां निपात्यते। अथवा रुमन् + मतुप्। नलोपाभावो णत्वञ्च। संज्ञाभावे लवणवान् रुमवान् वा। धृतिर्नेष्टौ स्त्रियां तुष्टौ योगभिद्‌धैर्यधारणे इति मेदिनी। आवहति=जनयति। कथं कथमपि=गरीयसा कष्टेन। कथमादि तथाप्यन्तं यत्नगौरवबाढ़योरित्युज्ज्वल:। द्वौ कथंशब्दौ सर्वथाऽसम्भावितघटनं सूचयत:। निष्पन्नप्रायम्=निष्पन्नस्य प्रायं तुल्यम्। प्रायो भरणानशने मृत्यौ बाहुल्यतुल्ययोरिति मेदिनी। निष्पन्नम्=निर् + पद् + क्त:। वात् पदान्तादिति न णत्वम्।

प्रारब्धेऽस्मिन् स्वामिनो वृद्धिहेतौ
दैवेनेत्थं दत्तहस्तावलम्बे।
सिद्धे भ्रान्तिर्नास्ति सत्यं तथापि
स्वेच्छाचारी भीत एवास्मि भर्त्तु:॥

(1) সিদ্ধবাক্যে ভ্রান্তি নাই সত্য, তথাপি দৈব কর্ত্তৃক এইরূপে দত্তসাহায্য স্বামীর অভ্যুদয়ের হেতুভূত এই রত্নাবলী প্রাপ্তিরূপ কার্য্য তাঁহার অজ্ঞাতাবস্থায় করিয়া স্বেচ্ছাচারী আমি প্রভুর ভয়ে ভীত আছি বটে।

(2) Though it is true that there can be no error in the prophet, I am afraid of my master, having acted independently though, for the work which will be the root of his prosperity and which has thus been helped by fate.

(3) सिद्धे भ्रान्तिर्नास्ति सत्यम्। तथापि दैवेन इत्थं दत्तहस्तावलम्बे स्वामिनो वृद्धिहेतौ अस्मिन् प्रारम्भे स्वेच्छाचारी भर्तुर्भीत एवास्मि।

(4) सिद्धे अलौकिकसामर्थ्ये जने भ्रान्तिर्भ्रमः नास्ति इति सत्यं यथार्थं तथापि दैवेन विधिना इत्थमनेन प्रकारेण समुद्रपतनाद्रक्षणादिना दत्तो हस्तावलम्ब आश्रयो यस्मिन् स तथोक्तस्तस्मिन् अर्पितकराश्रये स्वामिनो वत्सराजस्य वृद्धेरभ्युदयस्य हेतौ कारणे अस्मिन् प्रारभ्यते इति प्रारम्भः। अकर्तरि च कारके संज्ञायामिति घञ्। रभेरशब्लिटोरिति नुम्। तस्मिन् कर्मणि रत्नावलीलाभरूपे विषये इत्यर्थः। स्वस्य इच्छयाचरणमाचरतीति णिनिः स्वेच्छाचारी भर्तुरनिवेद्य रत्नावलीलाभार्थं यतमान इत्यर्थः। सन् भर्तुः प्रभोर्वत्सराजात्। भीत्रार्थानां भयहेतुरिति पञ्चमी। भीतः शङ्कित एव अस्मि भवामि। अनादिष्टत्वात् कोपोद्रेकसंभावनयेत्यर्थः।

(5) सिंहलराजदुहितुः समुद्रपतनेन फलकासादनेन, पश्चात् अत्रागमनेन च दैवेनैव अस्मत्स्वामिनः साहायकं कृतम्। तस्याः प्राप्तौ वत्सराजस्य उन्नतिर्भविष्यतीति सिद्धस्य वाक्ये यद्यपि सन्देहो नास्ति तथापि प्रभोरादेशं विनैव पूर्वं तस्मै अनाख्याय च सर्वमनुतिष्ठता मया शङ्कितेनैव भूयते।

(6) इत्थम्=इदम्+थमु। भीतः=भी+क्तः। बिभेति। बिभाय, बिभयाम्—आस्—चकार,—बभूव। भेष्यति। अभैषीत्। भीत्वा। भेतुम्। बिभ्यत्। भीयते। अभायि। सिद्धे सेत्स्यति अस्मिन् प्रारम्भे भ्रान्तिर्नास्तीति केचित्। तत्र—सिद्धे इत्यवाशंसायां भूतवच्चेति (३।३।१३२) भविष्यदर्थे क्तः। तथाच भवत्कृतां भूतिमपेक्षमाणा इति भारविः (१।४९)। भवता करिष्यमाणामित्यर्थः। सौमित्रे मामुपायंस्था इत्यत्र यथा वर्त्तमाने।

(8) ...भ्रान्त्या न भूयते...भृत्येन...स्वेच्छाचारिणा भीतेन...भूयते।

(9) शालिनी नाम वृत्तम्। मात्तौ गौ चेच्छालिनी वेदलोकैरिति लक्षणात्,

the order of the गण is म—त—तग—ग and the यति is after वेद (fourth vowel) and thence लोक (Seventh vowel).

(10) अत्र स्वेच्छाचारित्वेन मदमिति काव्यलिङ्गमलङ्कारः। हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमिति लक्षणात्।

(11) आरम्भो नाम नाटकीयावस्था दर्शिता। औत्सुक्यमात्रमारम्भः फललाभाय भूयसे इति लक्षणात्। कः सन्देह इत्यादिना प्रारब्धं सिद्धिमित्यन्तेन वत्सराजस्य रत्नावलीप्राप्तिहेतुरनुकूलदैवो यौगन्धरायणव्यापारः नाटकीयबीजरूपेण न्यस्तः।

(12) स्वेच्छाकारीति दशरूपकधृतः पाठः।

(नेपथ्ये कलकलः)

(आकर्ण्य।) अये, मधुरमभिहन्यमानमृदुमृदङ्गानुगतसंगीतमधुरः पुरः पौराणामुच्चरति चर्चरीध्वनिः। तथा तर्कयामि यदेनं मदनमहमहीयांसं पुरजनप्रमोदमवलोकयितुं प्रासादाभिमुखं प्रस्थितो देव इति। (ऊर्द्धमवलोक्य।) अये, कथमधिरूढ़ एव देवः प्रासादम्। य एष

(1) (নেপথ্যে কল কল শুনিয়া)—আহা তাড্যমান মৃদঙ্গসঙ্গতসঙ্গীতমনোহর পৌরদিগের চর্চরী শব্দ উচ্চারিত হইতেছে। অতএব বোধ হইতেছে এই কামোৎসবমহীয়ান্ পৌরজনপ্রমোদ দর্শনের জন্য রাজা প্রাসাদের দিকে গমন করিতেছেন। (উর্দ্ধে দেখিয়া) এই যে মহারাজ প্রাসাদে আরোহণ করিয়াছেন। এই তিনি—

(2)—(Noise within—listening) O, the sweet notes of the people mixed with songs to the sound of soft tabours gently played upon, are heard. I think the king is going to the palace in order to see their grand amusements in honour of the festival of the god of love. (Looking up) O, the king has gone up on the roof of the palace. And—

(3) मधुरेति=मधुरं मनोहरम् अभिहन्यमानस्य ताड्यमानस्य मृदोः कोमलस्य मृदङ्गस्यानुगतमनुरूपं यत् सङ्गीतं तदिव मधुरम्। उपमानानि सामान्यवचनैरित्यु-

पमान तत्पुरुषः। पौराणां नगरस्थानां जनानां चर्चरी एवध्वनिः शब्दः। चर्चरी गीतिविशेषः।

"द्रुतमध्यलयं समाश्रिता पठति प्रेमभरान्नटी यदि।
प्रतिकण्ठप्रपूरकैव वा द्रुतमध्यप्रकृता हि चर्चरी॥"

इति लक्षणात्। करशब्द इति केचित्। मृदङ्गा मुरजा इत्यमरः। (Drums or tabours.) पुरः=अग्रतः। उच्चरति=उद्गच्छति। उदश्चरः सकर्म-कादिति न तङ्। अकर्मकत्वात्। तथा=अतः। तर्कयामि=मन्ये मन्यया-मीतियावत्। अततर्कत्। मदनेति=मदनस्य कामस्य महेन उत्सवेन महीयांसं गरीयांसम्। मदनमहीयांसमिति पाठे कामेन गरीयांसमित्यर्थः। मह उद्धव उत्सव इत्यमरः। मह उत्सवतेजसोरिति मेदिनी। महत्+ईयसुन्=महीयस्। तम्। द्विवचनविभज्योपपदे तरबीयसुनावितीयसुन्। The affixes तरप् and ईयसुन् are joined to the words when comparison between two is understood। स्त्रियां महीयसी। प्रासादाभिमुखम्=प्रासादस्य सौधस्य अभिमुखं समीपम्। प्रासादो देवभूभुजां सौधोऽस्त्री राजसदन-मित्यमरः। प्र+सद+घञ्=प्रासादः। उपसर्गस्य घञ्यमनुष्ये बहुलमिति दीर्घः। अर्थान्तरे प्रसादः। प्रस्थितः=चलितः। अभिहन्यमानस्य=अभि+हन्+कर्मणि शानच्। हन्ति। जघान। हन्ता। हनिष्यति। हन्तु। अहन्। हन्यात्। वध्यात्। अवधीत्। अहनिष्यत्। हतम्। घ्नत्। हन्तुम्। हत्वा। हन्यते। अवधि अघानि।

विश्रान्तविग्रहकथो रतिमाञ्जनस्य
चित्ते वसन् प्रियवसन्तक एव साक्षात्।
पर्युत्सुको निजमहोत्सवदर्शनाय
वत्सेश्वरः कुसुमचाप इवाभ्युपैति॥

तद्यावदहमपि गत्वा कार्यशेषं चिन्तयामि। (इति निष्क्रान्तः।)

इति विष्कम्भकः।

(১) বিগ্রহকথাশূন্য (যুদ্ধবার্ত্তারহিত ও রণকথাশূন্য) রতিমান্ (প্রেমিক ও রতিসমন্বিত), জনচিত্তনিবাসী (প্রজারঞ্জনশীল ও লোকমনোভব), প্রিয়বসন্ত, সাক্ষাৎ কুসুমচাপের ন্যায় বৎসরাজ পর্য্যুৎসুক হইয়া নিজমহোৎসবদর্শনের জন্যই আসিতেছেন। অতএব আমি গৃহে যাইয়া অবশিষ্ট কার্য্য চিন্তা করি। (নিষ্ক্রান্ত)। ইতি বিষ্কম্ভক।

(2) After the war talk has ceased, that loving king, dear to his people and like the god of love incarnate, beloved of his boon companion (*Basantaka*) is coming, as it were, to see his own festival, being full of zeal. I too go home and meditate on what is to be done (exit) (The end of the prelude).

(3) विश्रान्तविग्रहकथः रतिमान् जनस्य चित्ते वसन् प्रियवसन्तकः साक्षात् कुसुमचापइव वत्सेश्वरः पर्य्युत्सुकः निजमहोत्सवदर्शनाय एव अभ्युपैति।

(4) विश्रान्ता निरस्ता विग्रहस्य युद्धस्य पक्षे कायस्य कामस्यानङ्गत्वात् कथा आलापः पक्षे वृत्तान्तः यस्य स तथोक्तः। विग्रहो युधि विस्तारे प्रविभागशरीरयोरिति हेमचन्द्रः। रतिमान् प्रणययुक्तः पक्षे सभार्य्यः। रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोरिति मेदिनी। जनस्य लोकस्य चित्ते मनसि वसन् तिष्ठन् सन् प्रजारञ्जनात् पक्षे मनसिजत्वात्। साक्षात् मूर्त्तिमानेव प्रियो वसन्तो मधुः पक्षे वसन्तकनामधेयो विदूषको यस्य स तथोक्तः। शेषाद्विभाषेति बहुव्रीहौ पक्षे कप् समासान्तः। कुसुमं चापो यस्य स मदन इव। अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चवाणस्य सायका इति प्रसिद्धेः। वत्सेश्वरः उदयनः पर्य्युत्सुकः कुतूहलयुक्तः सन् निजस्य स्वानुष्ठितस्य कामपक्षे आत्मनो महोत्सवस्य प्रधानोत्सवस्य दर्शनाय अवलोकनाय एवेति अवधारणे। महांश्चासौ उत्सव इति महोत्सवः। आन्महतः समानाधिकरणजातीययोरित्यात्वम्। अभ्युपैति आगच्छति)।

(5) रणकथा समाप्ता। रागवान् वत्सराजः काम इव आत्ममहोत्सवदर्शनायैव आयाति।

(6) प्रियवसन्तक:=वा प्रियस्येति वक्तव्यात् बहुव्रीहौ प्रियशब्दस्य वा पूर्वनिपात:। अभ्युपैति=अभि+उप+इण्+लट् तिप। एत्येधत्यूठ्स्विति वृद्धि:। i. e. in उप+एति the Rule एङि पररूपम् intervenes and therefore the aforesaid special Rule which means if अवर्ण is followed by the roots इण् and एध beginning with एकार or the आदेश ऊठ्, वृद्धि i. e. ऐ or औ as the case may be, shall take place.

निजमहोत्सवदर्शनाय—तादर्थ्ये चतुर्थी वाच्येति चतुर्थी। As to तुमर्थाच्च भाववचनात्, vide the note above. Some say that this वार्त्तिक is an interpolation and accordingly they give for निमित्तार्थे चतुर्थी the ज्ञापक सूत्र given in the चतुर्थीसमास viz :—चतुर्थी तदर्थार्थबलिहित सुखरक्षितै:।

(8) विश्रान्तविग्रहकथेन रतिमता...वसता प्रियवसन्तकेन...पर्य्युत्सुकेन वत्सेश्वरेण...कुसुमचापेन...अभ्युपेयते।

(9) वसन्ततिलकं वृत्तम्। ज्ञेयं वसन्ततिलकं तभजा जगौ ग इति लक्षणात्। The order of the गण is त-भ-ज-ज-ग-ग in each line.

(10) उपमालङ्कार:। साधर्म्यमुपमा भेदे इति लक्षणात्।

इति विष्कम्भक:।

प्रथमोऽङ्कः।

(ततः प्रविशत्यासनस्थो गृहीतवसन्तोत्सववेषो राजा विदूषकश्च)

राजा—(सहर्षमवलोक्य) सखे वसन्तक।

विदूषकः—आणवेदु भवं। (क)

राजा—राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः॥

(क) आज्ञापयतु भवान्।

প্রথমাঙ্ক—রাজপ্রাসাদ। পশ্চাৎ উদ্যান।

(আসনস্থ ও গৃহীতবসন্তোৎসববেশ রাজা ও বিদূষকের প্রবেশ।)

রাজা—(সহর্ষে অবলোকনপূর্ব্বক) সখে বসন্তক!

বিদূষক—কি আদেশ, মহারাজ।

রাজা—রাজ্য নির্জ্জিতশত্রু সমস্ত কার্য্যভার উপযুক্ত মন্ত্রীতে সংস্থাপিত। সকলোপদ্রবশূন্য প্রজা উৎকৃষ্ট পালনে পরিপোষিত। প্রদ্যোতের কন্যা, বসন্ত সময়, ও তুমি (অথবা প্রদ্যোতের কন্যা ও বসন্তকালের ন্যায় আচরণশীল তুমি) বিদ্যমান। অতএব নাম দ্বারাই কাম, পর্য্যাপ্ত সন্তোষ লাভ করুন। আমি কিন্তু এই মহান্ উৎসবকে আমারই উৎসব মনে করিতেছি।

(2)—(Act I—Scene 1)—(The palace—then a garden.)

(Enter the king and the jester seated and with garments fit for Spring festival).

King—(Looking joyfully) Friend Basantaka !

Jester—Please to command your majesty.

K.—My kingdom is rid of all enemies. All works have been entrusted to the able minister. My subjects with their difficulties removed, are prosperous under good control. I have now Pradyota's daughter, yourself and Spring (or yourself with spring-like behaviour). So let the God of love be fully satisfied with the name (only) of this festival. But it is, as I consider, really mine.

(3) राज्यं निर्जितशत्रु । समस्तो भरः योग्यसचिवे न्यस्तः । प्रशमिताशेषोपसर्गाः प्रजाः सम्यक्पालनलालिताः । प्रद्योतस्य सुता वसन्तसमयः त्वञ्च इति नाम्ना कामः धृतिं काममुपैतु । अयं पुनर्मम महानुत्सवः (इति) मन्ये ।

(4) राज्यं मच्छासनायत्ता भूमिः । निर्जिताः पराभूताः शत्रवो रिपवो यस्मिन् तत् निर्जितशत्रु विध्वंसितरिपु । समस्तः सकलो भरो भारः योग्यसचिवे उपयुक्तमन्त्रिणि यौगन्धरायणे न्यस्तः निक्षिप्तः । प्रशमिता निवारिता अशेषाः समस्ता उपसर्गा उपद्रवा यासां तास्तथोक्ताः । प्रजाः प्रकृतयः जना इति यावत् । सम्यक् साधु पालनं तेन लालिताः पोषिताः । उपसर्गः पुमान् रोगभेदोपद्रवयोरपीति मेदिनी । प्रद्योतस्य प्रद्योत इतिनामधेयस्य उज्जयिनीराजस्य सुता वासवदत्ता । वसन्तस्य समयः कालश्च त्वञ्च विद्यमानः । यद्वा वसन्तस्य ऋतुविशेषस्य समय आचार इव समयो यस्य स तथोक्तः । समयः शपथाचारकालसिद्धान्तसंविद इत्यमरः । इतिहेतोः कामो मदनो नाम्ना नाममात्रेणैव धृतिं सन्तोषं कामं पर्य्याप्तमुपैतु लभताम् । अयं पुनः किन्तु मम महान् विपुलः उत्सवः मह इति मन्ये गणयामि । यतोऽयमुत्सवः कामस्य नाम्ना-वारब्धस्ततः स प्रीणातु । कार्य्यतस्तु ममैवायं सर्वथोल्लासकरः । राज्यादीनां निर्वृतत्वादिति भावः ।

(5) निष्कण्टकमाधिपत्यम्। योग्योऽमात्यश्च न्यासनिरत:। विघ्नहीना: प्रकृतय: सम्यक्पालनवर्द्धिता:। वासवदत्ता त्वं वसन्तसमयश्च। अत: काममहोत्सव इति नाम्नैव कामस्तुष्यतु। अयन्तु ममैवोत्सव:। सर्वथा सुखमयत्वात्।

(6) राज्यम्—राजन्+यक्। पत्यन्तपुरोहितादिभ्यो यगिति (५।१।१२८) यक्। न स्तद्धित इति (६।४।१४४) टिलोप:। If followed by a तद्धित affix, टि of भ (i. e. अपदान्त part of a base) vanishes. Though the term literally means राज्ञो भाव: कर्म वा, it indicates kingdom—स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ तथा सुहृत्। सप्तैतानि समस्तानि लोकेऽस्मिन् राज्यमुच्यते इति मनु:।

योग्यसचिवे=योग्यश्च सचिवश्चेति कर्मधारय:। तस्मिन्। युज्+ण्यत्= योग्य:। ऋहलोर्ण्यत् इति (3. 1. 28) ण्यत्। चजो: कु घिण्ण्यतोरिति कुत्वम्। ण्यत् is added to the roots ending in हल् or ऋवर्ण in the कृत्याधिकार। The affixes dropping घ and the affix ण्यत् alter च and ज into क and ग respectively in the roots.

न्यस्त:=नि+अस्+क्त:। समस्त:=सम्+अस्+क्त:। अस्यति। आस। असिष्यति। आस्यत्। अस्त:। अस्त्वा असित्वा। असितुम्। अस्यत्। अस्यते। आसि। सम्यक्=सम्+अञ्च्+क्विन्=सम्यच्। Then, पदान्ते सम्यक्। चो: कुरिति कुत्वम्। क्रियाविशेषणम्। सत्यं तथ्यमृतं सम्यगित्यमर:।

वसन्तसमय:—वसन्तश्च समयश्चेति कर्मधारये विशेषणं विशेष्येण बहुलमित्यत्र (२।१।५७) बहुलग्रहणात् तक्षक: सर्प: इतिवन्न समासप्रसङ्ग:। तथापि मलयाद्रि: व्याकरणशास्त्रं तर्कविद्या कैलासपर्वत: शिंशपावृक्ष इत्यादि बहुप्रयोगदर्शनात् कथञ्चिदयं सोढव्य:। अथवा वसन्तनिर्दिष्टो समय इति शाकपार्थिवादीनां सिद्धये चोत्तरपदलोपश्चेति वक्तव्यात् तत्पुरुष:। तथाच—"अथ जयाय नु मेरुमहीभृत इति भारवि: (५।१)। स देवदारुद्रुमवेदिकायामिति कालिदास:। एतानि बिभ्रति मुरारिकवेर्वचांसीति मुरारि:। अब्धब्राह्मणशङ्कारपादपादिति हरदत्त:। तत् सर्व्वं जयदेवपण्डितकवे: कृष्णैकतानात्मन इति जयदेव:। The grammarians have no

easy way of asserting कर्मधारय in such words as शिंशपावृक्ष: कैलासपर्व्वत: &c.—as भाष्यकार has opposed it by stating कथं तर्हीमौ द्वौ प्रधानशब्दौ एकस्मिन्नर्थे युगपदवरुध्येते ? वृक्ष: शिंशपेति ? नैतयोरावश्यक: समावेश: । नह्यवृक्ष: शिंशपास्ति ।" वृत्तिकार also opposes such समास—"क्वचिन्न भवत्येव । रामो जामदग्न्य: । विशेषणमिति किम् ? तक्षक: सर्प: । विशेष्येणेति किम् ? लोहितस्तक्षक: ।" Though subsequent commentators argued off the objection, the case stands still, in absence of the support from मुनित्रय, as of doubtful accuracy. As for the poets, निरङ्कुशा: कवय: । If वसन्तसमय: be taken as an adjective to त्वम्, the समास is of course under सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्चेति वक्तव्यम् ।

(7) मन्त्री सहाय: सचिव इत्यमर: ।

(8) राज्ये न निर्जितशत्रुणा । ...न्यस्तेन समस्तेन भारेण.. लालिताभि: प्रशमिताशेषोपसर्गाभि: प्रजाभि: । ...सुतया...वसन्तसमयेन त्वया...धृति: कामेन... उपेयताम् । अनेन...मन्यते...महता उत्सवेन ।

(9) शार्दूलविक्रीडितं वृत्तम् ।

(10) अत्र निर्जितशत्रुत्वादिहेतुत्वात् काव्यलिङ्गालङ्कार: । सच समुच्चयानप्राणित: ।

(11) अनेन श्लोकेन नायकस्य धीरललितत्वं प्रकटितम् ।

विदूषक:—(सहर्षम्) भो वअस्स, एव्वं णेदं । अहं उण जाणामि ण भवदो ण कामदेवस्स मम ज्जेव्व एक्कस्स बम्हणवड्डअस्स अअं मअणमहुस्सवो । जस्स किदे पिअवअस्सेण एव्वं मंतीअदि । (विलोक्य) ता किं इमिणा । पेक्ख पेक्ख दाव इमस्स महुमत्तकामिणीजणसअंगहगहिदसिंगकजलप्पहारणच्चंतणाअरजणजणिदकोदूहलस्स समंतदो

मच्छंदमंथुलोद्दामचच्चरीसद्दमुहररत्थामुहसोहिणो पइण्णपड-वासपुंजपिंजरिददहदिसामुहस्स सस्सिरीअदं मअणमहस्स-वस्स । (क)

(क) भो वयस्य एवमिदम्। अहं पुनर्जानामि न भवतो न कामदेवस्य ममैव एकस्य ब्राह्मणबटोरयं मदनमहोत्सव: यस्य कृते प्रियवयस्येन एवं मन्यते। तत् किमनेन प्रेचस्व प्रेचस्व तावद् अस्य मधुमत्तकामिनीजन-स्वयंग्रहगृहीत-शृङ्गकजलप्रहार-नृत्य-न्नागरजन-जनितकौतूहलस्य समन्तत: स्वच्छन्दमन्थरोद्दाम-चर्चरीशब्दमुखर-रथ्यामुख-शोभिन: प्रकीर्ण-पटवासपुञ्ज-पिञ्जरित-दशदिङ्मुखस्य सश्रीकतां मदनमहोत्सवस्य।

(1) বিদূষক। (সহর্ষে) ওহে বয়স্য, তা বটে। আমি কিন্তু জানি আপনারও নহে, কামদেবেরও নহে, যাহার জন্য আপনি এরূপ বলিতেছেন তাহা কেবল এক ব্রাহ্মণকুমার আমারই মহোৎসব। (দর্শনপূর্ব্বক) যাক ইহাতে কি? দেখুন দেখুন মদমত্তকামিনীজনকর্ত্তৃক স্বয়ং গৃহীত পিচ্‌কারী জলের আঘাতে নর্ত্তনকারী নাগরজন-কর্ত্তৃক উদ্দীপিত হয়, চারিদিকে পর্য্যাপ্ত গম্ভীর চর্চরী (গীতিবিশেষ বা হস্ত) শব্দ দ্বারা শব্দায়মান-বত্ম-প্রারম্ভে মনোহর, প্রক্ষিপ্তপীতচূর্ণরাশিদ্বারা দশদিক্ পীতকারী, মদন-মহোৎসবের কি শোভা!

(2) Jester—(joyfully) O friend, this is just so. But I know this festival of which you are thus speaking, is neither yours nor of the god of love but only of myself who am a Brahmin boy. (Seeing) But let it go. See, see now the beauty of this amorous festival full of pleasure created by the city people who are dancing, having been struck with water through syringes willingly taken up by the females excited with wine, and which appears excellently at the junctions of the streets full of noise of the songs (or clapping) discordant, loud and profuse and in which the ten quarters have been made yellow-coloured, with the scattered mass of fragrant yellow dust.

(3) ब्राह्मणवटुकस्य=ब्राह्मणबालकस्य। मन्त्र्यते=भाल्प्यते। मधुविति=मधुना मद्येन वसन्तेन वा मत्तस्य कामिनीनां जनस्य स्वयमात्मना ग्रहेण अवलम्बनेन गृहीतस्य शृङ्गकस्य जलनिक्षेपयन्त्रस्य जलस्य प्रहारेण नृत्यद्भिः नागरैर्जनैर्जनितमुत्पादितं कौतूहलं हर्षो यस्मिन् स तथोक्तस्तस्य। कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलमित्यमरः। स्वयंग्रहः सुप्सुपेति समासः। ग्रह्+अप्=ग्रहः। ग्रह वृद्दनिश्चिगमश्चेत्यप् (३।३।५८)। ग्राहइति पाठे गृह्णातीति ग्राहः। विभाषा ग्रह-इति वैकल्पिको णः (३।१।१४३)। कविप्रयोगात् कथञ्चित् नास्य जलचरे रूढ़िः स्वीकर्त्तव्या। तथाहि कण्ठे स्वयंग्राहनिषक्तबाहुमिति कुमारे। समन्ततः=सर्वतः। स्वच्छन्देति=स्वच्छन्देन पर्य्याप्तेन मध्यरेण मन्देन तथा दाम्नो बन्धनादुद्गतः उद्दामा तेन। निरादयः क्रान्ताद्यर्थे पञ्चम्येति वक्तव्यात् प्रादितत्पुरुषः। उच्छृङ्खलेन अनियमोद्गतेनेत्यर्थः। चर्चरीशब्देन गीतिविशेषध्वनिना (करशब्देन वा) मुखरं शब्दायमानं रथ्यायाः मार्गस्य मुखं प्रारम्भः तस्मिन् शोभमानस्य। उद्दाम बन्धरहिते स्वतन्त्रे च प्रचेतसीति मेदिनी। स्वच्छन्दमर्दलोद्दामेति पाठे स्वच्छन्दस्य पर्य्याप्तस्य मर्दलस्य वाद्यविशेषस्येत्यर्थः। स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रह इत्यमरः। शृङ्गकम्=शृङ्गमिव शृङ्गकम्। संज्ञायां कन्। शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके इति मेदिनी। प्रकीर्णेति—प्रकीर्णेन प्रक्षिप्तेन पटवासस्य पिष्टातकस्य पुञ्जेन राशिना पिञ्जरितानि पीतानि दश दिशां मुखानि यस्मिन् स तथोक्तस्तस्य। पिञ्जरितानि—पिञ्जरः पीतः सञ्जात एषामिति तारकादित्वादितच्। तारकादेराकृतिगणत्वात्। पिञ्जरोऽश्वान्तरे पीते क्लीवं स्वर्णे च पीतन इति मेदिनी। पीतनं हरितालमित्यर्थः। पिष्टातः पटवासक-इत्यमरः।

सश्रीकताम्=शोभाम्। श्रिया सह वर्त्तमानः सश्रीकः। शेषाद्विभाषेति कप्। तस्य भावः तथा ताम्।

राजा। (सहर्षं समन्तादवलोक्य) अहो परां कोटिमधिरोहति प्रमोदः पौराणाम्। तथाहि—

कीर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमक्षोदगौरै-
र्हेमालङ्कारभाभिर्भरनमितशिरः शेखरैः कैङ्किरातैः ।
एषा वेशाभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोषा
कौशाम्बी शातकुम्भद्रवखचितजनेवैकपीता विभाति ॥

(১) রাজা (সহর্ষে চারিদিকে অবলোকন পূর্ব্বক)—অহো পৌরদিগের আহ্লাদ অত্যন্ত উৎকর্ষ প্রাপ্ত হইতেছে। যেহেতু—

দিবসপ্রারম্ভতুল্যকারী কুঙ্কুমচূর্ণবদ্ গৌর, বিক্ষিপ্ত পীত চূর্ণরাশি ও স্বর্ণালঙ্কারদীপ্তি এবং কিঙ্কিরাতপুষ্পগ্রথিত ভারাবনমিতশিরশ্চূড়া দ্বারা একমাত্র পীতবর্ণা এই পরিচ্ছদা-নুমেয়স্ববিত্তনির্জ্জিতকুবেররত্নাগারা কৌশাম্বী যেন স্বর্ণদ্রবমণ্ডিতলোকযুক্তা হইয়া শোভা পাইতেছে।

(2) King—(Looking joyfully on all sides)—O the delight of the people is rising to the highest point, since—

This *Kousambi* which exceeds the treasures of *Kubera* (or of rich men) as guessed from her apparels, is entirely turned yellow like the dawn, by scattered mass of saffron-like yellow-dust and also by the brightness of the golden ornaments and the crowns made of Amaranths which stoop down by the burden of their fore parts and thus she appears as if her inhabitants are besmeared with golden liquid.

(3) कृतदिवसमुखैः कुङ्कुमक्षोदगौरैः कीर्णैः पिष्टातकौघैः हेमालङ्कारभाभिः कैङ्किरातैर्भरनमितशिरः शेखरैः एकपीता एषा वेशाभिलक्ष्यस्वविभवविजिताशेष-वित्तेशकोषा कौशाम्बी शातकुम्भद्रवखचितजनेव विभाति ।

(4) पराम् = अत्यन्ताम् । कोटिम् = उत्कर्षम् । कोटिरुत्कर्षसंख्ययो-रिति हलायुधः । अधिरोहति लभते । प्रमोदः = उल्लासः । कीर्णैरिति । कृतं प्रापितं दिवसस्य मुखं प्रारम्भः प्रातरित्यर्थः यैस्ते तथोक्ता स्तैः प्रापितप्रातःसमय शोभैः पीतीकृतदिङ्मण्डलैरित्यर्थः । कुङ्कुमानां काश्मीरजानां क्षोदैः रजोभिः गौरैः पीतैः । गौरः श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपीति हेमचन्द्रः । कीर्णैर्विक्षिप्तैः

पिष्टातकानां सद्गन्धपीतचूर्णविशेषाणाम् श्रोघैः समूहैः। हेमनिर्मितानामलङ्काराणां भाभिर्दीप्तिभिः। किङ्किरातानां कुरण्टकानां पीतपुष्पविशेषाणामित्यर्थः। किङ्किरात मुदितं कुरण्टकमिति हलायुधः (A Species of Amaranth) सम्बन्धिभिः किङ्किरातपुष्पग्रथितैः। भरेण भारेण नमितानां शिरसा शेखरैः शिखाभिः अग्रभागैरिति यावत्। शिखास्यापीडशेखराविल्यमरः। एका केवला च पीता च एकपीता। एके मुख्यान्यकेवला इत्यमरः। एषा वेशैः परिच्छदैरभिलक्ष्यो निर्णयः स्वो विभव ऐश्वर्यं तेन विजितः अतिक्रान्तः अशेषः समस्तः वित्तेशस्य कुवेरस्य (अथवा वित्तेशानां धनिनां) कोषो रत्नागारं यया सा तथोक्ता। कौशाम्बी इयं राजधानीत्यर्थः। शातकुम्भस्य सुवर्णस्य द्रवेण खचिता लिखिता जना नरा यत्र सा तथोक्ता स्वर्णद्रवमण्डितलोका इव। विभाति चकास्ति शोभतइति यावत्।

(5) पिष्टातकादिभिः सर्वत्र पीतत्वमापद्यमाना कौशाम्बी हेमद्रवशोभितजनेव दीप्यते।

(6) कैङ्किरातैः—किङ्किरात+अण्। तैः। तस्य इदमित्यण्।

(7) चूर्णः क्षोद इत्यमरः। क्षुद+घञ्। क्षुणत्ति क्षुन्ते। चक्षोद चुक्षोद। क्षोत्ता। क्षोत्स्यति-ते। क्षुणत्तु क्षुन्ताम्। अक्षुणत् अक्षुन्त। क्षुन्द्यात् क्षुन्दीत। क्षुद्यात् क्षुत्सीष्ट। अक्षौत्सीत् अक्षुत्त अक्षुदत्। अक्षोत्स्यत्-त। क्षुद्यते। अक्षोदि। क्षुषम्। क्षुन्दत् क्षुन्दानम्। क्षोत्तुम्। क्षुत्त्वा। शातकम्भं सुवर्णं स्यात् शातकुम्भोऽश्वमारक इति मेदिनी। अश्वमारकः करवीरकइत्यर्थः। कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोरित्यमरः।

(8) एतया...कौशाम्ब्या...जनया...एकपीतया विभायते।

(9) स्रग्धरा वृत्तम्।

(10) उत्प्रेक्षालङ्कारः। सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यदितिलक्षणात्।

अपि च।

धारायन्त्रविमुक्तसंततपयःपूरप्लुते सर्वतः

सद्यः सान्द्रविमर्दकर्दमकृतक्रीडे क्षणं प्राङ्गणे।

उद्दामप्रमदाकपालनिपतत्सिन्दूररागारुणैः
सैन्दूरीक्रियते जनेन चरणन्यासैः पुरः कुट्टिमम् ॥

(১) আরও—চারিদিকে জলনির্গম যন্ত্রনির্গত অবিচ্ছিন্ন জলপ্রবাহ দ্বারা আর্দ্রীকৃত এবং এ সময়ে ঘনবিমর্দ্দনজাত কর্দ্দম দ্বারা কৃতক্রীড় প্রাঙ্গণে লোকগুলি সম্মুখস্থিত বদ্ধভূমিকে স্বাধীন রমণীগণের কপালচ্যুতসিন্দূররঞ্জিত চরণক্ষেপ দ্বারা ক্ষণকালের জন্য সিন্দূরবর্ণ করিতেছে।

(2) Moreover, while the courtyard is flooded with constant flow of water from water pipes on all sides and made muddy with constant walking in sports, the people are reddening the front pavements with their feet coloured with redlead falling from the foreheads of the unrestrained women.

(3) सर्वतः धारायन्त्रविमुक्तसन्ततपयःपूरप्लुते सद्यःसान्द्रविमर्द्दकर्द्दमकृतक्रीडे प्राङ्गणे पुरः कुट्टिमम् उद्दामप्रमदाकपालनिपतत्सिन्दूररागारुणैश्चरणन्यासैर्जनेन क्षणं सैन्दूरीक्रियते ।

(4) सर्वतः समन्ताद्धाराणां सलिलस्रवाणां यन्त्रेण जलनिर्गमयन्त्रेणेत्यर्थः । सन्ततो निरन्तरो यः पयसां पूरः प्रवाहस्तेन प्लुते आर्द्रीकृते प्लुते इति वा पाठः । तथा सद्यः तत्क्षणे सान्द्रो घनो निविड़ इति यावत् यो विमर्द्दो मर्द्दनं तेन यः कर्द्दमः पङ्कस्तेन कृता क्रीड़ा यस्मिन् तत् तथोक्तं तत्र । प्राङ्गणे चत्वरे । पुरः अग्रतः । कुट्टिमं बद्धभूमिः । उद्दामानः स्वतन्त्रा या प्रमदास्तासां वारवनितानामित्यर्थः । कपालेभ्यः शिरोऽस्थिभ्यः । कपालोऽस्त्री शिरोस्थि स्याद् घटादेः शकले व्रजे इति मेदिनी । निपततां सिन्दूराणां रागेण लौहित्येन अरुणैः रक्तैश्चरणानां न्यासैर्विक्षेपैर्न्यस्तचरणैः इत्यर्थः । अनेन लोकेन क्षणं स्वल्पकालं निर्व्यापारस्थितौ कालविशेषोत्सवयोः-क्षणइत्यमरः । सिन्दूरेण रक्तं सैन्दूरं तेन रक्तं रागादित्यण् (४।२।१) । असैन्दूरं सैन्दूरं क्रियते सैन्दूरीक्रियते । अभूततद्भावे च्विः ।

(5) समन्तात् कृत्रिमप्रस्रवणनिर्गतनिरन्तरसलिलप्रवाहपूर्णे तत्क्षणं गाढ़-मर्द्दितपङ्कविहितक्रीड़े चत्वरे पुरो बद्धभूमिः 'स्वतन्त्ररमणीशिरोस्थिस्खलत्सिन्दूर-

रञ्जितपादविन्यासैः लोकेन अङ्गीक्रियते। धारायन्त्र-(water pipes) निर्गतेन जलेन परिप्लुते पाददलनोत्पन्नेन कर्दमेन कृतक्रीड़े प्राङ्गणे या बद्धभूमि रासीत् ताम् उद्दामसमतानां रमणीनां कपोलच्युतसिन्दूररञ्जिता लोहितैश्चरणैर्जनाः सिन्दूरवर्णां चक्रुः।

(6) सन्ततः=सम+तम्+क्तः। पक्षे सततः। लुम्पेदवश्यमः कृत्ये तुम्, काममनसोरपि। समो वा हिततत्तयोर्मांसस्य पचियुड्घञोरिति। i. e., if कृत्यप्रत्यय i. e. तव्य, तव्यत्, अनीयर्, क्यप्, यत्, or ण्यत् &c. follows, the last letter of अवश्यम् is to be dropped ; if काम or मनस् follows that of तुम् is to be dropped. If हित or तत, that of सम् and if युड़न्त or घञन्त पच् follows the last letter of मांस is to be dropped प्लुत—प्लुङ् गतौ भ्वादिः। प्लवते। पुप्लुवे। प्लोष्यते। अप्लोष्ट। प्लूयते। अप्लावि। प्लवमानम्। प्लोतम्। प्लुत्वा। प्लुतम्। प्लुते इति पाठे। प्लौति। पुप्लाव। अप्लावीत्। प्लविष्यति। प्राङ्गणं—प्र+अगि+ल्युट्। तस्मिन्। पूर्वपदात् संज्ञायामगइति णत्वम्। प्राङ्गणं चत्वराजिरे इत्यमरः। The word has a technical meaning and hence इत्यादिः सत्रुमः being a नियम सूत्र does not obstruct its णत्व। Neither does the prohibition अगः prevail here ; the meaning of the Rule as it stands in the सिद्धान्तकौमुदी is misleading, either through an oversight or misprint, as अग qualifies पूर्वपदात्। Besides अगः is rejected by पतञ्जलि।

(7) पूरो जलसमूहे स्यात् व्रणसंशुद्धिखाद्ययोरिति मेदिनी। घनं निरन्तरं सान्द्रमित्यमरः। चित्रादिरञ्जकद्रव्ये लाक्षादौ प्रणयेच्छयोः। सारङ्गादौ च रागः स्यादारुण्ये रञ्जने पुमानिति शब्दार्णवः। कुट्टिमं बद्धभूमिकमिति हलायुधः। A tesselated pavement, कपाल:—This word appears to mean here forehead ;—but in Sanskrit if it be used in that sense the rhetoricians call it the ग्राम्यतादोष as it does not mean

ललाट or भाल. So some read here कपोलनिपतत् i. e. falling from cheeks—अमरसिंह gives "स्यात् कर्परः कपालोऽस्त्री"। हेमचन्द्र—कपालं कुष्ठकभेदे घटादिशकले गणे। शिरोऽस्थनि। हलायुध gives "शिरसोऽस्थि करोटिः स्यात् कपालं शकलञ्च तत्"।

(8) .. सैन्दूरीकरोति जनः।

(9) शार्दूलविक्रीड़ितं वृत्तम्।

विदू। (विलोक्य) एदं पि दाव सुविअड्ढजणपूरिद-सिंगकजलप्पहारमुक्कसिक्कारमणोहरं वारविलासिणीविलसिदं आलोएदु पिअवअस्सो। (क)

राजा। (विलोक्य) वयस्य सम्यक् दृष्टं त्वया।—कुतः

(क) इदमपि तावत् सुविदग्धजनापूरितशृङ्गकजलप्रहारमुक्तशीत्कारमनोहरं वारविलासिनीविलसितमालोकयतु प्रियवयस्यः।

(1) विदूषक—(दर्शनपूर्ब्बक) এই রসিকজনপূরিত জলযন্ত্র (পিচকারি) জলাঘাত মুক্ত-সীৎকার মনোহর, বেশ্যাগুলির ক্রীড়া ও প্রিয়বয়স্য অবলোকন করুন।

রাজা—(দর্শনপূর্ব্বক) বয়স্য বেশ দেখেছ। কেননা—

(2) Jester—(Looking) Dear friend, look also at the sports of the harlots, which are charming owing to the hissing sound produced by the strokes of water from syringes filled by the gallants.

King—(Looking) you have seen well, friend, since.—

(3) सुविदग्धेति=सुविदग्धैः रसिकैर्जनैरापूरितस्य शृङ्गकस्य जलप्रहारयन्त्रस्य जलस्य प्रहारेण निर्गतो यः सीत्कार स्तेन मनोहरं मनोज्ञं वारविलासिनीनां वेश्यानां विलसितं क्रीड़ाम्। विदग्धश्छेकउच्यत इति हलायुधः। i.e. a shrewd clever, knowing person. is छेक। छेको गृहाश्रितमृगपक्षिणोर्नागरे विचिन्ति मेदिनी। So by "नागर" a libertine also is indicated. This meaning is traced from the implication of a domesticated

bird or beast. cf. :—गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते इत्यमरः।
Hence विदग्ध is a नागर who is somewhat like a cat after having burnt (दग्ध) its paws.

अस्मिन् प्रकीर्णपटवासकृतान्धकारे
दृष्टो मनाङ्मणिविभूषणरश्मिजालैः।
पातालमुद्यतफणाकृतिशृङ्गकोऽयं
मामद्य संस्मरयतीव भुजङ्गलोकः॥

(1) বিক্ষিপ্ত-পিষ্টাতক-কৃতান্ধকার এই স্থানে, রত্নালঙ্কারদীপ্তিসমূহ দ্বারা কিঞ্চিৎ দৃষ্ট, উদ্যতফণাকৃতিশৃঙ্গক, কামুক লোক (পক্ষে সর্পগণ) আমাকে অদ্য পাতাল স্মরণ করাইতেছে।

(2) These libertines raising up their syringes like the hoods of snakes, being seen slightly through the brightness of their adorning gems in this place darkened by the scattered powders, are making me to-day remember the nether world.

(3) प्रकीर्णपटवासकृतान्धकारे अस्मिन् मणिविभूषणरश्मिजालैर्मनाक् दृष्टः उद्यतफणाकृतिशृङ्गकः अयं भुजङ्गलोकः अद्य मां पातालं संस्मरयतीव।

(4) प्रकीर्णैर्विक्षिप्तैः पटवासैः कृतः अन्धकारः तमो यस्मिन् तत् तथोक्तं तस्मिन् अस्मिन् स्थाने इति शेषः। विक्षिप्तपिष्टातककृततिमिरे। मणयः रत्नानि एव विभूषणानि अलङ्कारास्तेषां रश्मीनां किरणानां जालैः समूहैः। जालं गवाक्ष आनाये जालके कपटे गणे इति यादवः। रत्नालङ्कारकिरणसमूहैः। मनाक् अल्पं दृष्टः अवलोकितः उद्यतानि फणाकृतिरिव आकृतिर्येषां तानि फणाकृतीनि शृङ्गकानि अम्बुयन्त्राणि येन स तथोक्तः। उत्तोलितभोगसदृशजलनिक्षेपयन्त्रः। अयं भुजङ्गानां विलासिनां सर्पाणाञ्च लोकः गणः। भुजङ्गः सर्पविड्गयोरिति हेमचन्द्रः। वेश्यापतिर्भुजङ्गः स्याद्विटः पल्लवकः स्मृत इति हलायुधः। कामुकजनः पक्षे सर्पगणः। अद्य मां पातालं संस्मरयतीव।

(5) कामुकैः पटवासचेपेण सर्वं तमसावृतं जातम्। अन्धकारत्वात् शृङ्गकीणां फणाकारत्वाच्च स्थानमिदं पातालमिव मे प्रतिभाति।

(6) संस्मरयति = सम् + स्मृ + णिच् + लट् तिप्। स्मृ आध्याने इति मित्त्वात् ह्रस्वः। अन्यत्र स्मारयति। आध्यानमुत्कण्ठापूर्वकं स्मरणम्। असस्मरत्। अणिजन्ते स्मरति। सस्मार। स्मरिष्यति। अस्मार्षीत्। स्मर्यते। अस्मारि। स्मृतम्। स्मर्तुम्। स्मृत्वा। माम्—गतिबुद्धीत्यादि सूत्रे (१।४।५२) दृशेश्चेति वार्त्तिकात् सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणम्। न तु ज्ञानविशेषार्थानामिति ज्ञाप्यते। तेन स्मरति जिघ्रतीत्यादीनामणिजन्तकर्त्तुर्णिजन्ते कर्मत्वं न। अतएव भट्टोजिः स्मारयति घ्रापयति देवदत्तेनेत्युदाजहार। कथमत्रैव मामिति द्वितीया ? अवतु स्मृ आध्याने इत्यस्मात् घटादेर्णिरणाविति सूत्रे (१।३।६७) स्मरयत्येनं वनगुल्मः स्वयमेवेति भाष्यकार-प्रयोगप्रामाण्यात् कर्मत्वम्। तथाहि—यत्तु णेरणाविति सूत्रे स्मरयत्येनं वनगुल्मः स्वयमेवेत्युदाह्रियते तद् भाष्यप्रयोगादेव कर्मत्वं बोध्यम् इति प्रौढमनोरमा। "आध्यानार्थकघटादिभिन्नस्मरतेरेव योगे तद्भाष्यप्रामाण्यात् कर्मत्वाभावो घटादेस्तु भवत्येव कर्मत्वमिति शब्दरत्ने हरिदीक्षितः। "स्मरयत्येनं वनगुल्म इत्यत्र तु णेरणाविति सूत्रे भाष्यप्रयोगादेव कर्मत्वं बोध्यमिति तत्त्वबोधिनी। *i. e.* Since भाष्यकार in 1. 3. 67 allows प्रयोज्य कर्म्म to स्मरयति *viz*. स्मरति वनगुल्मं कोकिलः—स्मरयति एनं *i.e.* कोकिलं वनगुल्मः स्वयमेव), the root स्मृ when meaning आध्यान may have its अणिकर्त्ता as कर्मकारक in its णिजन्त state. Otherwise there is an objection to द्वितीया in माम् here. तृतीया ought to have been used. For, in the Rule गतिबुद्धि &c. (1. 4. 52) the वार्त्तिक "दृशेश्च" indicates that the word बुद्धि does not include any special kind of perception. So स्मरण, घ्राण &c. are not comprised in it. Therefore माम् ought to have been मया। दुर्गादास asserts "गुरुः शिष्यं श्लोकं स्मारयति।" एवञ्च स्मरणमपि ज्ञानविशेषः। But we have shewn above that भट्टोजि and others go against this opinion. श्रीपति includes ईक्षणादि under बोधार्थ।

आर्क्षयति नूपुरशिञ्जितानि क्रीड़ारम्। ईर्ष्ययति विभ्रमं लीकान्। प्रापयति च्छावमामोदम्। But कैयट and हरदत्त are of different view.

(8) हष्टेन—पातालमुद्यत् फणाकृति गङ्गकेयानेनाङ्गं संमर्थ्ये भुजङ्गलोकेन। This use of द्वितीया in माम् in the active, presents a difficulty as to the clear sense of the passage when attempted in the passive voice. For under the Rule "प्रयोज्य कर्मण्यन्येषां ण्यन्तानां लादयो मता" माम् changes into अहम् in the passive form and then संमर्थ्य gives rather a vague meaning.

(9) वसन्ततिलकं वृत्तम्।

(10) अत्र उत्प्रेक्षालङ्कारः। स च स्मरणालङ्कारोज्जीवितः। यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणमिति लक्षणात्।

विदू। (विलोक्य) भो वअस्स एसा क्खु मअणिआ मअणसरिसं वसन्ताभिणअं णच्चंती चूदलदिआए सह इदो जेव्व आअच्छदि त्ति अवलोअदु पिअवयस्सो। (क)

(क) भो वयस्य एषा खलु मदनिका मदनसदृशं वसन्ताभिनयं नृत्यन्ती चूतलतिकया सह इत एव आगच्छतीति अवलोकयतु प्रियवयस्यः।

(1) বিদূষক—(দর্শনপূর্ব্বক) হে সখে, এই মদনিকা বসন্তাভিনয়ে মদনতুল্য নাচিতে নাচিতে চূতলতিকার সহিত এস্থানে আগমন করিতেছে। অবলোকন করুন।

(2) Jester—(Looking) O dear friend see '*Madanika* is coming here with *Choota-Latika*, dancing just like the god of love in the festival of Spring.

(3) मदनसदृशम्=कामानुरूपम् यथातथा।

(ततः प्रविशतो मदनलीलां नाटयन्त्यौ द्विपदीखण्डं
गायन्त्यौ चेट्यौ ।)

मदनिका—(गायति)

कुसुमाउहपिअदूअओ मउलाइदबहुचूअओ ।
सिढिलिअमाणग्गहणओ वाअइ दाहिणपवणओ ॥
विअसिअवउलासोअओ कंखिअपिअअणमेलओ ।
पडिवालणअसमत्थओ भमइ जुवईसत्थओ ॥
इह पढमं महुमासो जणस्स हिअआइं कुणइ मिदुलाइं ।
पच्छा विज्झइ कामो लद्धप्पसरेहिं कुसुमबाणेहिं ॥ (क)

(क) कुसुमायुधप्रियदूतको मुकुलायितबहुचूतकः ।
शिथिलितमानग्रहणको वाति दक्षिणपवनकः ॥
विकसितबकुलामोदकः काङ्क्षितप्रियजनमेलकः ।
प्रतिपालनासमर्थको भ्राम्यति युवतिसार्थकः ॥
इह प्रथमं मधुमासो जनस्य हृदयानि करोति मृदुलानि ।
पश्चाद्विध्यति कामो लब्धप्रसरैः कुसुमबाणैः ॥

(১) (মদনলীলা অভিনয় ও দ্বিপদী খণ্ড গান করিতে করিতে
দুই দাসীর প্রবেশ ।)

মদনিকা—(গান) পুষ্পায়ুধের (কামের) প্রিয়দূত, আম্রমুকুল প্রকাশক ও মান-ভঙ্গবিধায়ক দক্ষিণ পবন বহিতেছে। বিকসিত বকুলের আহ্লাদক অভিলষিত-প্রিয়জন-সঙ্গম, যুবতিসমূহ ভ্রমণ করিতেছে। এখন চৈত্র মাস অগ্রে লোকের হৃদয় কোমল করে। পশ্চাৎ সুযোগে কাম পুষ্পবাণ দ্বারা বিদ্ধ করে।

(2) (Enter two maids acting amorously and singing love snatches.)

Madanika—(Singing) There is blowing the south wind which is the messenger of the god of love ; the bringer of blossoms of many

mangoe trees and remover of ill feelings. There are wandering the young females who create delight to the blossomed *Bakul* trees, who are desirous of union with their lovers and who are unable to wait. Here Spring makes first the heart of people soft and then the god of love getting an opportunity, pierces it with his flowery arrows.

(4) युवतिसार्थक:=युवतीनां सार्थः। समूहः। अनुकम्पायामिति कन् (५।३।७६)। एवं मन्यत्रापि। सार्थो वणिक्समूहे स्यादपि संघातमात्रके इति मेदिनी। लब्धप्रसरैः=प्राप्तावकाशैः।=to which an opportunity has been given—मधुमासः=चैत्रमासः वसन्त इति यावत्। स्याच्चैत्रे चैत्रिको मधुरित्यमरः। प्रतिपालनासमर्थकः=प्रतिपालनस्य वल्लभागमने अपेक्षाया असमर्थकः असहनः। काङ्क्षितप्रियजनमेलकः=अभिलषितः प्रियजनस्य मेलकः सङ्गमो येन सः। मेलकः सङ्गसङ्गमावित्यमरः। विकसितवकुलामोदकः=विकसितानां वकुलानां आमोदकः आह्लादकः। "पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति वकुलो मुखशीधुसिक्तः। आलोकितः कुरवकः कुरुते प्रकाशं आलोडितस्तिलक उत्कलिकां बिभर्तीति कविसमयसिद्धेः। आमोदक इति शेषषष्ठ्याः समासः। द्विपदीखण्डम्=गीतिविशेषम्। "भवेत् द्विपदिका गीतिर्भरतेन प्रकीर्तिता। पूर्वायतुर्भिश्चरणैस्त्रयोदशकलात्मिकेतिलक्षणयुक्ता द्विपदिका नाम गीतिः= Snatches of songs, called ठुंरी in Hindi. कला means मात्रा। चेट्यौ=दास्यौ।

(6) मुकुलायितः=मुकुलशब्दात् आचारार्थे क्यङ्। ततः प्रयोजके णिच्। ततः क्तः। मुकुल+क्यङ्=मुकुलाय, मुकुलाय+णिच्=मुकुलायि। लटि मुकुलाययति। क्यङन्तात् लटि तु मुकुलायते।

भ्राम्यति—वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलष इति (३।१।७०) कर्त्तरि वा श्यन्। तेन दिवादौ लटि भ्राम्यति। लुङि अभ्रमत्। भ्वादौ भ्रमति भ्रम्यति। लुङि अभ्रमीत्। भावे लुङि अभ्रमि। भ्रान्तः। भ्रमितुम्। भ्रान्त्वा भ्रमित्वा।

युवतिसार्थकः—यु+कनिन्=युवन्। युवा। यूनस्तिरिति (४।१।७७) स्त्रियां

तिप्रत्ययः युवन्+तिः=युवतिः। लिखितं युवतिर्नैपुण्यं तरीति कुमारी (८।१७)। युवतीति तु यौतेः शतृन्तात् ङीपि बोध्यम् इति मल्लीनाथः। ऋदिति ङीप् इति उज्ज्वलदत्तः। युवतीकरनिर्मथितं दधीति। विषविषमा मधुरा हि युवत्य इति च प्रयोगः। कथन्तर्हि यूनी काममयी दुर्गोति च मनो वैधव्यभावात्स्त्रू रिति। अमाधि-नीयम्। इतिकारो यूनस्तिरित्यत्र स्फुटमाह ङीपोऽपवाद इति। The statement of उज्ज्वलदत्त is of course, like that of माधव, based on the वार्त्तिक "सर्वतोऽक्तिन्नर्थादित्येके" otherwise ति is not a कृत् but a तद्धित प्रत्यय। जयादित्य obstructs the application of ऋन्नेभ्यो ङीप् by distinctly asserting ङीपोऽपवादः।· विध्यति—विव्याध। व्यद्धा। व्यत्स्यति। विध्यतु। अविध्यत्। विध्येत्। विध्यात्। अव्यात्सीत्। अव्यत्स्यत्। विध्यते। अव्याधि। विद्धम्। विध्यत्। व्यद्धुम्। विद्धा।

राजा—(निर्वर्ण्य।) अहो, मधुरोऽयमासां निर्भरः क्रीड़ारसः। तथाहि।

स्रस्तः स्रग्दामशोभां त्यजति विरचितामाकुलः केशपाशः
क्षीबाया नूपुरौ च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ।
व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीड़न्त्याः पीड़येव स्तनभरविनमन्मध्यभङ्गानपेक्षम्॥

(১) রাজা—(দর্শনপূর্ব্বক) আহা এই রমণীদের গাঢ় ক্রীড়ানুরাগ মনোহর বটে। আরও—স্তনভারবিনম্র শরীরমধ্যভাগ ভগ্ন হয় হউক, এবিষয়ে অপেক্ষাশূন্য হইয়া ক্রীড়াকারিণী এই মদনিকার ক্লেশ ঘটিতেছে হেতুই যেন স্রস্ত ও আকুল কেশসমূহ বিরচিত পুষ্পমাল্যসমূহের শোভাকে পরিত্যাগ করিতেছে। পাদলগ্ন নূপুরদ্বয় দ্বিগুণাধিক শব্দ করিতেছে—অনবরত কম্পনহেতু বিচলিত হার বক্ষে আঘাত করিতেছে।

(2) King—(Looking). O how sweet is the earnest attention of these women to the sports. Moreover—being entirely reckless about the breaking asunder of her waist stooping down by her

burdensome heaving breast, this intoxicated woman is playing in such a way that out of grief for her as it were, her scattered and dishavelled hairs have allowed the beauty of their garlands to fade away—and—her anklets are making more than double noise and her necklace owing to constant movement is striking against her breast.

(3) स्तनभरविनमन्मध्यभङ्गानपेक्षं क्रीडन्त्याः क्षीबाया अस्याः मदनिकायाः पीडया इव स्रस्तः आकुलः केशपाशः विरचितां स्रग्दामशोभां त्यजति। पादलग्नौ इमौ नूपुरौ च द्विगुणतरं क्रन्दतः। कम्पानुबन्धाद् व्यस्तः अयं हारः उरः हन्ति।

(4) निर्वर्ण्य—दृष्ट्वा। निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणमित्यमरः।

निर्भरः=अत्यन्तः। क्रीडारसः=क्रीडानुरागः। आसाम्=मदनिकादीनाम्। स्तनेति। स्तनयोः कुचयोर्भरेण भारेण विनमतः निम्नं गच्छतः मध्यस्य कटिदेशस्य भङ्गे द्विधाभवने नास्ति अपेक्षा भयमित्यर्थः यस्मिन् तत् तथोक्तम्। कुचभाराधोभवत् कटिभङ्गभयशून्यं यथातथा क्रीडन्त्याः खेलन्त्याः क्षीबायाः मत्ताया अस्या मदनिकायाः पीडया क्लेशेन हेतुना इव स्रस्तः विगलितः अतएव आकुलः क्षिप्तः केशपाशः शिरोरुहसमूहः। पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् पर इत्यमरः। विरचितां सम्बद्धां स्रजः पुष्पमालाया दाम्नः समूहस्य शोभां कान्तिं त्यजति परिहरति। तथा पादलग्नौ चरणस्थितौ इमौ नूपुरौ मञ्जीरौ द्विगुणतरं द्विगुणाधिकं क्रन्दतः ध्वनतः। कम्पस्य शरीरचालनस्य अनुबन्धादविच्छेदाद् व्यस्तः चलितः अयं हारस्य उरो वक्षो हन्ति प्रहरति।

(5) स्तनभारनतकटिदेशो भनक्तु नवेत्यगणयित्वा इयमित्थं क्रीडति यदस्याः क्लेशादिव विस्रस्तः केशकलापः कुसुमशोभाहीनः। नूपुरौ चाधिकतरं नादयुक्तौ। नियतचलनात् हारश्च वक्षसः प्रहारकः।

(6) स्रस्तः=स्रन्स्+क्तः। स्रंसते। सस्रंसे। स्रंसिष्यते। अस्रंसिष्ट अस्रसत्। स्रंसमानम्। स्रस्त्वा स्रंसित्वा। स्रंसितुम्। स्रस्यते। अस्रंसि। क्षीबायाः=क्षीब्+क्त=टाप्। तस्याः। षष्ठी शेषे। अनुपसर्गात्फुल्लक्षीब-

क्षमोशाघा इति (८।३।५५) निपातने। The word क्षीब is irregularly derived by क्त to the root क्षीब। क्षीबते। चिक्षीबे। अक्षीबिष्ट।

विगुणतरम्—विगुणशब्दात् तरप्। But the word विगुण has intensive meaning. So how can there be further comparison? Says the काशिका in 5. 3. 55—"यदाच प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्तादपरः प्रत्ययो भवत्येव।" and then quotes two illustrations one from the वेद *viz.*—"देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे।" and the other from the लौकिक Sanskrit "युधिष्ठिरः श्रेष्ठतमः कुरूणाम्।"

(7) मत्ते शौण्डोत्कटक्षीबा इत्यमरः। पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियामित्यमरः।

(8) असेन—शोभा त्यज्यते विरचिता आकुलेन केशपाशेन। नूपुराभ्याम् आभ्यां क्रन्द्यते पादलग्नाभ्याम्। व्यसेन उरः हन्यते हारेणानेन।

(9) स्रग्धरा वृत्तम्।

(10) उत्प्रेक्षालङ्कारः।

विदू। (सहर्षम्) भो वअस्स अहम्मि एदाणं वहुपरि-अराणं मज्झे णच्चन्तो गाअन्तो मअणमहूसवं सम्माणइस्सं। (क)

राजा। (सस्मितम्) वयस्य एवं क्रियताम्।

विदू। जं भवं आणवेदि। (इत्युत्थाय चेट्योर्मध्ये नृत्यति)। (ख) भोदि मअणिए भोदि चूदलदिए एदं चच्चरिं मम्पि सिक्खावेध।

मद। (विहस्य) हदास ण होदि एसा चच्चरी। (ग)

विदू। ता किं क्खु एदं। (घ)

(क) भो वयस्य अहमपि एतासां बद्धपरिकराणां मध्ये नृत्यन् गायन् मदनमहोत्सवं सम्मानयिष्यामि ।

(ख) यद्भवानाज्ञापयति । भवति मदनिके भवति चूतलतिके इमां चर्च्चरिकां मामपि शिक्षयतम् ।

(ग) हताश न भवति एषा चर्च्चरी ।

(घ) तत् किं खल्विदम् ।

(1) বিদূষক—(সহর্ষে) ওহে বয়স্য, আমিও এই বদ্ধপরিকর রমণীদের মধ্যে নাচিয়া ও গাইয়া কামমহোৎসবের সম্মান করিব।

রাজা—(সস্মিতে) বয়স্য, কর।

বি—আপনার যেরূপ আজ্ঞা (উত্থানপূর্ব্বক দাসীদ্বয়ের মধ্যে নর্ত্তন)। ওগো মদনিকে, ওগো চূতলতিকে, এই চর্চ্চরী আমাকেও শিখাও।

মদনিকা—(হাস্যপূর্ব্বক) ওরে হতাশ! ইহা চর্চ্চরী নহে :

বি—তবে ইহা কি ?

(2) Jester—(Joyfully) My dear, I too shall honour this festival of the god of love by dancing and singing in the midst of these women who have girded up their loins.

King—(Smiling) Do it friend.

J.—As you direct.—(Goes and dances between the maids). Respected *Madanika*, respected *Chootatalika*, teach me too this high-toned song.

Madanika—(Laughing) Disappointed, this is no high-toned song.

J.—What is it then ?

(3) बद्धपरिकराणाम्=क्षतगात्रबन्धानाम् । बद्धपरिजनानां इति पाठे बधूपरिजनानामिति संक्षतम् । अथ परिकरः पर्य्यङ्कपरिवारयोः । प्रगाढ़गात्रिकाबन्धे विवेकारम्भयोर्गणे इति हेमचन्द्रः ।

मद । हदास दुवदीखण्ड क्खु एदं । (क)

বিদূ। (সহর্ষম্) কিং এদিণা খণ্ডেণ মোঅআ করীঅন্তি লড্ডুআ বা। (খ)

মদ। (বিহস্য) হদাস ণহি ণহি পঠীঅদি ক্খু এদং। (গ)

বিদূ। (সবিস্ময়ম্) পঠীঅদি ক্খু এদং। (সবিষাদম্) জই পঠীঅদি ণ ভুঞ্জীঅদি তা মম এদিণা ণ কজ্জং। বরং পিঅবঅস্সস্স জ্জেব্ব সআসং গমিস্সং (তথা করোতি)। (ঘ) উভে। (আকর্ষতঃ। বিদূষকঃ আকর্ষতি। উভে হস্তৌ গহ্নীত্বা) চিট্ঠ বিণা কীলিদং হদাস কহিং গচ্ছসি। (ঙ) (ইতি বহুবিধং তাড়য়তঃ)।

(ক) হতাশ দ্বিপদীখণ্ডং খল্বিদম্।

(খ) কিমেতেন খণ্ডেন মোদকাঃ ক্রিয়ন্তে লড্ডুকা বা।

(গ) হতাশ নহি নহি। পঠ্যতে খল্বেতৎ।

(ঘ) পঠ্যতে খল্বেতৎ। যদি পঠ্যতে ন ভুজ্যতে তন্মমৈতেন ন কার্য্যম্। বরং প্রিয়বয়স্যস্যৈব সকাশং গমিষ্যামি।

(ঙ) তিষ্ঠ বিনা ক্রীড়িতং হতাশ ক্ব গচ্ছসি।

(১) মদনিকা—হতাশ, ইহা দ্বিপদী খণ্ড।

বিদূষক—(সহর্ষে) এই খণ্ড দ্বারা মোয়া বা লাড্ডু করা হয় কিনা?

ম—(হাস্যপূর্ব্বক) হতাশ, না না ইহা পঠিত হয়।

বি—(সবিস্ময়ে) পড়া হয়? (সবিষাদে) যদি পড়িতে হয় এবং ইহা খাওয়া না যায়; তবে আমার ইহা দ্বারা কোনও কাজ নাই। আমি বরং প্রিয়বয়স্যের নিকটেই যাই (গমনোদ্যম, উভয়ের ও বিদূষকের পরস্পর আকর্ষণ)।

উভয়ে (হস্তদ্বয় ধরিয়া) দাঁড়াও, না খেলিয়া হতাশ কোথা যাইবে? (নানারূপ তাড়না)।

(2) Madanika—You, stupid, it is another piece.

Jester—(Joyfully) Can this piece be turned to sweetmeats?

M—(Laughing) No, no, fool, this is read.

J.—(Amazingly) It is read!—(Sorrowfully) If so,—and if it be not eaten,—I shall do nothing with it.—I shall rather go to my friend (Going—but dragged by both—he drags).

Both—(Catching hold of his hands) Stand, fool, where shall you go before playing? (Strike him in various ways).

(3) खण्डेन=इक्षुकृतांशेन=By lump of sugar. वरम्—ईषत् प्रियम्। देवाद्वृते वरःश्रेष्ठे त्रिषु क्लीवे मनाक् प्रिय इत्यमरः।

विदूषकः—(हस्तमाकृष्य प्रपलाय्य राजानमुपसृत्य ।) भो वअस्स, णच्चिदोम्हि । (क)

राजा । वयस्य, क्रीड़ितम् ।

विदूषकः—णहि कीलिअं । पलाइदोम्हि । (ख)

चूतलतिका—हञ्जे मदणिए, चिरं क्खु अम्हेहिं कीलिदं । ता एहि । णिवेदेम्ह दाव भट्टिणीए संदेसं महाराजस्स । (ग)

मदनिका—चूदलदिए, सुट्ठु क्खु तुए सुमरिदं एदं । एव्वं करेम्ह । (घ)

(परिक्रम्योपसृत्य च ।)

उभे—जेदु जेदु भट्टा, देवी आणवेदि-(इत्यर्धोक्ते लज्जां नाटयन्त्यौ ।) णहि णहि । विण्णवेदि । (ङ)

राजा—(सहर्षं विहस्य सादरम् ।) मदनिके, नन्वाज्ञापयतीत्येव रमणीयम् । विशेषतोऽद्य मदनमहोत्सवे । तदुच्यतां किमाज्ञापयति देवी ।

विदूषकः—आः दासीए धीए, किं त्ति देवी आणवेदि। (च)

चेट्यौ—एवं भट्टिणी विण्णवेदि। जहा क्खु अज्ज मए मअरन्दुज्जाणं गदुअ रत्तासोअपाअवदलसंठाविदस्स भअवदो कुसुमाउहस्स पूआ णिव्वत्तइदव्वा। तत्थ अज्जउत्तेण संणि- हिदेण होदव्वं त्ति। (छ)

राजा—वयस्य, किं वक्तव्यम्। उत्सवादुत्सवान्तरमा- पतितमिति।

(क) भो वयस्य, नर्तितोऽस्मि।

(ख) नहि क्रीड़ितम्। पलायितोऽस्मि।

(ग) हञ्जे मदनिके, चिरं खल्वावाभ्यां क्रीड़ितम्। तदेहि। निवेदयावस्ता- वद्भर्त्याः संदेशं महाराजाय।

(घ) चूतलतिके, सुष्ठु खलु त्वया स्मृतमेतत्। एवं कुर्वः।

(ङ) जयतु जयतु भर्त्ता। भर्त्तः, देव्याज्ञापयति—नहि नहि। विज्ञापयति।

(च) आः दास्याः पुत्रि, किमिति देव्याज्ञापयति।

(छ) एवं भर्त्री विज्ञापयति। यथा खल्वद्य मया मकरन्दोद्यानं गत्वा रक्ताशो- कपादपतलसंस्थापितस्य भगवतः कुसुमायुधस्य पूजा निर्वर्त्तयितव्या। तत्रार्यपुत्रेण संनिहितेन भवितव्यमिति।

(।) वि—(हस्তাকর্ষণ পূর্ব্বক পলায়ন করিয়া রাজার নিকট গমন) ওহে বন্ধো, নর্ত্তিত হইয়াছি।

রা—বন্ধো, খেলিয়াছ।

বি—ক্রীড়া নহে—পলায়িত হইয়াছি।

চূতলতিকা—ওলো মদনিকে, আমরা দুইজনে বহুক্ষণ খেলিয়াছি। অতএব এস। ভর্ত্রীর বার্ত্তা মহারাজকে বলিব।

মদনিকা—চূতলতিকে, ভাল মনে করেছ। তাই করিব (পরিক্রমণ ও নিকটে আগমন)।

উভয়ে—মহারাজের জয় হউক। মহারাজ দেবী আজ্ঞা করিতেছেন—(অর্দ্ধোক্তে লজ্জা প্রকাশ) না না—নিবেদন করিতেছেন—

রা—(সহর্ষে হাস্য ও আদরের সহিত) মদনিকে, ভাল, "আজ্ঞা করিতেছেন" ইহাই রমণীয়—বিশেষতঃ অদ্য মদনমহোৎসবে—। অতএব বল রাজ্ঞী কি আজ্ঞা করিতেছেন।

বি—আঃ দাসীর বেটা, কি? দেবী আজ্ঞা করিতেছেন!

দাসীদ্বয়—দেবী এইরূপ বিজ্ঞাপন করিতেছেন যে আজ আমাকর্তৃক মকোরন্দোদ্যানে গমনপূর্ব্বক রক্তাশোকবৃক্ষতলে সংস্থাপিত ভগবান্ কামদেবের পূজা সম্পাদন করিতে হইবে। সে স্থানে আর্য্যপুত্র কর্ত্তৃক সন্নিহিত থাকিতে হইবে।

রা—বয়স্য, কি বলা যায়? এক উৎসব হইতে অন্য উৎসব উপস্থিত।

(2) Jester—(Taking off his hand and fleeing to the king) Friend, they made me dance!

K—Well, you have played.

J—Not played—but fled.

Choota—Oh! *Madanika*, we have played too long;—come and let us now inform the king of the queen's desire.

Mada—*Chootalatika*—you have remembered well. Let us do this. (Moving and coming to the king).

Both—Victory to the king.. May it please your Majesty, the queen directs—(Half speaking—bashfully) no, no, the queen submits—

K—(Joyfully laughing and with endearment) *Madanika*, it is highly pleasing that the queen directs—specially now when the festival of god of love is going on;—so tell us what the queen directs—

J—What? ill-begotten females?—the queen directs—

Maids—The queen submits that today she will go to the garden called *Makaranda*, to perform the worship of the revered God of love situated below the redflowered *Asoka* tree and that her dear lord may also be there.

K—Friend, what is to be said?—One festival has sprung from another.

(3) सन्देशम्=वाचिकम्। वार्तामिति यावत्। निर्वर्त्तयितव्या=सम्पादयितव्या। आपतितम्=आगतम्। उत्सवान्तरम्=अन्यप्रमोदः। अन्यः उत्सवः उत्सवान्तरम्। मयूरव्यंसकादयश्चेति तत्पुरुषः। हञ्जे—हञ्जे हण्डे हलाह्वानं नीचां चेटीं सखीं प्रतीत्यमरः। दास्याः पुत्री—षष्ठ्या आक्रोशे इति (६।३।२१) षष्ठ्या अलुक्। लिङ्गविशिष्टपरिभाषाया नित्यत्वस्वीकारे तु पुत्रेऽन्यतरस्यामिति (६।३।२२) विकल्पेऽलुक्। "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्।" *i.e.* "प्रातिपदिक includes also those forms which are derived by adding to it affixes denoting genders"—This परिभाषा does not belong to पाणिनि and had been current before he flourished. It is sometimes accepted and sometimes not. If here accepted पुत्र includes पुत्री। But how to get पुत्री? "शार्ङ्गरवाद्यञो ङीन् [४।१।७३]"। But "पुत्र" is not included by all, in the शार्ङ्गरवादि class—"अत्र पुत्रशब्दं केचित् पठन्ति। प्रव्रीतपुत्री शैलपुत्रीति वार्त्तिकविषयाद (पुत्रङादेशाद) अन्यदेव ङीनः उदाहरणम्। पुत्रङादेशस्तु ङीपि स्वरार्थ इति मन्यन्ते। नात्रासभाषितमस्तीति पदमञ्जर्यां हरदत्तः। कैयट holds a different view—In the वार्त्तिक वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानं कर्त्तव्यम् (७।३।४५) he explains पुत्रिका thus:—पुत्रशब्दाच्छार्ङ्गरवादित्वाद्ङीन् प्रत्ययः। ततः स्वार्थे कन्। केऽणइति ह्रस्वः। तस्य पक्षेऽकारो विधीयते।" भट्टोजि follows कैयट but finds a difficulty as to how to account for पुत्रट् आदेश in the वार्त्तिक of 6. 3. 70. "सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रड् वा।" "यदपि शार्ङ्गरवादौ पुत्रशब्दः प्रक्षिप्तो नतु साम्प्रदायिक इति तदपि न।" इति मनोरमा। "पुत्रीव हर्षं हृदये तनोति।" "कुर्वे तदुर्व्वीपतिपुत्रि सर्वम्।" "मा भैषीः पुत्रि सीते व्रजति मम पुरो नैष दूरं दुरात्मेति महानाटके।

विदू। ता उट्ठेहि तहिं ज्जेव्व गच्छह्म जेण तहिं गदस्स ममावि बह्मणबालअस्स सोत्थिवाअणं किम्पि भविस्सदित्ति। (क)

राजा। मदनिके गम्यतां देव्यै निवेदयितुम्। अयमहमागत एव मकरन्दोद्यानमिति।

चेट्यौ। जं भट्टा आणवेदि। (इति निष्क्रान्ते)। (ख)

राजा। वयस्य एह्यवतराव। (उभौ प्रासादादवतरणं नाटयतः) वयस्य आदेशय मकरन्दोद्यानस्य मार्गम्।

विदू। एदु एदु भट्टा (परिक्रामतः। अग्रतोऽवलोक्य) भो एदं तं मअरन्दुज्जाणं ता एहि पविसह्म (इति प्रविशतः। सविस्मयम्) भो महाराअ पेक्ख पेक्ख एदं तं मलअमारुदान्दोलिदमउलन्तसहआरमञ्जरीरेणुपडलपड़िवद्धपड़विआणं मत्तमहुअरणिअरमुक्कझङ्कारमिलिदमहुरकोइलालावसङ्गीदसुहावहं तुहागमणदंसिआअरं विअ मअरन्दुज्जाणं लक्खीअदि ता पविसतु भवं। (ग)

राजा। (समन्तादवलोक्य) अहो रम्यता मकरन्दोद्यानस्य। इह हि—

(क) तदुत्तिष्ठ। तत्रैव गच्छावः। येन तत्र गतस्य ममापि ब्राह्मणबालकस्य स्वस्तिवाचनं किमपि भविष्यतीति।

(ख) यद्भर्त्ताज्ञापयतीति।

(ग) एतु एतु भर्त्ता। भोः, एतत्तन्मकरन्दोद्यानम्। तदेहि। प्रविशावः। भो महाराज, प्रेक्षस्व प्रेक्षस्व। एतत्तन्मलयमारुतान्दोलितमुकुलायमानसहकारमञ्जरीरेणुपटलप्रतिबद्धपटवितानं, मत्तमधुकरनिकरमुक्तझङ्कारमिलितमधु-

রক্তাকিঙ্কিরাতাপসংগীতমুখরাবস্থ তবাগমনহর্ষিতাদ্ধ্বেরিব মকরন্দোদ্যানং লক্ষ্যতে। তৎ প্রবিশতু ভবান্।

(1) বি—তবে উঠুন, সেখানেই যাইব। সে স্থলে উপস্থিত থাকিলে ব্রাহ্মণপুত্র আমারও কিছু স্বস্তিবাচন ঘটিতে পারে।

রা—মদনিকে, যাও, দেবীকে বল, এই আমি মকরন্দোদ্যানে প্রায় উপস্থিত।

দাসীদ্বয়—যে আজ্ঞা মহারাজ (প্রস্থান)।

রা—বয়স্য, এস অবতরণ করি। (প্রাসাদাবতরণ), বয়স্য, মকরন্দোদ্যানের পথ নির্দেশ কর।

বি—মহারাজ আসুন। (পরিক্রমণ ও অগ্রে অবলোকন) মহারাজ, এই মকরন্দোদ্যান। আসুন, প্রবেশ করি। (প্রবেশ ও সবিস্ময়ে) মহারাজ দেখুন দেখুন, এই সেই মলয়পবন-সঞ্চালিত-মুকুলাবস্থা-প্রাপ্ত-চূত-মঞ্জরী-পরাগ-সমূহসংযুক্ত-বস্ত্রচন্দ্রাতপ, মত্ত-মধুকর-নিকর-মুক্ত-ঝঙ্কার-মিশ্রিত-মধুর-কোকিল-কূজন-সঙ্গীত-সুখদায়ক, আপনার আগমনে সবিশেষ সমাদৃত মকরন্দোদ্যান লক্ষ্য হইতেছে। অতএব প্রবেশ করুন।

রা—(চারিদিকে দর্শনপূর্ব্বক)—অহো মকরন্দোদ্যানের মনোহারিতা। এস্থানে—

(2) J—Then rise up, there we go, so that by being there as a Brahmin's son, I too may get some wages for chanting the words which will bring blessings.

K—*Madanika*, go, tell the queen, I am almost come to the *Makaranda* Garden.

Maids—As your Majesty commands (Exeunt).

K—Come friend, let us go down (Descending). Friend, show me the way to the *Makaranda* Garden.

J—Please to proceed your Majesty (Moving and looking at the front). This is that *Makaranda* Garden, let us enter (Entering—amazingly) O Sire, see, see, here is that *Makaranda* Garden which appears to be favoured by your arrival ;—from which comes out the happy song mixed with the sounds of the cuckoos and

maddened bees and in which a canopy of cloths is unfurled, joined with the pollens and new leaves of the mango trees shaken by the south wind. So, your Majesty may enter.

K—(Looking on all sides) Oh the beauty of the *Makaranda* Garden ! here--

(३) मलयेति = मलयस्य मारुतेन पवनेन आन्दोलितानां चलितानां मुकुलायमानानां कोरकभावं लभमानानां सहकाराणां चूतानां मञ्जरीणां पुष्पस्तवकानां रेणूनां परागाणां च पटलैः समूहैः प्रतिबद्धं संयुक्तं पटस्य वस्त्रस्य। पटश्चित्रपटे वस्त्रेऽस्त्री पियालद्रुमे पुमानिति मेदिनी। वितानमुल्लोचः यत्र तत् तथोक्तं तत्। अस्त्री वितानमुल्लोच इत्यमरः। पल्लवः स्यात किसलयं वल्लरी मञ्जरी तथेति हलायुधः। पटलं तिलके नेत्ररोगेच्छदिषि समूह इति हेमचन्द्रः। मुकुलानिव आचरन्तीति मुकुलायमानास्तेषाम्। मुकुल + क्यङ् + शानच्। मत्तेति = मत्तानां मधुकराणां भ्रमराणां निकरेण समूहेन मुक्तैर्झङ्कारैर्मिलितः मिश्रितः मधुरः मनोज्ञः कोकिलानामालापः एव सङ्गीतं तेन सुखावहम। रक्ताशोकेति रक्तविशेषणेन स्मरोद्दीपकत्वं सूचितम्। "प्रसनकैर्वर्णभेदम् श्वेतो रक्त इति द्विधा। बहुसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्द्धनः" इति।

उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो
भृङ्गालीविरुतैः कलैरविशदव्याहारलीलाभृतः।
घूर्णन्तो मलयानिलाहतिचलैः शाखासमूहैर्मुहु
र्भान्ति प्राप्य मधुप्रसङ्गं मधुना मत्ता इवामी द्रुमाः॥

(१) সমুদ্গত প্রবালকান্তিনবপল্লব দ্বারা লোহিতদ্যুতি,—ভ্রমরকুলের মধুর নিনাদ দ্বারা অব্যক্তবচনলীলামনোহর,—ও মলয়পবনবিকম্পিত শাখাসমূহদ্বারা পুনঃপুনঃ ঘূর্ণনশীল ঐ বৃক্ষগণ এখন মধুসম্পর্ক প্রাপ্ত হইয়া যেন মত্তের ন্যায় শোভা পাইতেছে।

(2) Beautifully appear the trees as if wild by the touch of Spring (or wine) as they are often reeling with the branches shaken

by the south wind and appear charming with the sweet humming noise of the bees, being adorned with red colour of the new leaves just like corals in their full development.

(3) उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतः कलैर्भृङ्गालीविरुतै रविशदव्याहारलीलाभृतः मलयानिलाहतिचलैः शाखासमूहैर्मुहुः घूर्णन्तः अमी द्रुमा अधुना मधुप्रसङ्गं प्राप्य मत्ताइव भान्ति ।

(4) उदयतामुन्मीलतां विद्रुमाणां प्रवालानां विद्रुमो रत्नवृक्षेपि प्रवालेपि पुमानयमिति मेदिनी । कान्तिः उदयद्विद्रुमकान्तिः साइव कान्तिर्येषाम् तानि तथोक्तानि तैः उद्गच्छत्प्रवालप्रभैः । किसलयैः पल्लवैस्ताम्रां लोहितां त्विषं दीप्तिं बिभ्रतो गृह्णन्तः कलैरस्फुटमनोहरैः भृङ्गाणां द्विरेफाणामालीनां श्रेणीनां विरुतैः शब्दैः अविशदः अस्फुटः । विशदं प्रकटं स्पष्टं प्रकाशं स्फुटमिष्यत इति हलायुधः । व्याहारः उक्तिरेव लीला विलासस्तां बिभ्रति धारयन्ति ये ते तथोक्ताः अस्फुट-वाग्विलासयुक्ताः मलयानिलस्य आहतिभिराघातैश्चलैः अभिमर्शीलैः मलयपवनकम्पितैः शाखासमूहैर्मुहुः भृशं घूर्णन्तःस्खलन्तः अमी द्रुमा वृक्षा अधुना इदानीं मधोर्वसन्तस्य अथवा मधुनो मद्यस्य । मधुश्चैत्रर्त्तुदैत्येषु जीवाशाकमधूकयोः । मधु क्षीरे बले मद्ये नीरे पुष्परसे पिचेति हेमचन्द्रः । प्रसङ्गं सम्पर्कं प्राप्य लब्ध्वा मत्ता इव भान्ति शोभन्ते ।

(5) उन्मीलद्विद्रुममनोहराणां पल्लवानां रक्तकान्तिमादधाना भ्रमररवपूरिता मलयमारुतधूता वृक्षा मधुयोगेन मत्ताइव चकासति ।

(6) घूर्णन्तः—घुण घूर्ण भ्रमण इति तौदादिकौ परस्मैपदिनौ । भ्वादौ त्वात्मनेपदिनौ । घूर्णति । जुघूर्ण । घूर्णिष्यति । अघूर्णीत् । घूर्णितम् । घूर्णित्वा घूर्णितुम । घूर्णते । अघूर्णि । उद्यत्=उद्+इण्+शतृ । मत्ताः—मद्+क्तः । तं । न ध्याख्यापृमूर्च्छिमदामिति (८।२।५७) निष्ठातस्य न नत्वम् । माद्यति । ममाद । मदिष्यति । अमदत् । मद्यते । अमादि । मदित्वा । मदितुम् । माद्यत् ।

(7) पल्लवोऽस्त्री किसलयमित्यमरः । किसलयशब्दो दन्त्यसकारवान् । तथाच किसलयैः सलयैरिव पाणिभिरिति रघुयमकम् । ध्वनौ तु मधुरास्फुटे कलइत्यमरः ।

পুংস্যালিবিশিষ্টাশ্রয়ে। বিষু স্ত্রিয়াং বয়স্যায়াং সেতৌ পঙ্‌ক্তৌ প্রকীর্তিতেতি মেদিনী। ততঃ সর্বতোঽক্তিন্নর্থাদিত্যেকে ইতি ঙীষ্ (৪।১।৪৫)।

(8) বিভঙ্গিঃ...লীলাভঙ্গিঃ...ঘূর্ণাঙ্গিঃ...ভায়তে...মত্তৈরমীভি দ্রুমৈঃ।

(9) শার্দূলবিক্রীড়িতং বৃত্তম্।

(10) উৎপ্রেক্ষালঙ্কারঃ।

(12) ক্বচিদ্ ভ্রান্তিং প্রাপ্য মধুপ্রসঙ্গমধুনা মত্তাইবামী দ্রুমা ইতি পাঠঃ। তত্র মধোর্বসন্তস্য প্রসঙ্গেন প্রসক্ত্যা সমাগমেনেতি যাবত্ যত্ মধু মদ্যং তেন ভ্রান্তিং ঘূর্ণনং প্রাপ্য লব্ধ্বা অতএব মত্তাইব মত্তা যথা অমী দ্রুমা বৃথা বর্ত্তন্ত ইতি গ্রন্থঃ। ইত্যর্থঃ। Here মধুপ্রসঙ্গমধুনা = by the liquor from the season of Spring. অবিশদ = Inarticulate কল - Sweet.

অপি চ।

মূলে গণ্ডূষসেকাসব ইব বকুলৈর্বাস্যতে পুষ্পবৃষ্ট্যা
মধ্বাতাম্রে তরুণ্যা মুখশশিনি চিরাচ্চম্পকান্যদ্য ভান্তি।
আকর্ণ্যাশোকপাদাহতিষু চ রসতাং নির্ভরং নূপুরাণাং
ঝঙ্কারস্যানুগীতৈরনুকরণমিবারভ্যতে ভৃঙ্গসার্থৈঃ॥

(1) কিঞ্চ—মূলদেশে পুষ্পবর্ষণ দ্বারা যেন অদ্য বকুল, গণ্ডূষ-সিক্ত সুরাকে সুরভি করিতেছে। যুবতীর সুরালোহিত মুখেন্দুতে বহুকালের পর অদ্য চম্পকগুলি শোভা পাইতেছে। (অথবা যুবতীর মুখেন্দু সুরারঞ্জিত হওয়াতে বহুকালের পর অদ্য চম্পকগুলি শোভা পাইতেছে।) ভ্রমর সমূহ ঝঙ্কারানুগীতি দ্বারা যেন অশোকে পাদাহনন নিবন্ধন অত্যন্ত শব্দায়মান নূপুরের অনুকরণ করিতেছে।

(2) By pouring flowers at the roots today, the *Bakool* trees are, as it were, making fragrant the quantity of wine taken into the mouths at a draught and then cast there by young ladies. The *Champaka* flowers too are shining today, in the faces of youthful ladies flushed with wine (or as the faces of youthful

ladies are flushed with wine). The bees also, after listening to the loud noise from the anklets of ladies while kicking the *Asoka* trees, are imitating that sound by singing in response thereto.

(3) अपिच—अद्य वकुलैर्मूले पुष्पवृष्ट्या तरुण्या गण्डूषमेकासवो वास्यतइव। मुखशशिनि मध्वाताम्रे चम्पकानि चिराद् भान्ति। भृङ्गसार्थै श्च आकर्ण्य अनुगीतैरशोकपादाहतिषु निर्भरं रसतां नूपुराणां झङ्कारस्यानुकरणमारभ्यत इव।

(4) अद्यास्मिन्नहनि वकुलैः केसरैः। अथ केसरे वकुलो वञ्जुलइत्यमरः। मूले पाददेशे पुष्पानां कुसुमानां वृष्ट्या वर्षणेन (करणेन) तरुण्या युवत्या गण्डूषस्य सेकः प्रक्षेप एव आसवो मद्यं वास्यते सुगन्धीक्रियते इव। मुखं शशीव मुखशशी तस्मिन्। उपमितं व्याघ्रादिभिः सामान्याप्रयोगइत्युपमिततत्पुरुषः। मधुना मद्येन आताम्रे आलोहिते सति। यस्य च भावेन भावलक्षणमिति सप्तमी अथवाधिकरणे सप्तमी। चिरात् बहोः कालात् परं चम्पकानि चम्पकपुष्पाणि भान्ति शोभन्ते। अत्र कविप्रसिद्धिः। ("स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति वकुलः शीधुगण्डूषसेकात् पादाघातादशोकस्तिलककुरुवकौ वीक्षणालिङ्गनाभ्याम्। मन्दारो नर्मवाक्यात् पटु मृदुहसनाच्चम्पको वक्त्रवाताच् चूतो गीतान्नमेरुर्विकसति च पुरोनर्त्तनात् कर्णिकारः।" इति।) भृङ्गाणां भ्रमराणां सार्थैः समूहैश्च आकर्ण्य श्रुत्वा अनुगीतैरनुनिनादैः अशोकेषु याः पादयोराहतय आघाता तासु निर्भरं अत्यर्थं रसतां ध्वनतां नूपुराणां मञ्जीराणां झङ्कारस्य रणनस्य अनुकरणमारभ्यते प्रक्रम्यतइव। झङ्कारस्येत्यत्र कर्त्तृकर्मणोः कृतीति अनुकरणमित्यस्य कर्मत्वात् षष्ठी। आकर्ण्येऽत्यस्या-प्रधानत्वेनोपपदत्वाभ्नाव द्वितीयाप्रसङ्गः। उपपदविभक्तेः कारकविभक्तिर्वलीयसीति भाष्यात्। उप समीपे उच्चारितं पदमित्युपपदमिति (१।४।१०५ सूत्रे पदमञ्जर्य्यां) हरदत्तः।

(५) वकुलैर्मूले युवतिवदनमदिरा पुष्पवर्षणेन सदृगन्धा क्रियत इव। युवत्या मुखे सुरारञ्जिते चम्पकानि विराजन्ते। भ्रमराश्च अशोकपादाहतिषु नदन्नूपुरनाद मनुनिशम्य तदनुकरणनिरता इव आसते। अनुरूपविशेषणं यथा "सुराजितह्रियो

यूनां तनुमध्यासते स्त्रियः। तनुमध्याः क्षरत्स्वेदसुराजितमुखेन्दव इति टीकायामुक्तं।

(६) वास्यते—वासि कर्मणि लट्। वासयति-ते। अवीवसत्-त। रमताम्—रम्+ लोट्। तेषाम्। रमति। रराम। रमिष्यति। अरमीत् अरासीत्। रम्यते। अरासि। रसितः। रसित्वा। रसितुम्। आरभ्यते—आङ्+रभ्+कर्मणि लट्। रभते। रेभे। रब्धा। रप्स्यते। रभताम। अरभत। रभेत। रप्सीष्ट। अरब्ध। अरप्सात। रभ्यते। अरम्भि। रब्धः। रभमाणः। रब्धुम्। रब्ध्वा।

(७) गण्डूषः—गण्ड्+षिच्+ऊषन्। गण्डेश्चेति (४।७८) औणादिकः। गण्डूषो मुखपूरणे। गजस्य च कराङ्गुल्यां प्रसृत्या प्रमितेपि चेति हेमचन्द्रः।

निर्भरम्—अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भर इत्यमरः।

(८) गण्डूषसेकासवमिव बकुला वामयन्ति। चम्पकैर्भायते। अनुकरणमारभन्ते कुङ्कुमार्याः।

(९) स्रग्धरा वृत्तम्।

(१०) उत्प्रेक्षालङ्कारः।

विदूषकः—(आकर्ण्य) भो वअस्स, ण एदं महुअरा णेउरसद्दं अणुहरन्तो। णेउरसद्दो ज्जेव्व एसो देवीए परिअणस्स। (क)

राजा—वयस्य, सम्यगवधारितम्।

(ततः प्रविशति वासवदत्ता, काञ्चनमाला, गृहीतपूजोपकरणा सागरिका-विभवतश्च, परिवारः।)

वासवदत्ता—हञ्जे कञ्चणमाले, आदेसेहि मअरन्दुज्जानस्स मग्गम्। (ख)

कांचनमाला—एदु एदु भट्टिणी। (ग)

वासवदत्ता—(परिक्रम्य।) हञ्जे कांचणमाले, अध केत्ति

अदूरे सो रत्तासोअपाअवो जहिं मए भअवदो कुसुमाउहस्स पूआणिव्वत्तइदव्वा। (घ)

(क) भो वयस्य, नैते मधुकरा नूपुरशब्दमनुहरन्ति। नूपुरशब्द एवैष देव्याः परिजनस्य।

(ख) हञ्जे काञ्चनमालि, आदेशय मकरन्दोद्यानस्य मार्गम्।

(ग) एत्वेतु भर्त्री।

(घ) हञ्जे काञ्चनमालि, अथ कियद्दूरे स रक्ताशोकपादपो यत्र मया भगवतः कुसुमायुधस्य पूजा निर्वर्तयितव्या।

(1) বি—(শুনিয়া) ওহে বয়স্য, এই মধুকরগুলি নূপুরশব্দ অনুকরণ করিতেছে না। ইহা রাজ্ঞীর পরিজনের নূপুরশব্দ।

রা—বয়স্য, ভাল নিশ্চয় করিয়াছ।

(বাসবদত্তা, কাঞ্চনমালা, পূজোপকরণসহ সাগরিকা ও বিভবানুসারে অন্যান্যের প্রবেশ।)

বাসবদত্তা—কাঞ্চনমালে, মকরন্দ উদ্যানের পথ দেখাও।

কাঞ্চন—ভর্ত্রি, আসুন।

বাস—(পরিক্রমণ) ওগো কাঞ্চনমালে, ভাল যেখানে আমাকর্তৃক ভগবান্ মদনের পূজা করিতে হইবে সেই রক্তাশোক বৃক্ষ কত দূরে ?

(2) J—(Listening) Friend, it is not the bees which are imitating the noise, but the sound, of the anklets of the queen's maids.

K—Yes, friend, you have rightly ascertained. (Enter the queen, *Kanchanmala*, *Sagarika* with the articles for worship, and other persons according to their positions).

Queen—Well, *Kanchanmala*, shew me the way to the *Makaranda* Garden.

Kanchan—This way, please mistress.

Queen—Now *Kanchanmala*, how far is that red-flowered Asoka tree under which I shall have to perform the worship of the god of love?

(3) अनुहरन्ति = अनुकुर्वन्ति। गतताच्छील्याभावाद् हरतेर्गतताच्छील्य इति वार्त्तिकेन नात्मनेपदम्। If constant habit in movement is indicated हृञ् takes आत्मनेपद, but here it means neither गमन nor ताच्छील्य। निर्वर्त्तयितव्या = सम्पादयितव्या। "णेरनिटि" इति णिज्लोपाभावः। *i.e.*, when an affix which does not take इट् before it, follows, णिच् प्रत्यय vanishes. But here तव्य is a सेट् affix, so णिच् does not vanish. अथ = अथाथो संशये स्यातामधिकारे च मङ्गले। विकल्पानन्तरप्रश्नकात्स्न्यारम्भसमुच्चय इति मेदिनी।

काञ्चनमाला—भट्टिणि, आसणो जेव्व किं ण पेक्खदि भट्टिणी। इअं क्खु सा निरंतरुब्भिण्णकुसुमसोहिणी भट्टिणीए पडिग्गहिदा माहवी लदा। एसा वि क्खु अवरा णोमालिआ लदा जाए अआलकुसुमुग्गमसद्धालुणा भट्टिणा अनुदिणं आआसीअदि अप्पा। ता एदं अदिक्कमिअ दीसदि ज्जेव्व सो रत्तासोअपाअवो, जहिं देवो पूअं णिव्वत्तइस्सदि। (क)

वासवदत्ता—ता एहि। तहिं जेव्व लहुं गच्छम्ह। (ख)

काञ्चनमाला—एदु एदु भट्टिणी। (ग)

(सर्वाः परिक्रामन्ति।)

वासवदत्ता—अअं सो रत्तासोअपाअवो जहिं अहं पूअं णिव्वत्तइस्सं। तेण हि मे पूआणिमित्ताइं उवअरणाइं उवणेहि। (घ)

सागरिका—(उपसृत्य) भट्टिणि, एदं सव्वं सज्जम्। (ङ)

(ক) ভর্ত্তি, আসন্ন এব, কিং ন প্রেক্ষতে ভর্ত্রী। ইয়ং খলু সা নিরন্তরোদ্ভিন্ন-কুসুমশোভিনী ভর্ত্রা পরিগৃহীতা মাধবী লতা। এষাপি খল্বপরা নবমালিকা লতা যস্যা অকালকুসুমোদ্গমশ্রদ্ধালুনা ভর্ত্তানুদিনমায়াস্যত আত্মা। তদেনামতি-ক্রম্য দৃশ্যত এব স রক্তাশোকপাদপো যত্র দেবী পূজাং নির্ব্বর্ত্তয়িষ্যতি।

(খ) তদেহি। তত্রৈব লঘু গচ্ছাবঃ।

(গ) এত্বেতু ভর্ত্রী।

(ঘ) অয়ং স রক্তাশোকপাদপো যত্রাহং পূজাং নির্ব্বর্ত্তয়িষ্যামি। তেন হি মে পূজানিমিত্তান্যুপকরণান্যুপানয়।

(ঙ) ভর্ত্তি, এতৎ সর্ব্বং সজ্জম্।

(১) কাঞ্চন—রাজ্ঞি, নিকটেই বটে, দেখিতেছেন না? এই সেই নিবিড় (অথবা সতত) প্রস্ফুটিত কুসুমশোভিনী আপনাকর্ত্তৃক পরিগৃহীতা মাধবী লতা। এই অন্যটী নবমালিকা লতা এবং ইহার অসময়ে পুষ্পোদ্গমবিষয়ে বিশ্বাসবান্ (অথবা আকাঙ্ক্ষী) মহারাজ অনুদিন নিজকে ক্লিষ্ট করিতেছেন। ইহাকে অতিক্রম করিয়া আপনার পূজা সম্পাদনের স্থানে এই সেই রক্তাশোক বৃক্ষ দেখা যাইতেছে।

বাস—অতএব এস, সেখানে শীঘ্র যাই।

কা—ভর্ত্ত্রি, আসুন। (সকলের পরিক্রমণ)।

বাস—যে স্থলে আমি পূজা নির্ব্বাহ করিব এই সেই রক্তাশোক বৃক্ষ। অতএব আমার পূজার জন্য উপকরণ আনয়ন কর।

সাগরিকা—(নিকটে আসিয়া) ভর্ত্ত্রি, এই সকল প্রস্তুত।

(2) Kanch—Just near, mistress, do you not see? This is the Jasmin plant adopted by you and constantly (or thickly) adorned with blowing flowers.—That is the other creeping plant Nyktanthes (নবমালিকা) for which the king, confident of (or desirous for) the untimely appearance of its flowers, is constantly giving troubles to himself. Just passing her appears that very redflowered *Asoka* tree under which you will have to worship.

Queen—So come to the place quickly.

Kanch—Come, mistress (Going).

Queen—This is that redflowered *Asoka* tree under which I shall perform the worship. So fetch the articles for my worship.

Sagarika—(Coming near) Here are all those ready, mistress.

(3) निरन्तरेति=निरन्तरं निविड़मथवा सतत मुद्भिन्नैः प्रस्फुटितैः कुसुमैः पुष्पैः शोभते या सा।=सततविकसितप्रसूनशालिनी। अकालेति=अकाले यानि कुसुमानि तेषां समुद्गमे श्रद्धालुना विश्वासिना (काङ्क्षिणा वा)। श्रद्धा सम्प्रत्यय स्पृहेत्यमरः। स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुजिति (३।२।१५७) श्रत्+ धा + आलुच्। श्रच्छब्दस्योपसंख्यानमित्युपसर्गत्वम्। आयास्यते = क्लिश्यते = व्यथ्यते। अतिक्रम्य स्थित इति शेषः। अन्यथा असमानकर्तृकत्वं स्यात्। लघु शीघ्रमरं द्रुतमित्यमरः। पूजेति=पूजा निमित्तं कारणं येषामिति। उपनय= उपस्थापय। सज्जम्=प्रयोगार्हम्। सागरिका=सागर+अण्+ङीप्=सागरी। सागरी+क+टाप्=सागरिका। तत आगत इत्यण् (४।३।७४)। सागरादागता अज्ञात इति कः (५।३।७३)। अज्ञाता सागरीति सागरिका। केऽण इति (७।४।१३) ईकारस्य ह्रस्वः। सागरशब्दस्य वृद्धत्वेऽपि वा नामधेयस्येति वा वृद्धसंज्ञाभावाच्छः। *cf.*—"विधाय मूर्त्तिं कपटेन वामनीमिति नैषधे।

वासवदत्ता—(निरूप्यात्मगतम्।) (अहो पमादो परिअणस्स। जस्स ज्जेव्व दंसणपधादो पअत्तेण रक्खीअदि तस्स जेव्व दिट्ठिगोअरे पडिदा भवे। भोदु। एवं दाव भणिस्सं') (प्रकाशम्।) हञ्जे साअरिए कीस तुमं अज्ज मअणमहुस्सववपराहीणे परिअणे सारिअं उज्झिअ इह आगदा। ता तहिं जेव्व लहुं गच्छ। एदंपि सव्वं पूओवअरणं कंचणमालाए हत्थे समप्पेहि। (क)

सागरिका—जं भट्टिणी आणवेदित्ति। (तथा कृत्वा कतिचित् पदानि गत्वात्मगतम्।) सारिआ मए उण सुसंगदाए हत्थे समप्पिदा। एदंपि अत्थि मे पेक्खिदुं कोदुहलं। किं जहा तादस्स अन्तेउरे भअवं अणङ्गो अच्चीअदि इधवि तह जेव्व किंवा अण्णदेत्ति। ता अलक्खिआ भविअ पेक्खिस्सं। (परिक्रम्यावलोक्य च।) ता जाव इह पूआसमओ होदि ताव अहंपि भअवन्तं मअणं ज्जेव्व पूअइदुं कुसुमाइं अवचिणिस्सं। (इति कुसुमावचयं नाटयति।) (ख)

वासवदत्ता—कञ्चणमाले, पडिट्ठावेहि असोअमूले भअवतं पज्जुम्णं। (ग)

काञ्चनमाला—जं भट्टिणी आणवेदित्ति। (तथा करोति।) (घ)

विदूषकः—(परिक्रम्यावलोक्य च।) भो वअस्स, जधा वासन्तो णेउरसद्दो तथा तक्केमि आअदा देवी असोअमुलंत्ति। (ङ)

(क) अहो प्रमादः परिजनस्य। यस्यैव दर्शनपथात् प्रयत्नेन रक्ष्यते तस्यैव दृष्टिगोचरं पतिता भवेत्। भवतु। एवं तावद्भणिष्यामि। हञ्जे सागरिके, कस्मात्त्वमद्य मदनमहोत्सवपराधीने परिजने सारिकामुज्झित्वेहागता। तत्त्वरितमेव लघु गच्छ। एतदपि सर्वं पूजोपकरणं काञ्चनमालाया हस्ते समर्पय।

(ख) यद्भर्त्र्याज्ञापयतीति। सारिका मया पुनः सुसंगताया हस्ते समर्पिता। एतदप्यस्ति मे प्रेक्षितुं कौतूहलम्। किं यथा तातस्यान्तःपुरे भगवाननङ्गोऽर्च्यते

ইহাপি তথৈব কিং বান্যথেতি। তদন্তরিতা ভূত্বা প্রেক্ষিষ্যে। যাবদিহ পূজা-সময়ো ভবতি তাবদহমপি ভগবন্তং মদনমেব পূজয়িতুং কুসুমান্যবচেষ্যামি।

(গ) কাঞ্চনমালে, প্রতিষ্ঠাপয়াশোকমূলে ভগবন্তং প্রদ্যুম্নম্।

(ঘ) যদ্ভর্ত্র্যাজ্ঞাপয়তীতি।

(ঙ) ভোঃ বয়স্য যথা বিস্রান্তো নূপুরশব্দস্তথা তর্কয়াম্যাগতা দেব্যশোকমূলমিতি।

(১) বাসব—(নিরূপণপূর্ব্বক স্বগত) হায় পরিজনের অসাবধানতা। যাহার (i. e. রাজার) দর্শন পথ হইতে যত্নের সহিত (সাগরিকাকে) রক্ষা করা হইতেছে,— তাহারই দৃষ্টিগোচরে পতিত হইবার সম্ভাবনা! হউক,—এখন আমি এইরূপ বলি— (প্রকাশ্যে) ওলো সাগরিকে, পরিজন অদ্য মদন মহোৎসবে বিহ্বল,—অতএব তুমি কেন সারিকাকে পরিত্যাগ করিয়া এখানে আসিয়াছ,—অতএব তথায় শীঘ্র যাও, এই সকল পূজোপকরণও কাঞ্চনমালার হস্তে সমর্পণ কর।

সাগরিকা—যেরূপ ভর্ত্রীর আজ্ঞা। (তাহা করিয়া কিছুদূর যাইয়া স্বগত) সারিকাকে সুসঙ্গতার হাতে দিয়াছি। পিতার অন্তঃপুরে যেরূপ ভগবান্ কাম অর্চিত হইয়া থাকেন এস্থলেও তদ্রূপ কি না দর্শন করিতে আমার কৌতূহল আছে। অতএব অলক্ষিতা হইয়া দেখিব। (পরিক্রমণ ও অবলোকন)। পূজার সময় হওয়া পর্য্যন্ত আমিও ভগবান্ মদনকেই পূজা করিবার জন্য পুষ্পচয়ন করি (পুষ্পচয়ন)।

বাস—কাঞ্চনমালে অশোক মূলে ভগবান্ কন্দর্পকে স্থাপিত কর।

কাঞ্চ—যেরূপ ভর্ত্রীর আদেশ—(তথা করণ)।

বিদূ—(পরিক্রমণ ও অবলোকন) সখে নূপুরধ্বনি শান্ত হইয়াছে;—অতএব স্থির করিতেছি রাজ্ঞী অশোকমূলে আসিয়াছেন।

(2) Queen—(Finding and aside) Alas, the carelessness of the servants! She may fall in with the very person whom she is kept away from! Very well—I shall say thus.—(*To Sagarika*) Well, *Sagarika*, why did you come here, leaving the parrot, when all persons are to-day beside themselves, on account of the festival of the god of love? So go there at once and put these things in the hands of *Kanchanmala*.

Sagarika—As the queen directs.—(Does as bidden, after a few steps, aside). The parrot has been kept with *Susangata*. I too

feel inquisitive as to whether or not the god of love is worshipped here just as he is in my father's house ! So remaining unobserved, I shall watch. (Moving and looking) I too pluck flowers to worship that god of love till it is time here for their worship. (Gathers flowers).

Queen—*Kanchanmala*, just erect the god at the root of the *Asoka* tree.

Kanch—I obey the mistress. (Does the same).

J—(Moving and seeing) Friend, the sound of the anklets has ceased. So I think the queen has reached the root of the *Asoka* tree.

(3) भणिष्यामि=कथयिष्यामि। भणति। बभाण। भणिष्यति। अभणीत् अभाणीत्। भण्यते। अभाणि। भणितम्। भणत्। भणितुम्। भणित्वा।

मदनमहोत्सवपराधीने—मदनस्य महता उत्सवेन पराधीने=कामप्रमोद-विह्वले। अवचेष्यामि=संग्रहीष्यामि। चिनोति चिनुते। चिकाय चिचाय चिक्ये चिच्ये। चेता। चेष्यति—ते। चिनोतु चिनुताम्। अचिनोत् अचिनुत। चिनुयात् चिन्वीत। चीयात् चेषीष्ट। अचैषीत् अचेष्ट। अचेष्यत्-त। चीयते। अचायि। चेतुम्। चित्वा। चितम्। चिन्वत् चिन्वानम्। प्रतिष्ठापय=आरोपय। प्रति+स्था+णिच्+लोट् मध्यमैकवचने। उपसर्गात् सुनोतीत्या-दिना षत्वम् (८।३।६५)। प्रद्युम्नम्=कन्दर्पम्। मदनो मन्मथो मारः प्रद्युम्नो मीन-केतनहत्यमरः। विश्रान्तः=शान्तः। उज्झित्वा=त्यक्त्वा। औज्झीत्।

राजा—वयस्य, सम्यगवधारितम्। पश्येयं देवी। या किलैषा

कुसुमसुकुमारमूर्तिर्दधती नियमेन तनुतरं मध्यम्।

आभाति मकरकेतोः पार्श्वस्था चापयष्टिरिव॥

तदेहि। उपसर्पावः। (उपसृत्य।) प्रिये वासवदत्ते।

(1) রাজা—বয়স্য, বেশ স্থির করিয়াছ। দেখ এই সেই কুসুমকোমলদেহা ব্রতাদিহেতু ক্ষীণকটিদেশা রাজ্ঞী মদনের পার্শ্বস্থ চাপযষ্টির ন্যায় শোভা পাইতেছে। এস, নিকটে যাই। (নিকটে গমন) প্রিয়ে বাসবদত্তে !

(2) King—Yes, friend, you have rightly judged. See the queen who, with her body as tender as flowers and with a very small waist, appears beautifully just like the bow of the God of love, placed by his side. So come, let us go near. Dear *Basabadatta,*—

(3) कुसुमसुकुमारमूर्त्तिर्नियमेन तनुतरं मध्यं दधती मकरकेतोः पार्श्वस्था चापयष्टिरिव आभाति।

(4) कुसुममिव सुकुमारा। उपमानानि सामान्यवचनैरिति तत्पुरुषः। कोमला मूर्त्तिः शरीरं यस्या इति बहुव्रीहिः सा। पक्षे कुसुमान्येव सुकुमारमूर्त्तिं यस्या इति रूपकगर्भो बहुव्रीहिः। कामधनुषः पुष्पमयत्वात्। सा तथोक्ता पुष्पपेलवदेहा। नियमेन मदनपूजारूपव्रताद्यनुरोधेन पक्षे क्षीणनिर्माणत्वेन तनुतरमतिकृशं मध्यं कटिदेशं दधती धारयन्ती मकरकेतोर्मीनध्वजस्य मदनस्येति यावत् पार्श्वस्था समीपस्थिता चापो यष्टिर्दण्ड इवेत्युपमिततत्पुरुषः। आभाति शोभते। यष्टिभर्ग्यां मधयष्ट्यां ध्वजे दण्डेऽस्त्रहारयोरिति हेमचन्द्रः। दण्डे यष्टिश्च कथ्यते इति हलायुधः।

(5) कुसुमकोमलवपुः क्षीणमध्या मत्प्रिया अनङ्गपार्श्वस्था चापयष्टिरिव शोभते।

(6) दधती—धा + शतृ + ङीप्। उगितश्चेति ङीप्। पक्षे दधाना। दधाति धत्ते। दधौ दध्रे। धाता। धास्यति-ते। दधातु धत्ताम्। अदधात् अधत्त। दध्यात् दधीत। धेयात् धासीष्ट। अधात् अधित। अधास्यत्-त। धातुम्। हित्वा। हितम्। धीयते। अधायि।

(7) धनुश्चापौ धन्वशरासनकोदण्डकार्मुक मित्यमरः।

(8) कुसुमसुकुमारमूर्त्या दधत्या...आभायते...पार्श्वस्थया...चापयष्ट्या।

(9) आर्य्यानाम च्छन्दः।

(10) उत्प्रेक्षालङ्कारः।

वासवदत्ता—(विलोक्य।) कधं अज्जउत्तो। जअदु जअदु अज्जउत्तो। अलंकरेदु इमं देसं आसणपडिग्गहेण। एदं आसणम्। एत्थ उवविसदु अज्जउत्तो। (क)

(राजा नाट्येनोपविशति)

काञ्चनमाला—भट्टिणी, सहत्थदिस्सेहिं कुसुमकुंकुम-चन्दणवासेहिं सोहिदं रत्तासोअपाअवं गदुअ अच्चीअदु भअवं पज्जुम्मो। (ख)

वासवदत्ता—उवणेहि मे पूओवअरणाइं। (ग)

(काञ्चनमालोपनयति। वासवदत्ता तथा करोति।)

(क) कथमार्यपुत्रः। जयतु जयत्वार्यपुत्रः। अलङ्करोत्विमं देशमासनपरि-ग्रहेण। एतदासनम्। उपविशत्वार्यपुत्रः।

(ख) भर्त्रि, स्वहस्तदत्तैः कुसुमकुङ्कुमचन्दनवासोभिः शोभितं रक्ताशोकपादपं गत्वार्च्यतां भगवान् प्रद्युम्नः।

(ग) उपानय मे पूजोपकरणानि।

(1) বাস—(দর্শনপূর্ব্বক) এই যে আর্য্যপুত্র ! আর্য্যপুত্রের জয় হউক ;—আসন গ্রহণ পূর্ব্বক এই স্থান অলঙ্কৃত করুন। এই আসন। ইহাতে আর্য্যপুত্র উপবেশন করুন। (রাজার উপবেশন)।

কাঞ্চ—ভর্ত্তি, স্বহস্তার্পিত কুঙ্কুম কুসুম চন্দন বস্ত্র দ্বারা রক্তাশোক বৃক্ষকে শোভিত করিয়া, যাইয়া ভগবান্ কামকে পূজা করুন।

বাস—আমার পূজোপকরণ আনয়ন কর (কাঞ্চনমালার আনয়ন ও বাসবদত্তার তাহা করণ)।

(2) Queen—(Seeing) Here is my husband ! may my lord prosper ;—please to adorn this place by taking a seat. This is the seat. Please, my dear, sit down here. (The king sits).

Kanch—Mistress, go and worship the god with your own hand, after adorning the red-flowered *Asoka* with clothes, sandal, flowers and saffron.

Queen—Fetch the articles for my worship. (The maid brings them and the queen does the same.)

(3) कुसुमेति—कुसुमेन पुष्पेण कुङ्कुमेन काश्मीरजन्मना चन्दनेन वाससा चेति द्वन्द्वः । अथ कुङ्कुमं काश्मीरजन्मेत्यमरः । अर्च्यताम्=पूज्यताम् । भ्वादि चुरादिश्च । अर्चति अर्चयति । आनर्च अर्चयामास etc. । आर्चीत् आर्चिचत् । अर्च्यते । आर्चि । अर्चत् अर्चयत् ।

राजा—प्रिये वासवदत्ते,

प्रत्यग्रमज्जनविशेषविविक्तकान्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रबालविटपिप्रभवा लतेव ॥

(1) রাজা—প্রিয়ে বাসবদত্তে,—এইমাত্র উত্তমরূপে স্নান দ্বারা পবিত্র কান্তি হইয়া কুসুম্ভপুষ্প-রক্তিম-মনোহর-প্রকাশমান-বস্ত্রাগ্রা, মদনের পূজয়িত্রী তুমি, নব কিসলয়তরুসংলগ্না লতার ন্যায় শোভা পাইতেছ ।

(2) King—My dear *Basabadatta*, worshipping the god of love with pure appearance obtained by recent and excellent bathing and wearing a shining garment with borders fine with the red dye of safflower (carthamus), you appear as beautiful as a creeping plant on a tree adorned with fresh sprouts.

(3) प्रत्यग्रमज्जनविशेषविविक्तकान्तिः कौसुम्भरागरुचिरस्फुरदंशुकान्ता मकरकेतनमर्चयन्ती त्वं बालप्रबालविटपिप्रभवा लतेव विभ्राजसे ।

(4) प्रत्यग्रेण नूतनेन प्रत्यग्रोऽभिनव इत्यमरः । मज्जनस्य विशेषेण उत्तमस्नानेनेत्यर्थः । विशेषोऽवयवे द्रव्ये दृष्टव्योत्तमवस्तुनीति शब्दार्णवः । विविक्ता पवित्रा । विविक्तौ पूतविजनावित्यमरः । कान्तिः शोभा । शोभा कान्तिर्द्युतिश्छविरित्यमरः । यस्याः सा तथोक्ता । अभिनवावगाहनविशुद्धद्युतिः । कुसुम्भस्य महारजनस्य पुष्पविशेषस्य । महारजनमिच्छन्ति कुसुम्भञ्च सुमेधस इति हलायुधः । अयं कौसुम्भो·

रागः। तस्येदमित्यण्। रक्तिमा तेन रुचिरः मनोज्ञः स्फुरन् दीप्यमानश्च अंशुकस्य वस्त्रस्य। अंशुकं वस्त्रमात्रे स्यात् परिधानोत्तरीययोरिति शब्दार्णवे। अन्तः प्रान्तः। अवयवो वा। अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः। अवयवेऽपीति हेमचन्द्रः। यस्याः सा तथोक्ता। महारजनलौहित्यमनोहरदीप्यमानवस्त्रप्रान्ता। मकरः केतनं चिह्नं यस्य स तथोक्तस्तं कन्दर्पमर्चयन्ती पूजयन्ती त्वं बालोऽभिनवः प्रवालः किसलयं यस्य स तथोक्तः। प्रवालोऽस्त्री किसलये इति मेदिनी। विटपाः शाखाः सन्त्यस्य विटपी वृक्षः। बालप्रवालश्च विटपी चेति स तस्मिन् प्रभवतीति प्रभवा। लता वल्लीव विभाजसे शोभसे।

(5) अभिनवस्नानविगङ्गाता आलोहितवस्त्रप्रान्तेन शोभमाना त्वं मदनं पूजयन्ती नवपल्लवकीर्णतरुलग्ना लतेव राजसे।

(6) विविक्ता = वि + विच् + क्त + टाप्। विचिर् पृथग्भावे इति रुधादिः। विनक्ति विङ्क्ते। विवेच विविचे। वेक्ता। वेक्ष्यति-ते। विनक्तु विङ्क्ताम्। अविनक् अविङ्क्त। विच्यात् विञ्चीत। विच्यात्। विक्षीष्ट। अविचत् अवैक्षीत् अविक्त। विच्यते। अवेचि। विक्तम्। विचत् विचानम्। वेक्तुम्। विक्त्वा।

विभाजसे—वि + भाज् + लट् थास्। बभाजे। अभाजिष्ट। भाज्यते। अभाजि।

(7) कौसुम्भरागरुचिरस्फुरदंशुकान्ता—कौसुम्भरागरुचिरं च स्फुरच्च अंशुकस्य अन्तं यस्याः सा तथोक्ता इति वार्थः। अन्तं स्वरूपे नाशे ना न स्त्री शेषोऽन्तिके त्रिषु इति मेदिनी। यद्वा रुचिरेण स्फुरता अंशुकेन अन्ता रम्या। मृतावसिते रम्ये समाप्तावन्त इष्यते इति शब्दार्णवः।

(8) कान्त्या ..स्फुरदंशुकान्तया...विभाज्यते...अर्चयन्त्या...प्रभवया लतयेव।

(9) वसन्ततिलकं वृत्तम्।

(10) उपमालङ्कृतिः। सा च लता विभाजते त्वं विभाजसे इति पुरुषभेदाद् दोषाप्रतीति काव्यप्रकाशे।

अपि च ।

स्पृष्टस्त्वयैव दयिते स्मरपूजाव्यापृतेन हस्तेन ।
उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यतेऽशोकः ॥

(1) আরও—হে প্রিয়ে তোমার মদনপূজায় ব্যাপৃত হস্ত দ্বারা স্পৃষ্ট হইয়া অশোক মধুদ্গতাপরকোমলতরপল্লবতুল্য লক্ষিত হইতেছে।

(2) Moreover—O Dear, the *Asoka* being touched by your hand busy in worshipping the god, appears as if it has another fresh sprout which is more tender.

(3) हे दयिते त्वया स्मरपूजाव्यापृतेन हस्तेन स्पृष्ट एवाशोकः उद्भिन्नापर-मृदुतरकिसलय इव लक्ष्यते ।

(4) हे दयिते प्रिये त्वया स्मरस्य मदनस्य पूजायामर्चायां व्यापृतेन नियुक्तेन हस्तेन करेण स्पृष्टः धृतः एव अशोकः उद्भिन्नमुद्गतमपर मन्यत् मृदुतर मति कोमलं किसलयं पल्लवो यस्य । करतलस्याताम्रत्वात् । स तथोक्तः इव लक्ष्यते दृश्यते ।

(5) प्रिये त्वत्करधृतः अशोकः समुद्गतसुकुमारतरपल्लव इव शोभते ।

(6) दयिते—दय् + क्तः + टाप् । तत् सम्बुद्धौ । दयते । दयाञ्चक्रे, दयामास, दयाम्बभूव । दयिष्यते । अदयिष्ट । दय्यते । अदायि । दयमानम् । दयितुम् । दयित्वा ।

व्यापृतेन—वि + आङ् + पृ + क्तः । तेन । तुदादिः । प्रायेणायं व्याङ्पूर्वः । व्याप्रियते । पप्रे । पर्त्ता । परिष्यते । प्रियताम् । अप्रियत । प्रियेत । पृषीष्ट । अपृत । अपरिष्यत । पृतम् । प्रियमाणम् । पर्त्तुम् । पृत्वा । प्रियते । अपारि ।

(7) दयितं वल्लभं प्रिय मित्यमरः ।

(8) स्पृष्टम्...किसलयं...लक्षयामः अशोकम् ।

(9) आर्य्याछन्दः । (10) उत्प्रेक्षा । स च हस्तस्य किसलयोपयोगित्वे परिणामात् परिणामालङ्कारानुप्राणिता । परिणामः क्रियार्थश्चेद्विषयी विषयात्मनेति लक्षणात् । मृदुतरत्वेन व्यतिरेकश्च । व्यतिरेको विशेषश्चेदुपमानोपमेययोरिति कुवलयानन्दे ।

अपि च।

अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रुवम्।
यदनेन न संप्राप्तः पाणिस्पर्शोत्सवस्तव ॥

(1) আরও—এই অনঙ্গ অদ্য নিজের শরীরনাশকে অবশ্য নিন্দা করিবে। যেহেতু সে তোমার হস্তস্পর্শরূপ পরমানন্দ প্রাপ্ত হইল না।

(2) Besides,—since the god of love has not obtained the great pleasure of being touched by your hand, he is sure to blame today his unembodied state.

(3) अयमनङ्गः अद्य अनङ्गत्वं ध्रुवं निन्दिष्यति यदनेन तव पाणिस्पर्शोत्सवः न संप्राप्तः।

(4) अयं मनसिजः अनङ्गः कामः अद्य अनङ्गत्व मशरीरत्वं ध्रुवं निश्चितं निन्दिष्यति आक्षेप्स्यति। यत् यतः अनेन तव पाणिस्पर्शोत्सवः हस्तस्पर्शपरमानन्दः न सम्प्राप्तः लब्धः।

(5) अङ्गाभावात्ते करस्पर्शसुख मलभमानः कामः आत्मनिन्दापरायणः खलु भविष्यति।

(6) निन्दिष्यति—लृटि रूपम्। निन्दति। निनिन्द। अनिन्दीत्। निन्द्यते। अनिन्दि। निन्दितम्।

(7) अनङ्गेनानेन...अनङ्गत्वं निन्दिष्यते।...अयं न सम्प्राप्तवान्...मङ्गीत्सवम्।

(8) अनुष्टुप् नाम वृत्तम्। पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः इति हि तल्लक्षणम्।

(9) रूपकालङ्कारः।

काञ्चनमाला—भट्टिणि, अच्चिदो भअवं पज्जुम्णो। ता करेहि भत्तुणो उइदं पूआसक्कारं। (क)

वासवदत्ता—तेण हि उवणेहि मे कुसुमाइं विलेवणं च। (ख)

काञ्चनमाला—भट्टिणि, एदं सब्बं सज्जं। (ग)

(वासवदत्ता नाट्येन राजानं पूजयति।)

(क) भर्त्रि, अर्चितो भगवान् प्रद्युम्नः। तत्कुरु भर्तुरुचितं पूजासत्कारम्।

(ख) तेन उपनय मे कुसुमानि विलेपनं च।

(ग) भर्त्रि, इदं सर्वं सज्जम्।

(1) কাঞ্চন—রাজ্ঞি, ভগবান্ কাম অর্চিত হইয়াছেন। অতএব এখন পতির উচিত পূজাসম্মান করুন।

বাসব—অতএব আমার পুষ্প ও চন্দনাদি আনয়ন কর।

কাঞ্চ—রাজ্ঞি, এই সকল প্রস্তুত। (বাসবদত্তা কর্তৃক রাজার পূজন)

(2) Maid—Mistress, the God is worshipped, so now do the needful worshipping of the master.

Queen—So get me the flowers and sandal.

Maid—Here, they are all ready, madame. (The queen worships the king.)

(3) पूजासत्कारः=अर्चनासम्माननम्। विलेपनम्=चन्दनादिकम्।

सागरिका—(गृहीतकुसुमा।)(हद्धी हद्धी। कहं कुसुमलोहोक्खित्तहिअआए मए अदिचिरं किदम्। ता इमिणा सिन्दुवारविडवेण ओवारिअसरीरा भविअ पेक्खिस्सम्। (विलोक्य) कहं पेक्खिढ़ो ज्जेव्व अपुव्वो कुसुमाउहो। अम्हाणं तादस्स अन्तेउरे चित्तगदो अच्चीअदि। इह पच्चक्खो लब्भीअदि।) ता अहंपि इमेहिं कुसुमेहिं इह ट्ठिदा ज्जेव्व भअवंतं कुसुमाउहं पूअइस्सम्। (इति कुसुमानि प्रक्षिपति।) नमो दे भअवं कुसुमाउह, सुभदंसणो मे भविस्ससि। दिट्ठं जं दिट्ठव्वं। अमोघदंसणो मे भविस्ससि। (इति प्रणमति।) अच्चरिअं। दिट्ठो वि पुणो पेक्खिदव्वो।

ता जाव न को वि मं पेक्खदि दाव ज्जेव्व गमिस्सं। (इति कतिचित्पदानि गच्छति)। (क)

(क) हा धिक् हा धिक्। कथं कुसुमलोभोत्क्षिप्तहृदयया मयातिचिरं कृतम्। तस्मादनेन सिन्धुवारविटपेनापवारितशरीरा भूत्वा प्रेक्षिष्ये। कथं प्रेक्षित एवापूर्व्वः कुसुमायुधः। अस्माकं तातस्यान्तःपुरे चित्रगतोऽर्च्यते। इह प्रत्यक्षो लभ्यते। तस्मादहमप्येतैः कुसुमैरिह स्थितैव भगवन्तं कुसुमायुधं पूजयिष्यामि। नमस्ते भगवन् कुसुमायुध, शुभदर्शनो भविष्यसि। दृष्टं यद्द्रष्टव्यम्। अमोघदर्शनो मे भविष्यसि। आश्चर्यम्। दृष्टोऽपि पुनःप्रेक्षितव्यः। तद्यावन्न कोऽपि मां प्रेक्षते तावदेव गमिष्यामि।

(1) সাগরিকা—(পুষ্পগ্রহণপূর্ব্বক) হায়, ধিক! কেন পুষ্পলোভবিমোহিতচিত্তা হইয়া অত্যন্ত বিলম্ব করিলাম? এখন এই সিন্ধুবারশাখাদ্বারা গুপ্তদেহা হইয়া দেখিব। (দর্শন পূর্ব্বক) অহো অপূর্ব্ব অনঙ্গ দৃষ্ট হইল! আমার পিতার অন্তঃপুরে চিত্রগত কন্দর্প অর্চিত হয়, কিন্তু এখানে প্রত্যক্ষই পাওয়া যায়! অতএব আমিও এই পুষ্প সমূহ দ্বারা এখানে থাকিয়াই ভগবান্ কামকে পূজা করিব। (পুষ্প প্রক্ষেপ) হে ভগবন্ কুসুমায়ুধ! আপনাকে প্রণাম, আমার পক্ষে শুভদর্শন হইবেন। যাহা দর্শনীয় তাহা দেখিলাম। আমার পক্ষে সফলদর্শন হইবেন (প্রণাম করণ)। আশ্চর্য্য! দৃষ্ট হইলেও আবার দর্শনীয় হইতেছেন! যাবৎ আমাকে কেহ না দেখিতে পায় তাবৎ গমন করি। (কতিপয় পদ গমন)।

(2) Sagarika—(With flowers) Alas, alas, why did I delay so long, being misled by the temptations for flowers? So now being concealed here by the branches of this *Sindhoobar* tree, I shall see all (Looking). Oh! I have seen a strange God of love. In my father's dwelling he is worshipped in effigy;—but he is incarnate here! so, remaining here, I too shall worship him with these flowers (Offers the flowers). I bow to the God of Love, may his sight turn to do good to me.—That worth seeing is seen! may this meeting be fruitful to me. O strange! though seen, still it grows worth seeing! So now, before any one observes me, I shall be off (Walks a few steps).

(3) कुसुमलोभोत्चिप्तहृदयया—कुसुमानां लोभेन उत्चिप्तं आकृष्टं हृदयं यस्याः सा तथोक्ता तया=पुष्पलोभविमोहितया। अतिचिरम्=अतिविलम्बः। अपावृतशरीरा=गुप्तदेहा। अपूर्वः=अद्भुतः विचित्र इति यावत्। अमोघदर्शनः =अव्यर्थदर्शनः सफलावलोकन इति यावत्।

काञ्च। अज्ज वसन्तअ एहि सम्पदं तुमं पि सोत्थिवाअणं पड़ीच्छेहि। (क) (विदूषक उपसर्पति।)

वास। (विलेपनकुसुमाभरणदानपूर्व्वकम्) अज्ज एदं सोत्थिवाअणं पड़ीच्छ (इत्यर्पयति)। (ख)

विदू। (सहर्षं गृहीत्वा) सोत्थि भोदीए। (ग)

(क) आर्य वसन्तक, एहि। सांप्रतं त्वमपि स्वस्तिवाचनं प्रतीच्छ।

(ख) आर्य, इदं तत् स्वस्तिवाचनं प्रतीच्छ।

(ग) स्वस्ति भवत्यै।

(1) কাঞ্চন—আর্য্য বসন্তক, আসুন, এখন আপনিও স্বস্তিবাচন গ্রহণ করুন। (বিদূষকের নিকট গমন।)

বাসব—(বিলেপন, পুষ্প ও আভরণ দান পূর্ব্বক) আর্য্য এই স্বস্তিবাচন গ্রহণ করুন। (অর্পণ)।

বি—(সহর্ষে গ্রহণ পূর্ব্বক) আপনার মঙ্গল হউক।

(2) Maid—Respected *Basantaka*, come, you too now receive the rewards for chanting the words of blessings (The Jester goes near).

Queen—(Offering sandal, flowers and cloths) Sir, this is the reward for chanting the words of blessing. Please to accept (Gives the same.)

Jester—(Receiving gladly) Blessing to you.

(3) स्वस्तिवाचनम्=स्वस्तिवाचन + ठञ्=स्वस्ति वाचनम्। पुण्याहवाचनादिभ्यो लुग् वक्तव्य इति ठञो लुक् (5।1।124)। स्वस्तिवाचनं प्रयोजनमस्येति स्वस्तिवाचनार्थं

प्रदेयं धनमित्यर्थः। In the sense of तदस्य प्रयोजनं we get ठञ् by 5, 1, 109 to the word स्वस्तिवाचन and thereby it means something the necessity of which is to have the words स्वस्ति to be chanted by Brahmins. Now this ठञ् disappears under the aforesaid वार्त्तिक in such word as पुण्याहवाचनम्, स्वस्तिवाचनम्, शान्तिवाचनम् &c.... कर्म्मारम्भे मङ्गति, ब्राह्मणा हि वस्त्रादिभिः पूजिताः प्रार्थ्यन्ते पुण्याहं भवन्तोऽधिब्रुवन्तु स्वस्ति भवन्तोधिब्रुवन्तु—ऋद्धिं भवन्तोधिब्रुवन्त्विति। तथाच स्मृतिः—सम्पूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्। धर्म्ये कर्मणि माङ्गल्ये संग्रामाद्भुतदर्शने इति। Hence स्वस्तिवाचनम्=स्वस्तिपाठार्थं दक्षिणादिकम्। प्रतीच्छ=गृहाण। प्रतिपूर्वादिषे ग्रहणार्थत्वम्। तथाहि रत्नविन्दून् प्रतीच्छ त्वमिति देवीमाहात्म्ये।

(नेपथ्ये वैतालिकः पठति)

अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवा-
वास्थानीं समये समं नृपजनः सायन्तने सम्पतन्।
सम्प्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं
प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते॥

(1) (নেপথ্যে স্তুতিপাঠকের বাক্য)—এইক্ষণ অস্তাচল-নিক্ষিপ্ত-সমস্ত-কিরণ রবি, আকাশপারে গমন করাতে, সায়ংকালে রাজগণ সকলে এক সঙ্গে সভাসীন হইয়া নয়নের অত্যন্ত প্রীতিকর সমুদিত চন্দ্রতুল্য উদয়নরাজের পঙ্কজকান্তি-বিলোপি-চরণ=(পক্ষে কিরণ) সেবার জন্য অপেক্ষা (পক্ষে ঊর্দ্ধে দৃষ্টি) করিতেছেন।

(2) (A bard's speech within)—Now at the twilight, when the sun has cast all his rays on the western mountains, and has thus gone to the end of the sky, all these kings going simultaneously to the court, are waiting (or looking up), O moonlike *Udayan* who extremely delight the eyes, for worshipping your feet (or the rays of the moon) which have surpassed (or closed) the beauty of the lotuses.

(3) सम्प्रति अस्तापास्तसमस्तभासि रवौ नभसः पारं प्रयाते सायन्तने समये समम् आस्थानीं सम्पतन् एष नृपजनः दृशां प्रीत्युत्कर्षकृतः उदयनस्य इन्दोरिव (उदयनस्य) तव सरोरुहद्युतिमुषःपादान् आसेवितुमुदीक्षते।

(4) सम्प्रत्यधुना अस्ते अस्तपर्वते। अस्तः क्षिप्तेऽप्यवसिते त्रिषु ना पश्चिमाचलेइति मेदिनी। अपास्ताः निपातिताः समस्ताः सकलाः भासोंऽशवो येन स तथोक्तः तस्मिन् पश्चिमाचलनिक्षिप्तसकलकिरणे। रवौ सूर्य्ये। नभसः आकाशस्य पारमन्तं प्रयाते गते सति सायन्तने समये सन्ध्याकाले। समं युगपद्। आस्थानीं सभां सम्पतन् आगच्छन्। एष नृपजनः राजलोकः। दृशां चक्षुषां प्रीत्युत्कर्षकृतः प्रीते रानन्दस्य उत्कर्षं परां काष्ठां करोतीति तथोक्त स्तस्य, परमानन्दं जनयतः। उद्गतमयनमाविर्भावो यस्य स उदयन स्तस्य समुदितस्य। इन्दोश्चन्द्रस्य। इव यथा तथा। उदयनस्य वत्सराजस्य तव। रोहन्तीति रुहाणि सरःसु रुहाणि पङ्कजानि तेषां द्युतिं शोभां मुष्णन्ति अपहरन्ति इति तथोक्ताः तान्। शोभया पराजितकमलकान्तीन् चन्द्रपक्षे कमलिनीप्रभाविलोपिनः। पादान् चरणान् गौरवे बहुत्वम्। पक्षे किरणान् पादा रश्म्यङ्घ्रितुर्य्यांशाइत्यमरः। आसेवितुं पूजयितुं पक्षे लब्धुम् उदीक्षते अपेक्षते पक्षे ऊर्द्धं पश्यति।

(5) नयनप्रीतिप्रदस्य चन्द्रस्य किरणानासेवितु मूर्द्धमीक्षमाणः जनइव सभाजयितुमागतः अस्मिन् सायंकाले राजवर्गः नेत्राह्लादकस्य तव चरणावासेवितुमपेक्षते।

(6) आस्थानीम् = आङ् + स्था + ल्युट् + ङीप्। ताम्। आस्थीयते अस्यामित्यधिकरणे ल्युट्। टित्त्वाद्ङीप्। सम्पतन् = सम् + पत् + शतृ। सः। पतति। पपात। पतिष्यति। अपप्तत्। पत्यते। अपाति। पतित्वा। सायन्तने = सायम् + तुट् + ट्युल्। तस्मिन्। सायं चिरंप्राह्णेप्रगेऽव्ययेभ्य ष्ट्युट्युलौतुट् चेति (४।३।२३) ट्युल्। तुडागमश्च। From ट्युल् ट् + ल् and from तुट् उ and ट् vanish and यु = अन by युवोरनाकौ (७।१।१)।

सरोरुहद्युतिमुषः—रोहन्ति जायन्त इति रुहाणि। इगुपधज्ञाप्रीकिरः क इति कः। ततः सप्तमीसमासः अथवा कप्रकरणे मूलविभुजादिभ्य उपसंख्यानमिति

कः। सरःसु रोहन्तीति उपपदतत्पुरुषः। तानि। तेषां द्युतिं प्रभां मुष्णन्ति विलुम्पन्तीति मुष् + क्विप्। ते। तान्। प्रथमैकवचने मुट्। मुष्णाति। मुमोष। मोषिता। मोषिष्यति। मुष्णातु। अमुष्णात्। मुष्णीयात्। मुष्यात्। अमोषीत्। अमोषिष्यत्। मुष्यते। अमोषि। मोषितुम्। मुषित्वा। मुषितम्। मुष्णत्।

(7) समज्या परिषद् गोष्ठी सभासमितिसंसदः। आस्थानी क्लीव मास्थानमित्यमरः।

(8) नृपजनेन...संपतता...एतेन...उड्डीन्यन्ते पाद्याः।

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) उपमालङ्कारः।

(11) अत्र चन्द्रतुल्यवत्सराजगुणाख्यानाद् विलोभनं नाम नाटकीयं बीजाङ्गं वर्णितम्। तथाहि "गुणाख्यानाद् विलोभनमिति दशरूपके।

साग। (श्रुत्वा सहर्षं परिवृत्य राजानं दृष्ट्वा सस्पृहम्) कहं अअं सो राआ उअअणो णाम जस्स अहं तादेण दिण्णा। (दीर्घं निश्वस्य) ता परप्पेसणदूसिदं बि मे सरीरं एदस्स दंसणेण दाणिं बहुमदं संवुत्तं। (क)

(क) कथमयं स राजोदयनो नाम यस्मै अहं तातेन दत्ता। तस्मात् परपोषणदूषितमपि मे शरीरमेतस्य दर्शनेनाद्य बहुमतं संवृत्तम्।

(1) সাগরিকা—(শুনিয়া সহর্ষে ফিরিয়া রাজাকে দেখিয়া সাভিলাষে) পিতা কর্ত্তৃক আমি যাঁহাকে দত্ত হইয়াছি—এই কি সেই রাজা উদয়ন! (দীর্ঘনিশ্বাস ত্যাগ) যা হউক পরের ভৃত্যভাবে (অথবা পরপোষণে) দূষিত আমার শরীর অদ্য ইঁহার দর্শনে অতি প্রিয় হইল।

(2) Sagarika—(Listening) Is this the king *Udayan* to whom I have been betrothed by my father? (Sighing) So my body which has been impure by serving others (or by being nourished by others) is much respected now by seeing him.

(3) परप्रेषणदूषितम्=परस्याः वासवदत्तायाः प्रेषणेन परिचर्य्यया दूषितं कलुषितं न्यूनीकृतमित्यर्थः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पुंवत्वम् । परपोषणेनेति वा पाठः । पोषणेन प्रतिपालनेनेत्यर्थः ।

राजा—कथमुत्सवापहृतचेतोभिः संध्यातिक्रमोऽप्यस्माभिर्नोपलक्षितः । देवि, पश्य ।

उदयतटान्तरितमियं प्राची सूचयति दिङ् निशानाथम् ।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥

देवि, तदुत्तिष्ठावः । आवासाभ्यन्तरमेव प्रविशावः ।

(सर्वे उत्थाय परिक्रामन्ति ।)

(1) রাজা—এই যে উৎসবাপহৃতচিত্ত আমাদিগকর্ত্তৃক সন্ধ্যাতিক্রমও উপলক্ষিত হয় নাই ! মহিষি, দেখ—

রমণী পরিপাণ্ডু মুখ দ্বারা যেরূপ হৃদয়স্থিত বল্লভকে সূচনা করে তদ্রূপ এই পূর্ব্বদিক উদয়পর্ব্বততটাচ্ছাদিত চন্দ্রকে সূচনা করিতেছে ।

রাজ্ঞি, অতএব উত্থান পূর্ব্বক বাসগৃহেই প্রবেশ করি (সকলের উত্থান ও পরিক্রমণ) ।

(2) King—Well, the subsiding twilight has not been perceived by us whose minds were fully occupied in the festival. My dear, see,

This eastern quarter, by its white appearance, is indicating the moon concealed by the side (declivity) of the eastern mountain, as a lady indicates her beloved (who is much thought of) in her heart.

My dear, let us rise and enter into the house. (All rise and walk).

(3) इयं प्राची दिक् परिपाण्डुना मुखेन, रमणी, हृदयस्थितं प्रियमिव, उदयतटान्तरितं निशानाथं सूचयति ।

(4) इयं प्राची पूर्वा दिक् आशा परिपाण्डुना सर्वतः श्वेतवर्णेन उदयचन्द्र-

किरणविभूषितत्वादन्यत: विरक्तादित्यर्थ:। मुखेन रमणी अङ्गना हृदयस्थितं चिन्ता-विषयगतं प्रियं वल्लभमिव उदयस्य पूर्वपर्वतस्य। उदय: पूर्वपर्व्वत इत्यमर:। तटेन शृङ्गेण शृङ्गञ्च शिखरं कूटं सानु प्रस्थं तटं भृग्विति हलायुध:। अन्तरितमाच्छादितं निशानाथं चन्द्रं सूचयति ज्ञापयति।

(5) परिचिन्तनपाण्डुना मुखेन यथा अङ्गना चित्तस्थितं वल्लभमनुमापयति तथैयं प्राची दिग् उदयगिरिगुप्तसुधाकरं गौरकररञ्जितं विज्ञापयति।

(6) प्राची—प्र + अञ्च + क्विन् + ङीप्। उगितश्चेति ङीप्। धातोश्चेद् गित् कार्य्यं तर्हि अञ्चतेरेवेति नियमात्। *i. e.*, if उक् (उवर्ण, ऋवर्ण & लृ vanish from affixes, the प्रातिपादिक takes ङीप् in the feminine. But if उक् vanish from roots, this rule will be applicable only in the cas of the root अञ्चु and no other roots. यद्वा अञ्चतेरुपसंख्यानमिति वार्त्तिकेन ङीप् (४।१।६, वा)।

(8) उदयतटान्तरित: अनया प्राच्या दिशा सूच्यते निशानाथ: प्रियइव हृदय-स्थित: रमण्या।

(9) आर्य्याछन्द:।

(10) उपमालङ्कार:।

(11) उदयगिरितटान्तरितं प्राची सूचयति दिङ् निशानाथमिति वा पाठ:। अत्र उदयस्य गिरि: अथवा उदयश्च गिरिरिति समास:।

सागरिका—कधं पत्थिदा देवी। भोदु। ता अहं वि तुरिआ गमिस्सम्। (राजानं सस्पृहं दृष्ट्वा निश्वस्य च) हड्डी। कधं मए मन्दभाइणीए पेक्खिदुंवि चिरं ण पारिदो अअं जणो। (इति निष्क्रान्ता।) (क)

(क) कथं प्रस्थिता देवी। भवतु। तदहमपि त्वरिता गमिष्यामि। हा धिक्। कथं मया मन्दभागिन्या प्रेक्षितुमपि चिरं न पारितोऽयं जन:॥

(1) সাগরিকা—এই যে দেবী চলিলেন। হউক,—তবে আমিও শীঘ্র যাইব।

(রাজাকে সাভিলাষে দর্শন ও নিশ্বাস ত্যাগ) হা ধিক্ ! মন্দভাগিনী আমি এই জনকে বহুক্ষণ দেখিতেও পারিলাম না। (নিষ্ক্রান্তা)।

(2) Sagarika—Well, the queen has departed ;—let it be. I too shall soon go (Glancing earnestly at the king and sighing). Alas ! this man cannot be even seen long enough by myself unhappy as I am (exit).

(3) पारित:=शक्त:। पृ+णिच्+क्त:। पारयति। अपपारत्।

राजा—(परिक्रामन्।)

देवि त्वन्मुखपङ्कजेन शशिन: शोभातिरस्कारिणा

पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम्।

श्रुत्वा ते परिवारवारवनितागीतानि भृङ्गाङ्गना

लीयन्ते मुकुलान्तरेषु शनकै: संजातलज्जा इव।

(इति निष्क्रान्ता: सर्वे।) इति मदनमहोत्सवो नाम प्रथमोऽङ्क:।

(1) হে দেবি, দেখ, চন্দ্রকান্তিপরিভাবী তোমার মুখপঙ্কজদ্বারা পরাভূত পদ্মগুলি সহসা শোভাহীনতা প্রাপ্ত হইতেছে এবং মধুকরীরা তোমার পরিবারস্থিত গণিকাদের গীত শ্রবণ করিয়া সলজ্জা হইয়াই যেন ধীরে ধীরে কুড্মলমধ্যে লীন হইতেছে।

(2) O queen, see, the lotuses are turning pale by being surpassed by your lotus-like-face which has defeated the beauty of the moon and the bees, as if ashamed, after listening to the songs of the courtezans in the midst of your serving maids, are slowly hiding themselves in the opening buds.

(3) देवि शशिन: शोभातिरस्कारिणा त्वन्मुखपङ्कजेन विनिर्जितानि अब्जानि सहसा विच्छायतां गच्छन्ति। भृङ्गाङ्गना: ते परिवारवारवनितागीतानि श्रुत्वा सञ्जातलज्जाइव मुकुलान्तरेषु शनकैर्लीयन्ते पश्य।

(4) हे देवि महिषि शशिनश्चन्द्रस्य शोभाया: कान्ते: तिरस्कारिणा परिभा

विना। अत्याकारः परिभावी।
काथ्यत इति हलयुधः। त
विनिर्जितानि पराभानि अप्सु
सहसा अतर्कितं यतथा। अत
तानि विच्छायानि प्रादिभ्यो ध
क्षेच इति (६।१।७ नुक्। ते
तथा भङ्गानामङ्ग स्त्रियो म
परिचारिकामुख्य याः वा
सञ्जाता लज्जा यतास्तथोक्ताः।
स्त्रियामित्यमरः।न्तरेषु मध्येषु
कच् (५।३।७ लीयन्ते तिष्ठन्त
(5) त्वन्तावानि पद्मा
परिचारिकाणां तानां गानेन ह
(6) तिरणा=तिरम्+
(८।३।४२)।वाराः=परि+
लीयन्ते— श्लेषणे। दि
infor लीयते लास्लीयताम्। अ
अल Su.— । अलासत। र
लीनं लाग lf wit म गनः। लीनः
(7) छायामिप्रिया कान्तिः।
(8) इत्यर्थः। अत्र विनिर्जि
सञ्जातलज्जाभिः...।
(9) शार्दूलविक्रीडितं वृत्तम्।
(10) उपमालङ्कृतिः।

पराभवः। अनादरश्चाभिभवस्तिरस्कारश्च
तत्त्वमित्युपमिततत्पुरुषः तत्। तेन-
र तानि पद्मानि सप्तम्यां जने डः इति डः।
। विगता छाया कान्तिर्येभ्य इति
इति। दलोप इति वक्तव्यात् बहुव्रीहिः।
विच्छायतां हतशोभत्वं गच्छन्ति लभन्ते।
परिव्रियते एभिरिति परिवारास्तेषु
— तासां गीतानि श्रुत्वा आकर्ण्य
मुकुलानां कुट्मलानां कुट्मलो मुकुलोऽ-
स्त्री। अव्ययसर्वनाम्नामकच् प्राक्टेरित्य-
वलोकय।
मलिनानि भवन्ति। अमर्थश्च त्वत्
कुट्मललीना भवन्तीति द्वैयस्व।
पनिः। तिरसोऽन्यतरस्यामिति सत्वम्
र् करणे। ते
लीयते। लिल्ये। लेता लाता।
लीयेत। लेषीष्ट लासीष्ट। अलेष्ट
अलायि। लीला विलीय विलाय।

नातप इत्यमरः।
विच्छायता। भङ्गाङ्गनाभिर्लीयते...

इति मदनमञ्जरी ... प्रथमोऽङ्कः।

द्वितीयोऽङ्कः

en see:

॥ प्र च गकः ॥

( ) तत: प्रविशति र अरव्यग्रहस्ता सुसङ्गा)

सुसं। हद्धी हद्धी। अह दाणिं मम र इमं सारिअं णिक्खिविअ कहिं गदा मे पिअसही साअरिआ भविस्सदि। (अन्यतो दृष्ट्वा) एसा क्खु णिउणिआ इध र आअच्छदि। ता जाव एदं पुच्छिस्सं। (क) (तत: प्रविशनिपुणिका।)

निपु। उअलद्धो क्खु मए भट्टिणी वुत्तं। ता जाव गदुअ भट्टिणीए णिवेदेमि। (इति परिक्रामति।) (ख)

सुसं। हला णिउणिए, कहिं दाणिं विम्हओ-क्खित्तहिअआ विअ इह ट्ठिदं मं रिअ क अदिक्कामसि। (ग)

de by ated t

(क) हा धिक् हा धिक्। अथेदानीं मम हस्ते ste रकां निक्षिप्य क्व गता मे प्रियसखी सागरिका भविष्यति। एषा खलु नि कैव एवागच्छति। तद्यावदेनां प्रक्ष्यामि।

(ख) उपलब्ध: खलु मया भर्तृवृत्तान्त:। तद्यावद्गत्वा भर्त्र्यै निवेदयामि।

(ग) हला निपुणिके, क्वेदानीं त्वं विस्मयोत्क्षिप्तहृदयेव इह स्थितां मामवधीर्य कुतोऽतिक्रामसि।

দ্বিতীয়াঙ্ক। প্রবেশক—অন্তঃপুর।

(সারিকাপিঞ্জরব্যগ্রহস্তা সুসঙ্গতার প্রবেশ)

সুসঙ্গতা—হায় ধিক্, হায় ধিক্, আমার হাতে এই সারিকাকে নিক্ষেপ করিয়া এইক্ষণ আমার প্রিয়সখী সাগরিকা কোথায়? (অন্যত্র দর্শন পূর্ব্বক) এই যে নিপুণিকা এই দিকেই আসিতেছে। ইহাকে জিজ্ঞাসা করি।

নিপুণিকার প্রবেশ।

নিপুণিকা—মহারাজের বৃত্তান্ত জানা হইল। অতএব এখন যাইয়া ভর্ত্রীকে নিবেদন করি (পরিক্রমণ)।

সু—সখি নিপুণিকে, এখানে থাকাতেও আমাকে অবহেলা করিয়া বিস্ময়বিহ্বল-চিত্তার ন্যায় এখন কোথায় যাইতেছ?

(2) Act. II. Prelude. Scene I—garden of the palace.

(Enter *Susangata* busy with a parrot in a cage)

Susangata—Alas, alas, where is now my dear friend *Sagarika* who has left this parrot in my hand. (Looking within) *Nipoonika* is coming in this direction, so I shall ask her.

(Enter *Nipoonika*)

Nippoo—I have learned the news of the king. So I go now to inform the queen (Moving).

Su.—Dear *Nipoonika*, where are you going now as if beside yourself with amazement, disregarding me who am here?

(3) प्रक्ष्यामि—जिज्ञासिष्ये। प्रच्छ्+लृट् मिप्। पृच्छति। पप्रच्छ। प्रष्टा। प्रक्ष्यति। पृच्छतु। अपृच्छत्। पृच्छेत्। पृच्छ्यात्। अप्राक्षीत्। अप्रक्ष्यत्। पृच्छ्यते। अप्रच्छि। प्रष्टुम्। पृष्ट्वा। पृष्टम्। पृच्छत्। क्व=किम्+अल्। सप्तम्यास्त्र-लिति अल् (५।३।१०)। अल् may stand for सप्तमी। उपलब्धः=ज्ञातः। उप+लभ्+क्तः। लभते। लेभे। लप्स्यते। अलब्ध। लभ्यते। अलम्भि अलाभि। लब्धुम्। लब्ध्वा। लभमानः। विस्मयोत्क्षिप्तहृदयेव=विस्मयेन उत्क्षिप्तं हृदयं यस्याः सा तथोक्ता सा इव। वैचित्र्यविचलितमना इव। इवेन विभक्त्यलोपः

पूर्वपदप्रकृतिस्वरत्वञ्चेति वार्त्तिकम् (२।२।१८) नित्याधिकारे पठितमपि भाष्यकृता सह सुपेत्यत्र गृहीतम्। यथा इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यम्। वाससी इव। कन्येइव इति। (२।१।४) तेन इवेन समासः क्वाचित्कएव। नतु नित्यः। यथोत्तरं मुनीनां प्रामाण्यात्। वार्त्तिकानुरोधेन जयादित्येपीदं नित्याधिकारे पपाठ (२।२।१८)। तथापि व्यस्तप्रयोगः। व्यवहितप्रयोगश्च। यथा उद्बाहुरिव वामन इति कालिदासः। कचाचितौ विष्वगिवागजौ गजाविति भारविः। समास with इव is not compulsory and hence इव here may or may not be taken as compounded. वागर्थाविव संपृक्ता-वित्यादौ 'इवशब्दः समस्तः व्यस्तो वा। समस्ते वृत्त्यन्तस्त्व। अग्निरिवराजः। वायुरिवसखः। अग्निरिवगुः। अग्निरिवपाशः। विस्तरस्तु शब्देन्दुशेखरे सहसुपेत्यत्र (२।१।४) द्रष्टव्यः। एवमेव श्रीपतिः। अवधीर्य—अवज्ञाय। अवधीरयति। This root is not expressly counted in चुरादि but it is accepted there under the गणसूत्र "बहुल मेतन्निदर्शनम्" given in that class and is supposed to come from the प्रातिपदिक धीर। So धीर + णिच्=धीरि and अव+धीरि + ल्यप्=अवधीर्य। लुङि अवादिधीरत्। अदन्तत्वान्नोपधाह्रस्वः। cf :—अवधीर्य धैर्यकलिता दयित मिति माघः (८।५।८)। Also "अवधीर्य धैर्यपरिपन्थि"—Ibid. इतीव धाराम्मवधीर्य मण्डली क्रिया श्रियामण्डितुरङ्गमैर्महीति नैषधीये। अतिक्रामसि=गच्छसि=प्रतिष्ठसे।

निपु।—कधं सुसंगदा। हला सुसंगदे, सुट्ठु तुए जाणिदं। एदं क्खु मम विम्हअस्स कारणं। अज्ज किल भट्टा सिरिपव्व-दादो आअदस्स सिरिखण्डदासणामहेयस्स धम्मिअस्स सआ-सादो अआलकुसुमसंजणणदोहलं सिक्खिअ अत्तणो पडिग्ग-हिदं णोमालिअं कुसुमसमिद्धिसोहिअं करिस्सदित्ति। तहिं

एदं वुत्तन्तं जाणिदुं देवीए पेसिदम्हि। तुमं उण कहिं पत्थिदा। (क)

सुसं। पिअसहीं साअरिअं अण्णेसिदुं। (ख)

निपु। हला दिट्टा मए साअरिआ गहीदसमुग्गअचित्त फलअवत्तिआ समुव्विग्गा कअलीघरं पविसन्ती। ता गच्छ पिअसहि, अहं वि देवीसआसं गमिस्सं। (इति निष्क्रान्ते।) (ग)

इति प्रवेशकः।

(क) कथं सुसंगता। हला सुसंगते, सुष्ठु त्वया ज्ञातम्। इदं खलु मम विस्मयस्य कारणम्। अद्य किल भर्त्ता श्रीपर्वतादागतस्य श्रीखण्डदासनामधेयस्य धार्मिकस्य सकाशादकालकुसुमसंजननदोहदं शिक्षित्वा आत्मनः परिगृहीतां नवमालिकां कुसुमसमृद्धिशोभितां करिष्यतीति। तदेनं वृत्तान्तं ज्ञातुं देव्या प्रेषितास्मि। त्वं पुनः क्व प्रस्थिता।

(ख) प्रियसखीं सागरिकामन्वेषितुम्।

(ग) हला दृष्टा मया सागरिका गृहीतसमुद्गकचित्रफलकवर्त्तिका समुद्विग्ना कदलीगृहं प्रविशन्ती। तद्गच्छ प्रियसखि। अहमपि देवीसकाशं गमिष्यामि।

(।) नि—কে সুসঙ্গতা? সখি সুসঙ্গতে, তুমি বেশ বুঝিয়াছ। ইহাই আমার বিস্ময়ের কারণ। আজ মহারাজ শ্রীপর্ব্বত হইতে আগত শ্রীখণ্ডদাস নামক ধার্ম্মিকের নিকটে অসময়ে পুষ্পোৎপাদক বস্তু শিক্ষা করিয়া নিজের পরিগৃহীত নবমালিকাকে পুষ্পবিভবশোভিতা করিবেন। এই ব্যাপার জানিবার জন্য সেস্থলে প্রেরিতা হইয়াছি। তুমি তবে কোথায় যাইতেছ?

সু—প্রিয়সখী সাগরিকাকে অন্বেষণ করিতে—

নি—সখি, সমুদ্বিগ্না সাগরিকাকে সমুদ্গক (i. e., চিত্রভাণ্ড, অঙ্কনদ্রব্যবর্ণাদির

আধার), চিত্রফলক (i. e., যদুপরি চিত্র করা যাইতে পারে তদ্‌যোগ্য কাষ্ঠাদি) ও বর্ত্তিকা (তুলিকা) গ্রহণ করিয়া কদলীগৃহে প্রবেশ করিতে দেখিয়াছি। অতএব যাও, প্রিয়সখি, আমিও দেবীর নিকট গমন করি (নিষ্ক্রান্ত)। ইতি প্রবেশক।

(2) N.—Who? *Susangata*? Dear *Susangata*, you have understood well. This is the cause of my amazement. The king will to-day adorn the creeper *Nyktanthes* adopted by him, with rich flowers, having learned the things which make the creepers and trees yield flowers out of season, from *Sreekhanda Dasa*, a sage from the *Sriparabata*. I was sent to the king to get information of this. Where are you going now?

Su—To find out my dear friend *Sagarika*.—

N—Dear, I have seen *Sagarika* very uneasy, entering the plantain house, with a box of painting articles, drawing board and brushes. So go, dear. I too go to the Queen (exeunt).

The end of the prelude.

(3) दोहदम्=इच्छा। Generally it means the longing of the pregnant. दोहदं दौहृदं श्रद्धा लालसा च समाः स्मृता इति हलायुधः। But here वृक्षादीनां प्रसवकारणं संस्कारद्रव्यम्। "तरुगुल्मलतादीनामकाले कुशलैः कृतम्। पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत् क्रियेति शब्दार्णवे।"

गृहीतसमुद्गकचित्रफलक-वर्त्तिका—समुद्गकः = सम्पुटकः (a box or casket which contains the painting articles) चित्रफलकः= अङ्कनाधारयोग्यं काष्ठादिकम् (a picture board or drawing board)। वर्त्तिका=वर्णक्षेपसाधनं (brush, painting pencil) चेति द्वन्द्वः। गृहीता एता यया सा। धार्मिकस्य=धर्म+ठक्। तस्य। धर्मं चरतीति (४।४।४१) ठक्। श्रीपर्वत=a temple of महादेव in the Deccan. It is one of the द्वादश ज्योतिर्लिङ्ग। इति प्रवेशकः।

द्वितीयोऽङ्कः।

(ततः प्रविशति गृहीतचित्रफलकवर्त्तिका मदनावस्थां नाटयन्ती सागरिका।)

साग—हिअअ, पसीद पसीद। किं इमिणा आआसमेत्तफलेण दुल्लहजणप्पत्थणाणुबंधेण। अस्सं च। जेण ऐव्व दिट्ठेण दे ईदिसो संदावो णं वड्ढदि। (सविस्मयम्) पुणोवि तं जेव्व पेक्खिदुं अहिलससित्ति अहो दे मूढदा। अइ णिसंस हिअअ, जम्मदो पहुदि सह संव्वड्ढिअ इमं जणं परिहरिअ क्खनमेत्तदंसणपरिचिदं जणं अनुगच्छंतो ण लज्जेसि। अदवा को तुह दोसो। अणंगसरपडणभीदेन तुए एव्वं अज्ज व्ववसिदं। भोदु दाव। अणङ्गं दाव उवालहिस्सं। (सास्रमञ्जलिं बद्धा जानुभ्यां स्थित्वा।) (भअवं कुसुमाउह, णिज्जिदसअलसुरासुरो भविअ इत्थिआजणं पहरंतो कहं ण लज्जेसि। (विचिन्त्य।) सव्वहा मम मंदभाइणीए इमिणा दुण्णिमित्तेण अवस्सं मरणं उवट्ठिदं। (फलकमवलोक्य।) ता जाव इह ण कोवि आअच्छदि दाव आलेक्खसमप्पिदं तं अभिमदं जणं पेक्खिअ जहा समोहिदं तहा करिस्सं।) (सावष्टम्भमेकमना भूत्वा नाट्येन फलकं गृहीत्वा निश्वस्य।) जइवि मे अदिसद्दसेण वेवदि अअं अतिमेत्तं अग्गहत्थो तहवि तस्स जणस्स अण्णो दंसणोवाओ णत्थित्ति ता जहातहा आलिहिअ णं पेक्खिस्सं। (इति नाट्येन लिखति।) (क)

(ক) হৃদয়, প্রসীদ প্রসীদ। কিমনেনায়াসমাত্রফলেন দুর্লভজনপ্রার্থনানুবন্ধেন। অন্যচ্চ। যেনৈব দৃষ্টেন তে ঈদৃশ: সংতাপো ননু বর্ধতে পুনরপি তমেব প্রেক্ষিতুমভিলষসীত্যহো তে মূঢ়তা। অয়ি নৃশংসহৃদয়, জন্মত: প্রভৃতি সহ সংবর্ধিতমিমং জনং পরিহৃত্য ক্ষণমাত্রদর্শনপরিচিতং জনমনুগচ্ছন্ন লজ্জসে। অথবা কস্তব দোষ:। অনঙ্গশরপতনভীতেন ত্বয়ৈবমধ্যবসিতম্। ভবতু তাবৎ। অনঙ্গং তাবদুপালপ্স্যে। ভগবন্ কুসুমায়ুধ, নির্জিতসকলসুরাসুরো ভূত্বা স্ত্রীজনং প্রহরন্ কথং ন লজ্জসে। সর্বথা মম মন্দভাগ্যায়া অনেন দুর্নিমিত্তেনাবশ্যং মরণমুপস্থিতম্। তদ্যাবদিহ ন কোঽপ্যাগচ্ছতি তাবদালেখ্যসমর্পিতং তমভিমতং জনং প্রেক্ষ্য যথা সমীহিতং তথা করিষ্যামি। যদ্যপি মেঽতিসাধ্বসেন বেপতেঽয়মতিমাত্রমগ্রহস্তস্তথাপি তস্য জনস্যান্যো দর্শনোপায়ো নাস্তীতি তদ্যথা তথালিখ্যৈনং প্রেক্ষিষ্যে।

(চিত্রফলকাদিসহ মদনাবস্থাযুক্তা সাগরিকার প্রবেশ।)

সাগরিকা—হে হৃদয়, প্রসন্ন হও, প্রসন্ন হ.। আয়াসমাত্রদায়িনী পুনঃ পুনঃ ঐ দুর্লভজনপ্রার্থনাতে প্রয়োজন কি? আরও, যাহাকে দেখিলে আমার তাদৃশ সন্তাপ বৃদ্ধিপ্রাপ্ত হয়,—(সবিস্ময়ে) পুনর্ব্বার তাহাকেই দেখিতে ইচ্ছা করিতেছ! হায়, তোমার মূঢ়তা! রে ক্রূর হৃদয়! জন্মাবধি একত্র বৃদ্ধিপ্রাপ্ত হইয়া এইজনকে (আমাকে) পরিত্যাগপূর্ব্বক ক্ষণকালমাত্র দর্শনদ্বারা পরিচিতজনের (রাজার) অনুগমনে লজ্জিত হইতেছ নাকি? অথবা তোমার দোষ কি? কামবাণপতনভীত তোমাকর্ত্তৃক আজ ইহা অনুষ্ঠিত হইতেছে। তাই হউক—অনঙ্গকেই তিরস্কার করিব। (জানুদ্বারা ভূমিগত হইয়া করপুটে ও সজলনেত্রে) ভগবন্ পুষ্পশর! সকলসুরাসুর পরাভবকারী আপনি স্ত্রীলোককে প্রহার করিয়া কেন লজ্জিত হইতেছেন না? (চিন্তা করিয়া) অথবা আপনি অঙ্গহীন। সর্ব্বপ্রকারেই মন্দভাগিনী আমার এই দুর্লক্ষণদ্বারা মরণ উপস্থিত। (ফলক দেখিয়া) অতএব যে পর্য্যন্ত এস্থলে কেহ আগমন না করে ততক্ষণ চিত্রগত সেইজনকে দর্শন করিয়া যেরূপ অভিলাষ তাহাই করি (ফলক গ্রহণ ও নিশ্বাস)। যদিও অত্যন্ত ভয়ে আমার হস্তের অগ্রভাগ কম্পিত হইতেছে—তথাপি অন্যরূপে দর্শনের উপায় না থাকাতে যেরূপ হউক তাহাকে চিত্রিত করিয়া দেখিব (অঙ্কন।)

(2) Act II. Scene 2—A Plaintain house.

(Enter *Sagarika* with a box, brush, picture-board and indicating wasted amorous state.)

Sagarika—O heart, pardon, pardon, what is the necessity of constantly hankering after a man who is beyond your reach ? And which will produce only useless exertion ? Besides, you require to see him again and again, whose sight causes so much flurry ! (Amazingly) Alas your fool hardiness ! O cruel heart, are you not ashamed to follow one known only by having been seen once for a short time ? and leaving me who have grown up together with you from birth ? Or there is no fault of yours. You have acted thus, being afraid of the arrows of the god of love. Let it be. I shall blame the god of love—(Kneeling, with coupled hands and tears) O God of flower-arrows ! why are you not ashamed of attacking a woman when you have defeated all the gods and demons ? (Thinking) Or you are bodiless. So by all means my death is near, unlucky as I am. (Seeing the drawing board) So, till some one comes here, let me do what I desire by seeing him in picture.—(Taking up the board and sighing) Though my fingers shake with great fear, as there is no other means, let me first paint any how and then see him (Draws).

(3) आयासमात्रफलकेन=केवलपरिश्रमलाभरूपेण। आयासएव आयासमात्रम्। मयूरव्यंसकादयश्चेति तत्पुरुषः। तदेव फलं यस्य स तथोक्तस्तेन। अत्र चकाराद् पुनः समासप्रतिषेधस्तु अनन्तरस्य विधिर्वा प्रतिषेधो वेति नियमात् अनन्तरस्य कर्मधारयस्यैव स्यात्। न तु बहुव्रीह्यादेः। दुर्लभजनप्रार्थनानुबन्धेन—दुष्प्रापजनाभिलाषसातत्येन। अनेन संकल्प-नाम-मदनावस्था सूचिता। व्यवसितम् =कृतम्=अनुष्ठितम्। उपालप्स्ये = निन्दिष्यामि। दुर्निमित्तेन = दुर्लक्षणेन दुर्लभजनलाभाभावरूपेण। समीहितम् = इष्टम्। अतिसाध्वसेन = अतिभयेन। अग्रहस्तः—अग्रश्च हस्तश्चेति कर्मधारयः। अग्रस्थावयवा इत्यर्थः। उभयोरभेदात्। यदाह वामनः काव्यालङ्कारसूत्रे—हस्ताग्राग्रहस्तादयो गुणगुणिनो रभेदादिति। षष्ठीसमासे तु राजदन्तादिपाठेन कथञ्चिदग्रशब्दस्य पूर्वनिपातः समाधेयः।

वेपते=कम्पते । विवेपे । वेपिष्यते ।' अवेपिष्ट । वेपमानः वेपितः । वेपितुम् । वेपित्वा । जन्मतः प्रभृति—"अपादाने पञ्चमीतिसूत्रे कार्त्तिक्याः प्रभृतीति भाष्यप्रयोगात् प्रभृत्यर्थयोगे पञ्चमी ।" इति भट्टोजिभट्टः । जन्मन् + तस्= जन्मतः । आलिख्यैनं प्रेक्षिष्ये इत्यादिभिः पूर्वरागानुप्राणितो विप्रलम्भाख्यो रतिभावः सूचितः । तत्र विनोदनार्थं चित्रलेखनादिकं ग्रहणम् ।

सञ्जाते विरहे यूनोस्तुल्यवस्तुविलोकनैः ।
अथवालेख्यनिर्माणैः स्वप्ने सन्दर्शनैश्च वा ॥ १ ॥
तत्स्पृष्टस्पर्शनैर्वापि प्रतीकारो निगद्यते ।
अन्यथा स्मरसञ्चारे दुर्विपाकभयं भवेत् ॥ २ ॥
अत्र प्रयत्नो नाम नाटकावस्था ।

(ततः प्रविशति सुसंगता ।)

सुसं—एदं क्खु कअलीघरम् । ता जाव पविसामि (प्रविश्यावलोक्य च सविस्मयम् ।) एसा मे पिअसही साअरिआ । किं उण एसा गुरुआणुराओक्खित्तहिअआ किं पि आलिहन्ती ण मं पेक्खदि । भोदु । ता जाव दिट्ठिपहं से परिहरिअ णिरुवइस्सं किं एसा आलिहदि त्ति । (स्वैरं पृष्ठतोऽस्याः स्थित्वा दृष्ट्वा सहर्षम् ।) कहं भट्टा आलिहिदो । साहु पिअसहि, साहु । अहवा ण कमलाअरं उज्झिअ राअहंसी अण्णहिं अहिरमदि । (क)

(क) एतत् खलु कदलीगृहम् । तद्यावत् प्रविशामि । एषा मे प्रियसखी सागरिका । किं पुनरेषा गुर्वनुरागोत्क्षिप्तहृदया किमप्यालिखन्ती न मां पश्यति । भवतु । तद्यावद्दृष्टिपथमस्याः परिहृत्य निरूपयिष्यामि किमेषालिखतीति । कथं भर्तालिखितः ! साधु प्रियसखि, साधु । अथवा न कमलाकरमुज्झित्वा राजहंस्यन्यत्राभिरमते ।

(সুসঙ্গতার প্রবেশ।)

(1) সু—এই সেই কদলী গৃহ। অতএব প্রবেশ করি। (প্রবেশপূর্ব্বক অবলোকন করিয়া বিস্ময়ের সহিত) এই আমার প্রিয়সখী সাগরিকা। তীব্রানুরাগবিচলিতচিত্তা কোনও বস্তুর অঙ্কনে প্রবৃত্ত হইয়া আমাকে দেখিতেছে নাকি? হউক। এখন ইহার দৃষ্টিপথ পরিত্যাগ করিয়া এ কি চিত্র করিতেছে তাহা নিরূপণ করিব (সাগরিকার পশ্চাতে থাকিয়া দর্শনপূর্ব্বক সহর্ষে) এই যে রাজা অঙ্কিত হইয়াছেন, ভাল প্রিয়সখি ভাল। অথবা সরোবর পরিত্যাগ করিয়া রাজহংসী অন্যত্র তুষ্ট হয় না।

(Enter Susangata.)

(2) Sus—This is that plantain house. So I enter (Entering and glancing and with surprise) This is my dear companion *Sagarika*. Is she, with heart deeply smitten with love, unable to see me being busy in portraying something? Let it be. Now keeping out of her sight, I shall find what she is drawing. (Going imperceptibly behind *Sagarika* and seeing,—joyfully) So, the king is portrayed! well, my dear, well. Or the white goose never delights to sport in any other place than a lake.

(3) अभिरमते=तुष्यति। कमलाकर—सरः। राजहंसी=विशेषणं विशेषेण बहुलमिति बहुलग्रहणात् कर्मधारये कृष्णसर्पादिवत् नित्यसमासः। राजहंसास्तु ते चञ्चूचरणैर्लोहितैः सिता इत्यमरः।

साग। (सवाष्पम्) आलिहिदो मए एसो किं उण अणवरदणिवड्न्तवाहसलिलेण मे दिट्टी पेक्खिदुं ण पहवदि। (मुखमुत्तानीकृत्याश्रूणि निवारयन्ती सुसङ्गतां दृष्ट्वा उत्तरीयेण फलकं प्रच्छादयन्ती स्मितं कृत्वा) कहं पिअसही सुसङ्गदा। (उत्थाय हस्ते गृहीत्वा) सहि सुसङ्गदे इदो उवविस। (क)

सुसं। (उपविश्य बलात् फलकमाक्रम्य दृष्ट्वा च) सहि को एसो तुए आलिहिदो। (ख)

साग। (सलज्जम्) पउत्तमअणमहूसवे भअवं अणङ्गो। (ग)

(क) आलिखितो मयायम्। किं पुनरनवरतनिपतद्वाष्पसलिलेन मे दृष्टिः प्रेक्षितुं न प्रभवति। कथं प्रियसखी सुसंगता। सखि सुसंङ्गते, अत्रोपविश।

(ख) सखि, क एष त्वयालिखितः।

(ग) प्रवृत्तमदनमहोत्सवे भगवाननङ्गः।

(1) সাগ—(সবাষ্প ; ইনি অঙ্কিত হইলেন। কিন্তু অনবরতপতনশীল অশ্রুর নিমিত্ত আমার নয়ন ইহাকে দেখিতে পারিতেছে না। (মুখ তুলিয়া অশ্রু মার্জ্জন ও সুসঙ্গতাকে দেখিয়া উত্তরীয় দ্বারা ফলকাচ্ছাদনপূর্ব্বক হাস্য) কে প্রিয়সখী সুসঙ্গতা? (উঠিয়া হাতে ধরিয়া) সখি সুসঙ্গতে এই স্থানে বস।

সু—(উপবেশন ও বলে ফলকাকর্ষণ ও দর্শন পূর্ব্বক) সখি, এই কে তোমা কর্ত্তৃক অঙ্কিত হইয়াছে?

সা—(সলজ্জভাবে) প্রবৃত্তমদনমহোৎসবে ভগবান্ অনঙ্গ।

(2) Sag—(With tears) He is portrayed by me. But my eyes cannot look at him owing to constant falling of tears (Raising up her face wipes off the tears and seeing *Susangata*, conceals the board with her cloth and smiling) Who? My dear *Susangata*? (Rising and holding her hand) My dear *Susangata*, sit down here.

Soo—(Sitting and snatching the board) Dear, who is this delineated by you?

Sag—(Bashfully) The god of love in his festival which has begun.

(3) अनवरतेति=अनवरतम् अविश्रान्तं निपतत् बाष्पमेव सलिलं तेन= निरन्तरगलदश्रुणा। बाष्पं नेत्रजलोष्मणोरिति विश्वः। अत्र सलिलपदप्रयोगेपि कर्णावतंस-जघनकाञ्ची-धनुर्ज्यापुष्पमालादिवत् सान्निध्यादृढ़ीत्कर्णादिवाचकत्वान्न पुनरुक्तिदोषः। तथाहि कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः। सन्निधानादिबोधार्थं स्थितेष्वेतत् समर्थनमिति मम्मटः। अनुरूपं वर्णनं यथा बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपीति आकुलत्वम्। अस्रैस्तावन् मुहुरुपचितै र्दृष्टिरालुप्यते मे इति मेघदूतम्।

सुसं—(सस्मितम्) अहो दे णिउणत्तणम्। किं उण सुण्णं विश्र चित्तं पडिभादि। ता अहं पि आलिहिश्र रइसणाहं करिस्सम्। (वर्त्तिकां गृहीत्वा नाट्येन रतिव्यपदेशेन सागरिकामालिखति)। (क)

साग—(विलोक्य सक्रोधम्।) सहि, कीस तुए एत्थ अहं आलिहिदा। (ख)

सुसं—(विहस्य।) सहि, किं अकारणे कुप्पसि। जादिसो तुए कामदेवो आलिहिदो तादिसी मए रई आलिहिदा। ता अस्रधासंभाविणि, किं तुह एदिणा आलविदेण। कहेहि सव्वं वुत्तन्तम्। (ग)

साग—(सलज्जा स्वगतम्।) णं जाणिदम्हि पिअसहीए। (प्रकाशम्) पिअसहि, महदी क्खु मे लज्जा। ता तह्रा करेसि जह्रा ण को वि अवरो एदं वुत्तन्तं जाणादि त्ति। (घ)

(क) अहो ते निपुणत्वम्। किं पुनः शून्यमिव चित्रं प्रतिभाति। तस्मा-दहमप्यालिख्य रतिसनाथं करिष्ये।

(ख) सखि, किमिति त्वयाबाहमालिखिता।

(গ) সখি, কিমকারণে কুপ্যসি। যাদৃশস্ত্বয়া কামদেব আলিখিতস্তাদৃশী ময়া রতিরালিখিতা। তদন্যথাসংভাবিনি, কিং তবৈতেনালপিতেন। কথয় সর্বং বৃত্তান্তম্।

(ঘ) ননু জ্ঞাতাস্মি প্রিয়সখ্যা। প্রিয়সখি, মহতী খলু মে লজ্জা। তস্মা-ত্তথা কুরুষ্ব যথা ন কোঽপ্যপর এতদ্বৃত্তান্তং জানাতীতি।

(১) সু—(সস্মিতে) অহো তোমার নিপুণতা। কিন্তু চিত্রটী শূন্য বোধ হইতেছে। অতএব আমিও অঙ্কনপূর্ব্বক ইহা রতিযুক্ত করি (তুলি লইয়া রতিচ্ছলে সাগরিকাকে অঙ্কন)।

সা—(দর্শন পূর্ব্বক সক্রোধে) সখি, কেন তুমি আমাকে এখানে অঙ্কিত করিলে!

সু—(হাস্যপূর্ব্বক) সখি, অকারণে কোপ করিতেছ কেন? তুমি যেরূপ কামদেবকে অঙ্কিত করিয়াছ, আমিও তদ্রূপ রতিকে অঙ্কিত করিয়াছি! অতএব অন্য প্রকার সম্ভাবনা করিয়া তোমার এইরূপ কপটতাযুক্ত আলাপে ফল কি? সমস্ত বৃত্তান্ত বল।

সা—(সলজ্জা স্বগত)—ভাল, প্রিয়সখী কর্ত্তৃক জ্ঞাতা হইয়াছি! (প্রকাশে) প্রিয়সখি, আমার বড়ই লজ্জা হইতেছে,—অতএব যাহাতে অপর কেহ এই বৃত্তান্ত না জানে তাহা কর।

(২) Soo—(Smiling) O your ability! But the painting appears to be incomplete. So, I too shall draw and make it contain the goddess of love. (Taking the brush, she draws a figure of *Sagarika.*)

Sag—(Seeing, with anger) Friend, why am I drawn here by you?

Soo—(Laughing) Friend, why are you angry without cause? I have drawn up such a goddess as will match your god. Therefore, O one who thinks otherwise, it is useless to talk thus. Tell me all things.

Sag—(Bashfully,—aside) Oh, I have been found out by my

dear friend. (To *Susangata*) Dear friend, I feel highly ashamed. So do that no one else may know this matter.

(3) रतिसमार्थम्=रतियुक्तम्। समार्थं प्रभुमित्याहुः सक्तिते विमतापिनीति शब्दार्णवे। रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोरिति मेदिनी। कुप्यसि= क्रुध्यसि। कुप्यति। चुकोप। कोपिष्यति। अकुपत्। कुप्यते। अकोपि। कुपितम्। कुप्यत्। कोपितुम्। कोपित्वा, कुपित्वा। यादृशः—यद् + दृश् + कञ्। त्यदादिषु दृशोऽनालोचने कञ्चेति कञ्। आ सर्व्वनाम्न इति आत्वम्। काशिकाकार says these are like रूढ़ words, though हरदत्त mentions a different view:—"तादृगादयो हि रूढ़िशब्दप्रकारा नैवात्र दर्शनक्रिया विद्यते" इति काशिका। "भाष्ये तु कर्मकर्त्तरि व्युत्पत्तिर्दर्शिता। तमिवेमं पश्यन्ति जनाः। सोऽयं स इव दृश्यमानः। तमिवात्मानं पश्यतीति"— पदमञ्जरी।

सुसं—सहि, मा लज्ज। ईदिसस्स कस्सारअणस्स अवस्सं एव्व इदिसे वरे अहिलासेण होदव्वं। तहवि जहा ण कोवि अवरो एदं वुत्तन्तं जाणिस्सदि तह करेमि। (एदाए उण मेधाविणीए एथ सारिआए कारणेण होदव्वं। कदावि एसा इमस्स आलावस्स गहिदक्खरा कस्सावि पुरदो मंतइस्सदित्ति।) (क)

साग—(सोद्वेगम्।) सहि, अदोवि मे अधिअदरं संदावो बाधेदि। (इति मदनावस्थां नाटयति।) (ख)

सुग—(सागरिकाया हृदये हस्तं दत्त्वा) सहि, समस्सस समस्सस। जाव इमाए दिग्घिआए णलिणीपत्ताणि मुणालिआओ अ गेण्हिअ लहुं आअच्छामि। (निष्क्रम्य पुनः प्रविश्य च नाट्येन नलिनीपत्रैः शयनीयं मृणालवलयानि च

রচয়িত্বা পরিশিষ্টানি নলিনীপত্রাণি সাগরিকায়া হৃদয়ে নিক্ষিপতি)। (গ)

(ক) সখি, মা লজ্জস্ব। ঈদৃশস্য কন্যারত্নস্যাবশ্যমেবেদৃশে বরেঽভিলাষেণ ভবিতব্যম্। তথাপি যথা ন কোঽপ্যপর এতদ্বৃত্তান্তং জ্ঞাস্যতি তথা করোমি। এতয়া পুনর্মেধাবিন্যা সারিকয়াত্র কারণেন ভবিতব্যম্। কদাচিদেতস্যালাপস্য গৃহীতাক্ষরা কস্যাপি পুরতো মন্ত্রয়িষ্যতে ইতি।

(খ) সখি, অতোঽপি মেঽধিকতরং সংতাপো বাধতে।

(গ) সখি, সমাশ্বসিহি সমাশ্বসিহি। যাবদেতস্যা দীর্ঘিকায়া নলিনীপত্রাণি মৃণালিকা চ গৃহীত্বা লঘ্বাগচ্ছামি।

(১) সু—সখি, লজ্জা করিও না। এতাদৃশ কন্যারত্নের এইরূপ বরেই অভিলাষ ঘটে। তথাপি যাহাতে অন্য কেহ এই বৃত্তান্ত না জানে তাহা করিব। কিন্তু এই মেধাবিনী সারিকা এই বিষয়ে (অন্যের অবগতি বিষয়ে) কারণ হইতে পারে। হয়ত, সারিকা আমাদের আলাপের কথা গুলি অভ্যস্ত রাখিয়া, কাহারও অগ্রে বলিয়া ফেলিবে।

সা—(উদ্বেগের সহিত) ইহা হইতেও আমার অধিকতর সন্তাপ ঘটিতেছে। (মদনাবস্থা প্রকাশ)।

সু—(সাগরিকার বক্ষে হাত দিয়া) সখি, সমাশ্বস্তা হও, এই দীর্ঘিকা হইতে পদ্মপত্র ও মৃণালখণ্ড লইয়া আমি শীঘ্র আসিতেছি (গমন ও প্রত্যাগমন পূর্ব্বক নলিনীপত্র দ্বারা শয্যা ও মৃণালবলয় নির্ম্মাণপূর্ব্বক অবশিষ্ট পদ্মপত্র সাগরিকার বক্ষে নিক্ষেপ)।

(2) Soo—Friend, be not ashamed, such a gem of a girl cannot but desire for such an excellent husband, yet I shall do such as to let no one know this. But this sagacious parrot may be the source of information to others. She may perchance by retaining in memory the words of this conversation, talk them out before some one.

Sag—(With anxiety) Friend, I suffer more deeply than this, (Betrays amorous sufferings).

Soo—(Touching *Sagarika's* breast) Dear, be calm, be calm till I come back soon with the leaves and small roots of lotus from this tank (Goes and returning with them prepares a bed of lotus leaves and bracelets with roots and puts the remaining leaves, on *Sagarika's* breast).

(3) मेधाविनी=धारणावत्धीसम्पन्ना। धीर्धारणावती मेधेत्यमरः। अस्याया मेधास्रजो विनिरिति (५।२।१२१) विनिः। ऋन्नेभ्यो ङीबिति ङीप्।=endowed with a retentive intellect। पुरतः=is a निपात। That which is derived from पूर्व is पुरः or पुरस्तात्। Cf: इयञ्च तेन्या पुरतो विडम्बनेति कालिदासः। पश्यामि तां मत इतः पुरतश्च पश्चादिति मालतीमाधवे। ज्ञानेन्द्रभिक्षु objects to the प्रामाणिकता of this word and जगन्नाथपण्डित in his रसगङ्गाधर is furious against it (vide 2nd chap.) But

"इयन्त इति संख्यानं निपातानां न वर्त्तते।
प्रयोजनवशादेते निपात्यन्ते पदे पदे॥"

तथाहि नागेशः—"अन्येतु दक्षिणोत्तराभ्यामतसुज् इत्युक्तं तस्यैव पुंवद्भावसिद्धे अतसुज्विधानं (५।३।२८) अन्यस्मादपीति ज्ञापनाय। तेन पश्चाद्यजन्तात् पुरशब्दादिष्टसिद्धिः। वस्तुतस्तु पुर अग्रगमने इति चौरादिकात् णिजभावे इगुपधलक्षणे के सार्वविभक्तिकस्तसिरिति बोध्यमिति। मन्त्रयिष्यते—मत्रि गुप्तभाषणे इति चुरादौ आत्मनेपदी। अकर्तृगामिफलार्थमिदमिति भट्टोजिः। आकुस्मीया अकर्माभिप्रायेऽपीति माधवः। मन्त्रयते। अममन्त्रत। परस्मैपदे निर्देशस्त्वपाणिनीयः। अन्यथा स्मन्नाद्यो प्रयोगः। मृणालिका=मृण हिंसायामिति धातोरौणादिकः कालन् प्रत्ययः। मृणालं पद्ममूलमित्युज्ज्वलदत्तः। स्त्रियां मृणाली। अल्पाख्यायामिति कन्। केऽण इतिह्रस्वः। टाप्। मदनावस्था=यथा

दृङ्मनःसङ्गसङ्कल्पा जागरः कृशतारतिः।
ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्ग दशा दशेति।

अन्ने तु क्षमतादिकाः काश्चिद् वर्णिताः। Interview, attraction, desire, waking, leanness, vexation, indecency, insanity, insensibility and death are the ten states of a person when under amorous suffering.

साग—सहि, अवणेहि इमाइं णलिणीपत्ताइं मृणालवलआइं च। अलं एदिना। कीस अआरणे अत्ताणं आआसेसि। णं भणामि

दुल्लहजणअणुराओ लज्जा गुरुई परव्वसो अप्पा।
पिअसहि विसमं प्पेम्मं मरणं सरणं णु वरमेक्कं ॥१॥

(इति मूर्च्छति।) (क)

सुसं। (सकरुणम्) पिअसहि साअरिए समस्सस समस्सस। (ख)

(क) सखि, अपनयेमानि नलिनीपत्राणि मृणालवलयानि च। अलमेतेन। कस्मादकारणे आत्मानमायासयसि। ननु भणामि।

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।
प्रियसखि विषमं प्रेम मरणं शरणं नु वरमेकम् ॥

(ख) प्रियसखि सागरिके, समाश्वसिहि समाश्वसिहि।

সা—সখি, এই পদ্মপত্র ও মৃণালখণ্ডগুলি দূরে রাখ। ইহাদের প্রয়োজন নাই। কেন অকারণে নিজকে ক্লেশ দিতেছ। ভাল, বলি (একে) দুর্লভ জনে অনুরাগ, তাহাতে লজ্জা অত্যন্ত, আত্মাও পরবশ। অতএব প্রিয় সখি প্রেম বিষম এবং কেবল মরণই উহাতে প্রধান আশ্রয়। (মূর্চ্ছা)।

সু—(সকরুণে) প্রিয়সখি সাগরিকে, সমাশ্বস্তা হও, সমাশ্বস্তা হও।

(2) Sag—Dear, take away these leaves, and bracelets of lotus roots. No use of them.—why do you take trouble in vain? Well,

I say, my love is for one who is beyond my reach. Modesty is there a great obstruction, and my body is under another, so this sort of affection is dangerous. My dear, only death is the great refuge. (Swoons)

Soo—(With pity) My dear, be calm, be calm.

(4) आयासयसि = खेदयसि = क्लेशयसि। दुल्लहेति। दुर्लभे दुष्प्रापे जने लोके राजनीत्यर्थः अनुरागः ममासक्तिः वर्त्तत इति शेषः। नाहं स्वयमपि तमभिसर्त्तुं शक्नोत्याह लज्जा गुर्वी महती। वोतो गुणवचनादिति वा ङीप्। स्वजनोऽपि कश्चिद न मां तस्मै दास्यतीत्याह। आत्मा परवशः। अन्यायत्तः। सागरोत्तरणात् परं मम वासवदत्तायाम्हस्ते पतनात्। प्रियसखि, प्रियसहचरि, प्रियस्य भावः प्रेम। प्रियशब्दादिमनिच्। प्रियस्थिरेत्यादिना (६।४।१५७) प्रादेशः। प्रेमा ना प्रियता हार्दं प्रेम स्नेह इत्यमरः। विषमं दुःसाधम्। अतः एकं केवलम्। एके मुख्यान्यकेवला इत्यमरः। मरणं मृत्युः न भी वरं श्रेष्ठं शरणमाश्रयः। देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिय इत्यमरः।

(5) दुष्प्रापजने प्रेम। त्रपा च महती। अहञ्च पराधीना। प्रणयः कठिनः। प्रियसखि केवलो मृत्युः मुख्यः आश्रयः। दुर्लभे जने योऽनुरागस्तं लज्जा पराधीनता च बाधते। तृतेश अभावात् स हि दुःखदायी। अतोऽत्र मरणमेव शान्तिलाभोपायः।

(9) छन्दइदं प्राकृते गाथेति कथ्यते। तस्या लक्षणम्—प्रथमे द्वादशमात्रा द्वितीयेऽष्टादशभिः संयुक्ता। यथा प्रथमे तथा तृतीये पञ्चदश चतुर्थके गाथेति।

(10) अत्र काव्यलिङ्गमलङ्कारः। स च एकस्मिन् प्रेम्णो विषमत्वे दुर्लभजनानुरागे साधके स्थिते साधकान्तरस्य गुरुलज्जादेः सद्भावात् समुच्चयालङ्कारानुजीवितः।

(11) अत्र धनिकमते विधूतं नाम नाटकीयं प्रतिमुखसन्ध्यङ्गं वर्णितम्। सागरिकायाः शीतोपचारस्य विधूननात्। तापनमिति विश्वनाथः। अत्र पूर्व्वानुरागरूपी विप्रलम्भाख्यो भावः। तथाहि भोजः—

भावी यदा रति र्नाम प्रकर्षमधिगच्छति।
नाधिगच्छति चाभीष्टं विप्रलम्भ स्तदोच्यते।
पूर्व्वानुरागो मानश्च प्रवासः करुणश्च सः।
पुरुषस्त्रीप्रकाण्डे षु चतुष्काण्डः प्रकाश्यते इति॥

इति सरस्वतीकण्ठाभरणे।

(12) मरणं सरणं णवरमेक्कमिति वा पाठः। तत्र णवरमिति शब्दः केवलार्थवाचकः। "णवरः केवलं" इति प्राकृतप्रकाशे वररुचिः (४।७)।

नेपथ्ये कलकलः।

कण्ठे कृत्वावशेषं कनकमयमधः शृङ्खलादाम कर्षन्
क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः।
दत्तातङ्कोऽङ्गनानामनुसृतसरणिः संभ्रमादश्वपालैः
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः॥

(1) (নেপথ্যে কলকল) নিম্নভাগে স্বর্ণশৃঙ্খল আকর্ষণপূর্ব্বক অবশিষ্টাংশ গলদেশে রাখিয়া অশ্বগৃহ হইতে পলায়িত বানর, অনায়াসগামী চরণদ্বয়ে শব্দায়মান ক্ষুদ্রঘণ্টিকামণ্ডল সহ স্ত্রীগণের আতঙ্ক সঞ্চারপূর্ব্বক অশ্বপালকর্ত্তৃক অনুসৃতমার্গ হইয়া দ্বারাতিক্রমণের পর নৃপতির গৃহে প্রবেশ করিতেছে।

(Noise within).

(2) Dragging a golden chain in the lower part and with the other part in its neck, a monkey fleeing from the stable with circles of small bells rattling in its two legs moving easily, is entering into the king's house, after crossing the doors and frightening the females while pursued hastily by the grooms (horsekeepers).

(3) अधः कनकमयं शृङ्खलादाम कर्षन् अवशेषं कण्ठे कृत्वा मन्दुरायाः प्रभ्रष्टः हेलाचलचरणरणत्किङ्किणीचक्रवालः प्लवङ्गः अङ्गनानां दत्तातङ्कः संभ्रमात् अश्वपालैः अनुसृतसरणिः द्वाराणि क्रान्त्वा नृपते र्मन्दिरं प्रविशति।

(4) अधो निजभागे कनकमयं स्वर्णमयं शृङ्खलादाम बन्धनरज्जुं कर्षन् वेगेन वहन् सन् अवशेषं अवशिष्टं कण्ठे ग्रीवायां कृत्वा रचयित्वा मन्दुराया अश्वगृहात् प्रभ्रष्टः पलायितः हेलया अवज्ञया चलयोर्गच्छतो श्चरणयोः पादयोः रणन्ती ध्वनन्ती किङ्किणीनां क्षुद्रघण्टिकानां चक्रवालं मण्डलं यस्य सः (अनायासगमनशील-पादध्वनत्क्षुद्रकिङ्किणीमण्डलः) प्लवङ्गो मर्कटः अङ्गनानां रमणीनां दत्तः उत्पादितः आतङ्को भयं येन स तथोक्तः उत्पादितत्रासः संभ्रमात् संवेगेन त्वरयेति यावत्। संभ्रमः साध्वसेपि स्यात् संवेगादरयोरपीति मेदिनी। अश्वपालैः वाजिरक्षकैः अनुसृता सरणिः पन्था यस्य स तथोक्तः अनुद्रुतमार्गः द्वाराणि क्रान्त्वा उल्लङ्घ्य नृपतेः राज्ञः मन्दिरं गृहं प्रविशति गच्छति।

(5) मन्दुराभ्रष्टः कपिः काञ्चनशृङ्खलं कण्ठे कृत्वा अवशिष्टं भूमौ कर्षन् अनायासचलितपादक्वणत्किङ्किणीकः योषितां भीतिमुत्पादयन् वाजिरक्षकैः द्रुतमनुगम्यमानः द्वाराणि लङ्घयित्वा राजगृहं याति।

(6) दत्तातङ्कोऽङ्गनानाम् = "भवति च प्रधानस्य सापेक्षस्यापि समासः। किमोदनः शालीनाम्। सक्त्वाढकमापणीयानामिति" (२।१।१) भाष्यकारवचनात् सापेक्षत्वेपि गमकत्वात् समासः। तत्र च भाष्यप्रामाण्यादेव वृत्तिः। अङ्गनानां दत्तः आतङ्को येन। The word आतङ्क is connected with अङ्गनानाम् and hence its समास with another word दत्त is objected to. This objection is removed by the समास in such words as किमोदनः शालीनाम् &c. which are expounded thus केषां शालीनां ओदनः केषाम् आपणीयानां सक्तूनां आढकम् on which कैयट remarks "केषां शालीनाम्? किं जातिमानामय रक्तानां शालीनामन्येषां वौदन इति प्रश्नः।" भट्टोजि also says thus in the शब्दकौस्तुभ—"क्वचित्तु सापेक्षत्वेपि भाष्यप्रामाण्याद्वृत्तिः किमोदनः शालीनाम्। केषां शालीनामोदन इत्यर्थः।" This is the authority for what is ordinarily called सापेक्षत्वेपि गमकत्वात् समासः।

प्रभ्रष्टः—प्र + भ्रंश् + क्तः। भ्रश्यति। बभ्रंश। भ्रंशिष्यति। अभ्रशत्। भ्रश्यते। अभ्रंशि। भ्रंशित्वा भ्रष्टा। भ्रंशितुम्। भ्रंशत्। केषाञ्चिन्मते

भ्वादिरपि। आत्मनेपदी। भ्रंशते। अभ्रंशिष्ट। नाभ्रश्यत स्वर्गफलाद् गुरुर्न इति रघुप्रयोगस्तु (१४।१६) कर्म्मकर्त्तरि बोध्यः। त्वयेति कर्म्मणि वा।

प्लवङ्गः—प्लवेन उत्क्षेपेण गच्छतीति। प्लव+गम्+खच्। गमेः सुपि वक्तव्यमिति खच्। खच्च डिद्वा वाच्य इति पक्षे प्लवङ्गमः। प्लवगः।

कनकमयम्—कनकस्य विकार इति। मयड् वैतयोर्भाषायामभक्ष्याच्छादनयो रिति (४।३।१४३). In the sense of विकार or अवयव, मयट् is added optionally to the words if they do not indicate भक्ष्य or आच्छादन। पक्षे कोपाधाञ्चेत्यण्।

क्रान्त्वा—क्रम्+क्त्वा। क्रमश्च क्त्वि इति (६।४।१८) वा उपधादीर्घः। पक्षे क्रन्त्वा क्रमित्वा। अक्रमीत्। क्राम्यति क्रामति। तङि क्रमते। क्रंस्यते। अक्रंस्त।

कर्षणम्—कृष्+अट। लुङि "कृषमृशस्पृशतृपदृपां च्लेः सिच् वा वाच्य" इति सिच् पक्षे क्सः। अक्राक्षीत् अकार्क्षीत् अकृक्षत् अकृक्षत अकृष्ट। कर्म्मणि अकर्षि।

(7) दामन्=न पुंसि दाम सन्दानं पशुरज्जुस्तु दामनीत्यमरः।

हेला—हेला तु स्यादवज्ञाविलासयो, रिति हेमचन्द्रः। किङ्किणी क्षुद्रघण्टिकेत्यमरः।=small bells.

चक्रवालम्—पटलं पेटलं चक्रं चक्रवालञ्च मण्डलमिति हलायुधः।

सरणिः—सरणिः पङ्क्तौ मार्गे स्त्रीति मेदिनी। मन्दुरा = वाजिशालातु मन्दुरेत्यमरः=A stable. मन्दिरम्=गेहं कुटं मन्दिरमिति हलायुधः।

(8) ...कर्षता ..चक्रवालेन—दत्तातङ्केन.... अनुसृतसरणिना....प्रभ्रष्टेन.... अनेन प्लवङ्गेन प्रविश्यते मन्दिरम्।

(9) स्रग्धरा वृत्तम्।

(10) स्वभावोक्ति रलङ्कृतिः। स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनमिति लक्षणात्।

(11) अत्र अवपातो नाम नाटकीयमङ्गम्। अवपातस्तु निष्क्रामः प्रवेशत्रास विद्रवै रिति लक्षणात्।

(12) दत्तातङ्को गजानामिति मन्दुरातः इति च दक्षकपकधृतः पाठः। कण्ठे

क्लृप्तावशेषमिति च पाठ:। तत्र क्लृप्त: छिन्न: अवशेष: अवशिष्टांश: यस्य तत् तथोक्तम्। तत् छिन्नशेषमित्यर्थ:। कृती छेदन इति धातो: क्त:। श्वीदितो निष्ठायामिति (७।२।१४) निष्ठाया अनिट्त्वम्। कृन्तति। अकर्त्तं। कर्त्तिष्यति कर्त्स्यति। अकर्त्तीत्। कृत्यते। अकर्त्ति। यस्य विभाषेत्यनेनापि (७।२।१५) निष्ठायामयमनिट्। विप्रतिषेधे परं कार्य्यम्। कर्त्तित्वा। कर्त्तितुम्। कृन्तत्।

अपिच।

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्त: कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामन:।
पर्य्यन्ताश्रयिभिर्निजस्य सदृशं नाम्न: किरातै: कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किन:।

(1) আরও, মনুষ্য গণনার বহির্ভূত এইহেতু লজ্জাত্যাগপূর্ব্বক নপুংসকেরা পলায়ন করিতেছে। এই খর্ব্ব পুরুষ ভয়ে কঞ্চুকীর শরীরাচ্ছাদনবস্ত্রের মধ্যে প্রবেশ করিতেছে। কিরাতেরা প্রান্তাশ্রয়পূর্ব্বক নিজ নামের অন্বর্থতা করিয়াছে। কুব্জেরা নীচতা হেতুই বানর কর্ত্তৃক নিজেদের দর্শন আশঙ্কা করিয়া আস্তে আস্তে যাইতেছে।

(2) Besides, as they are counted not amongst men, the ennuchs have shamelessly fled. This frightened dwarf is entering into the jacket of the chamberlain. The barbarian hunters have acted in accordance with the import of their appellation. Fearing to be seen by the monkey, the humpbacked persons truly low in stature, are slowly sneaking away.

(3) वर्षवरै मनुष्यगणनाभावात् त्रपामपास्य नष्टम्। अयं वामन त्रासात् कञ्चुकिकञ्चुकस्यान्तर्विशति। पर्य्यन्ताश्रयिभि: किरातै निजस्य नाम्न: सदृशं कृतम्। कुब्जा नीचतयैव आत्मेक्षणाशङ्किन: शनकै र्यान्ति।

(4) वर्षवरै: अवरोधसम्बन्धिभि: क्लीवै: मनुष्येषु नरेषु गणनाया: मानस्य अभावात् नरसम्मानशून्यत्वात् पौरुषहीनत्वादित्यर्थ:। त्रपां लज्जां अपास्य विहाय नष्टमन्तर्हितम्। नश अदर्शन इति धातो र्भावे क्त:। अयं पुरोवर्त्ती वामन: खर्व:।

(খ) কিং তদিদানীং কুর্বঃ।

(গ) এহি। অস্মিংস্তমালবিটপান্ধকারে প্রবিশ্য নমতিবাহয়াবঃ।

(ঘ) সুসংগতে, কথং ত্বয়া চিত্রফলক উজ্‌ঝিতঃ। কদাপি কোঽপি তং প্রেক্ষতে।

(ঙ) অয়ি সুস্থিতে কিমদ্যাপি চিত্রফলকেন করিষ্যসি। এষোঽপি দধিভক্ত-লম্পট এতৎপঞ্জরমুদ্‌ঘাট্য দুষ্টবানরোঽতিক্রান্তঃ। এষা খলু মেধাবিন্যুড্ডীনান্যতো গচ্ছতি। তদেহি। লঘুনুসরাবঃ। অস্মালাপস্য গৃহীতাক্ষরা কস্যাপি পুরতো মন্ত্রয়িষ্যতে।

(চ) সখি, এবং কুর্বঃ।

(1) সু—(শ্রবণ, সম্মুখে দর্শন, সবেগে উত্থান ও সাগরিকাকে ধরিয়া) সখি, উঠ উঠ এই দুষ্ট বানর এই দিকেই আসিতেছে।

সা—তবে এখন কি করিব ?

সু—এস, এই তমাল শাখার অন্ধকারে প্রবেশ পূর্ব্বক ইহাকে অতিক্রম করি। (পরিক্রমণ ও সভয়ে অবলোকন পূর্ব্বক নির্জ্জনে স্থিতি)।

সা—সুসঙ্গতে, চিত্রফলক ত্যাগ করিয়া আসিলে কেন ? যদি কেহ উহা দেখিতে পায় ?

সু—ওলো সুস্থিতে! এখন ঐ চিত্রফলকের প্রয়োজন কি ? দধিভক্তলম্পট বানর পঞ্জর উদ্‌ঘাটিত করিয়া, চলিয়া গিয়াছে। মেধাবিনী সারিকা উড়িয়া অন্যত্র যাইতেছে। এস, শীঘ্র অনুসরণ করি। আমাদের আলাপ মনে রাখিয়া হয়ত কাহারও নিকট প্রকাশ করিতে পারে।

সা—সখি—তাই করিব। (পরিক্রমণ)।

(2) Soo—(Listening, glancing before, rising hastily and holding Sagarika) Up, up, my dear ; the wicked monkey is coming hither.

Sag—What then shall we do ?

Soo—Dear, we shall avoid him by standing aside in the shade of these *Tamal* branches. (They go in and stand aside with fear).

Sag—*Soosangata*, why did you leave the drawing board? If some one observes it?

Soo—O thoughtless girl, what will you do now with that board? This monkey called *Dadhi* &c. has passed away after opening the cage. The parrot too is flying off. So, come, let us soon pursue. Picking up the words of our conversation, she may repeat them before some one.

Sag—Yes dear, let us pursue.

(3) तमालविटपान्धकारे = तमालशाखातमसि। अतिवाहयाव: = अतिक्राम्याव:। दधिभक्तलम्पट: = दध्योदनलुब्ध:। अथवा तन्नामधेयो वानर:। मेधाविनी = धारणावद्बुद्धिसम्पन्ना अथवा तन्नाम्नी सारिका। दधिभक्तलम्पट and मेधाविनी may also be considered as respectively the names of the monkey and the parrot. उद्घाट्य = उद् + घट् + णिच् + ल्यप्। घट संघात इति चौरादिकात्। नतु घट चेष्टायामिति भ्वादे:। The latter being a मित् root shall not have its उपधा अकार long when attached with णिच्। cf.—क्षुधा सन्धिं भीमो विघटयति यूयं घटयत इति वेण्याम्। द्वारि पुरस्योद्घटितापिधाने इति कुमारे (७।५३) अपि च— "अस्तौ मार्कण्डुकामा इव कमलवनोद्घाटनं कुर्वते ये इति सूर्यशतके। प्रविघाटयिता समुत्पतन् हरिदश्व: कमलाकरानिवेति भारवि:। लुङि अजीघटत्।

उड्डीना—उद् + डी + क्त: + टाप्। दिवादि:। डीयते। डिड्ये। डयिता। डयिष्यते। डीयताम्। अडीयत। डीयेत। डयिषीष्ट। अडयिष्ट। अडयिष्यत। डीयते। अडायि। डयितुम्। डयित्वा। "क्त्वा सेडिति न कित्त्वम्। डाययति। अडीडयत्। डिडयिषते। डीयमान:। सुस्थिते—अनुद्विग्ने। सु + स्था + क्त: + टाप्। तत्सम्बुद्धौ। But why not सकार of स्था is षकार by उपसर्गात् सुनोतीत्यादि (८।३।६५)। सु: पूजायामिति (१।४।९८) कर्मप्रवचनीयत्वविवक्षायामुपसर्गत्वाभावे न षत्वम्। कर्मप्रवचनीयसंज्ञा हि नतूपसर्गसंज्ञां बाधते।

(नेपथ्ये) ही ही। भो भोः। अच्चरिअं अच्चरिअं। (क)

साग—(विलोक्य।) सुसंगदे, जाणीअदि कहं पुणो वि एसो दुट्ठवाणरो ज्जेव्व आअच्छदि। (ख)

सुसं—(दृष्ट्वा विहस्य।) अइ कादरे, ण भेहि। भट्टिणो परिवासवत्ती क्खु एसो अज्जवसन्तओ। (ग)

(ततः प्रविशति वसन्तकः।)

वसन्त—ही ही। भो भोः। अच्चरिअं अच्चरिअं। साहु रे सिरिखण्डदास धम्मिअ, साहु। (घ)

साग—(सस्पृहमवलोक्य।) सहि सुसंगदे, दंसणीओ क्खु अअं जणो। (ङ)

सुसं—सहि, किं एदिणा दिट्ठेण। दूरीभूदा क्खु सारिआ। ता एहि। अणुसरेह्म। (च) (इति निष्क्रान्ते।)

(क) ही ही भो भोः। आश्चर्यमाश्चर्यम्।

(ख) सुसंगते, ज्ञायते कथं पुनरप्येष दुष्टवानर एवागच्छति ?

(ग) अयि कातरे, न बिभीहि। भर्तुः परिपार्श्ववर्ती खल्वेष आर्यवसन्तकः।

(घ) ही ही। भो भोः। आश्चर्यमाश्चर्यम्। साधु रे श्रीखण्डदास धार्मिक, साधु।

(ङ) सखि सुसंगते, दर्शनीयः खल्वयं जनः।

(च) सखि, किमेतेन दृष्टेन। दूरीभूता खलु सारिका। तदेहि। अनुसरावः।

(১) (নেপথ্যে)—হী ! হী ! আশ্চর্য্য, আশ্চর্য্য !

সা—(দর্শন পূর্ব্বক) সুসঙ্গতে, আবারও সেই দুষ্ট বানরটা আসিতেছে না কি ?

সু—(দর্শন ও হাস্য) ওলো কাতরে, ভয় করিও না। ইনি রাজার পার্শ্বচর আর্য্যবসন্তক।

(বিদূষকের প্রবেশ)

বিদূষক—হী! হী! আশ্চর্য্য! আশ্চর্য্য! সাধু রে ধার্ম্মিক শ্রীখণ্ডদাস, সাধু।

সা—(স্পৃহার সহিত দর্শন পূর্ব্বক) সখি সুসঙ্গতে, ইনি দর্শনীয় বটে!

সু—ওলো স্বস্থিতে, ইঁহাকে দেখিয়া ফল কি? সারিকা দূরে গিয়াছে। এস, অনুসরণ করি। (নিষ্ক্রান্তা)

(2)—(Behind the scene)—Hoh, hoh, strange, strange!

Sag—(Looking) *Susangata*, do you know? Is it that the wicked ape is again coming?

Soo—(Looking and laughing) O frightened one, be not afraid. This is the respected *Basantaka*, king's companion.

(Enter the Jester)

Jester—Hoh, hoh, strange, strange! Well done, pious *Sreekhanda Dasa*, well done!

Sag—(Looking earnestly) Dear *Susangata*, this man is worth seeing.

Soo—O, careless girl, no need of looking at him. The parrot is off. So, come, let us pursue. (Exeunt)

(3) বিভেহি—ভী + লোট্ সিপ্। পক্ষে বিভিহি। ভিয়োন্যতরস্যামিতি বা হ্রস্বম্।

वस। साहु रे सिरिखण्डदास धम्मिश्र साहु जेण दिण्ण-मेत्तेण एव्व तेण दोहएण इदिसो णोमालिश्रा सम्वुत्ता जेण णिरन्तरवुभिश्रकुसुमगुच्छसोहिश्रविड़वा उवहसन्ती विश्र लक्खीश्रदि देवीपरिगहिदं माहवीलदं। ता जाव गदुश्र पिश्रवश्रस्सस्स णिवेदेमि। (परिक्रम्यावलोक्य च)(एसो क्खु पिश्रवश्रस्सो तस्स दोहदस्स लद्धपच्चश्रदाए परोक्खं वि तं णोमालिश्रं पच्चक्खं विश्र कुसुमिदं पेक्खन्तो हरिसुफुल्ललोश्रणो

इदो एव्व आअच्छदि। ता जाव णं उवसप्पामि (इति राजानं प्रति निर्गतः)। (क))

(क) साधु रे श्रीखण्डदास धार्मिक, साधु। येन दत्तमात्रेणैव तेन दोहदकेनेदृशी नवमालिका संवृत्ता येन निरन्तरोद्भिन्नकुसुमगुच्छशोभितविटपोपहसन्तीव लक्ष्यते देवीपरिगृहीतां माधवीलताम्। तद्यावद्गत्वा प्रियवयस्याय निवेदयामि। एष खलु प्रियवयस्यस्तस्य दोहदस्य लब्धप्रत्ययतया परोक्षामपि तां नवमालिकां प्रत्यक्षामिव कुसुमितां प्रेक्षमाणः हर्षोत्फुल्ललोचन इत एवागच्छति। तद्यावदेनमुपसर्पामि।

(1) বি—সাধু রে ধার্ম্মিক শ্রীখণ্ডদাস, সাধু। দোহদদানমাত্রই নবমালিকা ঘনবিকসিতপুষ্পস্তবকশোভিতশাখা হইয়া দেবীপরিগৃহীত মাধবীলতার উপহাসিনীর ন্যায় লক্ষিত হইতেছে। অতএব প্রিয়বয়স্যকে গিয়া বলি। (পরিক্রমণ ও অবলোকন) এই যে প্রিয়বয়স্য দোহদবিষয়ে লব্ধবিশ্বাস হইয়া সেই পরোক্ষা নবমালিকাকে প্রত্যক্ষরূপে কুসুমিতার ন্যায় দর্শন করিয়াই যেন হর্ষোৎফুল্লনয়নে এই দিকে আসিতেছেন। অতএব ইঁহার নিকটে যাই (রাজার দিকে গমন)।

(2) Jester—Very well, O pious *Sreekhanda Dasa*, very well. No sooner the seasoning things were given than the *Nyktanthes* appeared, as it were, to deride the queen's *Jasmin*, with branches adorned with thick clusters of untimely blossoms. So I go to inform the dear friend. (Moving and looking) Well, my friend, having full faith in the power of those seasoning things, is coming in this direction, with eyes gleaming with pleasure, as if he has looked upon the *Nyktanthes* blossoming untimely in his presence, though it is at a distance. So I go to him, (Goes to the king.)

(3) निरन्तरेति = निरन्तरमनवकाशं (thickly) यथा तथा उद्भिन्नानां विकसितानां कुसुमानां गुच्छेन स्तवकेन शोभिता विटपाः शाखा यस्याः सा तथोक्ता

=अविरलप्रस्फुटितपुष्पस्तबकालङ्कृतशाखा। स्तबको गुच्छको गुच्छी गुलुच्छः परिकीर्त्तित इति हलायुधः। लब्धप्रत्ययतया=प्राप्तविश्वासतया। उपसर्पामि=गच्छामि। दत्तमात्रेण=दत्तमेव दत्तमात्रम्। तेन। मयूरव्यंसकादयश्चेति समासः। दोहदकेन=अनुकम्पायां, संज्ञायां वा कन्। परोक्षाम् = दूरस्थिताम्। अत्र भट्टोजिः "अक्ष्णः परमिति विग्रहे समासान्त विधानसामर्थ्यात् अव्ययीभावे शरत् प्रभृतिभ्यः (५।४।१०७) इत्यव्ययीभावः। परोक्षे लिडिति निपातनात् परस्योकारादेशः। परोक्षम्। परोक्षा क्रियेत्यादि तु अर्शआद्यचि।" कैयटस्तु—परमक्ष इति परोक्षम्। मयूरव्यंसकादित्वात् समासः। अच् प्रत्यन्ववपूर्वात्‌ (५।४।७५) इति योगविभागाद् अतएव वा निपातनादच् (३।२।११५) समासान्तः। यद्वा प्रतिपरसमनुभ्योऽक्ष्ण इति टच् समासान्तः। स च यद्यप्यव्ययीभावे विधीयते तथापि परशब्दस्याक्षिशब्देनाव्ययीभावासंभवात् समासान्तरे विज्ञायते" *i. e.* according to भट्टोजि, since we have a गणसूत्र under 5. 4. 107, viz. प्रतिपरसमनुभ्योऽक्ष्णः, the समास in परोक्षम् is अव्ययीभाव with the विग्रह अक्ष्णः परम्। So the समासान्त टच् by the above rule is attached to अक्षि when preceded by प्रति, पर, सम् and अनु। Then, since परोक्षे लिट् is used by the सूत्रकार himself, it is by निपातन that the अ of अक्षि is changed to उ when preceded by पर। Now by अर्श आदिभ्य अच् (5. 2. 127), परोक्ष becomes an ordinary adjective. Then टाप्। But कैयट asserts here मयूरव्यंसकादि तत्पुरुष and by a division in the Rule 5. 4. 75, अच् is taken out as a general समासान्त affix which is attached here. Or by निपातन because सूत्रकार uses the term thus in 3. 2. 115, or by टच् taken from 5. 4. 107. परोक्ष may also be formed. With regard to टच् he says, though provided for अव्ययीभाव, it is to be accepted in other समास as well, as पर and अक्षि cannot have अव्ययीभाव. As for पर+अक्ष = परोक्ष, a वार्त्तिक

runs—"परोभावः परस्याद्वे परोचे लिटि दृश्यताम्। उत्वं वादेः परादस्याः सिद्धं वाक्प्रतिपातनात् ॥" *i. e.* वा अथवा परात् (परशब्दात्) अवृध: (अविग्रहस्य) आदेः (आद्यक्षरस्य) उत्वं स्यादित्यर्थ:।

हर्षोत्फुल्ललोचन:=उत् + फुल् + क्त:=उत्फुल्लम्। उत्फुल्लसंफुल्लयोरुप-संख्यानमिति निष्ठातस्य लत्वम्। ति चेति (७।४।८९) फलते रकारस्य उत्वम्।

(ततः प्रविशति यथानिर्दिष्टो राजा।)

राजा। (सहर्षम्)।

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवम्
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम्।

(1) রাজা—(সহর্ষে) বিকশিতকলিকা (প্রকাশিতোৎকণ্ঠা) শুভ্রপ্রভা প্রারব্ধ বিকাশা (প্রাপ্তজৃম্ভণা) অবিরলপবন(নিশ্বাস)প্রবাহদ্বারা নিজায়াসপ্রকাশিনী এই বসন্তযুক্তা (সকামা) উদ্যানলতাকে অন্যা রমণীর ন্যায় দর্শন করিয়া নিশ্চিত অদ্য আমি ক্ষণকালের মধ্যেই রাজ্ঞীর (বাসবদত্তার) মুখ কোপারক্তপ্রভ করিব।

(2) King—(Joyfully), Today I shall surely make the face of the queen at once flushed with anger, by looking at this garden creeper as if she is a lady smitten with love (united with spring) and indicating fatigue with her breathing (constant blowing of wind) and who is yawning (properly developing), full of anxiety (with opening buds) and of white hue.

(3) उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भाम् अविरलैः श्वसनोद्गमैः आत्मनः आयास मातन्वती मिमामुद्यानलतां समदनाम् अन्यां नारीमिव पश्यन् ध्रुवमद्य क्षणात् देव्या मुखं कोपविपाटलद्युति करिष्यामि।

(4) दाम्नः बन्धनादुद्गता उद्दामा। निरादयः क्रान्त्याद्यर्थे पञ्चम्येति तत्पुरुषः। प्रकाशिता। उत् ऊर्द्धस्था कलिका कोरको यस्याः सा तथोक्ता ताम्। कोरक

लावककलिकाकुड्मलमुकुलानि तुल्यानीति हलायुध:। पक्षे उद्दामा उद्गता उत्कलिका उत्कण्ठा यस्या: सा। कथितोत्कलिकोत्कण्ठा हेलासलिलवीचि-ष्विति मेदिनी। तथोक्ता। ताम्। निर्गतोऽङ्कोरकाम् प्रकाशितोत्कण्ठाञ्च। विपाण्डुरा शुक्ला रुक् प्रभा यस्या: सा तथोक्ता ताम्। शुक्लशुभ्रशुचिश्वेतविशद-श्येतपाण्डुरा इति स्यु: प्रभारुग्रुचिस्त्विड्भा इति चामर:। एकत्र पुष्पविकाशाद-न्यत्रौत्कण्ठ्यात्। शुभ्रप्रभाम्। प्रारब्धा प्रक्रान्ता जृम्भा विकाश: पक्षे जृम्भणं यया सा तथोक्ता तया। प्रक्रान्तविकाशां पक्षे प्राप्तजृम्भणाम्। जृम्भा जृम्भणे विकाश इति हेमचन्द्र:। अविरलैर्निरन्तरै: श्वसनस्य पवनस्य पक्षे निश्वासस्य उद्गमैर्वहनै रात्मन: स्वस्या: आयासं ग्लानिम् आतन्वतीं विस्तारयन्तीम् इमां पुरोवर्त्तिनीम् उद्यानलताम् उपवनवल्लीं समदनां वसन्तयुक्तां पक्षे सकामाम्। राढे (वृक्षविशेषे) वसन्ते धूस्तूरे मदन: सिक्थके स्मरे इति हेमचन्द्र:। अन्या अपरां नारीमिव नायिकामिव पश्यन् अवलोकयन् ध्रुवं निश्चितमद्यअस्मिन्नहनि चणात् अल्पसमये सप्तमीपञ्चम्यौ कारकमध्ये इति (२।३।७) पञ्चमी। देव्या महिष्या मुखमाननं कोपेन क्रोधेन विपाटला आरक्ता द्युति: प्रभा यस्य तत् तथोक्तं तत्। रोषरक्तप्रभं करिष्यामि विधास्यामि।

(5) प्राप्तोत्कलिकां शुभ्रकान्तिं कृतजृम्भामायासवतीमन्यां रमणीमिव इमामुपवनवल्लीं पश्यति मयि ईर्षया महिषी अद्य क्षणादेव रोषकषायितानना भविष्यति।

(5) आतन्वतीम्=आङ्+तन्+शतृ+ङीप्। ताम्। तनोति तनुते। ततान तेने। तनिष्यति-ते। अतानीत् अतनीत् अतनिष्ट अतत। तन्यते तायते। अतानि। ततम। तन्वत् तन्वानम्। तनित्वा तत्वा। तनितुम्। उद्दामेत्यत्र दाम्नी मग्नत्वात् डाबन्तस्य प्रादिसमासे विशेष्यनिघ्नत्वम्। तथाहि उद्दामेन द्विरदपतिना सन्निपत्याभियुक्ता इति भवभूति:।

(8) पश्यता...मुखं करिष्यते (कारिष्यते वा) मया। (9) शार्दूलविक्री-डितं वृत्तम्। (10) उपमा। (11) अत्र तुल्यविशेषणतया पताकास्थानकं नाम प्राकरणिकस्य भाविनोऽर्थस्य सूचनम्। तथाहि प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्ति

सूचनम्। पताकास्थानकं तुल्यसंविधानविशेषणमिति दशरूपके। सागरिका पश्यति राज्ञि वासवदत्तायाः कोपरक्तनयनत्वं भविष्यतीति प्रतीतेः।

विदू। (सहसोपसृत्य) जअदु जअदु पिअवअस्सो। भो वअस्स, दिट्ठिआ वड्ढसि। (जेण दिट्ठमेत्तेणेति पुनः पठति।) (क)।

राजा। वयस्य कः संदेहः। अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः। पश्य।

कण्ठे श्रीपुरुषोत्तमस्य समरे दृष्ट्वा मणिं भ्रात्रुभि-
नष्टं मन्त्रबलैर्वसन्ति वसुधामूले भुजङ्गा हताः।
पूर्वं लक्ष्मणवीरवानरभटा ये मेघनादाहताः
पीत्वा तेऽपि महौषधेर्गुणनिधेर्गन्धं पुनर्जीविताः॥

तदादेशय मार्गं येन वयमद्य तदवलोकनेन चक्षुषः फलमनुभवामः।

(क) जयतु जयतु प्रियवयस्यः। भो वयस्य, दिष्ट्या वर्धसे।

(1) वि—(সহসা আগমন পূর্ব্বক) প্রিয়বয়স্যের জয় হউক। তোমার অভ্যুদয় হউক। (যত্তমাত্র ইত্যাদির পুনঃ পাঠ।)

রা—বয়স্য, সন্দেহ কি? মণি মন্ত্র ও ঔষধির প্রভাব অচিন্ত্য। দেখ—যুদ্ধে নারায়ণের কণ্ঠে মণি দর্শন করিয়া শত্রুগণ পলায়ন করিয়াছিল! মন্ত্রবলে ভুজঙ্গেরা রুদ্ধবীর্য্য হইয়া রসাতলে বাস করিতেছে। পূর্ব্বে লক্ষ্মণ ও বীর বানরসৈন্যগণ মেঘনাদ কর্ত্তৃক আহত হইয়া গুণনিধি মহৌষধির গন্ধ গ্রহণ পূর্ব্বক পুনর্জীবিত হয়। অতএব পথ দেখাও, আজ উহা দেখিয়া চক্ষুঃ সফল করিব।

(2) J.—(Coming suddenly) Blessings to my dear friend, O friend, be prosperous—(Repeats no sooner &c...)

K.—Friend, no doubt in it. The efficacy of gems, incantations and drugs is inconceivable. Consider—

Seeing the gems in the neck of *Bisnoo*, his enemies had once fled. Deprived of power by incantations, the snakes live under the earth. *Laksmana* and those heroic monkey warriors who had once been struck by *Meghanada*, revived by smelling the scent of some powerful herbs.

Lead the way, so that by seeing it, I may make my eyes successful.

(3) समरे श्रीपुरुषोत्तमस्य कण्ठे मणिं दृष्ट्वा शत्रुभिर्नष्टम्। भुजङ्गा मन्त्रबलैर्हता वसुधामूले वर्त्तन्ते। ये लक्ष्मणवीरवानरभटाः पूर्वं मेघनादाहता तेऽपि गुणनिधेर्महौषधेर्गन्धं पीत्वा पुनर्जीविताः।

(4) समरे युद्धे श्रीपुरुषोत्तमस्य नारायणस्य। देवं गुरुं गुरुस्थानं चैव चैवाधिदैवतम्। सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेदिति स्मृतेः पुरुषोत्तमशब्दस्य देवत्वाचित्वात् श्रीपूर्वत्वम्। यद्वा श्रीयुक्तः पुरुषोत्तमस्तस्य। समानाधिकरणाधिकारे शाकपार्थिवादीनां सिद्धये उत्तरपदलोपो वक्तव्यमिति तत्पुरुषः। कण्ठे गले मणिं रत्नं दृष्ट्वा विलोक्य शत्रुभिः रिपुभिर्नष्टं पलायितम्। भुजङ्गाः सर्पा मन्त्राणां बलैः शक्तिभिः हता रुद्धवीर्य्याः सन्तः वसुधायाः पृथिव्या मूले तले वसन्ति वर्त्तन्ते। ये लक्ष्मणश्च वीराश्च वानराणां भटा योद्धारस्ते पूर्वं पुरा मेघनादेन रावणतनयेन इन्द्रजिता आहताः प्रहृताः तेऽपि निधीयन्ते अस्मिन्निति निपूर्वात् दधातेः उपसर्गे घोः किरिति (३।३।९२) किः। गुणानां निधिरिति षष्ठी समासः। तस्य। महती चासौ ओषधिस्तस्याः। आन्महतः समानाधिकरणजातीययोरित्यात्त्वम्। विमर्द्दकरणाद्वा गन्धं लेशं स्वल्पपरिमाणमिति यावत्। गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः। पीत्वा पुनर्भूयो जीविता लब्धप्राणा आसन् इति शेषः। अथवा पीत्वा आघ्रायेत्यर्थः। पुनर्जीविता आसन्। आघ्राणत्वे रामायणं यथा—विशल्यं स समाघ्राय लक्ष्मणः परवीरहा। विशल्यो विरुजः शीघ्रमुदतिष्ठन् महीतलादिति।

(5) नारायणवक्षस्थमणिदर्शने शत्रूणां पलायनं भुजङ्गानां पाताले वासो मेघनादाहतानां लक्ष्मणादीनाञ्च महौषधिप्रयोगेन पुनर्जीवनं सर्वेषां ज्ञातमेव।

(6) दृष्ट्वा=दृश्+क्त्वा। पश्यति। ददर्श। द्रष्टा। द्रक्ष्यति। पश्यतु अपश्यत्। पश्येत्। दृश्यात्। अद्राक्षीत् अदर्शत्। अद्रक्ष्यत्। दृश्यते। अदर्शि। दृष्टम्। पश्यन्। द्रष्टुम्। पुरुषोत्तमस्य—पुरुषेषु उत्तम इति सप्तमीसमासः। न चात्र संज्ञां प्रति निर्बन्धः। तेन हलदन्तात् सप्तम्याः संज्ञायामित्यलुक् न (६।३।९)। तथाहि "अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात् ततः" इति नैषधीये पुरुषोत्तमशब्देन नलोऽपि भण्यते। एकाधिकवस्तुनिष्ठशक्तिमत्त्वा-दसंज्ञात्वम्। यद्वा पुरुषाणामुत्तम इति षष्ठीसमासः। अत्र कैयटः "यस्मान्निर्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणहेतुरेतत्त्रयसन्निधाने निर्धारणं भवतीति तत्रैव षष्ठीसमासनिषेधो भवति। इह न गोगानामुत्तमो गार्गोत्तम इति त्रयसन्निधाना-भावात् सम्बन्धसामान्ये षष्ठीति समासो भवत्येव।" (५।३।५७ भाष्यप्रदीप)। एतञ्च छत्रादिः शेष इति सत्रे (७।४।६०। छत्रामादिरिति भाष्यकृता समासस्य विधानात्। In the words पुरुषोत्तम, संज्ञात्व is not strictly adhered to, as it may indicate others besides विष्णु *cf.* : the quotation from श्रीहर्ष and उत्तमपुरुषस्त्वन्यः परमात्मेत्युदाहृत इति गीता। This is also the opinion of गोपीनाथ, a commentator of श्रीपति's कातन्त्रपरिशिष्ट। So there can be no obstruction with the अलुक् of सप्तमी under 6, 3, 9. Yet if संज्ञात्व is supposed, take षष्ठी समास; the prohibition न निर्धारणे is operative only when the thing selected and things to select from and the selecting attribute are all actually present. पतञ्जलि himself has accepted षष्ठीसमास in छत्रादिः in the Rule 7, 4, 60. So the statement of ज्ञानेन्द्रभिक्षु in the तत्त्वबोधिनी that, though सप्तमी समास in पुरुषोत्तम there is no विग्रह, is useless. The allusion as to the retreat of

the enemies by the sight of the gem in the neck of the preserving god is more or less obscure.

लक्षणवीरवानरभटाः=वानराणां भटाः वानरभटा वीराश्च ते चेति पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्चेति (२।१।५८) कर्मधारयः। ततो लक्षणयतेचेति द्वन्द्वः। लक्षणाश्च वीरश्चेति कर्मधारये तु बहुलग्रहणात् कथञ्चित् पूर्वपरेत्यादिसूत्रेण वीरशब्दस्य पूर्वनिपातत्वं निरसितव्यम्। तथाहि—"एकवीर इति पूर्वविप्रतिषेधे एव इति दुर्घटवृत्तिकारादयः। नत्ववावष्टम्भकं मुनित्रयवचः प्रमाणः। बहुलग्रहणं वा शरणीकर्त्तव्यमिति शब्दकौस्तुभे भट्टोजिः। एव मेव "जैत्रः स चित्रं रतिजानिवीर इति (७।८५) नैषधीयप्रयोगः समर्थनीयः। In the कर्मधारय with लक्षण and वीर the latter goes first in the समास under the rule 2, 1, 45. Justification by बाहुलक is not commonly accepted.

(7) अस्त्रियां समरानीकरणाः कलहविग्रहावित्यमरः। दिष्ट्या हर्षे मङ्गलेचेति मेदिनी। अव्ययमेतत्।

(8) शवव:...नष्टवत्त:...उच्यते भुजङ्गैः...हतैः।...भटैर्यै...मेघनादाहतैः तैः...जीवितैः...।

(9) शार्दूलविक्रीडितं वृत्तम्।

विदू। (साटोपम्) एदु एदु भवं। (क)

राजा। गच्छाग्रतः। (उभौ सगर्वं परिक्रामतः।)

विदू। (आकर्ण्य सभयं निवृत्य राजानं हस्ते गृहीत्वा ससंभ्रमम्।) भो वअस्स, एहि पलाअम्ह। (ख)

राजा—किमर्थम्।

विदू—भोः, एअस्सिं वउलपादवे कोवि भूदो पडिवसदि। (ग)

राजा—धिङ् मूर्ख, विस्रब्धं गम्यताम्। कुत इहस्माना-मत्र प्रभाव:।

विदू। फुडक्खरं एव्व मन्तेदि। जइ मम वअणं ण पत्तिआअसि ता अग्गदो भविअ सअं एव्व आअणेहि। (घ)

(क) एतु एतु भवान्।

(ख) भो वयस्य, एहि पलायावहे।

(ग) भो:, एतस्मिन्बकुलपादपे कोऽपि भूत: प्रतिवसति।

(घ) स्फुटाक्षरमेव मन्त्रयते। यदि मे वचनं न प्रत्येषि तदग्रतो भूत्वा स्वयमेवाकर्णय।

(১) বি—(সাহঙ্কারে) এস, এস।

রা—আগে যাও। (উভয়ের গর্ব্বে গমন।)

বি—(শ্রবণ, সভয়ে প্রত্যাগমন ও রাজার হাতে ধরিয়া সভয়ে) ওহে বন্ধো, এস পালাই!

রা—কেন?

বি—ওহে, এই বকুল গাছে একটা ভূত আছে।

রা—ধিক্ মূর্খ! নির্ভয়ে যাও। এখানে ভূতাদির প্রভাব কিরূপে হইতে পারে?

বি—স্পষ্টাক্ষরে বলিতেছে। যদি আমার কথায় বিশ্বাস না হয়, নিজেই অগ্রবর্ত্তী হইয়া শোন।

(2) J.—(With pride) Come, come.

K.—Precede (Both walk proudly).

J.—(Listening and turning back with fear and holding the king in hand) O friend, come, let us run away!

K.—Why?

J.—Lo, there is a goblin in yonder *Bakul* tree!

K.—Fie fool, go on boldly. How can there be any influence of such a thing here?

J.—It talks distinctly. If you do not believe my words, advance and listen yourself.

(3) साटोपम्=साहङ्कारम्। दर्पी मदोऽवलेपी मानी गर्वी भवेदहङ्कारः। आवेशः संवेगः संरम्भः सम्भ्रमस्तथाटोपइति हलायुधः। प्रत्येषि=विश्वसिषि=प्रति+इण्+लट् सिप्। विस्रब्धम्=विश्वासयुक्तं निर्भयमिति यावत्। पलायावहे—परा+अय्+लट् वहि। उपसर्गस्यायताविति लत्वम्। (If the root अय follows, the रेफ in an उपसर्ग becomes ल।) अयते। अयाञ्चकार,—आस,—बभूव। अयिष्यते। आयिष्ट। अय्यते। आयि। अयितम्। अयमानम्। अयित्वा। अयितुम्।

विस्रब्धम्=वि+स्रन्भ्+क्तः। स्रम्भते। सस्रम्भे। स्रम्भिष्यते। अस्रम्भिष्ट अस्रभत्। स्रभ्यते। अस्रम्भि। स्रम्भितुम्। स्रम्भित्वा स्रब्ध्वा। स्रम्भमाणम्। Some spell this root with तालव्य शकार।

राजा—(तथा कृत्वा श्रुत्वा च।)

स्पष्टाक्षरमिदं यस्मान्मधुरं स्त्रीस्वभावतः।
अल्पाङ्गत्वादनिर्ह्रादि मन्ये वदति सारिका॥

(ऊर्द्ध्वमवलोक्य निपुणं निरूप्य।) कथं सारिका।

(1) राजा—(তাহা করিয়া শ্রবণ পূর্ব্বক)—ইহা স্পষ্টাক্ষর, স্ত্রীপ্রকৃতিহেতু মধুর, এবং ক্ষুদ্রশরীরহেতু অনতিগম্ভীর। অতএব বোধ হয় সারিকার শব্দ। (ঊর্দ্ধে অবলোকন ও নিরূপণ পূর্ব্বক) এই যে সারিকা।

(2) K.—(Advancing and listening) I think it is a parrot that is repeating these words since they are distinct, low and sweet as proceeding from a small effiminate body. (Looking up and ascertaining) Ah! there she is!

(8) यस्मात् स्पष्टाक्षरं स्त्रीस्वभावतः मधुरम् अल्पाङ्गत्वादनिर्ह्रादि इदं (तस्मात्) सारिका वदति इति मन्ये।

(4) यस्मात् स्पष्टाक्षरं स्फुटवर्णं स्त्रीस्वभावत: स्त्रीप्रकृतित: मधुरं मनोहरम् अल्पाङ्गत्वात् क्षुद्रशरीरत्वात् अनिर्ह्रादि अनतिगम्भीरम् इदं श्रूयमाणं वाक्यं यस्मादित्यत्र तावदिति पाठे तावत् समस्तं। यावत् तावच्च साकल्येऽवधौ मानेवधारणे इत्यमर:। सारिका वदति उच्चारयतीति मन्ये गणयामि।

(5) स्फुटवर्णत्वादिहेतोरिदं सारिकावच इत्यनुमीयते।

(6) अनिर्ह्रादि=न निर्ह्रादि। नञ् समास:। निर् + ह्राद + णिनि:। ह्रादते। जह्रादे। ह्रादिष्यते। अह्रादिष्ट।

(8) मन्यते...उच्यते सारिकया।

(9) अनुष्टुप्।

विदू—(विचार्य) कधम्। सच्चं एव्व सारिआ। (क)

राजा—(सस्मितम्।) वयस्य, एवम्।

विदू—भो वअस्स, तुमं भआलुओ। जेण सारिअं भूदेत्ति मण्णेसि। (ख)

राजा—धिङ् मूर्ख, यदात्मना कृतं तन्मयि संभावयसि।

(क) कथम्। सत्यमेव सारिका।

(ख) भो वयस्य, त्वं भीरु:। येन सारिकां भूत इति मन्यसे।

(1) বি—(বিচারপূর্ব্বক) এই যে সত্যই সারিকা।

রা—(সস্মিতে) বয়স্য তাই বটে।

বি—ওহে বয়স্য। তুমি ভীরু, সারিকাকে ভূত মনে করিতেছ।

রা—ধিক্ মূর্খ, যাহা নিজে করিয়াছ তাহা আমার উপর সম্ভাবনা করিতেছ।

(2) J.—(Judging) So, a parrot truly !

K.—(Smiling) Just so friend.

J.—Well friend, you are a coward as you think it is a goblin.

K.—O stupid, what you have yourself done, you ascribe to me !

(3) भीरु:=भी + क्रु:। भिय: क्रुक्लुकनाविति (३।२।१७४) क्रुप्रत्यय:। भयशील:। भूत इति=कचिन्निपातेनाभिधानात् प्रातिपदिकार्थे प्रथमा।

विदू—भो, जइ एव्वं मा क्खु मं णिवारेसि। (सरोषं दण्डकाष्ठमुद्यम्य) (आः दासीए धीए, तुमं जाणासि सच्चं एव्व बह्मणो भाअदि त्ति। ता चिट्ट चिट्ट। इमिणा पिसुण-हिअअकुडिलेण दण्डअट्ठेण पडिपक्कं विअ कइत्थफलं इमादो बउलपाअवादो आहरिअ भूमिए पाडइस्सम्।) (इति हन्तु-मुद्यतः।) (ग)

राजा। (निवारयन्) मूर्ख, किमप्येषा रमणीयं व्याहरति। तत् किमेनां त्रासयसि। शृणवस्तावत्। (उभा-वाकर्णयतः।)

विदू। एव्वं भणादि। इमस्स बह्मणस्स भोजणं दिज्जेदि त्ति। (घ)

(ग) भोः, यद्येवं मा खलु मां निवारय। आः दास्याः पुत्रि, त्वं जानासि सत्यमेव ब्राह्मणो बिभेति इति। तत्तिष्ठ तिष्ठ। एतेन पिशुनहृदय-कुटिलेन दण्डकाष्ठेन परिपक्कमिव कपित्थफलमेतस्माद्बकुलपादपादाहृत्य भूमौ-पातयिष्यामि।

(घ) एवं भणति। एतस्य ब्राह्मणस्य भोजनं दीयतामिति।

(ग) बि—भाल यदि ताই, তবে আমাকে বারণ করিও না। (সরোষে লাঠি তুলিয়া) আঃ দাসীর বেটা, তুই জানিস সত্যই ব্রাহ্মণ ভয় পাইতেছে। থাক, থাক, এই খলহৃদয়বৎ কুটিল যষ্টি দ্বারা আঘাত করিয়া পরিপক্ক কপিত্থফলের ন্যায় বকুল বৃক্ষ হইতে ভূমিতে ফেলিতেছি (প্রহারোদ্যত)।

রা—(নিবারণ পূর্ব্বক) মূর্খ, সারিকা মনোহর কিছু বলিতেছে। উহাকে ত্রাসিত করিতেছ কেন? শুনিতে দাও (উভয়ের শ্রবণ)।

বি—বলিতেছে এই ব্রাহ্মণকে ভোজন দাও।

(2) J.—Well, if so, don't interfere (Holds up his staff angrily). Eh, bastardly parrot, you know a brahmin is frightened. So, stay, stay, I shall bring you down on the ground from the *Bakul* tree, as a ripe wood apple, by striking with this staff crooked as the mind of a wicked man (Attempts to beat).

K.—(Preventing) O fool, she is talking something prettily. Why do you frighten her ? let us hear. (Both listen).

J.—She says give this brahmin something to eat.

(3) पिशुनेति=पिशुनः खलस्य जनस्य हृदय मिव कुटिलं तेन। खलचित्तवक्रेण। उपमानानि समान्यवचनैरिति तत्पुरुषः। पिशुनः सूचके खले इति हेमचन्द्रः। व्याहरति=आलपति। त्रासयसि=भञ्जयसि। परिपक्वम्=परि+पच्+क्तः। पचो व इति निष्ठातकारस्य वत्वम्। पचति-ते। पपाच, पेचे। पक्ता। पक्ष्यति—ते। पचतु-ताम्। अपचत्-त। पचेत्-त। पच्यात् पक्षीष्ट। अपाक्षीत् अपक्त। अपक्ष्यत्-त। पचत् पचमानम्। पक्त्वा। पच्यते। अपाचि। पक्तुम्।

राजा—सर्वमप्यौदरिकस्याभ्यवहार एव पर्यवस्यति। तदन्यं वद। किमालपति सारिका।

विदू—(आकर्ण्य) भो वअस्स, सुदं तुए जं एदाए मन्तिदं। एसा भणादि। सहि, को एसो तुए आलिहिदो। पउत्तमअणमहूसवे भअवं अणङ्गोत्ति। पुणोवि भणादि। सहि, कीस तुए अहं एत्थ आलिहिदा। सहि, किं अआरणे कुप्पसि। जादिसो तुए कामदेवो आलिहिदो तादिसो मए रई आलिहिदेत्ति। ता अणधासंभाविणि, किं तुह एदिणा आलविदेण। कहेहि सव्वं वुत्तन्तं। भो वअस्स, किं णेदं। (क)

(क) भो वयस्य, श्रुतं त्वया यदेतया मन्त्रितम्। एषा भणति सखि, क एष त्वयालिखित:। प्रवृत्तमदनमहोत्सवे भगवाननङ्ग इति। पुनरपि भणति। सखि, कस्मात्त्वयाहमत्रालिखिता। सखि, किमकारणे कुप्यसि। यादृशस्त्वया कामदेव आलिखितस्तादृशी मया रतिरालिखितेति। तदन्यथासंभाविनि, किं तवैतेनालपितेन। कथय सर्वं वृत्तान्तम्। भो वयस्य, किं न्विदम्।

(1) রাজ— ঔদরিকের সকলই ভোজনে পরিণত হয়। সত্য বল সারিকা কি বলিতেছে।

বি—(শুনিয়া) ওহে বয়স্য, সারিকা যাহা বলিল তাহা শুনিলে? বলিতেছে—'সখি, ইনি কে চিত্রিত হইয়াছেন? প্রবৃত্তমদনমহোৎসবে ভগবান্ অনঙ্গ।' আবারও বলিতেছে—'সখি, কেন তুমি আমাকে এস্থলে অঙ্কিত করিলে? সখি, অকারণে কোপ করিতেছ কেন? তুমি যেরূপ কামদেব অঙ্কিত করিয়াছ আমিও সেরূপ রতি অঙ্কিত করিয়াছি। অতএব অন্যথামানিনি এরূপ আলাপে ফল কি? সকল বৃত্তান্ত বল।' ওহে বন্ধো! ইহা কি?

K.—The voracious takes every thing for his meal! Tell me truly what is the parrot uttering.

J.—O friend, have you heard what she repeated? She talks thus—"Friend, who is portrayed here? The god of Love in his festival which has begun." She talks again—"Friend, why am I portrayed here by you? Friend, why are you angry without cause. I have drawn up a goddess to match your god. So, Oh one who thinks otherwise there is no use talking thus. Tell me all." O friend, what is this?

(3) औदरिकस्य=कुक्षिम्भरे: स्वोदरपूरकस्येति यावत्। उदरे प्रसित: औदरिक:। उदराट्ठगाद्यूने इति ठक् (५।२।६७)। तस्य। आद्यून: स्यादौदरिको विजिगीषाविवर्जित इत्यमर:। आद्यून: स्यादौदारिको घस्मरो भक्षकोऽद्मर इति हलायुध:=shamelessly voracious. प्रसित: means प्रसक्त: *i. e.* तत्पर:। अभ्यवहारे=भक्षणे। अधिकरणे सप्तमी। पर्यवस्यति=

পরিণময়তি। পরি + অব + ণী + লট্ তিপ্। ননৌ। নাতা। নাস্যতি। নয়তু।
অনয়ত্। নয়েত্। নীয়াত্। অনৈষীত্। অনাস্যত্। নীয়তে। অনায়ি।
নীতম্। নয়ত্। নেতুম্। নীত্বা।

राजा—वयस्य, एवं तर्कयामि। कयापि हृदयवल्लभोऽनुरागादभिलिख्य कामदेवव्यपदेशेन सखीपुरतोऽपह्नुत:। तत्सख्यापि प्रत्यभिज्ञाय वैदग्ध्यादसावपि तत्रालिख्य रतिव्यपदेशेन दर्शितेति।

विदू—(छोटिकां दत्त्वा।) भो वअस्स, जुज्जदि क्खु एदं। (क)

राजा—भो वयस्य, तूष्णीं भव। पुनरपि व्याहरति। तच्छृणुवस्तावत्।

(उभावपि शृणुत:)

(ক) ভো বয়স্য, যুজ্যতে খল্বেতত্।

(১) রা—বয়স্য, বোধ হয় যে কোনও রমণী প্রণয়ে প্রিয়তমকে অঙ্কিত করিয়া সখীর নিকট কন্দর্পরূপে অপলাপ করিয়াছে। তাহার সখীও উহা বুঝিয়া নিপুণতার সহিত সেই রমণীকে সেখানে রতিরূপে চিত্রিত করিয়া দেখাইয়াছে।

বি—(তুড়ি দিয়া) বয়স্য ইহা সম্ভব বটে।

রাজা—চুপ কর বন্ধো! আবার বলিতেছে। শোনা যাউক (উভয়ের শ্রবণ)।

(2) K.—I think, friend, some lady delineating her lover out of love, has passed him off on her companion as the god of love. She too understanding the same, has pictured the lady near it and shown her as the goddess of love.

J.—(Snapping his fingers or striking his thumb on other fingers) Very likely friend.

K.—Hush, friend, she is talking again. Let us hear. (They both listen.)

(3) अपह्नुत:=अपलपित:=concealed, denied. अप+ह्नु+क्त:। ह्नुते। जुह्नुवे। ह्नोता। ह्नोष्यते। ह्नुताम्। अह्नुत। ह्नुवीत। ह्नोषीष्ट। अह्नोष्ट। अह्नोष्यत। ह्नूयते। अह्नावि। ह्नोतुम्। ह्नुत्वा। ह्नुवानम्। प्रत्यभिज्ञाय=निश्चित्य। रतिव्यपदेशेन=कामप्रियाछलेन। वैदग्ध्यात्=चातुर्य्यात्। विदग्धस्य=भाव: कर्म्म वा। गुणवचनब्राह्मणादिभ्य: कर्म्मणि चेति ष्यञ् (५।१।१२४)। "विभाषागुणे ऽस्त्रियामिति हेतौ पञ्चमी। तूष्णीम्=मौने तु तूष्णीमित्यमर:। अव्ययमेतत्।

विदू। भो पुणोवि एसा एव्वं भणादि। सहि मा लज्ज ईदिसस्स कण्णारअणस्स अवस्सं एव्व ईदिसे वरे अहिलासेण होदव्वं। ता जा एसा आलिहिदा सा क्खु कसा दंसणीआ। (क)

राजा। यद्येवमवहितौ शृणुवस्तावत्। अस्त्यत्रावकाशो न: कुतूहलस्य।

विदू। भो वअस्स मा पण्डिअगव्वं उव्वह अहं दे एदाए मुहादो सुणिअ सव्वं वक्खाणइस्स (इत्युभावाकर्णयत:)। भो वअस्स सुदं तुए जं एदाए मन्तिदं? सहि अवणेहि मे इमाइं णलिणीपत्ताइं मुणालवलआइं च, अलं एदिणा, कीस अआरणे अत्ताणं आआसेसि। (ख)

(क) भो: पुनरप्येषा एवं भणति। सखि मा लज्जस्व। ईदृशस्य कन्यारत्नस्य अवश्यमेव ईदृशे वरे अभिलाषेण भवितव्यम्। तद् या एषा आलिखिता सा खलु कन्या दर्शनीया।

(ख) भो वयस्य, मा पण्डितगर्वमुद्वह। अहं त एतस्या मुखत: श्रुत्वा सर्वं

व्याख्यास्ये। भो वयस्य श्रुतं त्वया यदेतया मन्त्रितम्। सखि अपनय मे इमानि नलिनीपत्राणि मृणालवलयानि च, अलमेतेन, कस्मादकारणे आत्मान मायासयसि।

(1) বি—ওহে আবারও সারিকা বলিতেছে। "সখি লজ্জা করিও না। ঈদৃশ কন্যারত্ন ঈদৃশ বরেই অভিলাষ করে।" যাই হউক, এই যে কন্যা চিত্রিতা হইয়াছে, সে দর্শনীয়া বটে।

রা—যদি তাহাই হয় তবে অবহিত হইয়া শোনা যাউক। ইহা কৌতূহলের বিষয় বটে।

বি—ওহে বন্ধো, পণ্ডিতমানী হইও না। ইহার মুখে শুনিয়া আমিই সকল ব্যাখ্যা করিব (উভয়ের শ্রবণ)। শুনেছ বন্ধো সারিকা কর্তৃক কি উক্ত হইল ? "সখি এই পদ্মপত্র ও মৃণালবলয়গুলি দূরে রাখ। ইহাদের প্রয়োজন নাই। কেন অকারণে নিজকে ক্লেশ দিতেছ।"

(2) J.—Lo, the parrot is again talking—"My dear, be not ashamed. Such a gem of a girl cannot but desire for such a husband." The lady thus pictured is, however, worth seeing.

K.—If so, let us attentively hear. There is room for curiosity in it.

J.—O friend, do not entertain a false conceit on your scholarship. Hearing from her I shall explain to you all. (Both listen) Friend, have you heard what she talked of? "My dear, take away these lotus leaves and bracelets. No use of them. Why are you distressing yourself in vain ?"

(3) अवहितौ=व्यापृतचित्तौ। अवकाशः=अवसरः। कुतूहलस्य=हर्षस्य। कुतूहलं कौतुके ख्यात् प्रशस्तेऽपि च दृश्यत इति मेदिनी। धरय=धारय। व्याख्यास्ये =वि+आङ् + चक्ष् + लृट् इट्। चक्षिङः ख्याञिति ख्याञादेशः। चष्टे। चचक्षे चख्यौ चख्ये चक्शौ चक्शे। ख्याता क्शाता। ख्यास्यति-ते, क्शास्यति-ते। चष्टाम्। अचष्ट। चक्षीत। ख्यायात् ख्येयात् क्शायात् क्शेयात् ख्यासीष्ट। क्शासीष्ट। अख्यत् अख्यत अक्शासीत् अक्शास्त। ख्यायते क्शायते।

अव्याथि, अक्ष्माथि। क्ष्मातुम् क्ष्मातुम्। क्ष्माला क्ष्माला। क्ष्मात: क्ष्मात:। अक्षाय:। अथिक्‌ व्यक्तायां वाचीत्यदादि:। तत्र क्ष्मा प्रकथन इति च धातुर्वर्त्तते। "अयमार्धधातुकमात्रविषयख्यावेयादय:। अन्ये तु सामान्येन मन्यन्ते" इति माधव:। भट्टोजिस्तु माधवादीनां मत मुल्लङ्घ्य अयं सार्वधातुकमात्र-विषय इति व्यवस्थापितवान्। अतोयं क्ष्माधातु: न आर्धधातुके प्रयोक्तव्य:। अयं ख्याआदेश: ख्यादि:। तस्य विभाषा ककारस्य यत्वम्। खरि चेति खकारस्य चर्त्वम् (८।४।५५)।

राजा—वयस्य, न केवलं श्रुतम्। अभिप्रायोऽपि लक्षित:।

विदू—भो वअस्स, अज्ज वि कुरकुराअदि एव्व एसा सारिआ दासीए धोआ। ता सव्वं सुणिअ वक्खाणइस्सम्। (क)

राजा—युक्तमभिहितम्।

(पुनराकर्णयत:।)

विदू—भो वअस्स, एसा क्खु सारिआ दासीए दुहिदा चउव्वेदो ब्रह्मणो विअ रिचाइं पठिदुं पउत्ता। (ख)

राजा—वयस्य, कथय। किमप्यन्यचेतसा मया नावधारितं किमनयोक्तमिति।

(क) भो वयस्य, अद्यापि कुरकुरायत एवैषा सारिका दास्या: पुत्री। तत्सर्वं श्रुत्वा व्याख्यास्ये।

(ख) भो वयस्य, एषा खलु सारिका दास्या दुहिता चतुर्वेदी ब्राह्मण इव ऋच: पठितुं प्रवृत्ता।

(१) रा—वयस्य, केवल शोना हय नाइ—अभिप्रायओ बुझा गियाछे।

वि—बन्धो, एखनओ एइ दासीर कन्या सारिका कुरकुर करितेछे। शुनिया सकलइ व्याख्या करितेछि।

রা—বেশ বলেছ। (উভয়ের পুনর্ব্বার শ্রবণ)।

বি—ওহে বয়স্য, এই দাসীর দুহিতা সারিকা, চতুর্বেদ ব্রাহ্মণের ন্যায় নিশ্চিত ঋক্ মন্ত্র পাঠ আরম্ভ করিয়াছে।

রা—বন্ধো বল—কিঞ্চিৎ অন্যমনস্ক থাকায় উহার উক্তি অবধারণ করিতে পারি নাই।

2) K.—Friend, not only heard, but understood too.

J.—Friend, this ill-begotten parrot is still chirping ! I shall hear and explain.

K.—Well said (They both listen).

J.—O friend, the bastardly parrot has surely commenced to chant the *Rik* verses, just like a Brahmin versed in the four *vedas*.

K.—Dear, tell me what it is. I was a little unmindful and could not understand what she discoursed.

(3) कुरकुरायते = कुरकुरशब्दं करोति - chirps. अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाजिति (५।४।५७) डाचि विवक्षिते बहुलं द्वे भवत इति वक्तव्याद्द्विर्वचनम्। ततो डाचि कुरत् कुरा इति स्थिते नित्यमाम्रेडिते डाचीति कुरच्छब्दस्य तकारस्य परस्य ककारस्य चोभयोः पररूपे ककारः। ततः क्यष्। लोहितादिडाज्भ्यः क्यष् इति वा क्यष इति विकल्पे तङ्। अकृत्सार्वधातुकयोर्दीर्घः (७।४।२५) इत्यार्धधातुके यकारे परे अकारस्य दीर्घत्वम्। कुरत् + डाच् + लट् त = कुरकुरायते। The affix क्यष् is applied to लोहित and डाजन्त words. डाच्प्रत्यय can occur with onomatopoetic words when डाच् follows the word is reduplicated. क्यष् प्रत्ययान्त roots are उभयपदी। ऋचः = ऋग्मन्त्रान्।

चतुर्वेदः = चतुरो वेदानधीते वेद वेति तद्धितार्थोत्तरपदसमाहारे चेति तत्पुरुषः। ततः द्विगोर्लुगनपत्ये इति (४।१।८८) तद्धितस्य लुक्। तद्धितश्चात्र तदधीते तद्वेद इति सूत्रेणोत्पन्नः (४।२।५९)। तथाच वार्त्तिकम् "सर्वसादेर्द्विगोश्च लः" इति

(४।२।६०) सर्वादेः सार्वादिंगोर्यात्पन्नस्य तद्धितस्य अजादेः लुग् भवतीत्यर्थः । चतुर्वेदीति तु केषाञ्चित् संस्कृतम् । तत्र चत्वारो वेदा सन्त्यस्य पाठ्यत्वेनेतीनिः । कथं न तस्य लोप इति च त एव प्रष्टव्याः । वस्तुतस्तु चतुर्वेदीत्यपाणिनीयम् ।

विदू । भो एव्वं भणादि ।

दुल्लहजणाणुरात्रो लज्जा गुरुई परव्वसो अप्पा ।

पित्रसहि विसमं पेम्मं मरणं सरणं णवरमेक्कं ॥ (क)

राजा—(सस्मितम्) वयस्य एवंविधं भवन्तं ब्राह्मणं मुक्त्वा कोऽन्य एवंविधानामृचामभिज्ञः ।

विदू । तदो किं णु क्खु एदम् । (ख)

राजा—ननु गाथिकेयम् ।

विदू । किं गाधिया तदो किं कहिदा । (ग)

(क) भो एवं भणति ।

दुर्लभजनानुरागो लज्जा गर्वी परवश आत्मा ।

प्रियसखि विषमं प्रेम मरणं शरणं नु वरमेकम् ।

(ख) ततः किं नु खल्वेतत् ।

(ग) किं गाथिका । ततः किं कथितम् ।

(১) বি—ওহে এইরূপ বলিতেছে—দুর্লভজনানুরাগ ইত্যাদি

রা—(সস্মিতে) বয়স্য তোমার তুল্য ব্রাহ্মণ ব্যতীত ঈদৃশ ঋক্ মন্ত্রের অভিজ্ঞ আর কে হইতে পারে ?

বি—তবে উহা কি ?

রা—ওহে ইহা গাথা ।

বি—কি গাথা ? তবে কি বলা হইল ?

(2) J—Well, she is talking thus : "It is my love for one &c."

K.—Friend, no other Brahmin than one like yourself can be versed in such *Rik* verses.

J.—Well, what is it then ?

K.—O, it is a ballad.

J.—What a ballad ? Then what did she express ?

(3) मुक्ता=वर्जयित्वा। गाथिका=छन्दोग्रथितो वाग्विशेषः। गाथा+कन्+टाप्। संज्ञायां कन्। अभाषितपुंस्काच्चेति (७,३।४८) आकारस्य ह्रस्वम्। गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयोरिति मेदिनी।

राजा—वयस्य, कयापि श्लाघ्ययौवनया प्रियतममनादयन्त्या जीवितनिरपेक्षयोक्तम्।

विदू—(उच्चैर्विहस्य) भोः किं एदेहिं वक्कभणिदेहिं। उजुअं एव्व किं ण भणासि जह मं एव्व अणासाअअन्तीएत्ति। अण्णहा को अण्णो कुसुमचावव्ववदेसेण णिह्णवीअदि। (हस्ततालं दत्त्वोच्चैर्विहसति।) (क)

राजा—(ऊर्ध्वमवलोक्य) धिङ् मूर्ख, किमुच्चैर्विहसता त्वया तपस्विनी त्रासितेयं येनोड्डीयान्यत्र क्वापि गता।

(इति निरूपयतः।)

विदू—(विलोक्य) भो वअस्स, अण्णधा मा संभावेहि। एसा कअलीघरं एव्व गदा। ता एहि। अणुसरेह्म।

(इति परिक्रामतः) (ख)

(क) भोः, किमेतैर्वक्रभणितैः। ऋजुकमेव किं न भणसि यथा मामेवानासादयन्त्येति। अन्यथा कोऽन्यः कुसुमचापव्यपदेशेन निह्नूयते।

(ख) भो वयस्य, अन्यथा मा संभावय। एषा कदलीगृहमेव गता। तदेहि। अनुसरावः।

(1) রা—বয়স্য কোনও উৎকৃষ্টযৌবনা রমণী প্রিয়তমকে না পাইয়া জীবনে নিরপেক্ষ হইয়া ইহা বলিয়াছে।

বি—(উচ্চহাস্য) ওহে এই কুটিল কথায় ফল কি ? সরল ভাবে কেন বল না যে আমাকেই না পাইয়া ইত্যাদি। তাহা না হইলে আর কে কন্দর্পচ্ছলে নিহ্নুত হইবে। (হাত তালি দিয়া উচ্চ হাস্য)

রা—(উর্দ্ধে দেখিয়া) ধিক্ মূর্খ, উচ্চহাস্যে এই সারিকাকে ত্রাসিতা করিলে কেন ? না জানি উড়িয়া কোথায় গেল ! (নিরূপণোদ্যত)।

বি—(দর্শনপূর্ব্বক) ওহে বন্ধো, অন্যরূপ মনে করিও না,—এই কদলী গৃহেই গিয়াছে। এস, অনুসরণ করি (উভয়ের পরিক্রমণ)।

(2) K.—Friend, disappointed of her lover and indifferent to her life, some lady with an excellent youth, has thus lamented—

J. (With a loud laugh) O what is the use of this evasive statement ? Why do you not frankly say that disappointed of myself &c. ...? If not so, who else can be passed off as the god of love ? (Claps and laughs loudly).

K.—(Looking up) Fie, fool, why have you frightened the parrot with your loud laugh ? She has flown away ! (Trying to find out).

J.—(Looking) Friend, do not think otherwise. She has surely gone to this plantain house. Come, let us follow (They go).

(3) श्लाघ्ययौवनया=प्रशंसनीयताकण्यया। अनासादयन्त्या=अलभमानया। जीवितनिरपेक्षया=प्राणान् अवजानत्या। वक्रभणितैः=कुटिलवचनैः। ऋजुकम्=सरलम्। स्वार्थे कन्। कुसुमचापव्यपदेशेन=कन्दर्पच्छलेन। निह्नूयते=अपलप्यते। तपस्विनी=वराकी, अनुकम्प्येति यावत्। तपस्वी तापसे चानुकम्प्ये विश्वय योषितीति मेदिनी।

राजा—दुर्वारां कुसुमशरव्यथां वहन्त्या
कामिन्या यदभिहितं पुरः सखीनाम्।

तद्भूयः शुकशिशुसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति ॥

(1) বা—দুর্ব্বারমদনব্যথিতা কামিনীর সখীসমীপে কথিত বাক্য পুনর্বার শিশু-শুকসারিকাদি কর্ত্তৃক উচ্চারিত হইয়া সুকৃতীদের কর্ণপথের অতিথি হয়।

(2) K.—Whatever is uttered before companions, by females suffering from the unbearable attack of love, comes, being repeated by the parrots and their young ones as a guest to the ears of the fortunate.

(3) दुर्वारां कुसुमशरव्यथां वहन्त्या कामिन्या सखीनां पुरो यदभिहितं तद् भूयः शुकशिशुसारिकाभिरुक्तं धन्यानां श्रवणपथातिथित्वमेति ।

(4) दु दुःखेन वार्य्यते इति ता दुर्वारां दुस्त्यजाम् । ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलिति खल् । कुसुमशरव्यथां मदनपीडां वहन्त्या धारयन्त्या कामिन्या रमण्या सखीनां सहचरीनां पुरः अग्रे यदभिहितं कथितं तद् भूयः पुनः शुकानां कीराणां शिशवः शावकाः सारिकाश्च ताभिरुक्तं सत् धन्यानां सुकृतिनां सुकृती पुण्यवान् धन्यइत्यमरः । श्रवणमेव पन्थाः तस्य अतिथित्वं कर्णपथाभ्यागतत्वम् । ऋक्पूरब्धूः पथामानक्षइति समासान्तः अप्रत्ययः । एति प्राप्नोति ।

(5) विरहिणीवाक्यानि शुकादिभिरुक्तानि पुण्यवतामेव श्रुतिं विशन्ति ।

(5) ...वहन्ती...कामिनी...अभिहितवती...तेन...उक्तेन...अतिथित्वमीयते ।

(8) प्रहर्षिणीवृत्तम् । म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयमिति लक्षणात् । The order is म-न-ज-र-ग and the pauses (यति) shall be at the end of the third and thence the tenth vowel in each line.

(12) मदनशरव्यथामिति तन्वङ्गीति शिशुशुकसारिकाभिरिति च सरस्वती-कण्ठाभरणधृतः पाठः । तत्र शिशवः शुकाः सारिकाश्चेति द्वन्द्वः । ताभिरित्यर्थः ।

विदू—भो वअस्स, एदं क्खु कअलीघरअम् जाव पविसम्ह । (इत्युभौ प्रविशतः) भोः अलं दाव दासीए

धीआए सारिआए अण्णेसणपअत्तेण, इध दाव मलअमारु-दुव्वेलन्तबालकअलीदलसीअले सिलादले उवविसिअ मुहु-त्तअं वीसम्ह। (क)

राजा—यदभिरुचितं भवते।

विट्—(पार्श्वतोऽवलोक्य)। भो वअस्स, एदेण उग्घाडिअदुवारेण दुट्ठवाणरेण ताए सारिआए पञ्जरेण होदव्वम्। (ख)

राजा—वयस्य, निरूप्यताम्।

विट्—जं भवं आणवेदिति। (परिक्रम्यावलोक्य च।) एसो वि चित्तफलओ। जाव णं गेह्णामि। (गृहीत्वा निरूप्य च हर्षं नाटयति।) (ग)

राजा—(सकौतुकम्) वयस्य, किमेतत्।

(क) भो वयस्य, एतत् खलु कदलीगृहम्। यावत् प्रविशाव:। भो अलं तस्या दास्या: पुत्र्या: सारिकाया अन्वेषणप्रयत्नेन। इह तावत् मलयमारुतोद्वेल्लद्बालकदलीदलशीतले शिलातले उपविश्य मुहूर्त्तं विश्राम्याव:।

(ख) भो वयस्य, एतेनोद्घाटितद्वारेण दुष्टवानरेण तस्या: सारिकाया: पञ्जरेण भवितव्यम्। (ग) यद्भवानाज्ञापयतीति। एषोऽपि चित्रफलक:। यावदेनं गृह्णामि।

(।) বি—ওহে বয়স্য এই সেই কদলী গৃহ—প্রবেশ করা যাউক। (উভয়ের প্রবেশ)। ওহে সেই দাসীর পুত্রী সারিকার অন্বেষণে প্রয়োজন নাই। এই মলয়পবনসঞ্চলনবকদলীপত্রশীতলশিলাতলে উপবেশন পূর্ব্বক মুহূর্ত্ত বিশ্রান্তিলাভ করিব।

রা—যেরূপ তোমার অভিরুচি।

বি—(পার্শ্বে অবলোকন) ওহে বন্ধো, দুষ্টবানরোদ্ঘাটিত এই সেই সারিকার পিঞ্জর।

রা—বয়স্য, নিরূপণ কর।

বি—যেরূপ তোমার আদেশ। (পরিক্রমণ ও দর্শন) এই চিত্রফলক, গ্রহণ করি (গ্রহণ ও নিরূপণপূর্ব্বক হর্ষ প্রকাশ)।

রা—(সকৌতুকে) কি হে বয়স্য?

(2) J.—O friend, this is the plantain house, let us enter. (Entering) O, it is useless to search for that bastardly parrot. Let us sit down and rest for a moment, on this rock which is as cold as a leaf of a new plantain moved by the south wind.

K.—As you like.

J.—(Looking at the sides). Friend, this might be the cage of the parrot, opened by the monkey.

K.—Find it out, friend.

J.—I obey you. (Walking and seeing) This is the board too. Let me take it up (Picks up and expresses joy).

K—(With curiosity) what is it friend?

(3) मलयेति=मलयस्य मारुतेन पवनेन उद्वेल्लन्ती सञ्चलन्ती या बाला कदली तस्या दलं पत्रमिव शीतलं तस्मिन्=दक्षिणपवनसञ्चलन्नवकदलीपत्त्रशीतले। उद्वेल्लत्—उद् + वेल्ल + शतृ। वेल्ल चलने। भ्वादिः। वेल्लति। विवेल्ल। वेल्लिष्यति। अवेल्लीत्। cf :—स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना इति महानाटकम्। भवते—रुच्यर्थानां प्रीयमाण इति चतुर्थी।

विदू—भो वअस्स दिट्ठिआ वड्ढसि एदं तं जं मए भणिदं तुमं जेव्व एत्थ आलिहिदो, अण्णहा को अण्णो कुसुमचाबव्ववदेसेण णिह्णवीअदि त्ति। (क)

राजा। (सहर्षं हस्तौ प्रसार्य्य) सखे दर्शय दर्शय।

विदू। ण दे दंसइस्सं। सावि कण्णआ एत्थ एव्व आलिहिदा त्ति। किं पारिदोसिएण विणा ईदिसं कण्णारअणं दंसीअदि। (ख)

(ক) ভোঃ বয়স্য দিষ্ট্যা বর্দ্ধসে। এতদ্যন্ময়া ভণিতম্। ত্বমেবাত্রালিখিতঃ। অন্যথা কোঽন্যঃ কুসুমচাপব্যপদেশেন নিহ্নূয়ত ইতি।

(খ) ন তে দর্শয়িষ্যামি। সাপি কন্যাত্রৈবালিখিতেতি। তত্ কিং পারিতোষিকেণ বিনেদৃশং কন্যারত্নং দৃশ্যতে।

(১) বি—ওহে তোমার অদৃষ্টে জয়। ইহা তাহাই। আমি বলিয়াছি তুমিই এখানে চিত্রিত হইয়াছ। নচেৎ কে আর কন্দর্প নামে গোপিত হইবে?

রা—(সহর্ষে হস্তপ্রসারণপূর্ব্বক) সখে, দেখি দেখি?

বি—তোমাকে দেখাইব না—সেই কন্যাও এস্থলে চিত্রিতা। বিনা পারিতোষিকে কি ঈদৃশ কন্যারত্ন দেখাইতে হয়?

(2) J.—Well, good luck to you! It is as I said; you are delineated here; otherwise who else can be passed off as the god of love?

K.—(Joyfully extending his hands) Show me friend, show me!

J.—No, I shall not show this. That girl also is portrayed here. How can such a jewel of a girl be shown without a reward?

(৩) পারিতোষিকেণ=পুরস্কারমূল্যেন। পরিতোষঃ প্রয়োজনমস্যেতি প্রয়োজনমিতি ঠঞ্ (৫।১।১০৯)।

রাজা।—(কটকমর্পয়ন্নেব বলাদ্ গৃহীত্বা পশ্যতি। বিলোক্য সবিস্ময়ং) বয়স্য পশ্য।

লীলাবধূতপদ্মা কথয়ন্তী পক্ষপাতমধিকং নঃ।
মানসমুপৈতি কেয়ং চিত্রগতা রাজহংসীব॥

(১) রা—(বলয় প্রদান, বলে গ্রহণ ও দর্শনপূর্ব্বক সবিস্ময়ে) বয়স্য দেখ, বিলাসবিকম্পিতপঙ্কজা, আমার প্রতি অধিকপক্ষপাতপ্রকাশকারিণী চিত্রগতা এই কোন্ অঙ্গনা রাজহংসীর ন্যায় মানসে প্রবেশ করিতেছে?

K.—(Giving bracelet and snatching and seeing with surprise) Friend, see.

Gently shaking lotuses in sport and indicating much love to me, what lady is this in drawing, who is stealing into my mind, just like a white goose having a peculiar gait, who enters into the lake *Manasha*, with much motion of its wings?

(3) लीलावधूतपद्मा अधिकं नः पक्षपातं कथयन्ती चित्रगता इयं का राजहंसीव मानसमुपैति?

(4) लीलया क्रीडया। लीला केलिर्विलासश्च शृङ्गारभावजक्रियेति हेमचन्द्रः अवधूतं कम्पितं पद्मं पङ्कजं यया सा तथोक्ता। क्रीडाकम्पितकमला। अधिकमतिरिक्तं नोऽस्माकम्। अस्मदो द्वयोश्चेति एकत्वे बहुत्वं वा। पक्षपातम् अनुराग पक्षे पक्षधूननञ्च कथयन्ती प्रकटयन्ती चित्रं गता आलेख्यस्थिता। पक्षे चित्रं अद्भुतं गतं गमनं यस्याः सा। चारुगमना। इयं का रमणी राजहंसीव मानसं चित्तं पक्षे सरः उपैति विशति। हंसानां वर्षासु मानसे गमनं प्रसिद्धम्। जलदसमये मानसं यान्ति हंसा इति साहित्यदर्पणः।

(5) अञ्चललीलासरोजा कैयमङ्गना मय्यनुरागं प्रकाशयन्ती हृदयमधिकरोति यथा मानसं राजहंसी।

(8) लीलावधूतपद्मया...कथयन्त्या...मनसम् उपेयते कया अनया...चित्रगतया राजहंस्येव।

(9) आर्या छन्दः। (10) उपमा।

अपिच।

विधायापूर्वपूर्णेन्दुमस्या मुखमभूद् ध्रुवम्।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः॥

(1) আরও বিধাতা ইহার মুখ অপূর্ব্ব পূর্ণচন্দ্র করিয়া নিশ্চিত নিজাসনপদ্মের সঙ্কোচহেতু কষ্টে উপবিষ্ট ছিলেন।

(2) Besides,—the creator having made her face a charming full moon, was surely inconvenienced by the closing of the lotus which was his seat.

(3) विधाता अस्या मुखमपूर्वपूर्णेन्दुं विधाय ध्रुवं निजासनाम्भोजविनिमीलन-दुःस्थितः अभूत्।

(4) विधाता स्रष्टा अस्याः कामिन्या मुखमाननं मपूर्वं मद्भुत पूर्णेन्दुं पूर्ण-चन्द्रं विधाय कृत्वा ध्रुवं निश्चितं स्वस्य निजस्य आसनमिवाम्भोजं पद्मं तस्य विनि-मीलनेन संकोचेन दुःस्थितः कष्टेन उपविष्टः। स्वासनपद्मसङ्कोचदुःखोपविष्टः। अभदवशिष्ट। चन्द्रोदये कमलस्य निमीलनादिति भावः।

(5) विधाता अस्या मुखं चन्द्रं कृतवान्। तेनास्यासनपद्मं निमीलितम्। भूतलस्य उपवेशनं कर्कशं जातम्।

(8) अभावि धात्रा दुःस्थितेन।

(9) अनुष्टुप्।

(10) धातुर्दुःस्थितेरसम्बन्धेपि तत्सम्बन्धोक्तावतिशयोक्तिः। सा च विषमकाव्य-लिङ्गोत्प्रेक्षानुजीविता। विरुद्धकार्य्यस्योत्पत्ति र्यत्रानर्थस्य वा भवेत्। विरूपघटना-वासौ विषमालङ्कृति स्त्रिधेति विषमालङ्कारलक्षणात्।

ततः प्रविशति सागरिका सुसङ्गता च।

साग। सहि सुसङ्गदे ण समासादिदा अह्मेहिं सारिआ। ता चित्तफलअं वि दाव इमादो कअलीघरादो गेह्निअ लहुं आअच्छह्म। (क)

सुसं। सहि एव्वं करेह्म (इत्युपसर्पतः)। (ख)

विदू—भो वअस्स, कीस उण एसा ओणदमुही आलि-हिदा। (ग)

सुसं—(आकर्ण्य।) सहि, जहा वसन्तओ मन्तेदि तहा तक्केमि भट्टिणा वि एत्थ होदव्वम्। ता कअलीघरगुम्म न्तरिआ भविअ पेक्खह्म। (ख)

(इत्युभे आकर्णयतः।)

(क) सखि सुसंगते, न समासादिताऽस्माभिः सारिका। तच्चित्रफलकमपि तावदस्मात् कदलीगृहकाद् गृहीत्वा लघ्वागच्छाव।

(ख) सखि, एवं कुर्वः।

(ग) भो वयस्य, कस्मात् पुनरेषावनतमुख्यालिखिता।

(घ) सखि, यथा वसन्तको मन्त्रयते तथा तर्कयामि भर्त्रायेनैव भवितव्यम्। तत्कदलीगृहगुल्मान्तरिता भूत्वा प्रेक्षावहे।

(1) (সাগরিকা ও সুসঙ্গতার প্রবেশ)

সা—সখি সুসঙ্গতে, সারিকাকে পাওয়া গেল না। এই কদলী গৃহ হইতে চিত্রফলক লইয়া শীঘ্র আসিব।

সু—সখি তাহাই করিব। (গমন)

বি—ওহে বন্ধো, সে অবনতমুখী চিত্রিতা হইয়াছে কেন ?

সু—(শুনিয়া) সখি, বসন্তক কথা বলিতেছে, তবে রাজাও এখানেই আছেন। অতএব কদলীগৃহগুল্মান্তরিতা হইয়া দেখিব (উভয়ের শ্রবণ।)

(Enter Sagarika and Soosangata).

(2) Sa—Dear *Susangata*, we could not overtake the Parrot So let us soon now get away the picture board from this plantain house.

Soo.—Let us do it, dear. (Both going).

J.—Friend, why is she pictured with her face downwards ?

Soo.—(Listening) Dear, the king must be by, as *Basantaka* is speaking. So let us observe, being concealed in the bush of the plantain house. (They listen).

(3) कदलीगृहगुल्मान्तरिता = कदलीगृहस्तम्बसंवृता। अप्रकाण्डे स्तम्बगुल्मौ इत्यमरः। गुल्म *i.e.*, a shrub, bush, thicket, cluster.

राजा—वयस्य, पश्य पश्य। (विधायापूर्वपूर्णेन्दुमित्यादि पुनः पठति।)

सुसं—सहि, दिट्ठिआ वड्ढसि। एसो दे हिअअवल्लहो तुमं ज्जेव्व वण्णेदि। (क)

सागर—(सलज्जम्) सहि, कीस परिहाससीलदाए इमं जनं लहुं करेसि। (ख)

विदू—(राजानं चालयित्वा) णं भणामि, कीस एसा ओणदमुही आलिहिदा। (ग)

(क) सखि, दिष्ट्या वर्धसे। एष ते हृदयवल्लभस्त्वामेव वर्णयति।

(ख) सखि, किमिति परिहासशीलतयेमं जनं लघुं करिष्यसि।

(ग) ननु भणामि। किमित्येषावनतमुख्यालिखिता।

(1) রা—বয়স্য, দেখ, দেখ, (বিধাতা ইহার মুখ ইত্যাদির পুনঃ কথন)।

সু—সখি, তোমার অদৃষ্টের জয়। এই তোমার হৃদয়বল্লভ তোমাকেই বর্ণনা করিতেছেন।

সা—(লজ্জার সহিত) সখি পরিহাসে আমাকে লঘু করিতেছ কেন?

বি—(রাজাকে নাড়িয়া) ওহে জিজ্ঞাসা করি কেন সে অবনতমুখী অঙ্কিতা হইয়াছে?

(2) K.—Friend, see, see (Repeats the Creator &c....).

Soo.—Good luck to you, my dear; your beloved is describing you.

Sag. –(Bashfully) My dear, do not lower me with your jest.

J.—(Nudging the king) Well, I say why is she portrayed with her face downwards?

(3) लघुम्=सामान्यम्।

राजा—वयस्य, सारिकयैव सकलमावेदितम्।

सुसं—(विहस्य) सहि, दंसिदं सारिआए अत्तणो मेहाविक्तणं। (क)

विदू—भवि सुहाअदि दे लोअणं ण वेत्ति। (ख)

सागर—(ससाध्वसं स्वगतम्) हद्धी हद्धी। ण आणे

किं एत्थ भणिस्सदि। जं सच्चं एव्व मरणजीविदाणं अन्तरे वट्टामि। (ग)

(क) सखि दर्शितं सारिकया आत्मनो मेधाविलम्।

(ख) अपि सुखायते ते लोचनं न वेति।

(ग) हा धिक् हा धिक् न जाने किमत्र भणिष्यति, यत् सत्यमेव मरणजीवितयोरन्तरे वर्त्ते।

(1) रा—वयस्य, সারিকাই সকল বলিয়াছে।

সু—(হাস্য) সখি, সারিকা নিজের স্মৃতিশক্তি দেখাইয়াছে।

বি—তোমার চক্ষুঃ সুখলাভ করিতেছে কি না?

সা—(সভয়ে, স্বগত) হায় ধিক, হায় ধিক, জানি না এখন কি বলিবেন। সত্যই জীবনমরণের মধ্যে আছি।

(2) K.—Friend, the parrot has expressed all.

Soo.—(Laughing) Dear, the parrot has proved her retentive instinct.

J.—Are your eyes feeling pleasure?

Sag.—(With fright and aside) Alas, alas, I do not know what he will now declare? Truly I am now between life and death.

(3) सुखायते—सुखं वेदयते अनुभवतीत्यर्थः। सुखादिभ्यः कर्तृवेदनायामिति क्यङ् (३।१।१८)

राजा—वयस्य, सुखायतइति किमुच्यते।

कृच्छ्रादूरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्यास्त्रिवलीतरङ्गविषमे निस्पन्दतामागता।
मद्दृष्टिस्तृषितेव संप्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने॥

(1) রাজা—বয়স্য, সুখলাভ কি বল ?

আমার চক্ষুঃ অতি কষ্টে ইহার উরুদ্বয় অতিক্রম পূর্ব্বক বহুক্ষণ, জঘনস্থলে ভ্রমণ করিয়া ত্রিবলিনিমিত্তক অসমান মধ্যদেশে নিস্পন্দ হইয়াছে। সম্প্রতি অল্পে অল্পে তুঙ্গ স্তনদ্বয় আরোহণ পূর্ব্বক, তৃষিতের ন্যায় উহা, আকাঙ্ক্ষার সহিত পুনঃ পুনঃ সলিলকণাস্রাবি নয়নদ্বয়কে দর্শন করিতেছে।

(2) K.—Friend, why pleasure alone ?

Having passed over her thighs with difficulty, and moving long on her buttocks, and being arrested by the middle of her body which is uneven owing to the rising folds of her skin over the navel, my eyes, as if insatiate, slowly rising over her heaving breasts, are now resting on her eyes casting drops of tears.

(3) कृच्छ्रादस्या ऊरुयुगं व्यतीत्य नितम्बस्थले सुचिरं भ्रान्त्वा विवलीतरङ्ग-विषमे मध्ये निस्पन्दतामागता मद्दृष्टि: शनै: तुङ्गौ स्तनौ आरुह्य तृषितेव सम्प्रति जललवप्रस्यन्दिनी लोचने मुहु: साकाङ्क्षमीक्षते।

(4) कृच्छ्रात् कष्टेन अस्या ऊरुयुगं सक्थिद्वयं व्यतीत्य अतिक्रम्य नितम्ब-स्थले श्रोणितटे सुचिरं बहुक्षणं भ्रान्त्वा चलित्वा विवल्या: उदरावयवविशेषस्य तरङ्गै: भङ्गैर्विषमे उन्नतानते। भङ्ग: तरङ्ग ऊर्मिर्वेत्यमर:। मध्ये मध्यभागे निस्पन्दतां निश्चलताम् आगता प्राप्ता मद्दृष्टिर्मम नयनं शनैर्मन्दं तुङ्गौ उच्चौ स्तनौ कुचौ आरुह्य उत्क्रम्य तृषितेव पिपासितेव तुङ्गस्थानारोहणश्रान्त्या तृष्णा भवत्येवेत्यर्थ:। सम्प्रत्यधुना जलस्य लवं कणं। लवलेशकणाणवइत्यमर:। पुन: पुन: प्रस्यन्दयत: मुञ्चत इति बहुल माभीक्ष्ण्येऽइति (३।२।८१) णिनि:। जललवप्रस्यन्दिनी सलिलकणस्राविणी लोचने नयने मुहुर्वारं वारं साकाङ्क्षं साभिलाषम् ईक्षते पश्यति।

(5) चिरगताया अस्या ऊरुयुगं दृष्ट्वा सुचिरं जघनदेशोऽवलोकित:। ततो वलिमयीत्यानबन्धुरो मध्यदेशश्च विलोकित:। अधुनास्या तुङ्गौ कुचौ दृष्ट्वा तृषिते इव मन्नयने अस्या: सलिलकणयुक्तयोर्लोचनयो: स्थापिते।

(6) कृच्छ्रात्—करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्येति वा पञ्चमी (२।३।३३)। पक्षे कृच्छ्रेण।

व्यतीत्य—वि+अति+इण्+ल्यप्। ह्रस्वस्य कृति पिति तुगिति तुक् i. e. if पकार vanishes from a कृत् प्रत्यय, a तकार is joined to the root, if it ends with a ह्रस्व vowel.

त्रिवलीतरङ्गविषमे—सर्व्वधातुभ्य इन्निति (वल्+इन्) औणादिक इन् प्रत्ययः। वलिः। वलिर्देहत्वग्भेदे च करचामरदण्डयोः। उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि। गृहदारुप्रभेदे च जठरावयवे त्रिवलीति मेदिनी। ततः कृदिकारादक्तिनः इति वक्तव्याद्वा ङीष् (४।१।४८, वा)। वली। त्रिविभक्ता वली त्रिवली। शाकपार्थि वादित्वात् तत्पुरुषः। ननु समाहार द्विगुस्तत्र स नपुंसकमिति (२।४।१७) नपुंसकत्वे ह्रस्वत्वं दुर्वारम्। तस्या स्तरङ्गैर्विषमे। Some has expounded तिसृणां वलीनां समाहार स्त्रिवली. In that case the Rule 2. 1. 17 interferes and by ह्रस्वो नपुंसके प्रातिपदिकस्य, the word turns to be त्रिवलि and so the metre is broken. The Rule द्विगोः (4. 1. 2) does not help, as it is for अकारान्तप्रातिपदिक which again is supported by the वार्त्तिक "अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः"। वलि is a fold of skin over the navel, specially of women.

निस्पन्दता=नि+स्पन्द्+अच्+तल्+टाप्। स्पदि किञ्चिच्चलने। भ्वादिः। स्पन्दते। पस्पन्दे। स्पन्दिष्यते। अस्पन्दिष्ट। स्पन्द्यते। अस्पन्दि। स्पन्दितः। स्पन्दमानः। स्पन्दितुम्। स्पन्दित्वा।

प्रस्यन्दिनी=प्र + स्यन्द + णिच् + णिनिः + ङीप्। Neutre. स्यन्दते। सस्यन्दे। स्यन्दिता। स्यन्ता। स्यन्दिष्यते, स्यन्त्स्यते, स्यन्त्स्यति। स्यन्दताम्। अस्यन्दत। स्यन्देत। स्यन्दिषीष्ट स्यन्त्सीष्ट। अस्यन्दिष्ट अस्यन्त अस्यदत्। वृद्भ्यो लुङीति वा परस्मैपदम्। Some assert that according to देवदास चक्रवर्त्ती अस्यन्दत् should be the optional form in लुङ् retaining नकार (*i. e.* नुम्) against the Rule अनिदितां हल उपधायाः क्ङिति।

But this is अपाणिनीय। स्यन्दते। अस्यन्दि। स्यन्नः। स्यन्दमानः। स्यन्दित्वा स्यन्त्वा प्रस्यन्द्य। स्यन्दितुम् स्यन्तुम्। स्यन्दयति। असस्यन्दत्। There where these double तकार occurs only one तकार also may optionally be retained under झरो झरि सवर्णे। So another form increases.

(7) पश्चान्नितम्बः स्त्रीकट्याः इत्यमरः।

(8) आगतया...मद्दृष्ट्या...तृषितयेव...ईक्ष्येते लोचने।

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) अत्र पर्यायनामालङ्कारः। एकस्या दृष्टेरनेकस्मिन् स्थितेः। तथाहि एकं क्रमेणानेकस्मिन् पर्यायोन्यस्ततोन्यथेति काव्यप्रकाशे। रसवदलङ्कार इति त्वलङ्कारसर्वस्वटीकायाम् जयरथः। अयं च समाधियुक्तः दृष्टौ प्राणिधर्मोत्वां समाधानादिति भोजदेवः।

साग—(श्रुत्वा स्वगतम्) हिअअ, पसीद पसीद। समस्सस समस्सस। मणोरहोवि दे दाणिं एत्तिअं भूमिं गदो। (क)

सुसं—सहि, सुदं तुए। (ख)

साग—(विहस्य) तुमं एव्व सुणु। जाए आलेक्खविसाणं वस्सीअदि। (ग)

विदू—(फलकं निर्वर्ण्य) भो वअस्स, जस्स उण ईदिसोओवि एव्वं पिअसमागमं बहु मरणन्ति तस्स वि अत्तणो उवरि को पराहवो जेण एत्थ एव्व ताए आलिहिदं अत्ताणअं ण पेक्खसि। (घ)

(क) हृदय, प्रसीद प्रसीद। समाश्वसिहि समाश्वसिहि। मनोरथोऽपि ते इदानीमियतीं भूमिं गतः।

(খ) সখি, শ্রুতং ত্বয়া।

(গ) ত্বমেব শৃণু যস্যা আলিখ্যবিজ্ঞানং বর্ণ্যতে।

(ঙ) ভো বয়স্য, যস্য পুনরীদৃশ্যোঽপ্যেবং প্রিয়সমাগমং বহু মন্যন্তে তস্যাপ্যাত্মন উপরি কঃ পরাভবঃ ঐনামেব ত্বয়ালিখিতমাত্মানং ন প্রেক্ষসে।

(১) সা—(শুনিয়া স্বগত) হৃদয়, প্রসন্ন হও, আশ্বস্ত হও, তোমার অভিলাষ এখন এতদূর পর্য্যন্ত গমন করিয়াছে।

সু—সখি, শুনেছ ?

সা—(হাস্যপূর্ব্বক) তুমিই শোন, তোমারই আলেখ্য বিজ্ঞান বর্ণিত হইতেছে

বি—(ফলক দর্শন পূর্ব্বক) ওহে বন্ধো, ঈদৃশ রমণীরাও যাহার প্রীতিকর সমাগমকে অত্যন্ত আদর করে, তাহারও কি নিজের উপর অবহেলা হয় ? এই স্থানেই তৎকর্ত্তৃক চিত্রিত তোমার নিজকে দেখিতেছ না কেন ?

(2) Sa.—(Listening, aside), O my soul, be of good cheer and trust : your desire has now gone so far.

Soo.—Have you heard this, dear ?

Sa.—(Smiling) You ought to hear, since your skill in delineation is described.

J.—(Looking at the board) O friend, can a man neglect himself whose delightful union even such ladies thus greatly welcome ? Why are you not looking at yourself also pictured by her here ?

(3) আলিখ্যবিজ্ঞানং=চিত্রনৈপুণম্। পরাভবঃ—অনাদরঃ।

রাজা—(নির্বর্ণ্য) বয়স্য, অনয়া লিখিতোঽহমিতি যৎসত্যমাত্মন্যেব বহুমানঃ। তৎকথং ন পশ্যামি। পশ্য

ভাতি পতিতো লিখন্ত্যাস্তস্যা বাষ্পাম্বুশীকরকণৌঘঃ।
স্বেদোদ্গম ইব করতলসংস্পর্শাদেষ মে বপুষি॥

(১) রা—(দর্শন পূর্ব্বক) বয়স্য ইহাকর্ত্তৃক অঙ্কিত হওয়াতেই আমার অত্যন্ত আত্মসম্মান হইয়াছে। কেন দেখিব না ?, দেখ—

চিত্রকারিণীর পতিত নেত্রজলবিন্দু হস্তস্পর্শহেতু যেন আমার শরীরে ঘর্মাবির্ভাবের ন্যায় শোভা পাইতেছে।

(2) K—(Looking) Friend, I do truly respect myself much as I have been portrayed by her. Why shall I not see? See—

The drops of falling tears of that painting lady appear, as it were, like perspiration on my body by the touch of her hand.

(3) लिखन्त्या तस्याः पतितः एष वाष्पाम्बुशीकरकणौघः करतलसंस्पर्शाद् मे वपुषि स्वेदोद्गम इव भाति।

(4) लिखन्त्या अङ्कयन्त्या तस्याः एषः पतितो गलितो वाष्पाम्बुनः नेत्रजलस्य शीकरकणानां बिन्दूनां ओघः समूहः करतलस्य संस्पर्शाद् मे मम वपुषि देहे स्वेदस्य घर्मस्य उद्गमः आविर्भावः इव भाति शोभते।

(5) अङ्कनकाले तस्या नयनाभ्यां च्युता जलकणा मम शरीरे तत्करस्पर्शसञ्जाताः स्वेदबिन्दव इव शोभन्ते। अनुरूपवर्णनं यथा शाकुन्तले—स्विन्नाङ्गुलिविनिवेशः रेखाप्रान्तेषु दृश्यते मलिनः। अश्रु च कपोलपतितं दृश्यमिदं वर्णिकोच्छ्वासात्।"

(6) ओघः प्रवाहः संघातो द्रुतनृत्तं परम्परेति हेमचन्द्रः। शीकरोऽम्बुकणाः स्मृता इत्यमरः। अथवा वाताऽस्तं वारि शीकर इति हलायुधः। तत्र च वाष्पाम्बुशीकरकणौघ इति पदं कथञ्चित् जघनकाञ्चीत्यादिवत् समर्थनीयम्। In वाष्पाम्बु and शीकरकण tautology cannot be avoided. कण may however mean सूक्ष्मांश, "लवलेशकणाणव" इत्यमरः। Hence वाष्पाम्बुनः शीकराणां बिन्दूनां कणानां लेशानां सूक्ष्मांशानामिति यावत् ओघः संघातः।

(8) भायते पतितेन...कणौघेन...स्वेदोद्गमेन...एतेन।

(9) आर्या।

(10) उत्प्रेक्षा।

विदू—(पार्श्वतोऽवलोक्य) भो वअस्स, एदं क्खु ताए सरसकमलिणीदलमुणालविरइदं मअणावत्थासूअअं लक्खीअदि। (क)

(क) भो वयस्य, एतत् खलु तस्याः सरसकमलिनीदलमृणालविरचितं मदनावस्थासूचकं लक्ष्यते।

(२) वि—(পার্শ্বে দর্শন পূর্ব্বক) ওহে বন্ধো, এই তাহার কামাবস্থাসূচক কমলিনীপত্রমৃণালবিরচন লক্ষিত হইতেছে।

(2) J.—(Looking at his sides) Friend, these are the preparations of fresh lotus leaves and roots indicating her love-smitten state.

(3) सरसेति=सरसेन नवेन अशुष्केणेति यावत् कमलिन्याः पद्मिन्या दलेन मृणालेन च विरचितं रचना। भावे क्तः।--प्रत्यय-पद्मिनीपत्रबिस-निर्मितिः।

राजा—वयस्य, निपुणमुपलक्षितम्। तथाहि।
परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति नलिनीपत्रशयनम्॥

(1) রা—বয়স্য, উত্তম স্থির করিয়াছ। যেহেতু—

পীনস্তনজঘনসঙ্গমে প্রান্তদ্বয়ে পরিম্লান, দেহমধ্যভাগের সহিত সংস্পর্শ না ঘটাতে মধ্যে হরিদ্বর্ণ, অলসভুজলতাস্থাপনসঞ্চালনে বিপর্য্যস্তরচন নলিনীপত্রশয্যা কৃশাঙ্গীর সন্তাপ ব্যক্ত করিতেছে।

(2) K.—You have nicely judged, friend. Since—The sufferings of that lean-bodied lady are indicated by this bed of lotus

leaves, which has been in disorder by her lean, languid arms now resting and now moving and which is green in the middle as it did not reach her slender waist, though stale on both the sides by the pressure of her heaving breasts and expansive buttocks.

(3) पीनस्तनजघनसङ्गादुभयतः परिम्लानं तनोर्मध्यस्य परिमिलनमप्राप्य अन्तर्हरितं श्लथभुजलताक्षेपवलनैः व्यस्तन्यासमिदं नलिनीपत्रशयनं कृशाङ्ग्याः सन्तापं वदति ।

(4) स्तनौ कुचौ जघनं श्रोण्यौ च स्तनजघनम् । द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानामिति एकवद्भावः । स नपुंसकमिति क्लीवत्वम् । पीनञ्च स्तनजघनञ्चेति कर्म्मधारयः । तस्य सङ्गात् संसर्गात् । स्थूलकुचश्रोणिसङ्गमात् । उभयतः ऊर्द्ध्वाधोभागयोः प्रान्तयोर्वा परिम्लानं क्षीणशोभम् । तनोः कृशस्य मध्यस्य मध्यभागस्य परिमिलनं परिमेलनं संयोगं संघर्षमिति यावत् अतिक्षीणत्वादप्राप्य अलब्ध्वा अन्तरभ्यन्तरे हरितं हरिद्वर्णं । पालाशं हरितं हरिदिति हलायुधः । भुजौ लते इव इत्युपमिततत्पुरुषः । श्लथयोः शिथिलयोर्भुजलतयोः क्षेपाः सञ्चालनानि वलनानि संवरणानि च शय्यांशानां प्रच्छादनानीत्यर्थः । तैः शिथिलबाहुलतासञ्चालनप्रच्छादनैः । वल वल्ल संवरणे इति धातोर्ल्युट् । व्यस्तः विक्षिप्तः विषमीकृतः कृतविपर्य्यास इति यावत् न्यासो रचना स्थितिरिति यावत् यस्य तत् । उल्लङ्घितरचनं विपर्य्यस्तमित्यर्थः । इदं नलिनीपत्रशयनं पद्मिनीदलनिर्मितशय्या कृशाङ्ग्याः तन्व्याः सन्तापं कामव्यथां वदति सूचयति अनुमापयतीत्यर्थः ।

(5) पीनस्तनजघनमर्दनेन प्रान्तयोर्निष्प्रभं कृशस्य मध्यस्यास्पर्शादभ्यन्तरे हरिद्वर्णं तथा शिथिलबाहुवल्लीसञ्चालननिवेशनादिभिर्विपर्य्यस्तमिदं पद्मपत्रशयनं क्षीणदेहायास्तस्याः सन्तापं प्रकटयति ।

(6) परिम्लानम् = परि + म्लै + क्तः । म्लायति । मम्लौ । म्लास्यति । अम्लासीत् । आशिषि लिङि म्लायात् म्लेयात् । म्लायते । अम्लायि । म्लायत् । म्लातुम् । म्लात्वा ।

पीनम्=प्याय्+क्तः। ओप्यायी वृद्धाविति भ्वादिः। प्यायते। पिप्ये। प्यायिष्यते। अप्यायि अप्यायिष्ट। प्याय्यते। अप्यायि। प्यायितुम्। प्यायित्वा। प्यायमानः। In निष्ठा when स्वाङ्गवाचक, the from will be पीन ; otherwise प्यान ; with उपसर्ग, the latter form as प्रप्यान, आप्यान ; but it it means अन्धुः (कूपः) or ऊधः (udder), it will be आपीन if preceded by आङ्।

उभयतः=उभशब्दात् तसिल्। ततो वृत्तिविषये अयजागमः। "उभादुदात्तो (५।२।४४) नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगो माभूदुभयशब्दस्यैव यथा स्यादि"ति कैयटः। परार्थाभिधानं वृत्तिरिति। कृत्-तद्धित समासैकशेषसनाद्यन्तधातुरूपाः वृत्तयः। कैयट decides that in the Rule 5. 2. 44 the word नित्यम् is inserted for the purpose that in the matter of वृत्ति (i. e. कृत्, तद्धित &c.) उभ shall not be used but उभय (i. e. उभ + अयच्). Hence तसिल् being a तद्धित, we get उभयतः and not उभतः।

परिमिलनम्=परि + मिल् + ल्युट् = परिमिलनम्। नायं कटादिः। कथं परिमिलनम् ? It is अपाणिनीयत्वादपशब्द एव if used by any ordinary writer. As for the poets निरङ्कुशाः कवयः। Or by the परिभाषा, संज्ञापूर्वको विधिरनित्यः, it is usual to justify such अभियुक्तप्रयोग। They also give another reading to avoid this ungrammatical form "सर्वाङ्गेष्वस्यान्तःपरिमिलितमप्राप्य हरितम्।" In which परिमिलितम् is under भावे क्तः and similarly in the following cases :—न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे" इत्यमरुः। "व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीर"मिति जयदेवः।

वलनैः—वल प्राणने धान्यावरोधे चेति भौवादिः परस्मैपदी च। If from this root, वलति, ववाल, अवालीत् will be the conjugations. It

may better come from वल वल्ल संवरणे सञ्चरणे च which is दन्तोष्ठ्यादि and आत्मनेपदी वलते, ववले, वलिष्यते, अवलिष्ट वलितम् &c. cf.—ववलिरे वलिरेचितमध्यमा इति माघः। As for वलद्बाधां राधां सरसमिदमूचे सहचरीति जयदेवप्रयोग, take ओष्ठ्यादि, बलन्ती प्राणती जीवन्तीति यावत् बाधा यस्याः ताम्।

कृशाङ्ग्याः—कृशमङ्गं यस्याः। अङ्गगात्रकण्ठेभ्यो वक्तव्यमिति ङीष् वा। But the genuineness of this वार्त्तिक is not acknowledged by all. They make ङीष् in such cases on the strength of चकार in 4. 1. 55, which collects others not mentioned. But says भट्टोजि—"एतत् भाष्याद्यनुक्तत्वादप्रमाणम् इति प्रामाणिकाः।"

(8) परिम्लानेन...हरितेन...अनेन व्यस्तन्यासेन...सन्तापः उद्यते ..नलिनी-पत्रशयनेन।

(9) शिखरिणीवृत्तम्। रसैः रुद्रैश्छिन्ना य-म-न-स-भ-ला गः शिखरिणीति लक्षणात्। i. e. यति should be in each line after the sixth vowel (रस) and thence after the eleventh (रुद्र) and the order is य-म-न-स-भ-ल-ग।

(10) अत्र अनुमानाख्योऽलङ्कारः। कार्य्यमुखेन कारणावगतेः। तथाहि अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनादिति। विच्छित्तिः कविप्रतिभोत्थिता चमत्कृतिरित्यर्थः।

(11) अत्र प्रसादाख्यो गुणः। तथाच लक्षणम्—"श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्। साधारणः समग्राणां स प्रसादो गुणो मत इति काव्यप्रकाशे।

(12) विसिनीपत्रशयनमिति मम्मटराघवभट्टाभ्यां धृतः पाठः। तत्र विसिन्याः मृणालिन्याः पद्मिन्या इति यावत् पत्राणां दलानां शयनमित्यर्थः। प्रश्लथितभुजाक्षेपवलनैरिति वा पाठः। तत्र प्रश्लथितयोर् भुजयोः राक्षेपैः सम्प्रसर्णैर्विश्लेषैश्चलनैर्गतिभिरित्यर्थः।

अपिच—स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्थामवस्थाम्।
अतिशयपरितापग्लापिताभ्यां यथास्याः
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति॥

(1) আরও—বক্ষঃস্থিত এই বিশাল পদ্মিনীপত্র যেরূপ ইহার অত্যন্ত সন্তাপ-ক্লিষ্ট চক্রাকার চিহ্নদ্বয়দ্বারা স্তনদ্বয়ের বিশালতা সূচনা করিতেছে তদ্রূপ অন্তর্গত মদনাবস্থা প্রকাশ করিতেছে না।

(2) Besides—The lotus leaf kept on her bosom does not reveal the fervour of her love so much as it is showing the great extent of her heaving breasts by its two pallid circles.

(3) अपिच—उरसि स्थितमेतत् विशालं पद्मिनीपत्रम् अतिशयपरितापग्लापिताभ्यां मण्डलाभ्यां यथा अस्याः स्तनयुगपरिणाहं ब्रवीति तथा अन्तर्मन्मथोत्थामवस्थां न कथयति।

(4) उरसि वक्षसि स्थितं एतत् विशालं बृहत् पद्मिनीपत्रं कमलिनीपर्णम् अतिशयेन प्राचुर्य्येण परितापः सन्तापः तेन ग्लापिताभ्यां शोषिताभ्यां संप्राप्तग्लानत्वाभ्यामिति यावत्। समधिकसन्तापशोषिताभ्यां। मण्डलाभ्यां चक्राभ्यां चक्राकारचिह्नाभ्यामित्यर्थः। पटलं पेटकं चक्रं चक्रवालञ्च मण्डलमिति हलायुधः। यथा स्तनयुगस्य कुचद्वयस्य परिणाहं विशालताम्। परिणाहो विशालतेत्यमरः। कुचद्वयविस्तीर्णताम्। ब्रवीति प्रकाशयति। तथा अन्तर्मध्ये मन्मथात् कन्दर्पात् उत्तिष्ठति उद्गच्छतीति तथोक्ता ताम्। आतश्चोपसर्गे इति कः (३।१।१३६)। अवस्थां दशां कामोद्गमदशां। न कथयति। सूचयति।

(5) तस्या हृदयस्थितमेतत् पद्मपत्रं कुचद्वयचिह्नितं सत् यथा तयोर्विशालतां सूचयति शुष्यत् न तथा तस्या मदनसन्तापम्।

(6) ग्लापिताभ्याम्=ग्ला + णिच् + क्तः। ताभ्याम्। ग्लास्नावनुवमाञ्चेति

घटादिगणसूत्रादनुपसर्गात् मित्त्वविकल्पेन पक्षे न ह्रस्वः। अन्यत्र ग्लपिताभ्याम्। णिजन्ते ग्लपयति ग्लापयति। लुङि अजिग्लपत्। अणिजन्ते। ग्लायति। जग्लौ। ग्लास्यति। ग्लायेत्। ग्लेयात् ग्लायात्। अग्लासीत्। ग्लायते। अग्लायि। ग्लायत्। ग्लानम्। ग्लातुम्। ग्लात्वा। परिणाहम् = परि + नह् + घञ्। तम्। णह बन्धने दिवादिः। नह्यति-ते। ननाह नेहे। नद्धा। नत्स्यति नत्स्यते। नह्यतु-ताम्। अनह्यत्-त। नह्येत्-त। नह्यात् नत्सीष्ट। अनात्सीत् अनद्ध। नह्यते। अनाहि। नद्धम्। नह्यत् नह्यमानम्। नद्धुम्। नद्ध्वा।

• ब्रवीति—ब्रू + लट् + तिप्। पक्षे ब्रूते, आह। उवाच ऊचे। वक्ता। वक्ष्यति-ते। ब्रवीतु ब्रूताम्। अब्रवीत् अब्रूत। ब्रूयात्। ब्रुवीत। उच्यात् वक्षीष्ट। अवोचत् अवोचत। अवक्ष्यत्-त। उच्यते। अवाचि। उक्तम्। ब्रुवत् ब्रुवाणम्। उक्त्वा। वक्तुम्। ब्रुवो वचिः इत्यार्धधातुके वचादेशः।

(8) स्थितेन विशालेन पद्मिनीपत्रेण एतेन कथ्यते मन्मथोत्था अवस्था स्तनयुगपरिणाहः उच्यते।

(9) मालिनी वृत्तम्। ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात्। The order is न-न-मयय; the pauses are at the end of eight (भोगिन्) vowel and thence seventh (लोक) vowel in each line.

विदू—(नाट्येन मृणालिकां गृहीत्वा) भो वअस्स, अअं क्खु अवरो ताए ज्जेव्व पीणत्थणक्खलणकिलिस्संतकोमलमुणालहारो। ता पेक्खदु भवं। (क)

(क) भो वयस्य, अयं खल्वपरस्तस्या एव पीनस्तनस्खलनक्लिश्यमानकोमलमृणालहारः। तत् प्रेक्षस्व भवान्।

(1) वि—(मृणालिकাগ্রহণপূর্বক) ওহে বন্ধো, তাহার এই অন্য পীনস্তনচ্যুতি-হেতু ক্লিশ্যমান কোমল মৃণাল হার। দেখ।

(2) J.—(Picking up the lotus root) O friend, this is another vestige,—her garland of lotus roots soft and withering, having fallen from her full-sized bosom. See this.

(3) पीनेति=पीनाभ्यां स्थूलाभ्यां स्तनाभ्यां कुचाभ्यां स्खलनेन पतनेन क्लिश्यमान: मृष्यन् कोमल: मृणालनिर्मित: हार:। क्लिश्यदिति प्रचल पाठस्तु अपाकिनीय:। दिवादेरात्मनेपदित्वात्। क्लिश्यते। चिक्लिशे। क्लेशिष्यते। अक्लेशिष्ट। क्लिष्ट्वा क्लिशित्वा। क्लिष्ट: क्लिशित:। क्लिश विबाधन इति क्रैयादिकस्तु सकर्म्मक:। क्लिश्नाति भुवनत्रयमिति।

राजा—(गृहीत्वोरसि विन्यस्य सोपालम्भम्) अयि जड़प्रकृते,

परिच्युतस्तत्कुचकुम्भमध्यात्
किं शोषमायासि मृणालहार।
न सूक्ष्मतन्तोरपि तावकस्य
तत्रावकाशो भवत: किमु स्यात्॥

(1) রাজা—(গ্রহণ পূর্ব্বক বক্ষে স্থাপন করিয়া তিরস্কারের সহিত) অরে জড়স্বভাব! মৃণালহার—তাহার কুচকুম্ভ হইতে পরিচ্যুত হইয়া শোষ প্রাপ্ত হইতেছ কেন? তথায় তোমার সূক্ষ্ম তন্তুরও স্থান নাই—তোমার স্থান কিরূপে হইবে?

(2) K.—(Placing it on the breast and blaming) O dull garland of lotus root! why are you withering, having fallen from the space between her fullsized breasts? There is no room even for your smallest fibre. How can you be accommodated there?

(3) मृणालहार तत्कुचकुम्भमध्यात् परिच्युत: किं शोषमायासि। तावकस्य सूक्ष्मतन्तोरपि न तत्रावकाश:। भवत: (अवकाश:) किमु स्यात्।

(4) हे मृणालहार बिसहार। तस्याः कुचौ कुम्भाविवेत्युपमितततपुरुषः। तयोर्मध्यात्। तत्स्तनकलसान्तरात्। परिच्युतः पतितः सन् किं कथं शोषं मलिनतामायासि प्राप्नोषि? अत्र दुःखेन तव शोषभावो न सर्वथा आश्रयितव्यः। यतस्तत्र तत्कुचकुम्भमध्ये तावकस्य तदीयस्य सूक्ष्मतन्तोः स्वल्पविस्तारस्य सूत्रस्यापि न अवकाशः स्थानमस्तीति शेषः। भवतः अवकाशः इति शेषः किमु कथं स्यात् भवेत्। अतोऽत्र तव न कश्चित् खेदो युज्यते इति भावः।

(5) अन्योन्यमुत्पीडयतोः कुचयोर्मध्ये भवतः सूक्ष्मसूत्रस्यापि स्थानं न घटते। कुतस्तव स्थानं सम्भविष्यति! अतस्तस्मात् पतनेन सर्वथा त्वया न शोचनीयम्। अनुरूपं वर्णनं यथा कुमारे—"अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम्। मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यमिति।"

(6) परिच्युतः=परि+च्यु+क्तः। च्यवते। चुच्युवे। च्योष्यते। अच्योष्ट। च्यूयते। अच्यावि। च्यवमानः। च्युत्वा। च्योतुम्।

तावकस्य=युष्मद्+अण्। तस्य। तवकममकावेकवचने इति (४।३।३) तवकादेशः। The affixes खञ्, अण् and छ are applicable to युष्मद् and अस्मद् and in singular, तवक and ममक replace them respectively when followed by खञ् or अण्। पक्षे तावकीनः। त्वदीयः।

(7) जडप्रकृते=बोधविवर्जितस्वभाव! अलसः शीतको मन्दो जडो जिह्मश्च मन्थरः इति हलायुधः। पक्षे जलशरीर। सुसीमः शिशिरो जड इत्यमरः। तथाच डलयोरभेद इत्येके। यथा माघे लीलदभुजाकारबृहत्तरङ्गमिति। लुड़ विलोड़ने इति धातोः शतरि लोलत्। कालिदासयमके च "अनयदासमरञ्जु परियहे भुजलतां जड़तामबलाजनः" इति। दण्डिनि च-"त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ। अयन्तु युवयोर्भेदः स जडात्मा पटुर्भवानि"ति।

(8) परिच्युतेन...शोषः...आयायते...अवकाशेन...भूयेत।

(9) इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनेनोपजातिवृत्तम्। स्यादिन्द्रवज्रा यदि तौ जगौ गः

উপেন্দ্রবজ্রা প্রথমে লঘৌ সা। অনন্তরোদীরিতলক্ষ্মভাজৌ পাদৌ যদীয়াবুপজাতয়স্তা ইতি লক্ষণাৎ। 'The order in ইন্দ্রবজ্রা is ততজ গগ and in উপেন্দ্রবজ্রা জ-ত-জ-গ-গ।'

(10) অত্র কুচয়োঃ স্থূলত্বাতিশয়ার্থং তন্নীরবকাশসম্বন্ধেঽপ্যসম্বন্ধকথনাদ অতিশয়োক্তিরলঙ্কৃতিঃ। সিদ্ধত্বেঽধ্যবসায়স্যাতিশয়োক্তির্নিগদ্যতে ইতি লক্ষণাৎ।

(11) অত্র প্রগয়ণং নাম প্রতিমুখসন্ধ্যঙ্গং সমাপ্তম্।

সুস। (আত্মগতম্) হদ্ধী হদ্ধী গুরুঅণুরাঅক্‌খিত্তহি-অও ভট্টা অসম্বদ্ধং ব্বি মন্তিদুং পউত্তো তা অদো অবরং উণ ণ জুত্তং অপেক্‌খিদুং। ভোদু এব্বং দাব। (প্রকাশম্) সহি জস্স কিদে তুমং আঅদা সো অঅং দে পুরদো চিট্ঠদি। (ক)

সাগ। (সাসূয়ম্) কস্স কিদে অহং আঅদা কো বা এত্থ চিট্ঠদি। (খ)

সুস। (বিহস্য) অই অস্সাসঙ্কিদে ণং চিত্তফলকস্স কিদে, তা গেহ্ণ এদং। (গ)

(ক) হা ধিক্ হা ধিক্ গুর্ব্বনুরাগোৎক্ষিপ্তহৃদয়ো ভর্ত্তা অসম্বদ্ধমপি মন্ত্রয়িতুং প্রবৃত্তস্তদতঃ পরং পুনর্ন যুক্তমপেক্ষিতুং, ভবতু এবং তাবৎ। সখি যস্য কৃতে ত্বমাগতা সোঽয়ং তে পুরতঃ তিষ্ঠতি।

(খ) কস্য কৃতে অহমাগতা, কো বাত্র তিষ্ঠতি।

(গ) অয়ি অন্যশঙ্কিতে ননু চিত্রফলকস্য কৃতে, তৎ গৃহাণেদম্।

(১) সু—(স্বগত) হায় ধিক্, হায় ধিক্, তীব্রানুরাগোৎক্ষিপ্তহৃদয় মহারাজ অসম্বদ্ধ বাক্যোচ্চারণে প্রবৃত্ত হইয়াছেন। অতঃপর আর অপেক্ষা করা উচিত নয়। এখন এইরূপ হউক—(প্রকাশে) সখি, যে জন্য তুমি আসিয়াছ তাহা ঐ অগ্রে রহিয়াছে।

সা—(অসূয়ার সহিত) কার জন্য আমি আসিয়াছি? কেই বা এখানে আছে?

সু—(হাস্যপূর্ব্বক) ওলো অন্যশঙ্কিতে! ভাল, চিত্রফলকের জন্য,—অতএব ইহা ধর।

(2) Soo.—(Aside) O fie, being transported with deep love, the king is talking nonsense. It is not proper to wait longer. Let it be.—(To *Sagarika*) Dear, the object you come for is that before you—

Sag.—(With envy) Whom have I come for? and who is there?

Soo.—(Smiling) O misapprehending one!—It is for the picture board.—So take it up.

(3) असम्बद्धम्=अयुक्तम्, unconnected nonsense. मन्त्रयितुम्= वक्तुम्। अत्र नाटकीयं नर्मनाम प्रतिमुखाङ्गम्।

साग। (सरोषम्) अइ अणिउणा क्खु ईदिसाणं आलावाणं, ता अण्णदो गमिस्सं (इति गन्तुमिच्छति)। (क)

सुसं। अइ असहणे इह दाव मुहुत्तअं चिट्ठ, जाव इमादो कअलीघरादो चित्तफलअं गेह्णिअ आअच्छामि। (ख)

साग। सहि एव्वं करेहि। (सुसंगता कदलीगृहाभिमुखं परिक्रामति)। (ग)

विदू। (सुसङ्गतां दृष्ट्वा ससम्भ्रमम्) भो वअस्स पच्छादेहि एदं चित्तफलअं, एसा क्खु देवीए परिचारिआ सुसङ्गदा आअदा। (राजा पटान्तेन फलकमाच्छादयति।) (घ)

सुसं। (उपसृत्य) जअदु जअदु भट्टा। (ङ)

(क) अइ अनिपुणा खलु तवेदृशानामालापानां, तदन्यतो गमिष्यामि।

(ख) अयि असहने इह तावन्मुहूर्तं तिष्ठ, यावदस्मात् कदलीगृहात् चित्रफलकं गृहीत्वा आगच्छामि।

(ग) सखि एवं कुरु।

(ঘ) भो वयस्य प्रच्छादयेदं चित्रफलकं. एषा खलु देव्याः परिचारिका सुसङ्गता आगता।

(ঙ) जयतु जयतु भर्त्ता।

(1) সা—(সরোষে) আমি তোমার ঈদৃশ আলাপের অনভিজ্ঞা। অতএব অন্যত্র যাইতেছি (গমনোদ্যতা)।

সু—ওলো অধীরে, এই কদলীগৃহ হইতে চিত্রফলক আনয়ন পর্য্যন্ত মুহূর্ত্ত অপেক্ষা কর।

সা—বেশ, তাই কর। (সুসঙ্গতার কদলী গৃহে গমন।)

বি—(সুসঙ্গতাকে দেখিয়া সভয়ে) ওহে বয়স্য চিত্রফলক প্রচ্ছাদন কর। মহিষীর পরিচারিকা সুসঙ্গতা উপস্থিত। (রাজার বস্ত্রদ্বারা ফলকের আচ্ছাদন)

সু—(আগমন পূর্ব্বক) মহারাজের জয়।

(2) Sa.—(Angrily) I am unskilful to such talks.—So I am going elsewhere (Going).

Soo.—O impatient one, stop a moment till I come back from this plantain house with the drawing board.

Sa.—Very well, do it. (*Soosangata* goes to the plantain house).

J.—(Seeing *Soosangata* with fright) Friend, conceal the picture board. *Soosangata*, the maid of the queen, is come. (King concealing it.)

Soo.—(Entering) Victory to the king.

(3) अनिपुणा = अनभिज्ञा।

राजा। सुसङ्गते, स्वागतम्। इहोपविश्यताम्। (सुसंगतोपविशति।) सुसंगते, कथमिहस्थोऽहं भवत्या ज्ञातः।

सुसं। (विहस्य।) ण केवलं देवो चित्तफलएण सह सव्वोवि वुत्तन्तो मए विसादो। ता देवीए गदुअ णिवेदइस्सं। (इति गन्तुमिच्छति।) (क)

विदू। (अपवार्य सभयम्) भो वअस्स, सव्वं संभावीअदि। मुहरा क्खु एसा गब्भदासी। तां परितोसेहि णं। (ख)

राजा। युक्तमुक्तं भवता। (सुसंगतां हस्ते गृहीत्वा) सुसंगते क्रीडामात्रमेतत्। अकारणे त्वया. देवी न व्यथयितव्या। इदं ते पारितोषिकम्। (इत्युक्त्वार्याभरणं दातुमिच्छति।)

(क) न केवलं देव'। चित्रफलकेण सह सर्वोऽपि वृत्तान्तो मया विज्ञात:। तस्माद्देव्यै गत्वा निवेदयिष्यामि।

(ख) भो वयस्य. सर्वं संभाव्यते। मुखरा खल्वेषा गर्भदासी। तत् परितोषयैनाम्।

(1) রা—সুসঙ্গতে, তোমার শুভাগমন, বস। (সুসঙ্গতার উপবেশন) আমি এখানে কিরূপে জানিলে?

সু—(হাস্যপূর্ব্বক) কেবল আপনি নহেন, চিত্রফলক সহ সকল বৃত্তান্তই জানিয়াছি। এখন যাইয়া রাজ্ঞীকে সকল বলি। (গমনোদ্যতা)

বি—(জনান্তিকে, সভয়ে) ওহে বন্ধো, সব সম্ভব, এই গর্ভদাসী মুখরা। উহাকে পরিতুষ্ট কর।

রা—বেশ বলেছ। (সুসঙ্গতার হস্তে ধরিয়া) সুসঙ্গতে, ইহা ক্রীড়া মাত্র। অকারণে মহিষীকে কষ্ট দিও না। এই তোমার পুরস্কার (অলঙ্কার প্রদানের ইচ্ছা)।

(2) K.—Welcome *Susangata*, sit down here (She sits). How could you know, *Soosangata*, that I was here !

Soo.—(Laughing) Not only Your Majesty, Sire, but all affairs with the picture board are known to me. So I now go and inform the queen (Going).

J.—(With fright to the king) This is possible, friend. This woman, a slave from her conception, is a scolding shrew. So conciliate her.

K.—Well advised. (Holding her in hand) *Soosangata*, this is only in joke. Do not uselessly torment the queen. This is your reward (Offers ornaments).

(3) स्वागतम्=अभिमतमागतम्। गर्भदासी=गर्भावस्थायाः प्रभृति दासी। =Slave even from the womb.

सुसं। भट्टा, अलं एदिणा कण्णाभरणेण। णं मए एव्वं विहेण भट्टिणीए प्पसादेण बहुदरं ज्जेव्व कीलिदं। एसो एव्व मे गुरुओ पसाओ। जं कीस तुए एत्थ चित्तफलए अहं आलिहि-दे त्ति कुविदा मे पिअसही साअरिआ चिट्ठदि। ता गदुअ इत्थे गेह्णिअ पसादीअदु णं। (क)

राजा। (ससंभ्रममुत्थाय) क्वासौ दर्शय दर्शय।

सुसं। एसा कअलीगुम्मान्तरिदा चिट्ठदि। (ख)

राजा। (सहर्षम्) आदेशय मार्गम्।

सुसं। इदो इदो भट्टा। (ग)

(सर्व्वे कदलीगृहान्निष्क्रान्ताः)

(क) भर्त्तरलमेतेन कर्णाभरणेन। ननु मया एवं विधेन भर्त्त्र्याः प्रसादेन बहुतरमेव क्रीड़ितम्। एष एव मे गुरुः प्रसादो यत् कस्मात्त्वया अत्र चित्रफलके अहमालिखितेति कुपिता मे प्रियसखी सागरिका तिष्ठति, तद्गत्वा हस्ते गृहीत्वा प्रसादयत्वेनाम्।

(ख) एषा कदलीगुल्मान्तरिता तिष्ठति।

(ग) इत इतो भर्त्ता।

(1) সু—মহারাজ, কর্ণাভরণের প্রয়োজন নাই। রাজ্ঞীর অনুগ্রহে এরূপ বস্তু দ্বারা আমি অনেক খেলিয়াছি। আমার প্রিয়সখী সাগরিকা আমাকর্তৃক এই চিত্রফলকে আলিখিতা হইয়া কুপিতা আছেন। যদি আগমনপূর্ব্বক তাহাকে হাতে ধরিয়া প্রসাদিত করেন, তবেই আমার প্রতি মহান্ অনুগ্রহ হয়।

রা—(সবেগে উঠিয়া) কোথায় সে? দেখাও,—দেখাও।

সু—এই কদলীগুল্মাচ্ছাদিতা।

রা—(সহর্ষে) রাস্তা কোথায়?

সু—এই দিকে, মহারাজ (সকলের গৃহ হইতে গমন)।

(2) Soo.—No need of this ear-ring, your majesty. I have played much with such trinkets, through the queen's favour. It will be a great boon to me if you go, Sire, and propitiate my friend *Sagarika*, shaking hands with her, who has been angry as to why she was portrayed by me in this board.

K.—(Rising hastily) Where is she? Show me, show me.

Soo.—Concealed here by this plantain cluster.

K.—(Joyfully) Shew me the way.

Soo.—By this side, your Majesty. (They all quit the plantain house).

साग। (राजानं दृष्ट्वा सहर्षं ससाध्वसं सकम्पञ्च स्वगतम्) एणं पेक्खिश्च अदिसञ्चसेण ण सक्कणोमि पदादो पदं वि गन्तुं, ता किं वा एत्थ करिस्सं। (क)

विदू। भो गेह्लामि एदं चित्तफलश्चं, कदावि इमिणा पुणो वि कज्जं होदि। (सागरिकां दृष्ट्वा) ही ही भो अच्चरीश्चं अच्चरीश्चं, ईदिसं कण्णारश्चणं माणुसलोए ण दीसदि, ता तक्केमि पश्चावइणोवि एदं णिम्माइश्च विह्मश्चो समुप्पण्णो। (ख)

(क) एवं प्रेक्ष्यातिसाध्वसेन न शक्नोमि पदात् पदमपि गन्तुम्। तत किं दाव करिष्यामि।

(ख) भो गृह्णामि इदं चित्रफलकं कदापि अनेन पुनरपि कार्यं भवति। ही ही भोः, आश्चर्यमाश्चर्यम्। ईदृशं कन्यारत्नं मनुष्यलोके न दृश्यते। तत्तर्कयामि प्रजापतेरप्येतत् निर्माय विस्मयः समुत्पन्नः।

(১) সা—(রাজাকে দেখিয়া সহর্ষ, সভয় ও সকম্পে) ইঁহার দর্শনে ভয়ে এক পদ হইতে অন্য পদও চলিতে পারিতেছি না। এখন এখানে কি করি?

বি—ওহে, এই চিত্রফলক আমার কাছে থাকুক, হয়ত আবারও ইহার প্রয়োজন হইতে পারে। (সাগরিকাকে দেখিয়া) হী হী! ভো ভো! আশ্চর্য, আশ্চর্য! ঈদৃশ কন্যারত্ন মানুষ লোকে দেখা যায় না। বোধ হয় ইহাকে নির্ম্মাণ করিয়া প্রজাপতিরও বিস্ময় ঘটিয়াছিল।

(2) Sa.—(Seeing the king, with joy, fear and trembling, aside) Seeing him, I am unable to move even one step. What shall I now do here?

J.—Well, I keep this picture board It may perchance again be needed. (Seeing *Sagarika*) O strange! strange! Such a gem of a girl is not met with in this earth. The creator himself, I think, was astonished after making her.

(3) मनुष्यलोके=मनुशब्दात् यत् षुगागमश्च। मनोर्जातावञ्यतौ षुक् चेति (४।१।१६१) यत् षुक् च। पक्षे मानुषः। When जाति is indicated and not अपत्य, अञ् वा यत् is added to the word मनु and षुक् is an आगम to the base also. अपत्येतु अणेव। मानवः। पक्षे माणवः माणवकः।

"अपत्ये कुत्सिते मूढ़े मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्धन्य स्तेन सिध्यति माणवः॥" इति वार्त्तिकम्।

अनधीतवेदत्वाद् मूढत्वम्। विहिताकरणात् प्रतिषिद्धसेवनाच्च कुत्सितत्वमिति हरदत्तः। When अपत्य is meant, the उत्सर्ग प्रत्यय (*i. e.* main affix *i. e.*) अण् should be applied and मानव is obtained. Again in the sense of one who is not yet purified with the sacred thread (उपवीत), the नकार becomes मूर्धन्य। कदापि भवति =कदापि भविष्यति। विभाषा कदाकर्ह्योरिति (३।३।५) वा भविष्यति लट्।

राजा। वयस्य ममाप्येवं मनसि वर्त्तते।
दृशः पृथुतरीकृता जितनिजातपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखैः समं व्याहृतम्।
शिरांसि चलितानि विस्मयवशाद् ध्रुवं वेधसा
विधाय ललनां जगज्जनललामभूतामिमाम्॥

(1) রা—বয়স্য, আমার মনেও তাই,—জগজ্জনললামভূতা এই রমণীকে সৃষ্টি করিয়া বিধাতা বিস্ময়ে নিশ্চিত স্বচ্ছত্রনিন্দিতকান্তিনয়নসমূহের বিস্তার এবং এককালে চারি মুখেই সাধুবাদ সহ মস্তকগুলিকে কম্পিত করিয়াছিলেন।

(2) K.—Friend, I too think so.—Having created this lady an ornament to the world, the astonished maker surely widened his eyes which surpass the beauty of the cover of his own heads and uttering "excellent! excellent!" with his four mouths, nodded his heads.

(3) जगज्जनललामभूतामिमां ललनां विधाय वेधसा ध्रुवं विस्मयवशाद् जितनिजातपत्रत्विषः दृशः पृथुतरीकृताः। चतुर्भिरपि मुखैः समं साधु साध्विति व्याहृतम्। शिरांसि चलितानि।

(4) जगती विश्वस्य जनानां ललामभूतामलङ्कारतुल्यां भुवनजनभूषणस्वरूपामिमां ललनामङ्गनां विधाय सृष्ट्वा वेधसा धात्रा विस्मयवशात् चमत्कृतिहेतोः ध्रुवं निश्चितं जिता पराभूता निजस्य स्वस्य आतपत्रस्य छत्रस्य त्विट् शोभा याभिस्ताः

पराभूतात्मच्छन्नशोभा:। इमश्चचूंषि पृथुतरीकृता विशालतरीकृता: सम्यगृदर्शनार्थमित्यर्थ:। तथा चतुर्भिर्मुखै: समं युगपत् साधु साधु सम्यक् सम्यग् इति व्याहृत मुच्चारितं शिरांसि च चलितानि कम्पितानि।

(5) ईदृशीं भुवनजनमनोहरां कामिनीं निर्म्माय स्रष्टा नूनं निन्दितस्वच्छलकान्तीनि नयनानि अधिकतरमायतानि चकार। युगपच्चतुर्भिराननै: साधु साध्वित्युवाद। शिरांसि च कम्पयामास।

(6) पृथुतरीकृता:—अतिशयेन पृथव: पृथुतरा: (पृथु + तरप्) वोतोगुणवचनादिति पचे ङीषभाव:। अपृथुतरा: पृथुतरा: सम्पद्यमाना: कृता पृथुतरीकृता:। अभूततद्भावे च्वि:।

चलितानि—चल् + णिच् + क्त:। तानि। Under the गणसूत्र in घटादि, "कम्पने चलि:" the root चल is मित् in the sense of कम्पन. Hence no उपधा वृद्धि। Cf :—चितिं सशैलां चलयन्निवेषुभिरिति भारवि: (१४।५०)।

ललामभूताम् = कथमत्र न च्विप्रत्यय:। को वा समास:? ललामवत् ललामास्त्रि प्रङ्गे चिह्नपताकयो:। रम्ये प्रधाने भूषायां पुण्ड्रे पुच्छप्रभावयोरिति हेमचन्द्र:। ललाम पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुष्वित्यमरश्च। श्रेण्यादय: कृतादिभिरिति (२।१।५९) तत्पुरुष इति केचित्। तुल्यार्थकभूतशब्देन सुप्सुपेत्यस्वपदविग्रहे नित्यसमास इत्यपरे। वस्तुतस्तु "प्रमाणभूत आचार्य्य: पवित्रदर्भपाणि"रिति भाष्यकारप्रयोगप्रामाण्यादेवाचूान्तेन सुप्सुपेति समास:। cf :—वितानभूतं विततं पृथिव्यामिति भारवि:। भाव्यभूता भवन्तु मे इति माघ:। आश्रमललामभूतेति कालिदास:। पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगदिति भर्तृहरि:।

(7) ललना = लल् + णिच + ल्यु: + टाप्। प्रमदा भामिनी कान्ता ललना च नितम्बिनीत्यमर:।

(8) पृथुतरीकृतवान्...व्याहृतवान्...चलितवान्...वेधा:।

(9) पृथ्वी वृत्तम्—जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुरिति लक्षणात्। The order is ज-स-ज-स-य-ल-ग and the pause is at the end of

eighth (वसु) vowel and thence at the end of the ninth (ग्रह) vowel.

(10) अतिशयोक्तिरलङ्कृतिः। वेधसो हृगादीनां पृथुतरीकरणादिमूलकासम्बन्धेऽपि तत्सम्बन्धाभिधानात्। सा च दीपकानुप्राणिता।

(12) निजाब्जपत्रत्विष इति वा पाठः। तत्राब्जस्य पद्मस्य आसनभूतस्य पत्रस्य दलस्य त्विड्त्विषर्थः। अयमेव पाठः साधीयान्। ब्रह्मण आतपत्रस्य त्विषोऽप्रसिद्धेः। जगत्त्रयललामभूतामिति च पाठान्तरम्।

साग—(सासूयं सुसंगतामालोक्य) सहि, ईदिसो चित्तफलओ तुए आणीदो। (इति गन्तुमिच्छति) (क)

(क) सखि, ईदृशश्चित्रफलकस्त्वयानीतः।

(1) সা—(অসূয়ার সহিত সুসঙ্গতাকে দেখিয়া) সখি, তুমি বেশ চিত্রফলক এনেছ (গমনোদ্যতা)।

(2) S.—(Glancing at *Susangata* with envy) Friend, a very fine picture board you have brought! (Going).

राजा। दृष्टिं कृषा क्षिपसि भामिनि यद्यपीमां
स्निग्धेयमेष्यति तथापि न रूक्षभावम्।
त्यक्त्वा त्वरां व्रज पदैः स्खलितैरयन्ते
खेदं गमिष्यति गुरुर्नितरां नितम्बः॥

(1) রাজা—কোপনে, তোমার এই ক্রোধযুক্ত দৃষ্টিক্ষেপ কাঠিন্যশূন্য হইয়া কোমল হইতেছে। ত্বরার সহিত গমন করিও না। তোমার গুরু নিতম্ব পাদস্খলনদ্বারা খিন্ন হইবে।

(2) K.—O Passionate lady, your amorous glances though wrathfully cast, are not rough. Go and avoid haste, otherwise your heavy buttocks will exceedingly suffer by stumblings.

(3) भामिनि यद्यपि रुषा इमां दृष्टिं क्षिपसि तथापि स्निग्धा इयं न रूक्षभाव मेष्यति। त्वरां त्यक्त्वा व्रज०। अयं ते गुरुर्नितम्बः स्खलितैः पदैर्नितरां खेदं गमिष्यति।

(4) हे भामिनि कोपने यद्यपि रुषा कोपेन इमां दृष्टिं दर्शनं क्षिपसि प्रेरयसि तथापि स्निग्धा कोमला इयं रूक्षभावं कठिनतां न एष्यति न लप्स्यते। त्वरां द्रुतत्वं त्यक्त्वा विहाय व्रज गच्छ। अयं ते तव गुरुर्दुर्भरः। गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भर इति विश्वः। नितम्बः कटिपश्चाद्भागः स्खलितैः प्रभ्रष्टैः पदैः चरणविक्षेपैः नितरामत्यन्तं खेदं दुःखं गमिष्यति प्राप्स्यति।

(5) कोपने तव दृष्टिः कोपाक्तापि रूक्षभावरहिता स्निग्धा। शनैर्याहि। अन्यथा दुर्वहस्ते नितम्बः पदस्खलनैः क्लिम्स्यते।

(6) क्षिपसि=क्षिप् + लट् सिप्। क्षिप प्रेरणे तुदादिः। अक्षैप्सीत अक्षिप्त। अक्षेपि। क्षिप्तः। क्षेप्तुम्। क्षिप्त्वा।

स्निग्धा=स्निह + क्तः + टाप्। स्निह्यति। सिष्णेह। स्नेग्धा स्नेढा स्नेहिता। रधादित्वादिट्। स्नेहिष्यति स्नेक्ष्यति। स्निह्यतु। अस्निह्यत्। स्निह्येत्। स्निह्यात्। अस्निहत्। अस्नेहिष्यत् अस्नेक्ष्यत्। स्नीढम् स्निग्धम्। स्निह्यत्। स्नेहितुम् स्नेग्धुम् स्नेढुम्। स्निहित्वा स्नेहित्वा स्निग्ध्वा। अस्नेहि।

(7) कोपना सैव भामिनीत्यमरः। भामः क्रोधः। सोऽस्यास्तीति। भाम + इनिः + ङीप्। भामते। अभामिष्ट। बभामे।

(8) दृष्टिः क्षिप्यते...इयं स्निग्धया...अनया...एष्यते...न रूक्षभावः। व्रज्यताम्। गंस्यते अनेन...खेदः...गुरुणा...नितम्बेन।

(9) वसन्ततिलकं वृत्तम्।

(10) अत्र विशेषोक्तिरलङ्कारः। सति हेतौ फलाभावो विशेषोक्तिरिति लक्षणात्। स च काव्यलिङ्गानुप्राणितः।

सुसं। भट्टा, अदिकोपणा क्खु एसा। ता अग्गहत्थे गेह्निअ पसादेहि णं। (क)

राजा। (सानन्दम्) यथाह भवती। (सागरिकां हस्ते गृहीत्वा स्पर्शसुखं नाटयति।)

विदु। भो, एसा क्खु तुए अपुव्वा सिरी समासादिदा। (ख)

(क) भर्त्त:, अतिकोपना खल्वेषा। तदग्रहस्ते गृहीत्वा प्रसादयैनाम्।

(ख) भो, एषा खलु त्वयापूर्वा श्री: समासादिता।

(1) सु—মহারাজ, এ অতি কোপনা। হস্তের অগ্রভাগে গ্রহণ পূর্ব্বক প্রসাদিত করুন।

রা—(সহসে) বেশ বলেছ (সাগরিকার হস্তগ্রহণ ও সুখবোধ)।

বি—ওহে, তুমি অপূর্ব্ব শ্রীলাভ করিয়াছ।

(2) Soo.—Your Majesty, she is very wrathful; conciliate her by taking the forepart of her hand

K.—(Joyfully) Rightly advised. (Holds *Sagarika* in hand and feels pleasure.)

J.—Friend, you have gained a wonderful beauty.

(3) अतिकोपना = अत्यन्तक्रुद्धस्वभावा। चण्डस्त्वत्यन्तकोपन इत्यमर:।

राजा। वयस्य, सत्यम्।

श्रीरेषा पाणिरप्यस्या: पारिजातस्य पल्लव:।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रव:॥

(1) রাজা—বন্ধো, যথার্থ ইনি লক্ষ্মী। ইহার হস্ত পারিজাতপল্লব। নচেৎ কোথা হইতে ঘর্ম্মচ্ছলে এই অমৃতরস ক্ষরিত হইবে?

(2) K.—Friend, it is true. She is the goddess of wealth. Her hand is the new leaf of the heavenly tree. Otherwise whence could issue the liquid nectar in the disguise of perspiration?

(3) एषा श्रीः। अस्याः पाणिरपि परिजातस्य पल्लवः। अन्यथा कुत एष स्वेदच्छद्मना अमृतद्रवः स्रवति।

(4) एषा सागरिका श्रीः लक्ष्मीः। अस्याः पाणिः हस्तोऽपि पारिजातस्य स्वर्गतरुविशेषस्य पल्लवः किसलयम्। अन्यथा नचेत् कुतः कस्मादेषः स्वेदो घर्म्मच्छद्म अपदेशो यस्य सः घर्मापदेशोत्पन्नः अमृतद्रवः सुधारसः स्रवति स्यन्दते। श्री-परिजातयोः समुद्रमन्थनेनोत्पत्तेः साहचर्य्यादमृताविर्भावः कल्पितः। नायकस्पर्शे स्वेदसुत्या नायिकायाः सात्त्विकभावोदयइत्यर्थः।

(5) समुद्रादेव रमामृत--पारिजातानामुद्भवादवैकस्यां सागरिकायामेव श्रीत्वं पारिजातपल्लवत्वं स्वेदव्याजेनामृतरसच्युतिश्चानमीयते।

(6) श्रीः—श्रि + क्विप्। श्रयति हरिमिति। क्विब् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्चेति वक्तव्यम्। (३।२।१७८)। अशिश्रियत् अशिश्रियत। अश्रायि।

स्रवति=स्रु + लट् तिप्। सुस्राव। स्रोष्यति। असुस्रुवत्। स्रुतः। स्रोतुम्। स्रुत्वा। स्रवत्। अस्रावि।

(7) कपटोऽस्त्रीव्याज-दम्भोपधय श्छद्म-कैतवे इत्यमरः। वाद्यभेदे स्वरूपेच च द्रवो विद्रवनर्मणोः। प्रदावे रसगत्योश्चेति हेमचन्द्रः।

(8) श्रिया एतया...पाणिना....पल्लवेन...स्रूयते....एतेन....स्वेदच्छद्मनामृत-द्रवेण...।

(9) अनुष्टुप्।

(10) रूपकालङ्कारः। उपमैव तिरोभूतभेदा रूपकमुच्यत इति काव्यादर्शे। स्वेदच्छद्मामृतद्रव इत्यत्रापह्नुतिश्च। प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिरिति-साहित्यदर्पणे।

(11) अत्र सविशेषानुरागोद्घाटनात् पुष्पं नाम नाटकीयं प्रतिमुखाङ्गम्। पुष्पं वाक्यं विशेषवदिति दशरूपके।

सुसं। सहि, अदक्खिणासि तुमं दाणिं। जा एव्वं भट्टिणा हत्थेण गहिदावि कोवं ण मुञ्चेसि। (क)

साग। (सभ्रूभङ्गम्) सुसंगदे, अज्जवि ण विरमेसि। (ख)

राजा। प्रिये सागरिके, अयि न खलु सखीजने युक्तएवं कोपानुबन्धः कर्त्तुम्।

विदू। भोदि, बुभुक्खिदो ब्बह्मणो विअ किं कुप्पसि। (ग)

सुसं। सहि, तुए सह ण वोलइस्सं। (घ)

राजा। अयि कोपने नैतद्युक्तं समानप्रतिपत्तिषु सखीषु।

(क) सखि, अदक्षिणासि त्वमिदानीम्। येवं भर्त्रा हस्तेन गृहीतापि कोपं न मुञ्चसि।

(ख) सुसंगते, अद्यापि न विरमसि।

(ग) भवति, बुभुक्षितो ब्राह्मण इव किं कुप्यसि।

(घ) सखि, त्वया सह न वक्ष्यामि।

(1) सु—সখি, ভর্ত্তাকর্ত্তৃক হস্তে গৃহীত হইয়াও কোপ ত্যাগ না করাতে তুমি অসরলা হইতেছ।

সা—(ভ্রূভঙ্গে) সুসঙ্গতে, এখনও বিরতা হইতেছ না?

রা—প্রিয়ে সাগরিকে, সখীজনের প্রতি কোপরক্ষা উচিত নহে।

বি—মাননীয়ে, ক্ষুধিত ব্রাহ্মণের ন্যায় ক্রোধ করিতেছেন কেন?

সু—সখি, তোমার সহিত কথা বলিব না।

রা—অয়ি কোপনে তুল্যগৌরবা সখী জনে এরূপ ব্যবহার উচিত নহে।

(2) Soo.—Dear, though held in hand by the king, you are angry. So you are insincere now.

Sa.—(Frowning) *Susangata*, still you do not cease!

K.—Dear *Sagarika*, well, it is not fit to continue angry with your companion.

J.—O respected one, why are you angry like a hungry Brahmin?

Soo.—Dear, I shall not speak with you.

K.—O wrathful one, it is not proper to a companion who is of equal position.

(3) अदक्षिणा=असरला। दक्षिणे सरलोदारावित्यमरः। बुभुक्षितः=क्षुधितः। भुज्+सन्+अ+टाप्=बुभुक्षा। बुभुक्षा+इतच्=बुभुक्षितः। तदस्य सञ्जातं तारकादिभ्य इतजितीतच्। तारकादेराकृतिगणत्वात्। वक्ष्यामि=भाषिष्ये। समानप्रतिपत्तिषु=तुल्यगौरवासु। समाना प्रतिपत्तिर्यासां तास्तथोक्ताः। तासु। प्रतिपत्तिस्तु गौरवे। प्राप्तौ प्रवृत्तौ प्रागल्भ्ये बोधे इति हेमचन्द्रः।= Honour or intelligence, understanding. प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेऽपि च। सम्प्राप्तौ च प्रबोधे च पदप्राप्तौ च योषितीति मेदिनी। विरमसि=निवर्त्तसे। व्याङ्परिभ्यो रम इति परस्मैपदम्।

कोपानुबन्धः = प्रवृत्तक्रोधानुवर्त्तनम् = संजातरोषरक्षणम्। अनुबन्धः शिशौ दोषोत्पादे मुख्यानुयायिनि। विनश्वरे प्रकृत्यादौ प्रवृत्तस्यानुवर्त्तने इति मेदिनी। =continuation. "युक्तः एवं कोपानुबन्धः कर्त्तुम्"=कोपानुबन्धः इत्यत्र कथं न द्वितीया? प्रधानशक्त्यभिधाने वा गुणशक्तिरभिहितवत् प्रकाशत इति काशिका (२।४।२६)। तद्व्याख्याने हरदत्तः "आख्यातपदवाच्या क्रिया विशेष्यत्वात् प्रधानम्। विशेषणभूता त्वप्रधानम्। तद्द्वारेण तद्विषययोः शक्त्योरपि गुणप्रधानभावः। तत्र प्रधानानुवर्त्तित्वाद् गुणानां तत्र स्वप्रेक्षित्वात् तद्विरुद्धस्वकार्य्यारम्भाभावात् यथायथं विभक्तिसिद्धिरिति (पदमञ्जरी)। i. e. the predicate expressed by आख्यात (तिङन्त) is principal and the others are गुण (i. e. indirect) subordinate. Hence the meaning expressed respectively by तिङन्त and others, possess प्रधानभाव and गुणभाव। So as the गुणक्रियाs (e. g. क्त्वा, तुमुन् &c.) follow the principal, being under them, they cannot independently raise any meaning through them, against the meaning indicated by

the principal क्रिया and therefore the principal क्रिया regulates or determines the विभक्ति। Here युक्तः (भवति) is the main आख्यातक्रिया and कर्त्तुम् is subordinate to it. So भवति decides the विभक्ति (प्रातिपदिकार्थे प्रथमा) in कोपानुबन्ध and not its subordinate कर्त्तुम्। The use of वा in the dictum of the वृत्तिकार leads also to क्वचित् गुणक्रिया प्राधान्यम्। And therefore says कैयट on that statement of the महाभाष्य, "शक्य' श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्"—"शकेः कर्मसामान्ये लिङ्गसर्वनाम नपुंसकयुक्ते कृत्यप्रत्ययः। यदात् पूर्वमेव विशेषविवक्षा तदा शक्या क्षुदिति भवत्येव। यदा तु प्रतिघातस्यैव तत्कर्म शकेस्तु प्रतिघातस्तदा क्षुधं प्रतिहन्तु' शक्यमिति भवति।" (भर्त्तृ) हरि too is of the same opinion :—

"प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते॥" (इति वाक्यपदीयम्।)

Cf:—"वक्तुं नास्ते जन इति न भोः कर्त्तुमेवं युनक्ति—", उद्धवदूतम्। In opposition to such authorities, नागेश's unwillingness to consent to the view taken by कैयट is nothing. (Vide भाष्यप्रदीपोद्द्योत of नागेश, 1.1.1. आह्निक।)

विदू। भोः, एसा क्खु अवरा देवी वासवदत्ता। (क)

(राजा सचकितं सागरिकाया हस्तं मुञ्चति।)

साग। (ससंभ्रमम्) सुसंगदे, किं दाणिं एत्थ करिस्सं। (ख)

सुसं। सहि, एदाए कदलीवीथिआए णिक्कमम्ह। (ग)

(इति निष्क्रान्ते।)

राजा। (पार्श्वतोऽवलोक्य सविस्मयम्) क्वासौ देवी वासवदत्ता।

विदू। भोः, ण जाणामि क्क सा। मए एसा क्खु अवरा देवी वासवदत्ता अदिदीहरोसदाएत्ति भणिदं। (घ)

(क) भोः, एषा खल्वपरा देवी वासवदत्ता।

(ख) सुसंगते, किमिदानीमत्र करिष्यामि।

(ग) सखि, एतया कदलीवीथिकया निष्क्रामावः।

(घ) भो न जानामि क्व सा, मया एषा खलु अपरा देवी वासवदत्ता अतिदीर्घरोषणतया इति भणितम्।

(1) বি—ওহে, এই অন্যা মহিষী বাসবদত্তা (রাজাকর্ত্তৃক সভয়ে সাগরিকার হস্তত্যাগ)।

সা—(সভয়ে) সুসঙ্গতে, এখন কি করিব?

সু—সখি, এই কদলীশ্রেণীর মধ্য দিয়া নিষ্ক্রান্ত হইব। (গমন)

রা—(পার্শ্বে অবলোকন পূর্ব্বক সবিস্ময়ে) কোথায় রাজ্ঞী বাসবদত্তা?

বি—ওহে, আমি জানি না কোথায়! অত্যন্ত কোপনা দেখিয়া আমি ইহাকেই অপরা মহিষী বাসবদত্তা বলিয়াছি।

(2) J.—O here is another queen, *Basabadutta!* (King lets go *Sagarika's* hand with fright.)

Sa.—(With terror) *Susangata*, what is to be done now?

Soo.—Dear, let us pass through these plantain rows. (Exeunt)

K.—(Looking at his side and with surprise) Where is the queen *Basabadatta?*

J.—Well, I don't know where! I called her another queen *Basabadatta*, as she was extremely testy.

(3) अतिदीर्घरोषणतया=अतिकोपनत्वेन। इत्थंभूतेति तृतीया।

कदलीवीथ्या=कदलीश्रेण्या। वीथी=a row or range वीथ्यालिरावलिः पङ्क्तिः श्रेणीलेखास्तु राजय इत्यमरः। वीथिकेति संस्कृते भल्ले, स्वार्थे, संज्ञायां वा कन्।

राजा। धिङ् मूर्ख,

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा।

रत्नावलीव कान्ता मम हस्ताद्भ्रंशिता भवता॥

(1) व्या—धिक् मূর্খ, ভাগ্যবশতঃ কষ্টলব্ধ, সমুদিতরাগা রত্নাবলীর ন্যায় সেই প্রিয়া কণ্ঠে গৃহীতা না হইতেই তোমাকর্ত্তৃক আমার হস্ত হইতে ভ্রংশিতা হইল।

(2) K.—Fie, fool, my beloved with expressed love, got by luck, under difficulty, was made to slip away by you, before she was embraced, just like a pearl necklace with distinct colour, before it was placed on the neck.

(3) दैवात् कथमपि प्राप्ता प्रकटरागा रत्नावलीव सा कान्ता कण्ठमनीतैव भवता मम हस्तात् भ्रंशिता।

(4) दैवात् भाग्यात् कथमपि कृच्छ्रेण प्राप्ता लब्धा प्रकटः प्रकाशितः रागोऽनुरागः लौहित्यञ्च यस्याः सा तथोक्ता। रागः स्यात्लोहितादिषु। गान्धारादौ क्लेशादिकेऽनुरागे मत्सरे नृपे इति हेमचन्द्रः। रत्नावली रत्नराजीव। आली श्रेण्यावली पङ्क्तिः वीथी राजी च कथ्यत इति हलायुधः। सा कान्ता प्रमदा। प्रमदा भामिनी कान्ता ललना च नितम्बिनीत्यमरः। कण्ठं गलदेशमनीता अप्रापिता पक्षे अधृता। अनालिङ्गितेत्यर्थः। एव भवता त्वया मम हस्तात् करात् भ्रंशिता च्याविता।

(5) कण्ठसंयोगात् पूर्वं हस्तभ्रंशिता रत्नावलीव सा ललना आश्लेषात् पूर्वमेव मत्तो विद्राविता त्वया।

(8) प्राप्ताम्...अनीताम्...ताम् प्रकटरागां रत्नावलीमिव कान्तां भ्रंशितवान् भवान्।

(7) आर्या।

(10) उपमा।

(11) अत्र निरोधो नाम नाटकीयं प्रतिमुखाङ्गम्।

ततः प्रविशति वासवदत्ता काञ्चनमाला च।

वास। हञ्जे काञ्चनमाले अध केत्तिअदूरे दाणिं अज्ज उत्तेण परिग्गहिदा णोमालिआ। (क)

काञ्च। एदं कअलीघरं अदिक्कमिअ दीसहि। (ख)

वास। ता आदिसेहि मग्गं। (ग)

काञ्च। एदु एदु भट्टिणी (इति परिक्रामतः)। (घ)

राजा। वयस्य क्वेदानीं प्रियतमा द्रष्टव्या।

काञ्च। भट्टिणि जह समीवे भट्टा मन्तेदि तह तक्केमि भट्टिणीं एव्व पड़िपालयन्तो चिट्ठदि, ता उपसप्पदु भट्टिणी। (ङ)

वास। (उपसृत्य) जअदु जअदु अज्जउत्तो! (च)

(क) हञ्जे काञ्चनमाले, अथ कियद्दूरं इदानीं मार्यपुत्रेण परिगृहीता नवमालिका।

(ख) एतत् कदलीगृहमतिक्रम्य दृश्यते।

(ग) तदादिशय मार्गम्।

(घ) तदेत्वेतु भर्त्री।

(ङ) भर्त्रि, यथा समीपे भर्त्ता मन्त्रयते तथा तर्कयामि भर्त्रीमेव प्रतिपालयंस्तिष्ठति। तदुपसर्पतु भर्त्री।

(च) जयतु जयत्वार्यपुत्रः।

(বাসবদত্তা ও কাঞ্চনমালার প্রবেশ)

(১) বা—ওলো কাঞ্চনমালে, আর্য্যপুত্র পরিগৃহীত নবমালিকা কত দূরে?

কা—এই কদলীগৃহ অতিক্রম করিলে দেখা যায়।

বা—পথ দেখাও।

কা—রাজ্ঞি আসুন (পরিক্রমণ)।

রা—বয়স্য, কোথায়, এখন প্রিয়তমাকে দেখিতে পাইব ?

কা—রাজ্ঞি, নিকটে মহারাজের কথা শুনা যাইতেছে। বোধ হয় আপনার জন্যই অপেক্ষা করিতেছেন। অতএব আসুন।

বা—(নিকটে আগমন) আর্য্যপুত্রের জয় হউক।

(2) Queen—Well *Kanchanma'la'*, how far is the *Nyktanthes* adopted by my husband ?

Maid—It is seen after passing this plantain house.

Q.—Show me the way.

M.—Please, come, madam (Walking).

King—Friend, where can now my beloved be seen ?

M.—Mistress, the king talks near. I think he is awaiting you. So go to him.

Q.—(Coming) Prosperity to my husband.

(3) प्रतिपालयन्=प्रतीक्षमाणः। प्रति + पा + णिच् + शतृ। पातेर्णौ लुग्वक्तव्यइति लकारः।

राजा—(अपवार्य)। वयस्य, प्रच्छादय चित्रफलकम्।

(विदूषको गृहीत्वा कक्षे निक्षिपति)

वास—अज्जउत्त, कुसुमिदा णोमालिया। (क)

राजा—(सविस्मयम्)। देवि, प्रथमसमागतैरस्माभिस्त्वं चिरयसीति कृत्वा न दृष्टा। तदेहि। समेतावेव तां पश्यावः।

वास—(निर्वर्ण्य)। अज्जउत्तमुहराअरागादो एव्व जानिदं जहा कुसुमिदा णोमालिआत्ति। ता ण गमिस्सं। (ख)

विदू—भोदि जए एव्वं ता जिदं अह्मेहिं। (इति बाहू प्रसार्य नृत्यति। कक्षात् पतितं फलकं दृष्ट्वा विषादं नाटयति। राजापवार्याङ्गुल्या दर्शयन्वसन्तकमुखं पश्यति।

अपवार्य।) भो भोः, मा कुप्प। एत्थ जाणिस्सं उत्तरं दादुं। (ग)

कांच—(फलकं गृहीत्वा।) भट्टिणि, पेक्ख दाव किं एत्थ चित्तफलए आलिहिदं। (घ)

वास—(निर्वर्ण्य स्वगतम्।) अअं अज्जउत्तो। इअं उण साअरिआ। (प्रकाश्यं राजानं प्रति सकोपहासम्।) अज्जउत्त, केण उण एदं आलिहिदं। (ङ)

राजा—(सवैलक्ष्यस्मितम्। अपवार्य।) वयस्य, किं ब्रवीमि।

(क) आर्य्यपुत्र, कुसुमिता नवमालिका।

(ख) आर्य्यपुत्रमुखानुरागादेव ज्ञातं यथा कुसुमिता नवमालिकेति तन्न गमिष्यामि।

(ग) भवति, यद्येवं तज्जितमस्माभिः। भो भोः, मा कुप्य। अत्र ज्ञास्याम्युत्तरं दातुम्।

(घ) भर्त्रि प्रेक्षस्व तावत् किमत्र चित्रफलक आलिखितम्।

(ङ) अयं आर्यपुत्रः। इयं पुनः सागरिका। आर्यपुत्र! केन पुनरिदं आलिखितम्।

(।) রা—(জনান্তিকে) বয়স্য, চিত্রফলক গোপন কর। (বিদূষক কর্ত্তৃক কক্ষে ধারণ)।

বা—আর্য্যপুত্র, নবমালিকা কুসুমিতা।

রা—(সবিস্ময়ে) রাজ্ঞি, তুমি বিলম্ব করিতেছিলে, অতএব আমরা অগ্রে আসিয়াও উহা দেখি নাই। এস! সকলে এক সঙ্গেই দেখিব।

বা—(দর্শন পূর্ব্বক) আর্য্যপুত্রের মুখরাগদর্শনেই বুঝা যাইতেছে নবমালিকা পুষ্পিতা হইয়াছে। আমি যাইব না।

বি—মাননীয়ে, যদি তাই, তবে আমাদেরই জয় (বাহুপ্রসারণপূর্ব্বক নৃত্য,—কক্ষ

হইতে পতিত ফলকদর্শনে বিষাদ,—রাজা কর্ত্তৃক জনান্তিকে অঙ্গুলি দ্বারা প্রদর্শন এবং বিদূষকের মুখ দর্শন,—জনান্তিকে) ওহে, ক্রোধ করিও না। আমি উত্তর দিতে জানি।

কাঞ্চ—(ফলক গ্রহণ পূর্ব্বক) রাজ্ঞি, দেখুন এই চিত্রফলকে কি অঙ্কিত হইয়াছে।

বা—(দর্শন ও স্বগত) এই আর্য্যপুত্র, এই আবার সাগরিকা। (প্রকাশ্যে রাজার প্রতি সকোপ হাস্যের সহিত) আর্য্যপুত্র, ইহা কে চিত্র করিয়াছে?

রা—(সলজ্জ, সস্মিত ও জনান্তিকে) বয়স্য কি বলিব?

(২) K.—(To the jester) Friend, conceal the picture board (The jester puts it in his armpit).

Q.—Husband, the *Nyktanthes* is flowered.

K.—(With surprize) Queen, you were delaying. So though we came first, we have not seen it. Let us visit it together.

Q.—(Looking) I find from the expressive face of my husband that it has flowered. So I shall not go.

J.—Lady, if so, we have then won. (Dances with his arms raised,—appears sorry at the fall of the picture,—the king points with his finger and looks at his face,—to the king) O, be not angry, I know how to answer.

M.—(Picking up the board) See, Mistress, who is portrayed in this drawing board.

Q.—(Looking, aside) This is my husband, this again is *Sagarika*. (To the king with smile and jealousy) Who has delineated this, my dear?

K.—(With surprize and smile, to the jester) What shall I say, friend?

(3) কুসুমিতা=পুষ্পিতা। ত্বদস্য সঞ্জাতং তাবৎকাদিঘ্য হরজিতানব্। প্রথমমাগতৈরস্মাভিঃ = পূর্ব্বমাগতেন ময়া। ননু সবিশেষস্য প্রতিষেধ ইতি

वक्तव्यात् कथमत्र अस्मदोर्द्वयोश्चेति एकस्मिन् बहुत्वम्? नचाच विशेषणस्य विधेयार्थत्वम्। अतो निरङ्कुशाः कवय इति। विधेयार्थे तु भवत्येव। तथाहि सच विधेयोर्थः विशेषणमिति अतिदेशो भवत्येवेति पदमञ्जर्यां हरदत्तः। विधेयत्वाद्भवत्येवेति शब्दकौस्तुभे भट्टोजिः। एवमेव—वयं तत्त्वान्वेषान् मधुकर हतास्त्वं खलु कृतीति शाकुन्तले। एते वयममी दाराः कन्येयं कुलजीवितमिति कुमारे। वयं क्व वर्णाश्रमरक्षणोचिता इति भारवौ (१४।२२)। त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इति भर्तृहरौ। Here there is a difficulty to justify the plural form of अस्मद् when it actually refers to one person, because a वार्त्तिक clearly restricts it to cases where अस्मद् is not accompanied by any adjectives. So, there is a poetical licence here. But if it be a predicative adjective there is no such limitation. Some deny the genuineness of this वार्त्तिक; but that is not tenable, as it stands in the works of वामन, जयादित्य, भट्टोजि &c. &c.

विदू। (अपवार्य्य) भो मा चिन्तेहि अहं उत्तरं दाइस्सं। (प्रकाशं वासवदत्तां प्रति) भोदि मा अण्णधा सम्भावेहि अप्पा किल दुक्खेण आलिहोअदि त्ति मम वअणं सुणिअ पिअवअस्सेण एदं आलेक्खविण्णाणं दंसिदं। (क)

राजा—यथाह वसन्तकस्तथैवैतत्।

वास—(फलकं निर्वर्ण्य) अज्जउत्त एसावि जा अवरा तुह समीवे आलिहिदा ता किं अज्जवसन्तकस्स विण्णाणं। (ख)

राजा (सवैलक्ष्यस्मितम्) देवि अलमन्यथाशङ्कया। इयं हि कापि कन्यका स्वचेतसैव परिकल्प्य लिखिता। न तु

विदू। सच्चं सवामि बह्मसुत्तेण जइ कदापि अह्मेहिं ईदिसी दिट्ठपुव्वा। (ग)

(क) भो मा चिन्तय। अहमुत्तरं दास्यामि। भवति मा अन्यथा सम्भावय। आत्मा किल दुःखेनालिख्यत इति मम वचनं श्रुत्वा प्रियवयस्येन इदमालेख्यविज्ञानं दर्शितम्।

(ख) आर्य्यपुत्र एषापि या अपरा तव समीपे आलिखिता तत् किम् आर्य्य-वसन्तकस्य विज्ञानम्।

(ग) सत्यं शपे ब्रह्मसूत्रेण यदि कदापि अस्माभिरीदृशी दृष्टपूर्व्वा।

বি—(জনান্তিকে) চিন্তা করিও না। আমি উত্তর দিব। (প্রকাশে) রাজ্ঞি, অন্যরূপ মনে করিবেন না। 'নিজকে সহজে অঙ্কিত করা যায় না' আমার এই বাক্য শুনিয়া প্রিয় বয়স্য এই চিত্রবিদ্যা দেখাইয়াছেন।

রা—বসন্তক যাহা বলিতেছে তাই বটে।

বা—(ফলক দেখিয়া) আর্য্যপুত্র এই যে অন্যা আপনার নিকট অঙ্কিতা হইয়াছে, তাহা কি আর্য্য বসন্তকের নিপুণতা?

রা—(সবিস্ময়ে হাস্যপূর্ব্বক) মহিষি, অন্যরূপ শঙ্কা করিও না। ইনি কোনও অজ্ঞাতা কন্যা মনের কল্পনাতেই আলিখিতা হইয়াছেন। কিন্তু দৃষ্টপূর্ব্বা নহেন।

বি—সত্য, উপবীতদ্বারা শপথ করিতেছি যদি কখনও আমরা ঈদৃশী কন্যা পূর্ব্বে দেখিয়া থাকি।

(2) J.—(To the king) O, do not fear. I shall answer. (To the queen) Lady, do not think otherwise. Hearing my words that one finds it difficult to draw one's own likeness, this skill in delineation has been shown by my dear friend.

K.—It is true as he says.

Q.—(Seeing the board) My dear, is this other one, who is portrayed beside you, from the skill of the respected *Basantaka*?

K. (Smiling and with hesitation) My dear, do not think other-

wise ; this is some unknown girl drawn from fancy, but never seen before.

J.—I swear by my sacred thread, if we have ever seen her before.

(3) आलेख्यविज्ञानं—चित्रनैपुण्यम्। कन्यका = कन्या + क + टाप्। अज्ञाते इति कः (५।३।७३)। क्षिपकादीनाञ्च नेति वक्तव्यान्न ह्रस्वम्। येतु क्षिपकादौ न पठन्ति तेषां मते अभाषितपुंस्काच्चेति। पक्षे कन्यिका। आदाचार्य्याणामिति न (७।३।४९)। कन्याका। परिकल्प्य = चिन्तयित्वा। दृष्टपूर्वा = पूर्वमवलोकिता। पूर्वं दृष्टेति सुप् सुपेति समासः। भूतपूर्वे चरड़िति (५।३।५३) निर्देशात् दृष्ट-शब्दस्य पूर्वनिपातः। The word दृष्ट precedes पूर्व in such cases under the intimation (i. e. ज्ञापक) that the सूत्रकार himself has used thus in the Rule 5-3-53.

शपे—शप आक्रोश इति भ्वादिः। स्वरितञितः कर्त्रभिप्राये क्रियाफल इति तङ्। तथाहि प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुज इति माघः। ननु शप उपलम्भन इति वक्तव्यादेवात्र तङ् (१।३।२१)। ननु स्वरितेत्त्वात्? अत्र कैयटः "उपलम्भनं प्रकाशनमिति। अत्र तु केवलप्रकाशनार्थाभावात् कैयटादिमते न तङ्। तथाहि "अतस्ते न भविष्यति। न प्रसूतिमनराध्य प्रजेति तं शशाप सेति। स तपःप्रतिबन्धमन्युना अशपद्भव मानुषीति तामिति च (८।८१) रघौ। सख्यः शपामि यदि किञ्चिदपि स्मरामीति। वृत्तिकारमते तु (काशिकामते) उपलम्भनार्थे एवात्र तङ्। तद् यथा वाचा शरीरस्पर्शनमुपलम्भनमिति। अत्र पदमञ्जरी—वाचा शरीर-स्पर्शनमिति तत् पादौ स्पृशामि नैतत् मया कृतमित्येवंरूपः शपथविशेषः। एतदनु-रोधेन हि सिद्धान्तकौमुद्यां शपतेराक्रोशार्थादकर्त्तृगेपि फले तङ् उक्तः। मनोरमा-याञ्च सख्यः शपामीत्यत्र "स्वाशयं प्रकाशयामीत्येव तावदिह विवक्षितं नतु शपथइति" उक्तम्। हरिदीक्षितस्तदनुगो नागेशश्च कैयटमतमेवावलम्बितवान्। माधव स्तु चान्द्र-भोजकौमारभागवृत्तिहरदत्तकैयटजयादित्यादीनां मतान्येवोल्लिलेख। स्वमतं तु न किञ्चिदुवाच। तथाह्यत्र महाभाष्यप्रदीपोद्द्योते नागेशः—"शपतिर्नानार्थः।

मत्याक्रोशे (१) (विकद्धानुध्यानमाक्रोश:)। देवदत्तं शपतीति निन्दतीत्यर्थ:। अस्ति (२) तत्त्वावेदनपूर्वकं तत्प्रत्ययनाय ब्राह्मणादे: क्वचिद्द ईदृशादिना साक्षात् स्पर्शरूपे मानसस्पर्शरूपे वा शपथे यथा विप्रै: शपे, चावधर्मेण शपे इत्यादौ तृतीया तु कर्मणोपि करणत्वविवक्षया। अस्ति (३) प्रकाशने देवदत्ताय शपते। कथयतीत्यर्थ:। तत्र स्वरितेत्त्वात् सिद्धेऽकर्त्रभिप्रायार्थमिदम्। तदपि प्रकाशनार्थं। सख्य: शपामीत्यादौ तु शपथार्थकत्वान्नात्मनेपदम्। काशिकादौ तूपलम्भनं शपथ इति व्याख्यातं तच्चिन्त्यमिति"। There are two opinions on the वार्त्तिक, "शप उपलम्भने"। By one, उपलम्भन means प्रकाशन and कैयट हरिदीक्षित, नागेश and भागवृत्तिकार follow it. By another, it means an oath by touching one's body or any sacred thing and it is adopted by जयादित्य, हरदत्त, भट्टोजि &...माधव is neutral. Under the first case, स्वरितेत्त्वात् तङ् and according to the other view, तङ् is here by the aforesaid वार्त्तिक। ब्रह्मसूत्रेण = यज्ञोपवीतेन। करणे तृतीया। A question is here why the king took upon himself the task of acknowledging the work of painting as his own and thereby telling what had not actually ..a the case? ; "Every thing is fair in love and war." No doubt the king's explanation was at first evasive. But he was led into it by the foolish attempt, on his behalf, of the jester—Thus the king was led to deceive his wife and play a false gallant to her.

काञ्च—(अपवार्य।) भट्टिणि, कदापि ईदिसं उण सुणक्खरं संवददि जेव्व। ता अलं कोविदेण। (क)

वास—(अपवार्य।) अइ उज्जुए, एदस्स वक्कभणिदाइं ण आणासि। वसन्तओ क्खु एसो। (प्रकाशम्। राजानं

प्रति।) अज्जउत्त, मम उण एदं चित्तं पेक्खन्तीए सीसवे-अणा समुप्पण्णा। ता सुहं चिट्ठदु अज् उत्तो। अहं गमिस्सं (इत्युत्थाय गन्तुमिच्छति।) (ख)

(क) भर्त्रि, कदापीदृशं पुनर्घुणाक्षरं संवदत्येव। तदलं कुपितेन।

(ख) अयि ऋजुके, एतस्य वक्रभणितानि न जानासि। वसन्तक: खल्वेष:। आर्य्यपुत्र, मम पुनरिदं चित्रं प्रेक्षमाणाया: शीर्षवेदना समुत्पन्ना। तत् सुखं तिष्ठत्वार्यपुत्र:। अहं गमिष्यामि।

(1) কাঞ্চ—(জনান্তিকে) ভর্ত্তি, হয়ত একপ ব্যাপার ঘুণকৃত অক্ষরের ন্যায় অকস্মাৎ মিলিতেও পারে, অতএব কোপের প্রয়োজন কি?

বাস—(জনান্তিকে) ওলো সরলে, ইহার কুটিল কথা বুঝিতেছিস্ না? এ যে বিদূষক বটে। (প্রকাশে, রাজার প্রতি) আর্য্যপুত্র, এই চিত্রদর্শনে আমার শিরোবেদনা উৎপন্ন হইয়াছে। আপনি সুখে থাকুন। আমি যাই (উত্থান পূর্ব্বক গমনোদ্যতা)।

(1) Maid—(To the queen) Mistress, no use of anger, it may perhaps be accidentally identical as the wood-eating insect turns out by chance some letters.

Qu.—(To the maid) O simple one, you do not understand his evasive words. He is no other than a buffoon. (To the king) My dear, looking at this picture, I have got headache ; so stop here, with your amusement, my dear. I am going—(Rises and attempts to go.)

(3) घुणाक्षरम् = घुणस्य अक्षरम्। घुणदंशनेन सञ्जातमक्षरम्। An accidental coincidence. घुण is an insect which eats wood. कदापि ईदृशं घुणाक्षरं संवदतीत्येव=ईदृशं वसन्तकेनोक्तं कस्याश्चिद् रमण्या: लक्षणं पुनर्घुणाक्षरं घुणदंशनजनितम् अक्षरं यथा, तथा सागरिकाया: चित्रं कदाचित्यात् संवदति, अनुकरोतीत्येव। As the insect called घुण, while boring

holds in wood, accidentally happens to carve out a letter, similarly the king's delineation of a female, has happened to turn out *Sagarika*. शीर्षवेदना=शिरःपीड़ा। शिरः शीर्षमूर्धकानि स्युरिति हलायुधः। शीर्षस्य वेदनेतिविग्रहः। उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियामित्यमरः। तान्याराद्गमहेश्वराणि भवतः शीर्षाणि तुल्यं दधतीति मुरारिः। व्याकरणं तु कुमारशीर्षयोर्णिनिः (३।२।५१) शीर्षच्छेदाद् यच (५।१।६०)। (६।१।६०) शीर्ष तद्धिते (६।१।६१)। अचि शीर्षं (६।१।६५) इत्यादिषु सर्वत्र शिरःशब्दादेव शीर्षादेशो निपातितः।

ऋजुके=सरले। कुत्सित इति कन्।

राजा—(पटान्तेन गृहीत्वा)। देवि,

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः।
न मे दोषोऽस्तीति त्वमिदमपि च ज्ञास्यसि मृषा
किमेतस्मिन्वक्तुं क्षममिति न वेद्मि प्रियतमे॥

(1) রা—(বস্ত্রান্ত গ্রহণ পূর্ব্বক) রাজ্ঞি, তোমার কোপ না হইলে 'প্রসন্ন হও' বলা উচিত নয়। আর এরূপ করিব না বলিলে (নিজ দোষ) স্বীকার করা হয়। আমার দোষ নাই বলিলেও তুমি উহা নিষ্কারণ বুঝিবে না। অতএব এই ব্যাপারে কি বলা উচিত, প্রিয়তমে, তাহা জানি না।

(2) K—(Holding her apparel) Queen, in absence of your anger, it will be improper to say 'be pleased.' It will also be a confession of guilt, if I say I shall not do it again. The statement that I am not to blame, will not pass without implication. So O, dearest, I do not know what is to be stated in this affair.

(3) प्रसीद इति ब्रूयाम् इदं कोपे असति न घटते। एवं न पुनः करिष्यामीति अभ्युपगमो भवेत्। न मे दोषोऽस्तीति इदमपि त्वं मृषा न ज्ञास्यसि। प्रियतमे एतस्मिन् किं वक्तुं क्षममिति न वेद्मि।

(4) प्रसीद अनुगृहाण इति ब्रूयां कथयेयमिति इदं वचनं कोपे तव क्रोधे असति अनुत्पद्यमाने न घटते युज्यते। अप्रकाशित: कोप: कथमनुभूत: स्यादित्यर्थ:। तथा एव नो न पुनर्भूय: करिष्यामि अनुष्ठास्यामि इति कथिते सति अभ्युपगम: निजापराधस्वीकृति:। अभ्युपगम: समीपागमने स्वीकृतावपीति हेमचन्द्र:। भवेत् स्यात्। न मे मम दोष: अपराध: अस्तीति इदं वचनमपि त्वं मृषा मिथ्या निष्कारण- मिति यावत्। न ज्ञास्यसि मोत्स्यसे। अत्र केनचित् कारणेन भवितव्य मिति तव सन्देहोऽवश्यमेव जनिष्यत इत्यर्थ:। अत: हे प्रियतमे! एतस्मिन् आलेख्य- व्यापारे किं वक्तुं वदितुं क्षमं युक्तमिति न वेद्मि जाने।

(5) कोपाभावे प्रसादनं न सम्भवति। नैतत् पुनरनुष्ठेयमिति च आत्मदोषस्वी- कृतिसूचकम्। निर्दोषोऽहमिति वाक्येन च त्वं संदेक्ष्यसि। अतोऽत्र किं वक्तव्य मिति न मम ज्ञातम्।

(6) ब्रूयाम्=संप्रश्ने लिङ् (३।३।१६१) संप्रश्नो विचारणा। ज्ञास्यसि= कथमत्रानुपसर्गाज्ज्ञ इति (१।३।७६) नात्मनेपदम्? "कर्त्रभिप्राय इत्येवेति जयादित्य:। धर्मं जानीते। अनुपसर्गाज्ज्ञ इति कर्त्रभिप्राये तङ् इति माधव:। So when the क्रियाफल does not result upon the subject the root is to be in परस्मैपदम्। Cf :—(1) जानीहि राज- प्रधिदेवतां मामिति रघौ। (2) जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनइति मेघदूते। On the other hand (1) जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मयेति अमरु:। (2) जाने तपसो वीर्यं सा बाला परवतीति शाकुन्तले। (3) न जाने स प्रधानो मे गुरुहस्तो सदामदइति देवीमाहात्म्ये। (4) वाच: पल्ल- वयत्युमापतिधर: सन्दर्भशुद्धिं गिरां जानीते जयदेव एवेति गीतगोविन्दे। अकर्मका- च्चेत्यपि (१।३।४५) अकर्त्रभिप्रायार्थमिति काशिका। अत्र तु नाकर्मकत्वम्।

(7) अभावे नह्यनो नापीत्यमर:। नो इति निषेधार्थको निपात:।

(8) प्रसद्यतामिति...उच्यते...अनेन...घट्यते। करिष्यते (कारिष्यते वा)... भूयेत...अभ्युपगमेन। दोषेण भूयते...त्वया...ज्ञास्यते (ज्ञायिष्यते वा)...केन क्षमेण विद्यते।

(9) शिखरिणी वृत्तम् ।

(10) आक्षेपालङ्कारः ।

(11) अत्र पर्य्युपासनं नाम नाटकीयं प्रतिमुखाङ्गम् ।

वास—(सविनयं पटान्तमाकर्षन्ती ।) अज्जउत्त, मा अण्णधा संभावेहि । सच्चं एव्व मं सीसवेअणा बाधेदि । ता गमिस्सं । (क)

(इति निष्क्रान्ते ।)

विदू—भोः, दिट्ठिआ वड्ढसे । क्खेमेण अदिक्कन्ता एसा वासवदत्ता अआलवादलिआ । (ख)

(क) आर्य्यपुत्र नान्यथा संभावय । सत्यमेव मां शीर्षवेदना बाधते । तद्गमिष्यामि ।

(ख) भोः, दिष्ट्या वर्धसे । क्षेमेणातिक्रान्तैषा वासवदत्ताकालवादलिका ॥

(1) वास—(সবিনয়ে বস্ত্রান্ত আকর্ষণপূর্ব্বক) আর্য্যপুত্র, অন্যরূপ মনে করিবেন না। সত্যই আমাকে শিরোবেদনা ক্লেশ দিতেছে। অতএব যাইতেছি (নিষ্ক্রান্তা)।

বি। ওহে তোমার ভাগ্যে মঙ্গল হউক। মঙ্গলহেতু এই অকালবৃষ্টি বাসবদত্তা চলিয়া গেল।

(2) Qu.—(Softly dragging her clothes) Husband, do not think otherwise. I am really suffering from headache, so I go. (Exeunt)

J.—Well, may you prosper.—Luckily this untimely shower in the shape of *Basabadatta* is off.

(3) अकालवादलिका=असमयधारापातः । वादली एव वादलिका । संज्ञायां कन् । Some read this वार्द्दलिका । वार्द्दलं दुर्दिने मेला मन्दायां वार्द्दलः स्मृत इति मेदिनी । क्षेमेण=मङ्गलेन । हेतावि‌ति तृतीया ।

राजा । धिङ्मूर्ख अलं परितोषेण । यात्वया निगूढ़ो न लक्षितस्त्वया देव्याः कोपानुबन्धः । पश्य

भ्रूभङ्गे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-
मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्।
अन्तर्बाष्पजड़ीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः॥

(1) धिक् मূর্খ, সন্তোষের প্রয়োজন নাই। গমনকারিণী মহিষীর গুপ্ত কোপস্থিতি লক্ষ্য কর নাই। দেখ—

হঠাৎ ভ্রূভঙ্গের আবির্ভাবেও প্রিয়া কর্তৃক বদন আনত করা হইয়াছে। আমার প্রতি সে অল্প হাসিয়াছে। বিরোধকারক নিষ্ঠুর বচন বলে নাই। অশ্রুজলকলুষিত চক্ষুও সামর্থ্য হেতু বিস্ফারিত করে নাই। প্রিয়া প্রণয়প্রকাশ, অথচ কোপরক্ষাও, করিয়াছে।

(2) K.—Fie, fool, no use of mirth. You have not marked her concealed anger which was preserved, while she was passing away.—See.

Though the brows were suddenly curved, the face was bent low, by my dear wife I was slightly smiled at. No cruel heart-rending words were spoken. The eyes surcharged with tears, were not strained through exertion. So love was sustained, though anger was expressed.

(3) भ्रूभङ्गे सहसा उद्गतेपि दयितया वदनं परां नम्रतां नीतम्। माम्प्रति ईषत् हसितम्। भेदकारि निष्ठुरं वचो नोक्तम्। अन्तर्बाष्पजड़ीकृतं चक्षुः प्रभुतया न विस्फारितम्। कोपश्च प्रकटीकृतः। प्रश्रयश्च न मुक्तः।

(4) भ्रुवोर्भङ्गे भेदे भ्रूकौटिल्ये सहसा अतर्कितमुद्गते उपस्थितेऽपि दयितया प्रियया वदन माननं परामत्यर्थं नम्रतां नीचत्वं नीतं प्रापितम्। मां प्रति ईषत् स्वल्पं हसितम्। भेदकारि मनोदाहि निष्ठुरं क्रूरं वचो वाक्यं न उक्तं कथितम्। अन्तर्बाष्पेण मध्यस्थितजलेन जड़ीकृतं स्थिरीकृतं कलुषितमिति यावत् चक्षुःनयनं प्रभुतया सामर्थ्येन न विस्फारित मायतीकृतम्। तस्मात् कोपः क्रोधश्च प्रकटीकृतः प्रकाशितः प्रश्रयः प्रणयश्च न मुक्तः त्यक्तः। प्रणयप्रश्रयौ समावित्यमरः।

(5) अधोनीतेन वदनेन भ्रूभङ्गः परिहृतः। मयि स्मितं कृतम्। प्रणयस्य निरासकं वचश्च न कथितम्। अन्तर्वाष्पप्रसरकलुषे नयने च न प्रसारिते। कोपो दर्शितः प्रणयश्च रक्षितः।

(6) निगूढः=गुप्तः। नि+गुह+क्तः। गूहति-ते। जुगूह, जुगुहे। गूहिता गोढा। गूहिष्यति-ते, घोक्ष्यति-ते। गूहतु-ताम्। गूहेत्-त। गूहिषीष्ट घुक्षीष्ट गुह्यात्। अगूहीत् अघुक्षत् अगूहिष्ट अघुक्षत अगूढ। गूहितुम् गोढुम्। गूहित्वा गूढ्वा। गुह्यते। अगूहि। विस्फारितम्=वि+स्फुर्+णिच्+क्तः। चिस्फुरोर्णौ इत्यात्त्वं वा। पक्षे विस्फोरितम्। स्फुरतिस्फुलत्यो र्निर्निविभ्य इति वा षत्वम्। णिजन्ते स्फारयति स्फोरयति। अपुस्फुरत। अविजन्ते। स्फुरति। पुस्फोर। स्फुरिष्यति। कुटादित्वान्न गुणः। लिङि। स्फुरेत्। स्फूर्यात्। लुङि अस्फुरीत्। स्फूर्यते। अस्फोरि। स्फुरितम्। स्फुरित्वा स्फुरितुम्।

(8) नीतवती....हसितवती...उक्तवती....विस्फारितवती....कोपश्च प्रकटितवती दयिता मुक्तवती प्रणयम्...।

(9) शार्दूलविक्रीड़ितं वृत्तम्।

(10) काव्यलिङ्गमलङ्कारः।

(11) कोपेऽपि विनयाद्यवलम्बनेन तच्छिक्षनिक्षवादत्र माधुर्य्यं नाम वाक्यार्थगुणः, तथाहि माधुर्य्यमुक्त माचार्य्यैः क्रोधादावप्यतीव्रतेति सरस्वतीकण्ठाभरणे।

विदू। गदा देवी वासवदत्ता, ता कीस तुमं अरस्सरुदिदं करेसि। (क)

राजा। मूढ़ न लक्षितस्त्वया देव्याः कोपस्तत्सर्व्वथा देवीप्रसादनं मुक्त्वा नान्यमत्रोपायमाकलयामि। तदेहि देवीं प्रसादयितुमभ्यन्तरमेव प्रविशावः। (इति निष्क्रान्तौ)।

(क) गता देवी वासवदत्ता, तत् कस्मात् त्वमरण्यरुदितं करोषि।

इति कदलीगृह' नाम द्वितीयोऽङ्कः।

(1) বি—মহিষী বাসবদত্তা চলিয়া গিয়াছেন। তবে তুমি কেন অরণ্যে রোদন করিতেছ?

রা—মূঢ়, তুমি দেবীর ক্রোধ লক্ষ্য কর নাই। এস্থলে রাজ্ঞীর সন্তোষসাধন ব্যতীত এখন আর কোনও উপায় দেখি না। এস, তাহাকে সন্তুষ্ট করার জন্য অন্তঃপুরেই যাই। (নিষ্ক্রান্ত)। ইতি দ্বিতীয় অঙ্ক।

(2) J.—The queen is gone. Why are you then crying in the wilderness?

K.—Fool, you have not marked her anger. Under the present circumstances she cannot but be conciliated. So, come, let us go to the harem. (Exeunt).

The end of the Act II.

(3) अरण्यरुदितम्=निष्फलालापः। मुक्त्वा=परित्यज्य। आकलयामि=स्थिरीकरोमि। सर्वथा=सर्वैः प्रकारैः। प्रकारवचने थाल् इति थाल् (५।३।२३)। मूढ=मूर्ख। मुह+क्तः। तत् सम्बुद्धौ। मुह्यति। मुमोह। मोहिष्यति मोक्ष्यति। रधादित्वादिट्। अमुहत्। मुह्यते। अमोहि। मुग्धः मूढः। मुग्ध्वा मूढ्वा मोहित्वा मुहित्वा। मोहितुम् मोग्धुम् मोढुम्। मुह्यत्।

इति द्वितीयोऽङ्कः।

रत्नावली।

तृतीयोऽङ्कः।

प्रवेशकः।

(ततः प्रविशति मदनिका।)

मद—(आकाशे।) कौसम्बिए, अवि दिट्ठा तुए भट्टिणो सआसे कञ्चणमाला ण वेत्ति। (कर्णं दत्त्वाकर्ण्य।) किं भणासि—'को वि कालो ताए आअच्छिअ गदाए' त्ति। ता कहिं दाणिं पेक्खिस्सं। (अग्रतोऽवलोक्य।) कथं एसा क्खु कञ्चणमाला इदो ज्जेव्व आअच्छदि। ता जाव णं उपसप्पामि। (क)

(ततः प्रविशति काञ्चनमाला।)

काञ्च—(सोत्प्रासम्।) (साहु रे वसन्तअ, साहु। अदिसइदो तुए अमच्चजोअन्धराअणो वि इमाए संधिविग्गहचिन्ताए।) (ख)

मद—(सस्मितमुपसृत्य।) (कञ्चणमाले, किं अज्जवसन्तएण किदं जेण सो एव्वं सलाहीअदि।) (ग)

(क) कौशाम्बिके, अपि दृष्टा त्वया भर्तुः सकाशे काञ्चनमाला न वेति। किं भणसि—'कोऽपि कालस्तस्या आगत्य गतायाः' इति। तत् कुत्रैनां प्रेक्षिष्ये। कथमेषा खलु काञ्चनमालैव इत एवागच्छति। तद्यावदेनामुपसर्पामि।

(ख) साधु रे वसन्तक, साधु। अतिशयितस्त्वयामात्ययौगन्धरायणोऽप्यनया संधिविग्रहचिन्तया।

(ग) काञ्चनमाले, किमार्यवसन्तकेन कृतं येन स एवं श्लाघ्यते।

তৃতীয় অঙ্ক। প্রবেশক। অন্তঃপুর। (মদনিকার প্রবেশ।)

(১) ম—(আকাশে) কৌশাম্বিকে, কাঞ্চনমালাকে মহারাজের নিকট দেখিলে কি? (শ্রবণাভিনয় পূর্ব্বক) কি বলিলে? কিছুকাল হইল সে সেখান হইতে চলিয়া গিয়াছে? তবে এখন কোথায় তাহাকে দেখিব? (অগ্রে দর্শন) এই যে কাঞ্চনমালা এই দিকেই আসিতেছে। ইহার নিকট যাই।

(কাঞ্চনমালার প্রবেশ।)

কা—(উপহাসের সহিত) সাধু। রে বসন্তক! সাধু এই সন্ধিবিগ্রহচিন্তাতে তোমা কর্তৃক মন্ত্রী যৌগন্ধরায়ণও অতিক্রান্ত হইয়াছেন।

ম—(সস্মিতে নিকটে গমনপূর্ব্বক) কাঞ্চনমালে, আর্য্য বসন্তক কোন্ কার্য্য হেতু এরূপ শ্লাঘিত হইতেছেন?

ACT III. SCENE—THE HAREM, PRELUDE.

(ENTER MADANIKA).

(2) M—(Feigning to address another) *Kousambika*, have you seen *Kanchanamala* near the king? (Feigning to listen) What do you say? It is sometime she went away thence? Where shall I see her now? (Looking before) O, here comes *Kanchanamala*. So I go to her.

(ENTER KANCHANAMALA)

K—(Ironically) Bravo! O *Basantaka*, bravo! You have surpassed even the minister himself, by your contemplation of separation and union (*i. e.* war and peace).

M—(Coming near with smiling) *Kanchanamala*, what has been done by the respected *Basantaka* that he is so praised?

(२) सोत्प्रासम्=उत्प्रासेन सह वर्त्तमानं यथा तथा। सोपहासमित्यर्थः।

च्छ्ता: सोल्लुण्ठसोत्प्रासमोपहासा: समास्त्रय इति हलायुध:। उत्+प्र+अस+घञ् =उत्प्रास:=आधिक्यम्=excess. सोत्प्रास:=exaggerating with latent irony.

अतिशयित:=अतिक्रान्त:। शेते। शिश्ये। शयिष्यते। अशयिष्ट। शय्यते। अशायि। शयित:। शयित्वा। शयितुम्। शयान:।

सन्धिविग्रहचिन्तया—सन्धि: संघटनं संयोग इति यावत्। पक्षे राजगुणविशेष:। सन्धि: पुमान् सुरङ्गायां भगे संघटने पिचेति मेदिनी। सम्+धा+कि:। विग्रह: विभाग: पक्षे युद्धञ्च। विग्रह: काये विस्तारे विभागे ना रणेऽस्त्रियामिति विश्व:। वि+ग्रह+अप्। उद्योगचिन्तया। मेलनभेदचिन्तया पक्षे मित्रतायोधनभावनया।

श्लाघ्यते=प्रशस्यते। श्लाघ्+कर्मणि लट् ते। श्लाघते। शश्लाघे। श्लाघिष्यते। अश्लाघिष्ट। अश्लाघि।

काञ्च। हला मअणिए किं तुह एदिना पुच्छिदेण पओअणं, तुमं इमं रहस्सं रक्खिदुं ण पारेसि। (क)

मद। सवामि देवीए चरणेहिं जइ कस्स वि पुरदो पआसेमि। (ख)

काञ्च—जइ एव्वं ता सुणु। कधइस्सं। अज्ज क्खु मए राअउलादो पडिणिवत्तमाणाए चित्तसालिआदुवारे वसन्तअस्स सुसंगदाए समं आलावो सुदो। (ग)

(क) सखि मदनिके किं तवैतेन पृष्टेन प्रयोजनं? त्वमिदं रहस्यं रक्षितुं न पारयसि।

(ख) शपे देव्याश्चरणै: यदि कस्यापि पुरत: प्रकाशयामि।

(ग) यद्येवं तच्छृणु। कथयिष्यामि। अद्य खलु मया राजकुलात्प्रतिनिवर्तमानया चित्रशालिकाद्वारे वसन्तकस्य सुसंगतया सममालाप: श्रुत:।

(১) का—ওলো মদনিকে, তোর ইহা জিজ্ঞাসার প্রয়োজন কি? তুই এই রহস্য রক্ষা করিতে পারিবি না।

ম—রাজ্ঞীর চরণের দিব্য যদি কাহারও কাছে প্রকাশ করি।

ক—যদি তাই তবে বলি শোন। আজ আমি রাজার গৃহ হইতে ফিরিবার সময় চিত্র-শালিকাদ্বারে বসন্তকের সহিত সুসঙ্গতার আলাপ শুনিয়াছি।

(2) K—O *Madanika*, no use of your asking this. You will not be able to keep such a secret.

M—I swear by the queen's feet, I shall not divulge it.

K—If so, listen, I shall say. While returning from the king's house today, I have overheard a conversation between *Basantaka* and *Susangata* at the door of the picture gallery.

(3) रहस्यम् = गोपनीयम्। रहसि भवम्। रहस् + यत्। दिगादिभ्यो यदिति यत्। (४।३।५४)।

देव्याश्चरणैः = बहुत्वं पूजायाम्। एतच्च लोकव्यवहारात्।

चित्रशालिकाद्वारे = चित्राणाम् आलेख्यानां शालिकाया गृहस्य द्वारे। शाला + कन् (क्रस्व इति ५।३।८६) + टाप्। ततः केण इति ह्रस्वे (शाल + कन्) प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपइतीत्वम् (७।३।४४) अकारस्य। *i. e.* if आप not attached to any सुबन्त follows, the अकार before क that belongs to an affix, is changed to इकार।

मद—(सकौतुकम्।) सहि, कधेहि कीदिसो सो आलावो। (क)

काञ्च—एदं वसन्तएण भणिदं जह भोदि सुसंगदे, णहि साअरिअं वज्जिअ पिअवअस्सस्स अण्णं किंपि अस्सत्थदाए कारणं। ता चिन्तेहि एत्थ पडिआरंत्ति। (ख)

मद—तदो सुसंगदाए किं भणिदं। (ग)

(क) सखि कथय कीदृशः सः आलापः।

(ख) इदं वसन्तकेन भणितं यथा भवति सुसङ्गते न हि सागरिकां वर्जयित्वा प्रियवयस्यस्य अन्यत् किमपि अस्वस्थतायाः कारणं, तच्चिन्तयात्र प्रतीकारमिति।

(ग) ततः सुसङ्गतया किं भणितम्।

(১) ম—(সকৌতুকে) সখি, বল, সে আলাপ কিরূপ?

কা—বসন্তক বলিল, 'মাননীয় সুসঙ্গতে, সাগরিকা ভিন্ন প্রিয় বয়স্যের অন্য কোনও অসুস্থতার কারণ নাই। এখন প্রতীকার চিন্তা কর।'

ম—তার পর সুসঙ্গতা কি বলিল?

(2) M—(Curiously) Dear, tell me what was the conversation?

K—Said *Basantaka*, 'Lady *Susangata*, there is no other cause of my dear friend's indisposition than *Sagarrika*'. So devise a remedy?

M—What did then Susangata say?

(3) प्रतीकारम्=उपायम्। प्रति+कृ+घञ्। नम्। उपसर्गस्य घञ्यमनुष्ये बहुलमिति दीर्घः। पक्षे प्रतिकारम्।

काञ्च—तदो ताए एव्वं भणिदं। अज्ज क्खु देवीए चित्तफलअवुत्तन्तसङ्किदाए साअरिआ मम हत्थे समप्पअन्तीए जं ताए पिणद्धं णेवत्थं पसादीकिदं तदो तेन जेव्व विरइदभट्टिणीवेसं साअरिअं गेण्हिअ अहंपि कञ्चणमाला-वेसधारिणी भविअ पदोसे भट्टिणो सआसं आगमिस्सं। तुमपि इधज्जेव्व ट्ठिदो चित्तसालिआदुवारे पडिवालइस्ससि। तदो माहवीलदामण्डवे ताए सह भट्टिणो संगमो भविस्सदि। (क)।

मद—हदा सुसंगदे, हदासि जा एव्वं परिअणवच्छलां भट्टिणीं वञ्चेसि। (ख)।

काञ्च—हला मअणिए, दाणिं तुमं कहिं पत्थिदा। (ग)

(क) ततस्तयैवं भणितम्। अद्य खलु देव्या चित्रफलकवृत्तान्तशङ्कितया सागरिकां मम हस्ते समर्पयन्त्या यत्तया पिनद्धं नेपथ्यं प्रसादीकृतं ततस्तेनैव विरचितभर्त्रीवेशां सागरिकां गृहीत्वाहमपि काञ्चनमालावेशधारिणी भूत्वा प्रदोषे भर्तुः सकाशे आगमि-

ष्यामि। त्वमपीहैव स्थितचित्रशालिकाद्वारे परिपालयिष्यसि। ततो माधवीलता मण्डपे तया सह भर्तुः संगमो भविष्यति।

(ख) हता सुसंगते, हतासि यैवं परिजनवत्सलां भर्त्रीं वञ्चयसे।

(ग) हला मदनिके, इदानीं त्वं क्व प्रस्थिता।

(১) কা—তার পর সুসঙ্গতা বলিল 'অদ্য চিত্রফলকবৃত্তান্তশঙ্কিতা দেবী সাগরিকাকে আমার হস্তে প্রদান করিবার সময় তাঁহার নিজের পরিহিত পরিচ্ছদ আমাকে পুরস্কারস্বরূপ দিয়াছেন। তদ্দ্বারা সাগরিকাকে রাজ্ঞীর বেশে সজ্জিত করিয়া আমি কাঞ্চনমালার বেশ ধারণপূর্বক প্রদোষে সাগরিকার সহিত মহারাজের নিকট যাইব। তুমিও এইখানেই অপেক্ষা করিও। তবেই মাধবীকুঞ্জে তাহার সহিত রাজার মিলন হইবে।

ম—নষ্ট সুসঙ্গতে, এরূপ পরিজনবৎসলা দেবীকে বঞ্চনা করিতেছ। তুমি নাশপ্রাপ্ত হও।

কা—ওলো মদনিকে, তুই এখন কোথায় যাইতেছিস্?

(2) Ka—Then she said—'Having some suspicion in the matter concerning the picture board, the queen while putting *Sagarika* today under my charge, gave me a suit of her own clothes by way of reward. Being myself dressed like *Kanchanamala*, I shall take *Sagarika* disguised with that suit to the king about sun-set; you too stay there So the master will meet her at the Jasmin bower.

M.——May you be ruined, O wicked *Susangata*, who are thus deceiving the queen affectionate to her companions.

Ka—O *Madanika*, where are you now going ?

(३) पिनद्धम्=परिहितम्। अपि+नह+क्तः। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति उपसर्गस्य वा अकारलोपः। पक्षे अपिनद्धम्।

वञ्चयसे=प्रतारयसि। गृधिवञ्च्योः प्रलम्भने इति आत्मनेपदम्। अन्यत्र अहिं वञ्चयति परिहरतीत्यर्थः। अवञ्चत।

मद। अस्सत्थसरीरस्स भट्टिणो कुसलवुत्तन्तं जाणिदुं गदा तुमं चिरअसि त्ति उत्तम्मन्तीए देवीए तुह सआसं पेसिदह्मि। (क)

काञ्च—(अदिउजुआ सा दाणिं देवी जा एवं पत्तिआअदि। (परिक्रम्यावलोक्य च।) कहं एत्थ एसो क्खु भट्टा अस्सत्थदामिसेण मअणावत्थं पच्छादअन्तो दन्ततोरणवलहीए उवविट्ठो चिट्ठदि। ता एहि। एदं वुत्तन्तं भट्टिणीए णिवेदेम्ह।)

(इति निष्क्रान्ते। इति प्रवेशकः।) (ख)

(क) अस्वस्थशरीरस्य भर्तुः कुशलवृत्तान्तं ज्ञातुं गता त्वं चिरयसीत्युत्ताम्यन्त्या देव्या तव समीपं प्रेषितास्मि।

(ख) अतिऋजुका सा इदानीं देवी, या एवं प्रत्ययते। कथमत्र एष खलु भर्त्ता अस्वस्थतामिषेण मदनावस्थां प्रच्छादयन् दन्ततोरणवलभ्यामुपविष्टस्तिष्ठति। तदेहि एनं वृत्तान्तं भर्त्र्यै निवेदयावः।

(১) ম—অসুস্থ শরীর মহারাজের কুশলবৃত্তান্ত জানিবার জন্য তুমি প্রেরিতা হইয়া বিলম্ব করিতেছ। অতএব ক্লেশযুক্তা দেবী আমাকে তোমার নিকট প্রেরণ করিয়াছেন।
কা—বিশ্বাসবতী রাজ্ঞী বড়ই সরলা। (পরিক্রমণ ও অবলোকন) এই যে মহারাজ অসুস্থতাচ্ছলে কামাবস্থা গোপন করিয়া দন্তনির্ম্মিতবহির্দ্বারোপরিস্থিত গৃহে উপবিষ্ট আছেন। এস, এই বৃত্তান্ত রাজ্ঞীকে জানাইব। (নিষ্ক্রান্ত)। ইতি প্রবেশক।

(2) M—I have been sent after you by the anxious queen as you were delaying in bringing the news of the indisposed king.

Ka—This confident queen is very simple. (Moving and looking) O, here is the king concealing his lovesmitten state under the guise of illness and staying in the top house over the ivory gate. Come, we shall inform the queen of all these, (exeunt). The end of the prelude to Act III.

(३) उत्ताम्यन्त्या—क्लिश्यमानया। उत्+तम+शतृ+ङीप्। तमा। शप्-श्यनौर्नित्यमिति शुम्। ताम्यति। तताम। तमिष्यति। अतमत्। ताम्यतु। ताम्यत्। तमित्वा तान्त्वा। तमितुम्। ताम्यते। अतमि।

अतिस्वल्पका—इत्यक इति (८।१।१२८) विकल्पे संहिताभावः। अङ्गस्थतामिषेण=पीड़ाच्छलेन। कैतवं कपटं कूटं व्याजच्छद्मोपधिच्छलम्। मिषं निभञ्च निर्द्दिष्ट व्यपदेशश्च सूरिभिरिति हलायुधः। वलभी=आच्छादनं स्याद्‌ वलभी गृहाणामिति हलायुधः। प्रत्ययते=विश्वसिति। प्रति+अय+लट् त। अय गताविति भ्वादिः। अयाञ्चक्रे। आयिष्ट। प्रत्येति इति वा संस्कृतम्।

ततः प्रविशति मदनावस्थां नाटयन्नुपविष्टो राजा।

राजा—(सोत्कण्ठं निःश्वस्य)

संतापो हृदय स्मरानलकृतः संप्रत्ययं सह्यतां

नास्त्येवोपशमोऽस्य मां प्रति पुनः किं त्वं मुधा ताम्यसि।

यन्मूढ़ेन मया तदा कथमपि प्राप्तो गृहीत्वा चिरं

विन्यस्तस्त्वयि सान्द्रचन्दनरसस्पर्शो न तस्याः करः॥

(১) তৃতীয় অঙ্ক। অন্তঃপুর। কামক্লিষ্ট রাজার প্রবেশ।

রা—(উৎকণ্ঠার সহিত নিশ্বাস ত্যাগ পূর্ব্বক) হে হৃদয়, সম্প্রতি এই কামানলসন্তাপ সহ্য কর। ইহার নিবৃত্তি নাই, কেন তুমি আমাকে লক্ষ্য করিয়া বৃথা ক্লিষ্ট হইতেছ? যেহেতু আমি সে সময়ে কষ্টে প্রাপ্ত সাগরিকার ঘনচন্দনরসস্পর্শ হস্ত বহুক্ষণ ধারণ করিয়া তোমাতে স্থাপন করি নাই।

ACT III. SCENE—HAREM.

(ENTER THE KING SITTING AND PALE)

(2) O my heart, as I foolishly did not place on you her hand the touch of which is like that of thick sandal paste, though obtained somehow and held long, suffer now this burning of a fiery love. There is no ceasing of this. Why do you then distress yourself with your fruitless attack against me?

(3) हृदय, सम्प्रति अयं स्मरानलकृतः सन्तापः सह्यताम्। अस्य उपशमः नास्ति एव। किं त्वं पुनर्मां प्रति मुधा ताम्यसि? यत् मूढ़ेन मया तदा कथमपि प्राप्तः तस्याः सान्द्रचन्दनरसस्पर्शः करः चिरं गृहीत्वा त्वयि न विन्यस्तः।

(4) हे हृदय मनः! सम्प्रत्यधुना अयम् अनुभूत इत्यर्थः। स्मरानलकृतः कामाग्निदत्तः सन्तापः दाहः सह्यताम् अनुभूयताम्। अस्य सन्तापस्य उपशमो निवृत्ति-

गोच्येव। किं कथं त्वं पुनर्भूय: मां प्रति लक्ष्यीकृत्य मुधा वृथा ताम्यसि क्लिश्यसि ? यद् यस्मात् मूढ़ेन बुद्धिहीनेन मया तदा मिलनसमये कथमपि• कष्टेण प्राप्तो लब्धस्तस्या: सागरिकाया: सान्द्रो घन श्चन्दनस्य रसो निर्य्यासस्तस्य स्पर्शइव स्पर्शो यस्य स तथोक्त: कर: हस्त:। सप्तम्युपमानेत्यादिना बहुव्रीहि:। चिरं दीर्घं गृहीत्वा धृत्वा त्वयि न विन्यस्त: स्थापित:।

(5) हे हृदय मूढ़ोहं कष्टलब्धं सान्द्रचन्दनशीतलं तस्या: करं चिरं धृत्वापि तवोपरि न स्थापितवान्। अतस्त्वं कामानलसन्तापं सहस्व। मां लक्ष्यीकृत्य वृथा न खिद्यसे।

(6) स्मरानलकृत:।=स्मर एवानलस्तेन कृत:। मयूरव्यंसकादयश्चेति समास:। न च रूपकरूप:। मुखचन्द्र: शोभत इत्यादिवदत्रोपमारूपकयोरेकतरस्य साधकबाधकाभाव:। तथाप्यत्र न स्मर: अनलइवेत्युपमितसमासाशङ्का। व्याघ्रादेराकृतिगणत्वेपि सन्ताप इति सामान्यधर्मस्य प्रयोगात्। भाष्याब्धि: क्वातिगम्भीर: क्वाहं मन्दमतिस्तत इति कैयटप्रयोगस्ततएव अतिवितत दुरवगाहत्वादिसामान्यधर्म्मकल्पनया मनोरमायामुपमितसमासेन समर्थित:। नागेशस्तु तदप्यसहमानो मयूरव्यंसकादित्वादेवात्र समास इत्याह।

गृहीत्वा कर:=vide note on युक्त एवं कोपानुबन्ध: कर्त्तुम् in Act II.

(7) व्यर्थके तु मुधा मृषेत्यमर:। सान्द्रं वने घने मृदाविति मेदिनी।

(8) सन्तापं स्मरानलकृतमिमं सहस्व। न भूयते उपशमेन। त्वया तप्यते। मूढ: अहं विन्यस्तवान्...स्पर्शं करम् प्राप्तम्।

(9) शार्दूलविक्रीड़ितं वृत्तम्।

(10) द्वितीयवाक्यार्थहेतुत्वात् काव्यलिङ्गमलङ्कार:। स्मरानलकृत इति रूपकम्। सान्द्रचन्दनरसस्पर्श इत्यत्रोपमा।

(12) तां प्रति इति वा पाठ:। तां सागरिकां प्रति उद्दिश्येत्यर्थ:।

अहो महदाश्चर्यम्। तथाहि

मनश्चलं प्रकृत्येव दुर्लक्ष्यं च तथापि मे।
कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः॥
(ऊर्ध्वमवलोक्य।) भोः कुसुमधन्वन्,

(১) অহো মহদ্ আশ্চর্য্য! যেহেতু—মনঃ স্বভাবতঃ অস্থির ও দুর্নিরূপণীয়। তথাপি কন্দর্প কি প্রকারে যুগপৎ পঞ্চবাণদ্বারা আমার মনকে বিদ্ধ করিল? (ঊর্দ্ধে দর্শন পূর্ব্বক) হে কন্দর্প!—

(2) O, very strange, since—the mind is by nature unsteady and hard to aim at, yet how could it be simultaneously hit at by the God of love with all his arrows? (Looking up) O God of love.

(3) मनः प्रकृत्यैव चलं दुर्लक्ष्यञ्च। तथापि कामिन् मे एतत् कथं सर्वैः शिलीमुखैः सम विद्धम्।

(4) मनश्चित्तं प्रकृत्या स्वभावत एव चलमस्थिरं दुर्लक्ष्यं दुर्निरूपणीयञ्च। तथापि कामेन मदनेन मे मम एतत् मनः कथं केन प्रकारेण सर्वैः समस्तैः पञ्चभिरित्यर्थः शिलीमुखैर्बाणैः। अलिबाणौ शिलीमुखावित्यमरः। समं युगपद् विद्धं भिन्नम्।

(5) अस्थिरस्य दुर्लक्ष्यस्य मनसो युगपत् पञ्चभिर्बाणैः कामेन विदारणमाश्चर्य्यमेव।

(6) आश्चर्य्यम्=चित्रमद्भुतमिति यावत्। आ+चर्+यत्। चरेराङि चागुराविति वाच्याद् यत्। आश्चर्य्यमनित्ये इति सुट् (६।१।१४७) आश्चर्य्यम्। गतौ तु गत्यर्थे। आचार्य्यः। पक्षे आचर्य्यो देशः। गन्तव्य इत्यर्थः। आचर्य्यं कर्म शोभनम्। In the sense of अद्भुत the root चर takes सुट् when preceded by आङ् and followed by यत्। By the परिभाषा आद्यन्तौ टकितौ (१।४६) सुट् becomes the आद्यवयव of चर्।

(7) दुर्लक्ष्यम्=दुर+लक्ष+णिच्+खल्। दुर्लक्ष्यमिति पाठे दुःखेन लक्ष्यं शक्यमिति प्रादितत्पुरुषः। प्रकृत्या=प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया।

(8) मनसा...चलेन...दुर्लक्ष्येण...कामेन...एतत्...विद्धवान्।

(9) अनुष्टुप्।

(10) चलत्वदुर्लक्ष्यत्वाभ्यां मनसः कामेन भेदने विरोधः। विप्रलम्भस्वाभाव्यादाभासत्वञ्च। अतएवात्र विरोधालङ्कारः। विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वच इति लक्षणात्।

(11) अत्र रूपं नाम नाटकीयं गर्भाङ्गम्। रूपं वाक्यं वितर्कवदिति साहित्यदर्पणे।

बाणा: पञ्च मनोभवस्य नियतास्तेषामसंख्यो जन:
प्रायोऽस्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।
दृष्टं तत्त्वयि विप्रतीपमधुना यस्मादसंख्यैरयं
विद्ध: कामिजन: शरैरशरणो नीतस्त्वया पञ्चताम्॥

(১) মনোভব তোমার পাঁচটী বাণ নির্দ্দিষ্ট আছে। ভুবনে কেবল মত্তুল্য অসংখ্য জনই উহাদের লক্ষ্য বলিয়া প্রসিদ্ধ। কিন্তু এখন তোমাতে ইহার বিপরীতভাব দেখা যাইতেছে। যে হেতু অসংখ্য বাণ দ্বারা বিদ্ধ নিরাশ্রয় কামিজন পঞ্চতা প্রাপ্ত হইতেছে।

(2) O flower-arrowed god who spring in the mind, your arrows are precisely limited to five, but their victims like myself are countless. This world-wide renown is now found reversed in you since with innumerable arrows you are bringing the helpless and victimised lovers to "the state of five." (i.e. to death).

(3) मनोभवस्य पञ्च बाणा नियता:। प्राय: अस्मद्विध: असंख्य एव जनस्तेषां लक्ष्य इति लोके यत् प्रसिद्धिं गतं तद् अधुना त्वयि विप्रतीपं दृष्टम्। यस्मादयमशरण: कामिजन: त्वया असंख्यै: शरै: विद्ध: पञ्चतां नीत:।

(4) मनोभवस्य चित्तजस्य तवेति शेष: पञ्च बाणा: सायका नियता निरूपिता:। निश्चितं नियतं स्मृतमिति हलायुध:। सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा। स्तम्भनश्चेति कामस्य पञ्चबाणा: प्रकीर्त्तिता इति प्रसिद्धे:। न न्यूनातिरिक्ता इत्यर्थ: प्रायो बाहुल्येन अस्माकं विधा प्रकार इव विधा यस्य स: अस्मद्विध: मत्प्रकार:। असंख्य एव जन स्तेषां बाणानां कृत्यानां कर्त्तरि वेति षष्ठी। लक्ष्य: भेद्य:। (लक्ष्यमिति पाठे शरव्यमित्यर्थ:। लक्ष्यं लक्ष्यं शरव्यञ्चेत्यमर:। अत्र पक्षे तेषामिति षष्ठी शेषे। विधेयत्वाल्लक्ष्यमित्यस्याजहल्लिङ्गत्वाच्च।) इति लोके भुवने यत् प्रसिद्धिं ख्यातिं गतं प्राप्तं तत् अधुना अस्मिन् समये त्वयि विप्रतीपं विपरीतं दृष्टमवलोकितम्। यस्मादयमशरण: निराश्रय: कामिजन: प्रणयिलोक: त्वया असंख्यैर्बहुभि: शरै: बाणैर्विद्ध: विदीर्ण: सन् पञ्चतां पञ्चसंख्याकत्वं पक्षे मृत्युं च नीत: प्रापित:। भवतीति शेष:। अनङ्गस्य दशमी दशा मृतिरिति सूच्यते। कन्दर्पस्य सायका: पञ्च कामिनस्त्वसंख्या:। अधुना हि तस्य बाणा असंख्या: कामिनस्तु पञ्चत्वविशिष्टा इति वैपरीत्यम्।

(5) हे पुष्पधन्वन् केवले त्वम पञ्चभिः सायकैर्मनुष्याणसंख्यातजना विद्धाः भवन्तीति लोकप्रसिद्धिः सर्वथा विपरीता जाता यत त्वमसंख्यैर्बाणैर्निराश्रयान् कामिनः पञ्चत्व नयसि। अनुरूपः श्लोको यथा सुभगे कोटिसंख्यात्वमुपेत्य मदनागुगैः। वसन्ते पञ्चता त्यक्ता पञ्चतासीद्वियोगिनामिति।

(6) कुसुमधन्वन् = पुष्पचाप। अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायका इति प्रसिद्धेः। कुसुमं धनुर्यस्येति विग्रहः। तत् सम्बुद्धौ वा संज्ञायामिति (५।४।१३३) धनुषा वा अनङ्। The समासान्त अनङ् drops अङ् and retains अन् : then under the परिभाषा ङिच्च"। (१।१।५३) it replaces the last letter of धनुस् ; so कुसुम + धनुस् + अनङ् = कुसुमधनु + अन् = कुसुमधन्वन्।

(7) विप्रतापम् = विप्रतिगता आपो यस्मिन्निति द्व्यन्तरुपसर्गेऽप ईदिति (६।३।९७) ईत्। ऋक्पूरब्धूःपथामानक्षे इति (५।४।७४) अप्रत्ययः समासान्तः। if अप् be preceded by द्वि, अन्तर् or उपसर्ग, its अ is changed to ई under the परिभाषा "आदेः परस्य" (१।१।५४). Again when अप् is an उत्तरपद in a समास, the affix अ is joined to it as a समासान्त। कामिजनः = कामिनां जनः। नलोपः प्रातिपदिकान्तस्येति कामिन्शब्दस्य नकारलोपः। (८।२।७)। गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहामिति प्रधानकर्मणि त्वादित्वात् प्रथमा।

(8) बाणैः पञ्चभिर्नियतैः (श्रूयते)...असंख्येन...अनेन...अलक्षितेन लक्ष्येण...येन...मनेन...तेन...विप्रतापेन...इमं विद्धं कामिजनमशरणं त्वं पञ्चतां नीतवान्। (अथवा दृष्टवान् तत्...विप्रतापमहम् &c....)

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) कार्य्यकारणयोरननुरूपघटनया विरुद्धकार्य्यस्योत्पत्तेर्विषमालङ्कारः।

(विचिन्त्य) न तथाहमेवंविधावस्थमात्मानमनुचिन्तयामि यथाऽस्तगूढकोपसम्भारायाः देव्या लोचनगोचरगतां तामेव तपस्विनीं सागरिकाम्। तथाहि—

(১) (চিন্তাপূর্ব্বক) অন্তর্গুপ্ত কোপপূর্ণা মহিষীর নয়নের বিষয়ীভূতা সেই দীনা সাগরিকার জন্য যেরূপ চিন্তা করিতেছি, এতদবস্থ আমার নিজের জন্য আমি তদ্রূপ ভাবিতেছি না। কারণ—

(2) (Thinking) I do not care so much for myself who am of this state, as I care for poor *Sagarika* exposed to the glances of the queen full of indignation concealed in her heart. Since—

(3) অন্তর্গূঢ়কোপসম্ভারায়াঃ = অন্তর্হৃদয়ে গূঢ়ঃ গুপ্তঃ কোপস্য সংভারঃ পূর্ণতা যস্যাঃ সা তথোক্তা তস্যাঃ। = হৃদয়গুপ্তক্রোধসমুচ্ছ্রায়াঃ। সম্ভারঃ সংভৃতৌ গণ ইতি হেমচন্দ্রঃ = mass, heap.

লোচনগোচরগতাম = লোচনয়োঃ গোচরো দেশঃ তং গতা। তাম্। (দ্বিতীয়া তত্পুরুষঃ। গোচরসঞ্চরবহব্রজব্যজাপণনিগমাশ্চেতি (৩।৩।১১৯)। গো + চর্ + ঘঃ। গাবশ্চরন্ত্যস্মিন্নিত্যধিকরণে ঘঃ নিপাত্যতে।) = নয়নবিষয়যাতাম্।

क्रिया सर्व्वस्याधो नयति विदितास्मीति वदनं
द्वयोर्दृष्ट्वालापं कलयति कथामात्मविषयाम्।
सखीषु स्मेरासु प्रकटयति वैलक्ष्यमधिकं
प्रिया प्रायेणास्ते हृदयनिहितातङ्कविधुरा॥

(১) 'সকলেই জানিয়াছে' এই লজ্জায় প্রিয়া অধোবদনা হয়। দুই জন আলাপ করিতেছে ইহা দর্শন করিলেই 'উহা নিজবিষয়ক কথা' এরূপ স্থির করে। সখীরা মৃদু হাস্যযুক্তা হইলে অত্যন্ত বিস্ময়ান্বিতা হয়। অতএব প্রিয়া সাগরিকা মনোগত ভয়ে অত্যন্ত অধীরা হইয়াছে।

(2) Supposing herself detected by all, she hangs down her head in shame. Seeing any two converse, she considers it as referring to herself. If the companions smile, she is highly astonished. So my beloved is extremely restless owing to her mental fright.

(3) सर्वैस्य विदितास्मीति क्रिया वदनमधो नयति। द्वयोरालापं दृष्ट्वात्मविषयां कथां कलयति। सखीषु स्मेरासु अधिकं वैलक्ष्यं प्रकटयति प्रायेण प्रिया हृदय-निहितातङ्कविधुरा आस्ते।

অবলোকন) এই যে প্রিয় বয়স্য এই দিক্ অবলোকন করিয়া বোধ হয় আমারই প্রতীক্ষা করিতেছেন। অতএব নিকটে যাই। (নিকটে গমন)। প্রিয় বয়স্যের জয় হউক। ওহে বন্ধো, ভাগ্যে অভিলষিত কার্য্যসিদ্ধি দ্বারা তোমার অভ্যুদয় হইতেছে।

(2) And I have sent *Basantaka* to bring some news of her. why is he delaying ?

(ENTER THE JESTER FULL OF PLEASURE.)

J—(Joyfully) O, ho, strange ! strange ! Hearing sweet words today from me, my friend will, I think, be so glad as he had not been even by ascending the throne of *Kousambi*, so I go and inform him. (Moving and seeing) Why, this is my friend. As he is staying with a look in this direction. I think he is waitiag for me. So I go to him. (Coming near) Prosperity to my friend. O my dear, you are luckily prospering with the success of our attempts.

(३) प्रतिपालयति = प्रतीक्षते। समीहितकार्य्यसिद्ध्या = अनुष्ठितकर्मफलेन = समीहितस्य अनुष्ठितस्य (अभिलषितस्य वा) कार्य्यस्य सिद्ध्या फलेन। ह्रीह्री = ह्रीह्री विस्मयहासयोरिति हेमचन्द्रः। एनम् = द्वितीयाटौस्स्वेन इति (२।४।३४) एतच्छब्दस्यान्वादेशे द्वितीयायामेनादेशः। किञ्चित् कार्य्यं विधातुं प्रयुक्तस्य कार्य्यान्तरं विधातुं पुनः प्रयोगः अन्वादेशः। (नपुंसकैकवचने एनदिति वक्तव्यम्। प्रत्याख्यातमेतत् परिवर्त्तयैनत्।) सापेक्षत्वेऽपि भवति। अथैनमङ्गुल्या श्रोणीचेति रवौ। तदेन-मुल्लङ्घितशासनं विधेहीति माघः। कथन्तर्हि नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापयेति जयदेवः ? आशीर्विषेण रदनच्छददंशदानमेतेन ते पुनरनर्हतया न गृह्यमिति नैषधे च ? अन्वादेशस्याविवक्षया। अनुवाद्यत्वमात्र विवक्षणात्। "इह तु वस्तुनिर्देशमात्रं कृत्वा एकमेव विधान"मिति वृत्तिकारः। वस्तुतस्तु एतत् सर्वं "मेतमात्तं ङित विद्याद् वाक्यस्मरणयोरङि"दिति भाष्यकारप्रयोगप्रामाण्यादेव साधु। "हं रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम्। जालान्तरेण मम वासगृहं प्रविष्टः श्रोणीतटं स्पृशति किं कुलधर्म्म एष इत्यादौ अयं श्रोणीतटं स्पृशति। एनं निवारयेति व्यत्यासेन योजनीयम्। एतद् or इदम् is replaced in द्वितीया, टा and ओस् विभक्ति by एन (and एनद् in neuter) if it be repeated for a purpose, having been previously used for a different one.

राजा—(सहर्षम्।) वयस्य, अपि कुशलं प्रियायाः सागरिकायाः।

विदू—(सगर्वम्।) भो, अइरेण सअं एव्व पेक्खिअ जाणिस्ससि। (क)।

राजा—(सपरितोषम्।) वयस्य, दर्शनमपि भविष्यति प्रियायाः।

विदूः—(साहंकारम्।) भोः, कीस ण भविस्सदि। जस्स दे उवहसिदविहप्पदिबुद्धिविहवो अअं अमच्चो। (ख)।

राजा—(विहस्य।) न खलु चित्रम्। किं न संभाव्यते त्वयि। तत्कथय। विस्तरतः श्रोतुमिच्छामि। (विदूषकः कर्णे एवमेवं कथयति। (सपरितोषम्।) वयस्य, इदं ते पारितोषिकम्। (इति हस्तादवतार्य कटकं ददाति।)

(क) भोः, अचिरेण स्वयमेव प्रेक्ष्य ज्ञास्यसि।

(ख) भोः, किमिति न भविष्यति। यस्य ते उपहसितबृहस्पतिबुद्धिविभवोऽयममात्यः।

(१) रা—(সহর্ষে) বয়স্য, প্রিয়া সাগরিকার কুশল ত?

বি—(সগর্বে) ওহে, নিজেই শীঘ্র দেখিয়া জানিতে পারিবে।

রা—(সহর্ষে) বয়স্য, প্রিয়াকে দেখিতেও পাইব?

বি—(সগর্বে) কেন পাইবে না? তোমার এই মন্ত্রী বৃহস্পতির বুদ্ধিপরাক্রমকেও উপহসিত করিয়াছে।

রা—(সহাস্যে) আশ্চর্য্য নহে বটে। তোমাতে কি অসম্ভব? বল, সবিশেষ শুনিতে ইচ্ছা। (বিদূষক কর্তৃক কর্ণে কথন, সহর্ষে) বয়স্য, এই তোমার পুরস্কার। (হস্ত হইতে বলয়দান)।

(2) K—(Joyfully) Friend, how does my beloved *Sagarika* do?

J—(Boastfully) Well, you will yourself soon know by seeing her.

K—(Joyfully) Friend, will my beloved be seen even ?

J—(Boastfully) Well, why not, when you have this councillor who has surpassed the wisdom of the celestial minister ?

K—(Laughing) Not really strange. There is nothing which you cannot manage. Tell me, I wish to hear fully. (The jester whispers —joyfully) Friend, this is your reward. (Takes off the bracelet and offers him).

(3) उपहसितबृहस्पतिबुद्धिविभवः = उपहसितः अधःकृतः बृहस्पतेर्बुद्धेर्विभवः गौरव प्रभावो वा येन स तथोक्तः = अधःकृतजीवबुद्धिगौरवः। बृहतां वाचां पतिरिति वाग्वं बृहतीति श्रुतेः। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्चेति वक्तव्यात् सुट् तलोपश्च। अमात्यः = मन्त्री। अमा + त्यप्। अव्ययात्त्यबिति(४।२।१०४)त्यप्।

विदू। (कटकं परिधाय आत्मानं निर्वर्ण्य) भोदु एव्वं दाव सुवण्णकडअमण्डिअहत्थं अत्तणो बह्मणीए गदुअ दंसइस्सं। (क)

राजा। (हस्ते गृहीत्वा निवारयन्) सखे पश्चाद्दर्शयिष्यसि, ज्ञायतां तावदधुना किमवशिष्टमह्न इति।

विदू। (परिक्रम्यावलोक्य च सहर्षम्) भो पेक्ख पेक्ख एसो क्खु गुरुआणुराओक्खित्तहिअओ संज्झावहूदिस्ससङ्केदो विअ अत्थगिरिसिहरकाणणं अणुसरदि भअवं सहस्सरस्सि। (ख)

(क) भवत्वेवं तावत्। सुवर्णकटकमण्डितहस्तमात्मनो ब्राह्मण्यै गत्वा दर्शयिष्यामि।

(ख) भोः, प्रेक्षस्व प्रेक्षस्व। एष खलु गुर्वनुरागोत्क्षिप्तहृदयः संध्यावधूदत्तसंकेत इवास्तगिरिशिखरकाननमनुसरति भगवान्सहस्ररश्मिः।

राजा। (विलोक्य सहर्षम्) सखे सम्यगुपलक्षितं पर्य्यवसितमहः। तथाहि—

(১) বি—(বলয় পরিধান ও নিজকে দর্শনপূর্ব্বক) থা'ক্। এখন নিজের ব্রাহ্মণীকে এই বিশুদ্ধস্বর্ণবলয়শোভিত হস্ত দেখাইব।

রা—(হস্তগ্রহণপূর্ব্বক বারণ করিয়া) সখে শেষে দেখাইও। এখন দেখ, দিনের কত টুকু বাকী।

বি—(পরিক্রমণ, অবলোকন ও সহর্ষে) ওহে দেখ, দেখ, এই সন্ধ্যাবধূদত্তসঙ্কেত, গুরু—প্রেমবিচলিত-হৃদয় সূর্য্যদেব অস্তগিরিশিরঃস্থিত কাননে অনুসরণ করিতেছেন।

রা—(দর্শন পূর্ব্বক সহর্ষে) বয়স্য, বেশ লক্ষ্য করিয়াছ—দিবা শেষ হইয়াছে—যেহেতু—

(2) J—(Wearing the bracelet and observing himself) Let it be. Thus adorned with a purely golden bracelet, I am going to show it to my wife.

K—(Stopping him) Not now, friend. Just see how much of the day remains ?

J—(Moving and observing and then joyfully) O see, see, the god Sun, smitten with deep love and getting some hints from the lady Twilight, is following to the wood on the top of the western mountain.

K—(Seeing joyfully) you have marked well, my friend. The day is ended. Since.—

(3) सौवर्णकटकः=सुवर्णस्य विकार इति मयड् वेत्यादिना (४।३।१४३) अण् वा। पक्षे सुवर्णमयम्। परिमाणार्थत्वे तु अण्येव। जातरूपेभ्यः परिमाण इति (४।३।१५३) कटकौ वलयोऽस्त्रियामित्यमरः।

सन्ध्यावधूदत्तसङ्केतः=सन्ध्या वधूरिव सन्ध्यावधूः। तया दत्तः कृतः सङ्केतो यस्य स तथोक्तः। "सङ्केत श्चेतन्यस्य सूरिभिः कथ्यते तथा संज्ञेति हलायुधः।=Singal, sign, token. अस्तगिरिशिखरकाननम्=शिरोग्रं शिखरं वा नेत्यमरः।=the top। पर्य्यवसितम्=अवसन्नम्। उपलक्षितम्=निरूपितम्।

अध्वानं नैकचक्रः प्रभवति भुवनभ्रान्तिदीर्घं विलङ्घ्य
प्रातः प्राप्तं रथो मे पुनरिति मनसि न्यस्तचिन्तातिभारः ।

संध्याक्रष्टावशिष्टस्वकरपरिकर-स्पष्टहेमारपङ्क्तिं
व्याकृष्यावस्थितोऽस्तक्षितिभृति नयतीवेष दिक्चक्रमर्कः ॥

(১) আমার এক চক্র রথ ভুবনভ্রমণায়ত-পথ অতিক্রম পূর্ব্বক পুনর্ব্বার প্রভাতে উপস্থিত হইতে সমর্থ হইবে না, মনে এইরূপ গুরু চিন্তা ধারণ করিয়া, সূর্য্য অস্তাচল আশ্রয় পূর্ব্বক, দিঙ্মণ্ডলকে আকর্ষণ করিয়া যেন তাহাতে সন্ধ্যাকর্তৃক আকর্ষণের অবশিষ্ট নিজ কিরণসমূহরূপ উজ্জ্বল স্বর্ণময় অরশ্রেণীর সংযোগ করিতেছেন।

(2) Heavy in mind with the thought that his one-wheeled chariot will not be able to appear again in the morning after going through the long path extending over the wide world, the Sun sitting upon the western mountain and dragging the circular horizon, is joining it, as it were, with the bright golden spokes made up of his rays which had been left behind after some were taken away from amongst them by the twilight.

(3) एकचक्रः मे रथः भुवनभ्रान्तिदीर्घमध्वानं विलङ्घ्य पुनः प्रातः प्राप्तुं न प्रभवतीति मनसि न्यस्तचिन्तातिभारः एषः अर्कः अस्तक्षितिभृति अवस्थितः दिक्चक्रं व्याकृष्य सन्ध्याकृष्टावशिष्टस्वकरपरिकर-स्पष्टहेमारपङ्क्तिं नयतीव।

(4) एकं चक्रं यस्य स एकचक्रः। आदित्यरथस्यैकचक्रत्वात्। सप्त युञ्जन्ति रथमेकचक्रमिति श्रुतेः। मे मम रथः स्यन्दनः भुवनस्य विश्वस्य भ्रान्त्या भ्रमणेन दीर्घमायतमध्वानं मार्गं विलङ्घ्यातिक्रम्य पुनः भूयः प्रातः प्रभाते प्राप्तुमागन्तुं न प्रभवति शक्नोतीति मनसि चित्ते न्यस्तः निहितः चिन्तायाः अतिभारः येन स तथोक्तः चिन्तितान्तकष्टाधिकः। एषः अर्कः सूर्यः। अस्तक्षितिभृति अस्ताचले अवस्थितः आश्रितः सन्। दिक्चक्रं दिङ्मण्डलं। पटलं पेटकं चक्रं चक्रवालञ्च मण्डलमिति हलायुधः। व्याकृष्य गृहीत्वा। सन्ध्यया आकृष्टेभ्यः गृहीतेभ्यः अवशिष्टानां स्वानां कराणां किरणानां परिकरः समूहः। भवेत् परिकरः सङ्घे पर्य्यङ्कपरिवारयोरिति मेदिनी। एव स्पष्टानि व्यक्तानि हेम्नः सुवर्णस्य अराणि चक्राङ्गविशेषाः। अरं शीघ्रे च चक्राङ्गे शीघ्रगे पुनरन्यवदिति मेदिनी। तेषां पङ्क्तिं श्रेणीम्। अर्करथस्य हिरण्मयत्वात् तत्र सुवर्णारसंयोजनं युक्तमेवेति भावः। तथाहि आकृष्णेन

रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्निति श्रुतिः। नयति प्रापयतीव योजयतीवेति यावत्।

(5) ममैकचक्रो रथः निखिलं विश्वं भ्रान्त्वा पुनः प्रातः कथमाविर्भविष्यतीति चिन्ताक्रान्तः सविता अस्ताचलस्थितः दिङ्मण्डलमाकर्षन् तत्र स्वकिरणरूपाणि हैमप्रभाणि अराणि योजयतीव।

(8) एकचक्रेण...प्रभूयते...रथेनेति न्यस्तचिन्तातिभारेण...अवस्थितेन...नीयते ...एतेन...अर्केण।

(9) स्रग्धरा वृत्तम्।

(10) रूपकानुप्राणितोत्प्रेक्षा। अनुप्रासश्च। आवृत्तिं यांतु वर्णानां नाति-दूरान्तरस्थिता। अलङ्कारस्य विद्वद्भिरनुप्रासः प्रदर्श्यते इति भोजः।

(11) हेमारपङ्क्तीति क्लीवलिङ्गपाठे तु दिक्चक्रमित्यस्य विशेषणत्वम्। तत्र सन्ध्याक्रष्टावशिष्टस्वकरसमूहेन स्पष्टस्वर्णारश्रेणि दिक्चक्रं व्याकृष्य नयति रथेन सह योजयतीत्यर्थः। हेमारपङ्क्तिरिति पुंलिङ्गपाठे अर्क इत्यस्य विशेषणत्वम्। करसमूहेन स्पष्टहेमारपङ्क्तिः सन् दिक्चक्रं व्याकृष्य नयतीव आत्मसङ्गं प्रापयतीत्यर्थः। सन्ध्याक्रष्टावशिष्टस्वकरपरिकरैरिति तृतीयान्तो विशिष्टः पाठश्च क्वचिद्दृश्यते। तत्र करणत्वमुक्तपदस्य ज्ञेयम्।

(12) The sun is said to have a chariot with one wheel and it is often alluded to. cf.—(1) एकचक्रो रथो यन्ता विकलो विषमा हयाः। आक्रामत्येव तेजस्वी तथाप्यर्को नभस्तल-मिति दण्डी। (2) "नभः समाक्रामति कृष्णवर्त्मना स्थितैकचक्रेण रथेन भास्कर" इति। Here आत्मनेपद under आङ उद्गमने (1. 3. 40) is said to have been barred by the meaning of व्याप्ति। Similarly his chariot is mentioned as golden and it is dragged by seven horses. e. f. the illustration of हिरण्मय in the वेद under the पाणिनि rule 6. 4. 175. Also "मध्ये ललाटन्तप-सप्तसप्तिः"। (रघुवंश)।

अपि च।

यातोऽस्मि पद्मनयने समयो ममैष
सुप्ता मयैव भवती प्रतिबोधनीया।
प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥

(1) "হে পদ্মাক্ষি! যাই, এই আমার সময় (প্রতিজ্ঞা), সুপ্তা তোমাকে আমিই প্রবোধিত করিব," অস্তাচলশিরঃসংস্থিতকর সূর্য্য এইরূপেই যেন কমলিনীর বিশ্বাস উৎপাদন করিতেছেন।

(2) "O lotus—eyed dear, I depart. This is my time (promise), I shall awake you." Thus the Sun with his rays (hand) on the western mountain, is creating trust (comfort) in the lotus plant.

(3) अस्तमस्तकनिविष्टकरः अयं सूर्यः, पद्मनयने यातः अस्मि, एष मम समयः, सुप्ता भवती मयैव प्रतिबोधनीया इति सरोरुहिण्याः प्रत्यायनां करोतीव।

(4) अस्तस्य अस्ताचलस्य मस्तके शिरसि निविष्टः स्थितः करः किरणः पक्षे हस्तः यस्य स तथोक्तः। आत्मजनशिरःस्पर्शपूर्वकस्य शपथस्य द्योतनात्। अस्तस्तु चरमक्ष्माभृदिति। बलिहस्तांशवः कराः इति चामरः। अस्ताचलाग्रसंस्थितकरः। अयं सूर्यो रविः। पद्मं पङ्कजं नयनं यस्याः पक्षे पद्मे इव नयने यस्याः सा पद्मनयना तत्सम्बुद्धौ। हे पङ्कजलोचने। अहं यातश्चलितः अस्मि भवामि। एष मम समयः गमनकालः पक्षे शपथः। समयाः शपथाचार-काल-सिद्धान्तसंविद इत्यमरः। सुप्ता निमीलिता पक्षे निद्रिता। भवती त्वं। मया एव नान्येनेत्यर्थः। प्रतिबोधनीया विकाशयितव्या पक्षे जागरणीया। इति इत्थं सरोरुहिण्याः कमलिन्याः प्रत्यायनां विश्वासोत्पादनां करोति विदधातीव। सूर्यकिरणसम्पर्कात् कमलानामुन्मेषः प्रसिद्धः।

(5) यथा प्रवासगमनोन्मुखः कान्तः संप्राप्तं गमनकालं निर्दिशन् पुनः करा-

कर्षणेन उत्थापयिष्यमाणां प्रियां सान्त्वयति तथा अस्ताचलनिचिप्तकरो दिवाकरः अन्तर्धानसमयमुल्लिखन् पुनःकिरणपातेन विकाशयिष्यमाणां पद्मिनीमाश्वासयति।

(6) सुप्ता=स्वप्+क्तः+टाप्। स्वपिति। सुष्वाप। स्वप्ता। स्वप्स्यति। स्वपितु। अस्वपीत् अस्वपत्। स्वप्यात्। सुप्यात्। अस्वाप्सीत्। अस्वप्स्यत्। स्वपन्। सुप्यते। अस्वापि। स्वप्तुम्। सुप्ता।

(7) प्रत्याययन्ताम्=प्रति+इण्+णिच्+युच्। ताम्। ण्यासश्रन्थो युजिति (३।३।१०७) युच्। The roots श्रन्थ and आस् and णिजन्त roots take युच् and not अ। Then टाप् in the feminine युच्=अन। लटि। बोधनार्थं प्रत्याययति लुङि प्रत्यायियत्। अन्यत्र गमयति। णौ गमिरबोधने इति (२।४।४६) गम्यादेशः। अजीगमत्।

(8) प्रतिबोधनीया=प्रति+बुध्+णिच्+अनीयर्+टाप्। णिजन्ते लुङि अबूबुधत्। अणिजन्ते दिवादेः बुध्यते। बुबुधे। भोत्स्यते। अबोधि अबुद्ध। बुद्धः। बोद्धुम्। बुद्धा। There are two more roots बुध in भ्वादि। (1) बुध अवगमने । परस्मैपदी। बोधति। बुबोध। बोधिष्यति। अबोधीत्। बोधित्वा बुधित्वा। बोधितुम्। and (2) बुधिर बोधने is उभयपदी। लुङि अबुधत् अबोधीत् अबोधिष्ट। अस्य तशब्दे (i e in the third person, singular) दीपजनेति (३।१।६१) चिण् न। तत्र दैवादिकैर्नित्यात्मनेपदिभिरकर्मकैः साहचर्यात् तादृश एव बुधि गृह्यते इति माधवः। c. f :—निबोध साधो! तव चेत् कुतूहलमिति कुमारे। All are भ्वादि।

(9) यातेन...भूयते...समयेन...एतेन...सुप्तामहं भवतीं प्रतिबोधयेयम्। प्रत्यायना...अनेन सूर्येण...करेण क्रियते।

(10) वसन्ततिलकं वृत्तम्।

(11) अवीतप्रिअलङ्कृतिः। सा च समासोक्तिजीविता। समासोक्तिः परिस्फूर्त्तिः प्रस्तुतेऽप्रस्तुतस्य चेदिति कुवलयानन्दे।

(12) तुल्येतिवृत्ततया पताकास्थानकं नाम प्राकरणिकस्य भाविनोऽर्थस्य सूचनम्।

(13) पद्मवदनेति वा पाठः।

तदुत्तिष्ठ। तत्रैव माधवीलतामण्डपे गत्वा प्रियतमासंकेतावसरं प्रतिपालयावः (१)।

विदू—सोभणं भणिदं। (इत्युत्तिष्ठति। विलोक्य।) भो वअस्स, पेक्ख पेक्ख। एसो क्खु बहुलीकिदविरलवणराइसण्णिवेसो गहीदघणपङ्कपीवरवणवराहमहिसकिसणच्छविपसरदि पुव्वदिसं पच्छादअन्तो तिमिरसंघाओ। (क)

(क) शोभनं भणितम्। भो वयस्य, प्रेक्षस्व प्रेक्षस्व। एष खलु बहुलीकृतविरलवनराजिसंनिवेशो गृहीतघनपङ्कपीवरवनवराहमहिषकृष्णच्छविः प्रसरति पूर्वदिशं प्रच्छादयंस्तिमिरसङ्घातः।

(১) অতএব এস, ঐ মাধবীলতামণ্ডপে গমনপূর্ব্বক প্রিয়তমাসঙ্কেতসময়ের প্রতীক্ষা করি।

বি—বেশ বলেছ। (উত্থান ও বিলোকনপূর্ব্বক) ওহে বয়স্য, দেখ, দেখ, এই বহুলীকৃত-বিরলবনরাজি-সন্নিবেশ, গৃহীত-ঘনকর্দ্দম-স্থূলবনবরাহমহিষ-চ্ছবি তিমিরসমূহ, পূর্ব্বদিক আবরণ করিয়া প্রসৃত হইতেছে।

(2) K—So get up, we shall await the time appointed by my beloved, in that Jasmin bower.

J—Well said. (Rising and looking) Friend, see, see, how this mass of darkness like the black appearance of the fat, wild boars and buffaloes besmeared with thick mud, obscures the groups of forests and advances on, after having covered the eastern quarter.

(१) प्रियतमासङ्केतावसरम् = प्रियतमायाः सङ्केतस्य संज्ञायाः इङ्गितस्येति यावत्। अवसरं समयम्। बहुलीत्यादि — अबहुलः बहुलः सम्पद्यमानः कृतः बहुलीकृतः विरलानां वनानां राजीनां श्रेणीनां सन्निवेशः स्थितिः येन सः = घनीकृताकरालवर्त्तिकाननसमूहस्थितिः। गृहीतेत्यादि = गृहीतः घनः सान्द्रः पङ्कः कर्द्दमो यैस्ते तथा। पीवराः स्थूलाः वनानां वराहा महिषाश्च त इव कृष्णा छविर्द्युतिर्यस्य स तथोक्तः = धृतसान्द्रकर्द्दमस्थूलारण्यशूकरमहिषकृष्णप्रभः। तिमिरसंघातः = अन्धकारसमूहः।

राजा—(सहर्षं समन्ताद्विलोक्य।) वयस्य, सम्यगुपलक्षितम्। तथाहि।

पुरः पूर्वामेव स्थगयति ततोऽन्यामपि दिशं
क्रमात् क्रामन्नद्रिद्रुमपुरविभागांस्तिरयति।
उपेतः पीनत्वं तदनु च जनस्येक्षणफलं
तमःसंघातोऽयं हरति हरकण्ठद्युतिहरः॥

तदादेशय मार्गम्।

(1) রা—(সহর্ষে চারিদিক দর্শন পূর্ব্বক) সখে, ঠিক বটে, যেহেতু এই নীলকণ্ঠ-কণ্ঠদ্যুতিহর তমোরাশি, অগ্রে পূর্ব্ব ও পশ্চাৎ অন্যদিক্ আচ্ছাদন পূর্ব্বক, ক্রমশঃ বিস্তৃত হইয়া, পর্ব্বতবৃক্ষনগরাংশগুলিকে অন্তর্হিত করে। তৎপর স্থূলত্ব প্রাপ্ত হইয়া লোকের দৃষ্টিহারী হয়।—পথ দেখাও।

(2) K—(Looking joyfully at all sides)—Rightly observed, friend, since.

This massive darkness exceeding the blue colour of the neck of the Destroying God, covers first the eastern and then the other quarters and then moving by degrees, obscures the bodies of mountains, trees, and cities and ultimately growing very thick, removes the visual power of men. Shew me the way—

(3) अयं हरकण्ठद्युतिहरः तमः संघातः पुरः पूर्वामेव ततः अन्यामपि दिशं स्थगयति। क्रमात् क्रामन् अद्रिद्रुमपुरविभागान् तिरयति। तदनु च पीनत्व-मुपेतः जनस्य ईक्षणफलं हरति।

(4) अयं हरस्य शिवस्य कण्ठस्य नीलत्वयुक्तस्येत्यर्थः। द्युतिं शोभां हरतीति तथोक्तः। हरतेरनुद्यमनेऽजिति (३।२।९) अच्। नीलकण्ठकण्ठकान्तिपरिभावी। तमःसंघातः तिमिरनिकरः पुर आदौ पूर्वां प्राचीमेव। ततोऽनन्तर मन्यामपरामपि दिशमाशां। स्थगयति आवृणोति। क्रमात् क्रामन् चलन् अद्रिद्रुमपुरविभागान् पर्वततरुनगरांशान्। तिरयति आच्छादयति। तिरःशब्दात् तत्करोतीति णिच्। णौ इष्ठवदिति टिलोपः। ततो लट्। स्थिरयतीति पाठस्तु प्रामादिकः। प्रियस्थिरेत्यादिना णौ इष्ठवद्भावे स्थिरशब्दस्य स्थादेशप्रसङ्गात् (६।४।१५७)। तदनु

ततपश्चात् पीनत्वं स्थूलत्व मुपेत: मास: जनस्य ईक्षणफलं नयनफलं दृष्टिमित्यर्थ: हरति मुष्णाति अपनयतीति यावत्।

(5) नीलकण्ठकण्ठकान्तिनाशीऽयं तम:समूह: क्रमश: पूर्व्वादीदिश: उपवनगर पर्व्वतादीन् जनानां नेत्रशक्तिञ्च विलुम्पति।

(6) स्थगयति = स्थग संवरण इति अयमङ्गल:। भ्वादीनां घुरादीनाञ्चाकृतिगणत्वात्। लुङि अस्थगीत्। अतिस्थगत् म। C. f :—विष्वग्मोह: स्थगयति कथं मन्दभाग्य. करोमीति भवभूति:। स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टमिति माघ: (११।३४)। निमित्तशून्ये स्थगिता रजोभिरिति भट्टि: (१२।६९)। उद्गत रज:स्थगितैकदिङ्मुख इति भारवि: (१४।३१)।

(7) क्रमात् = क्रममवलम्ब्य। ल्यब्लोपे कर्म्मण्यधिकरणे चेति वक्तव्यात् पञ्चमी।

क्रामन् = क्रम् + शतृ। क्रम: परस्मैपदेष्विति दीर्घ:। पचे क्राम्यन। वृत्त्याद्यभावान्नात्मनेपदम्। तिरयति—लुङि अतीतिरत्। पीनत्वम् = प्याय् + क्त + त्व। नत्।

(8) पूर्वा...स्थग्यते...अन्या दिक्...। क्रामता···विभागास्तिर्य्यन्ते...उपेतेन तम:संघातेन···फलेन ह्रियते...हरेण।

(9) शिखरिणीवृत्तम्।

(10) दीपकोऽलङ्कार:। जातिक्रियागुणद्रव्यवाचिनैकवर्त्तिना सर्व्ववाक्योपकारश्चेत् तमाहुर्दीपकं बुधा इति लक्षणात्।

विदू। एदु एदु पिअवअस्सो (इति परिक्रामत:)।

(निरूप्य) भो वअस्स एदं क्खु समासण्णं बहुलपाद-वदाए पिण्डीकिदान्धआरं विअ मअरन्दुज्जाणं, ता कधं एत्थ मग्गो लक्खीअदि। (क)

राजा। (गन्धमाघ्राय) वयस्य गच्छाग्रत:, ननु सुपरिज्ञात एवात्र मार्ग:। तथाहि

(क) एतु एतु प्रियवयस्य:। भो वयस्य इदं खलु समासन्नं बहुलपादपतया पिण्डीकृतान्धकारमिव मकरन्दोद्यानम्। तत्कथमत्र मार्गो लक्ष्यते।

(1) বি—এস, এস, প্রিয়বয়স্য। (পরিক্রমণ ও নিরূপণ) বয়ো, ঘনবৃক্ষতাহেতু পিণ্ডীকৃত অন্ধকারের ন্যায় মকরন্দোদ্যান নিকটেই, ইহাতে কি প্রকারেপথ দেখিব?

রা—(আঘ্রাণ পূর্ব্বক) আগে যাও, এস্থলে পথ বেশ জানা আছে—তথাচ।

(2) J—Come, come, friend. (Moving and finding) O friend, here is this *Makaranda* garden like a mass of darkness owing to the thick rows of trees. How can the way be seen through here?

K—(Smelling) Precede, friend. The path is here well known. Also—

(3) पिण्डीकृतान्धकारमिव = सान्द्रीकृततमइव। पिण्डी वोलि वले सान्द्रे हेहागारैकदेशयोरिति मेदिनी।

पालीयं चम्पकानां नियतमयमसौ सुन्दरः सिन्धुवारः
सान्द्रा वीथी तथेयं बकुलविटपिनां पाटला पङ्क्तिरेषा।
आघ्रायाघ्राय गन्धं विविधमधिगतैः पादपैरेवमस्मि-
न्व्यक्तिं पन्थाः प्रयाति द्विगुणतरतमोनिह्नुतोऽप्येष चिह्नैः॥

(इति परिक्रामतः।)

(1) এই চম্পক শ্রেণী। এই নিশ্চিত সুন্দর সিন্ধুবার। এই বকুল বৃক্ষের ঘন পঙ্‌ক্তি। এই পাটলা পঙ্‌ক্তি। নানা প্রকার গন্ধ আঘ্রাণ পূর্ব্বক প্রাপ্ত বৃক্ষচিহ্ন দ্বারা এস্থলে দ্বিগুণতরান্ধকারপ্রচ্ছাদিত পথও প্রকাশিত হয়। (পরিক্রমণ)

(2) This is the row of the *champas*. This is surely that of the beautiful *vitex-trifolia*. Here is the thick range of the *mimusops elengi* and this is the cluster of the *Bignonia suave-olens*. Through their various odours, the several trees can be reached and thus the way here, though doubly darkened, appears to be very clear. (Moving).

(3) इयं चम्पकानां पाली। अयमसौ नियतं सुन्दरः सिन्धुवारः। तथा इयं बकुलविटपिनां सान्द्रा वीथी। एषा पाटला पङ्क्तिः। अस्मिन् विविधं गन्धमाघ्रायाघ्राय अधिगतैः पादपैरिव चिह्नैः एष द्विगुणतरतमोनिह्नुतोऽपि पन्थाः व्यक्तिं प्रयाति।

(4) इयं चम्पकानां पाली श्रेणी। अयमसौ नियतं निश्चितं सुन्दरः शोभनः

सिन्धुवारः निर्गुण्डी । तथेयं वकुलविटपिनां केसरवृक्षाणां सान्द्रा घना वीथी राजिः । एषा पाटलानां पङ्क्तिः श्रेणिः । अस्मिन् मकरन्दोद्याने विविधं नानाप्रकार गन्धमाघ्रायाघ्राय । नित्यवीप्सयोरित्याभीक्ष्ण्ये द्वित्वम् । पुनः पुनः आघ्रायेत्यर्थः । अविरलैः घनैः पादपैः वृक्षैरेव चिकुरैरिव द्विगुणतरतमोनिह्नुतः अत्यन्तान्धकाराच्छादित अपि पन्थाः मार्गः व्यक्तिं प्रकाशं प्रयाति गच्छति ।

(5) अत्र चम्पकपाटलाबकुलसिन्धुवाराणां पङ्क्तयो वर्ण्यन्ते। अत्र विविध गन्धं पुनः पुनराघ्राय अनुभूतं वृक्षैरेव निविडान्धकारवृतोऽपि मार्गो विज्ञायते ।

(6) व्यक्तिम्—वि + अञ्ज् + क्तिन् । ताम् । अनक्ति । आनञ्ज । अङ्क्ष्यति अङ्क्ष्यति । आञ्जीत् । अज्यते । आङ्क्ष्व । अक्तम् । अञ्जन् । अङ्क्त्वा अक्त्वा अङ्क्त्वा । अञ्जितुम् अङ्क्तुम् । पङ्क्तिः—पचि + क्तिच् ।

द्विगुणतरतमोनिह्नुतः—निह्नुतमिति भावे क्तः । तमसां निह्नुतमिति षष्ठीसमासः । ततो द्विगुणतरं तमोनिह्नुतं यस्मिन् स तथोक्त इति बहुव्रीहिः । अन्यथा द्विगुणतरतमसा निह्नुत इति तृतीयायां तु ओजः सहोऽम्भस्तमसस्तृतीयाया इत्यलुक् (६।३।३)स्यात । सततनैशतमोवृतमन्यत इति भारवेः उदन्वदम्भःपरिवीतमूर्त्तिरिति माघस्य वक्ष्यमाण कृतलोवृतः कार्मुकेति चक्रधमनमङ्गना इति कालिदासस्य (रघौ १८।२४) प्रयोगस्यात्र न निर्वाहकः । "उत्तरपदेनात्र पूर्वपदमाक्षिप्यते तथाच तमःशब्दः पूर्वपदं किं तर्हि सततनैशतमः शब्द" इत्यादि भारविपद्यसमालोचनपरा पदमञ्जरीकारव्यवस्थापि भाष्यवार्त्तिकविरोधात् स्वयंकृतपूर्वापरव्याख्यानविरोधाच्च चिन्तनीयेति मनोरमायामुपेक्षिता । एवं "उत्तरपदाधिकारे तदन्तग्रहणं नास्ति । किन्तु केवलपदाधिकार एवे"ति दुर्घटवृत्तिकारमतमपि भाष्यविरोधाद् निराकृतम् । यत्तु श्रीपतिना "द्विवचनबहुवचनयोरत्र समासः । तमोभ्यां वृतं तमोभिर्वृतं तमोवृतमितीष्ट मेव" इत्युक्तम् तदपि पाणिनीयेषु न दृष्टम् । सूत्रे च तृतीयाया इति हि निर्देशः । गोपुत्री वर्षासुज इत्यादौ बहुवचनेऽप्यलुग्दर्शनाच्च ।

(7) पालि यूकाश्रिपङ्क्तिषु । जातश्मश्रु स्त्रियां प्रान्ते सेतौ कल्पितभोजने । प्रशंसाकर्णलतयोरुत्सङ्गे प्रस्थचिह्नयोरिति हेमचन्द्रः । अस्यैव व्याख्यायां तच्छाखेण महेन्द्रसूरिणा रत्नावलीश्लोक इत्युदाहृतः—"पालीयं चम्पकानां परिमलविलसत्षट्पदश्रेणिभाजामिति । कृदिकारादक्तिन इति वाच्यात् पक्षे ङीष् । पाली । परिमलेन

विकसतां षट्पदानां येषां मञ्जवे लभन्त इति तेषाम्। भञ्जो णिवृरिति णिः। परिमर्दः विमर्दोत्थ इत्यमरः विमर्दने इति हेमचन्द्रः।

पाटला = पाटलिः पाटलामोघा काचस्थाली फलेरुहेत्यमरः। वृक्षविशेषः। टाबन्तं प्रातिपदिकम्। पाटलीति बिल्वादिषु (४।३।१४६) ङीषन्तश्चाप्यत्।

नियतम् = निश्चितं नियतं स्मृतमिति हलायुधः। = positively, decidedly.

सान्द्रम् = सान्द्रं वने घने मृदाविति मेदिनी।

वीथी = वीथ्यालिरावलिः पङ्क्तिः श्रेणी रेखास्तु राजयस्त्वर इत्यमरः। = a row or range

(8) पाल्या अनया। अनेन अमुना सुन्दरेण सिन्धुवारेण···। सान्द्रया वीथ्या ···अनया···पाटलया···पङ्क्त्या। व्यक्तिः पथा यायते—निकृतेन एतेन।

(9) स्रग्धरा वृत्तम्।

विदू—भो:, एदं क्खु णिपडन्तमत्तमहुअरबउलकुसुमामोदवासिददिसामुहं मसिणमरगअमणिसिलाकुट्टिमसुहाअन्तचरणसंचारसूइदं तं ज्जेव्व माहवीलदामण्डवं संपत्तह्म। ता इह ज्जेव्व चिट्ठदु भवं जाव अहं देवीवेसधारिणीं साअरिअं गेह्णिअ लहुं आअच्छामि। (क)

राजा—वयस्य, तेन हि त्वर्यताम्।

विदू—वअस्स, मा उत्तम्म। एसो आअदोह्मि। (इति निष्क्रान्तः।) (ख)

(क) भो:, एतत्खलु निपतन्मत्तमधुकरबकुलकुसुमामोदवासितदिङ्मुखं मसृणमरकतमणिशिलाकुट्टिमसुखायमानचरणसंचारसूचितं तमेव माधवीलतामण्डपं संप्राप्तौ स्वः। तदिहैव तिष्ठतु भवान्यावदहं देवीवेषधारिणीं सागरिकां गृहीत्वा लघ्वागच्छामि।

(ख) वयस्य, मा उत्ताम्य। एष आगतोऽस्मि।

(১) বি—ওহে, আমরা এই নিপতন্মত্তমধুকরবকুলকুসুমামোদবাসিতদিঙ্মুখ, মসৃণমরকতমণিশিলাকুট্টিমসুখানুভবকারিপাদসঞ্চারসূচিত মাধবীমণ্ডপে আসিয়াছি। তুমি এখানে থাক। আমি শীঘ্রই দেবীবেশধারিণী সাগরিকাকে আনিতেছি।

রা—সখে, শীঘ্র কর।

বি—বয়স্য, অস্থির হইও না। এই আসিতেছি। (গমন)

(২) J—O, we have reached that Jasmin bower in which the *Bakool* flowers with maddened bees falling on them, have sweetly scented all space and which is known by the movement of feet feeling pleasure on the pavement of bland slippery emerald rocks. Stay here till I return soon with *Sagarika* dressed like the queen.

K—Make haste, friend.

J—Yes friend, be not impatient. I am almost come back (exit)

(৩) निपतदित्यादि &c. = निपतन्तः मत्ता मधुकरा येषु तानि तथोक्तानि। तेषां बकुलानां कुसुमानामामोदेन सौरभ्येण वासितं सुरभीकृतं दिङ्मुखं दिङ्मण्डलं यस्मिन् तत् = उपविष्टमत्तालिकुसुमपुष्पगन्धसौरभीकृतदिग्मण्डलम्। मसृणेति = मसृणानां स्निग्धानां मरकतानां गारुत्मतानां मणीनां रत्नानामिव शिलानां प्रस्तराणां कुट्टिमे बद्धभूमौ सुखायमानेन सुखमनुभवता चरणसञ्चारेण पादन्यासेन सूचितम् प्रकटितम = स्निग्धमरकतशिलारचितकुट्टिमसुखकरपादसञ्चारप्रकटितम्। चिक्कणं मसृणं स्निग्ध मित्यमरः।

राजा—तावदहमप्यस्यां मरकतशिलावेदिकायामुपविश्य प्रियायाः संकेतसमयं प्रतिपालयामि। (उपविश्य सचिन्तम्।) अहो, कोऽपि कामिजनस्य स्वगृहिणीसमागमपरिभाविनोऽभिनवजनं प्रति पक्षपातः। तथाहि

(১) রা—ততক্ষণ আমিও এই মরকতশিলাবেদীতে বসিয়া প্রিয়ার সঙ্কেতসময় প্রতীক্ষা করি। (উপবেশন ও চিন্তা) অহো স্বগৃহিণীসমাগমপরিভাবী কামুকদের নবীনা কামিনীর প্রতি কি অদ্ভুত পক্ষপাত! তথাচ—

(2) K—I too take my seat on this elevated emerald floor and await the time appointed by my beloved. (Sits and thinks) O, how strange is the partiality for a new sweet heart, of an amorous man who slights the connection with his own wife ! Also—

(3) स्वगृहिणीत्यादि &c.—स्वस्याः गृहिण्याः समागमस्य परिभावी तस्य। परि+भू+णिनिः। ग्रह्यादिभ्यो णिनिः (३।१।१३४)। कदाचिदुपसर्गेऽपि णिनिः स्यात्। अनुनादिमलक् (५।४।१२) विसारिणो मत्स्य इति निर्देशाज्ज्ञापकात् (५।४।१६)। स बभूवोपजीविनामिति। न्यषेधि शेषोऽप्यनुयायिवर्ग इति कालिदासः। न वञ्चनीयाः प्रभवोऽनुजीविभिरिति भारविः। पतत्यधोधाम विसारीति माघः। परिभाविन इत्यत्र न भाभूपूकमिगमिप्यायिवेपामिति (८।४।३४) भवतेरुपसर्गस्थनिमित्तकणत्वनिषेधात् कृत्यच इति (८।४।२९) णत्वस्य नित्यत्वबाधेन प्रातिपदिकान्तनुम्विभक्तिषु चेत्यनेन (८।४।११) वा णत्वम्।

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता
घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ।
वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो
रमयतितरां संकेतस्था तथापि हि कामिनी॥

(1) নির্দ্দিষ্টনির্জ্জনস্থা ভীতা অঙ্গনা (অর্থাৎ অভিসারিকা) প্রণয়ীর মুখে প্রেমনির্ম্মল দৃষ্টিদান করে না। কণ্ঠালিঙ্গনে অনুরাগভরে গাঢ়রূপে কুচসংযোগ করে না। আগ্রহে ধৃতা হইলেও বার বার "যাইতেছি" বলে। তথাপি প্রীতিলাভ হয়।

(2) The timid sweet-heart attending a tryst, does not look up at the face of her lover with expressive love. Nor can she embrace with her full pressing breasts. If earnestly detained, she wants often to go away. Still she pleases the most.

(3) सङ्केतस्था कामिनी शङ्किता वक्त्रे प्रणयविशदां दृष्टिं न ददाति। कण्ठाश्लेषे रसात् पयोधरौ घनं न घटयति। प्रयत्नधृतापि बहुशः गच्छामीति वदति। अहह तथापि हि रमयतितराम्।

(4) सङ्केतस्था निर्द्दिष्टस्थानस्थिता अभिसारिकेत्यर्थः। कान्तार्थिनी तु या याति सङ्केतं साभिसारिकेत्यमरवचनात्। कामिनी अङ्गना। शङ्किता भीता सती।

वक्रे प्रणयिन आनने प्रणयविश्रद्दामनुरागाभिरामां दृष्टिं न ददाति पातयति। कण्ठाश्लेषे कण्ठालिङ्गने रसात् प्रेम्नः प्रीत्या वा पयोधरौ कुचौ घनं गाढं न घटयति योजयति। प्रयत्नेन आग्रहेण धृता गृहीतापि बहुशः पुनःपुनर्गच्छामि यामीति वदति ब्रवीति। अहो तथापि ईदृशे प्रेमानुबन्धविरोधेऽपि हि निश्चितं। हि पादपूरणे हेतौ विशेषेऽप्यवधारणे इति मेदिनी। रमयतितरामधिकतरं प्रीणाति।

(5) अष्टदर्शिता अभिसारिका दर्शनालिङ्गनावस्थानादिकं पर्य्याप्तं नानुतिष्ठति तथाच कामं प्रीणाति।

(6) पयोधरौ—पयसां धरौ। तौ। कर्मणः शेषत्वविवक्षया षष्ठीसमासः। अत कर्मणः शेषत्वविवक्षा हि "अकारादनुपपदात् कर्मोपपदो विप्रतिषेधेने"ति वार्त्तिकं च निरस्तं मन्तव्यम्। अन्यथा गङ्गाधरशैषधरवज्रधरभूधरसगधरादयो न स्युः। एतच्च शब्दकौस्तुभादिषु द्रष्टव्यम् (३।२।१)। पच, धर, &c. are obtained with अच् under (3. 1. 134.) and काण्डलाव, ओदनपाच &c. are derived with अण् under 3. 2. 1. Now there is a वार्त्तिक quoted above, in 3. 2. 1. which enjoins that, between अनुपपद and कर्म्मोपपद अकारप्रत्यय, विप्रतिषेध shall prevail. अच् is an अकार-प्रत्यय which is joined to the roots when not preceded by any उपपद and अण् is another which is with a कर्मोपपद. So the विप्रतिषेध or subsequent rule being stronger, गङ्गाधर &c. falls under a serious objection. हरदत्त accepts here a संज्ञात्व But भट्टोजि says यन्नर &c. may be संज्ञावाचक, but not गङ्गाधर &c. We give above भट्टोजि's व्यवस्था। c.f.—सृजगन्धं माल्यधारय इति भट्टिः। 'न मज्जमवान्तरधारयस्य ते" इति नैषधीये। बहुशः=बहु+शस्। बह्वल्पार्थाच्छस् कारकादन्यतरस्यामिति शस् (५।४।४२)। रमयतितराम्=रम+णिच्+लट् तिप्+तरप् (घ)+आमु। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे इत्यामुप्रत्ययः (५।४।११)। रमते। रेमे। रंस्यते। अरंस्त। अरामि। अरीरमत्। रन्त्वा। रन्तुम्। रममाणः। रतः। रम्यते। केचिदिममुदितं पठित्वा क्त्वायामिड् विकल्पमुदाहरन्ति। तन्महान्तो न सहन्ते इति माधवः।

(8) प्रणयविशदा दृष्टिः दीयते। शङ्कितया घट्यते पयोधरौ। उच्यते। गम्यते प्रयत्नभृतया। रम्यतेतरां सङ्केतस्थया कामिन्या।

(9) हरिणीवृत्तम्। नसमरसलाग: षड् वेदैः हयैर्हरिणी मतेति लक्षणात्। The pauses are at the end of the sixth, thence fourth (वेद), thence seventh (अश्व) vowel and the गण is in the order न-स-म-र-स-ल-ग in each line.

(10) दीपकालङ्कारः।

(11) अत्र रूपं नाम नाटकीया गर्भसन्धिः। रूपं वितर्कवद्वाक्यमिति दशरूपके।

अये कथञ्चिरयति वसन्तकः, तत्किन्नु खलु विदितः स्यादयं वृत्तान्तो देव्या वासवदत्तया।

(ततः प्रविशति वासवदत्ता काञ्चनमाला च।)

वास। हञ्जे काञ्चणमाले सच्चं जेव्व मह वेसधारिणी भविअ साअरिआ अज्जउत्तं अहिसरिस्सदि त्ति। (क)

काञ्च—कधं अस्सधा भट्टिणीए णिवेदीअदि। अहवा चित्तसालिआदुवारे उवविट्ठो वसन्तओ जेव्व दे पच्चअं उप्पाद-इस्सदि। (ख)

(क) हञ्जे काञ्चनमालि, सत्यमेव मम वेशधारिणी भूत्वा सागरिकार्यपुत्रमभिसरिष्यति इति।

(ख) कथमन्यथा भर्त्र्यै निवेद्यते। अथवा चित्रशालिकाद्वार उपविष्टो वसन्तक एव ते प्रत्ययमुत्पादयिष्यति।

(1) বসন্তক বিলম্ব করিতেছে কেন? মহিষী বাসবদত্তা এই বৃত্তান্ত জানিয়াছে কি?

(বাসবদত্তা ও কাঞ্চনমালার প্রবেশ)

বাস—ওলো কাঞ্চনমালে, সত্যই কি সাগরিকা আমার বেশ ধারণ করিয়া আর্যাপুত্রের অভিসরণ করিবে?

কা—তাহা না হইলে, আপনাকে ইহা বলিব কেন? চিত্রশালাদ্বারে উপবিষ্ট বসন্তক ও আপনার বিশ্বাসোৎপাদনের কারণ হইবে।

(2) Well, why does *Basantaka* delay? Has this matter come to the knowledge of the queen?

(ENTER THE QUEEN AND HER MAID.)

Qu.—O wench, is it true that *Sagarika* disguised in my attire, will secretly meet my husband?

Maid—Otherwise why will you be told so? Or *Basantaka* just now loitering at the door of the picture gallery may be enough to induce your belief in this.

(3) चिरयति = विलम्बते। चिरशब्दात् तत्करोतीति णिच्। ततो लट्। वासवदत्ताया: = ज्ञस्य च वर्त्तमान इति विदितशब्दयोगे षष्ठी। तृतीयान्तपाठेन विदित इति भूते क्त:। तत: कर्त्तरि तृतीया। "तेनेत्यधिकारे उपज्ञात इति (४।३।११५) मतितत्वाद् ज्ञानार्थेभ्यो भूतेपि क्त:" इति शब्दकौस्तुभे भट्टोजि:। सामान्यापेक्षं ज्ञापक मिति मैत्रेयरक्षित:। हरदत्तस्तु नेदं मन्यते—"पूजितो य: सुरासुरैरित्यादि न चिन्त्यमेवेति पदमञ्जर्यां। तथाच कविषु बहुलम्। (१) संवत्सरमिमं यत्र वसामोऽविदिता: परैरिति भारते विराटपर्वणि। जनैरविदितविभवो भवानीपतिरिति भारवि: (२)। (३) जनविदितैर्भवदाप्तलोकैरिति माघ:। (४) कुलहं स रामसहित: कृतवानिति भट्टि:। (५) गङ्गा हिमवत: सारां विज्ञातोस्य हिमाद्रिर्गतिं कालिदास:। (६) अनुप्रासधिया गौड़ैस्तदिष्टं बन्धगौरवात्। ज्ञातो लङ्केश्वर: कृच्छादाञ्जनेयेन तत्त्वत इति दण्डी च। Since पाणिनि connects उपज्ञाते (4. 3. 115.) with तेन, मतिबुद्धिपूजार्थक roots also take क्त in the past tense and hence their कर्त्तृपद is तृतीयान्त. This is the opinion of रक्षित and भट्टोजि, though हरदत्त raises a discordant note. हरिदीक्षित, नागेश, ज्ञानेन्द्र &c...of course echo भट्टोजि।

अभिसरिष्यति = सङ्गंस्यति। = will go to an assignation for। सृ गताविति भ्वादि:। सरति। शीघ्रगत्यर्थे तु धावति। लुङि असार्षीत्। ससार। स्रियते। असारि।

वास। तेण हि तदो तहिं एव्व गच्छह्म। (क)

काञ्च। एदु भट्टिणी (इति परिक्रामतः)। (ख)

(ततः प्रविश्यत्युपविष्टः कृतावगुण्ठनो वसन्तकः।)

विदु। (कर्णौ दत्वा) जह अअं चित्तसालिआदुवारे पदसद्दो सुणीअदि, तह तक्केमि आअदा साअरिआ त्ति। (ग)

काञ्च। भट्टिणि इयं सा चित्तसालिआ, ता इध ज्जेव्व चिट्ठ, अहं पि वसन्तअस्स सग्गं देमि (इति च्छोटिकां ददाति)। (घ)

विदू। (सहर्षम् उपसृत्य सस्मितम्।) सुसङ्गदे सरिसो क्खु तुए किदो कञ्चणमालाए वेसो, अध साअरिआ दाणिं कहिं। (ङ)

(क) तेन हि ततस्तत्रैव गच्छामः।

(ख) एतु एतु भर्त्री।

(ग) यथायं चित्रशालिकाद्वारे पदशब्दः श्रूयते तथा तर्कयाम्यागता सागरिकेति।

(घ) भर्त्रि इयं सा चित्रशालिका, तदिहैव तिष्ठ, अहमपि वसन्तकस्य संज्ञां ददामि।

(ङ) सुसंगते सदृशः खलु त्वया कृतः काञ्चनमालाया वेशः। अथ सागरिकेदानीं क्व।

(১) বাস—অতএব চল, সেই খানেই যাই।

কাঞ্চ—ভর্ত্রি, আসুন (পরিক্রমণ, কৃতাবগুণ্ঠন বসন্তকের প্রবেশ)

বি—(শ্রবণ পূর্ব্বক) চিত্রশালাদ্বারে পদশব্দ শুনা যাইতেছে। বোধ হয় সাগরিক উপস্থিত।

কা—ভর্ত্রি, এই সেই চিত্রশালা, এখানে অপেক্ষা করুন। আমি বসন্তককে সঙ্কেত করি (তুড়ি দেওয়া)।

ও—(সহর্ষে আগমন পূর্ব্বক সহাস্তে) সুসঙ্গতে, ঠিক কাঞ্চনমালার বেশ ধরিয়াছ। সাগরিকা কোথায় ?

(2) Q—So let us go there.

M—Please to come, mistress. (Moving. Enter the jester sitting and veiled.)

J—(Listening) Trampling noise is heard at the door of the picture gallery. I think *Sagarika* is come.

M—Mistress, this is the picture gallery. Please stay here, make a signal to *Basantaka*. (Snaps her finger.)

J—(Joyfully coming near and smiling) *Susangata*, you have precisely adopted *Kanchanmala's* dress, where is now *Sagarika*?

(3) सञ्ज्ञा = संकेतम् = signal. संज्ञा स्यात् चेतना नाम हस्ताद्यैश्चार्थसूचना इत्यमरः। ... एकतरेणैव गतार्थत्वात्।

काञ्च—(अङ्गुल्या दर्शयन्ती।) णं एसा। (क)

विदू—(दृष्ट्वा सविस्मयम्) एसा फुडं ज्जेव्व वासवदत्ता। (ख)

वास—(साशङ्कमात्मगतम्।) अहं पच्चभिजादह्मि. ... ता गमिस्सं। (इति गन्तुमिच्छति।) (ग)

विदू—भोदि साअरिए, इदो आअच्छ। (घ)

(वासवदत्ता विहस्य काञ्चनमालामवलोकयति।)

काञ्च—(अपवार्याङ्गुल्या विदूषकं तर्जयन्ती।) हदास, सुमरिस्ससि एदं वअणं। (ङ)

विदू—तुवरदु तुवरदु साअरिआ। एसो क्खु पुव्वदिसादो उग्गच्छदि भअवं मिअलञ्छणो। (च)

वास—(ससंभ्रममपवार्य्य।) भअवं मिअलञ्छण, णमो

दे। मुहुत्तअं दाव ओवारिदसरीरो होहि। जेण पेक्खामि से भावाणुबंधं। (छ)

(सर्वे परिक्रामन्ति)

(क) नन्वेषा।

(ख) एषा स्फुटमेव वासवदत्ता।

(ग) कथं प्रत्यभिज्ञातास्म्यनेन। तद् गमिष्यामि।

(घ) भवति सागरिके, इत आगच्छ।

(ङ) हताश, स्मरिष्यसीदं वचनम्।

(च) त्वरतां त्वरतां सागरिका। एष खलु पूर्वदिशि उद्गच्छति भगवान्मृगलाञ्छनः।

(छ) भगवन्मृगलाञ्छन, नमस्ते। मुहूर्त तावदपवारितशरीरो भव येन प्रेक्षिष्येऽस्य भावानुबन्धम्।

(1) क—(अঙ্গুলিদ্বারা প্রদর্শনপূর্ব্বক) এই যে।

বি—(দর্শনপূর্ব্ব সবিস্ময়) ইনি ঠিক বাসবদত্তা।

সা—(শঙ্কার সহিত স্বগত) ইহা কর্তৃক প্রত্যভিজ্ঞাতা হইয়াছি।—অতএব চলিয়া যাই (গমনোদ্যত)।

বি—মাননীয়া সাগরিকে, এখানে আসুন (বাসবদত্তার সহাস্যে কাঞ্চনমালাকে দর্শন।)

কা—(জনান্তিকে বিদূষককে অঙ্গুলি দ্বারা তর্জ্জনপূর্ব্বক) হতাশ, এইকথা মনে করিতে হইবে।

বি—সাগরিকে, সত্বর, সত্বর। ভগবান্ শশাঙ্ক, পূর্ব্বদিক্ হইতে উদিত হইতেছেন।

ব—(সভয়ে জনান্তিকে) ভগবন্ শশাঙ্ক, আপনাকে প্রণাম। মুহূর্ত্ত গুপ্তদেহ হইয়া থাকুন। আমি ইহার পরবর্ত্তিকার্য্য দেখি (সকলের গমন)।

(2) M—(Pointing) Well, there.

J—(Looking with wonder) Why this is the very queen herself.

Q—(With misgiving, aside) O, he has recognised me! I am going (Moving).

J—Respected *Sagarika*, please to come this way, (The queen smiles and glances at her maid).

M—(Threatening the jester with her forefinger and aside to him) O rogue, you shall have to remember this.

J—Make haste, make haste, *Sagarika.* The moon is rising in the east.

Q—(With fear, aside) Greetings to you, O moon, conceal your body a little so that I may observe his subsequent behaviour. (An moving).

(3) प्रत्यभिज्ञाता = अनुस्मृता = परिचिता। अपसारितशरीर: = गूढदेह: ; भावानुबन्धम् = परवर्त्तिक्रियाम्।

राजा—(सोत्कण्ठमात्मगतम्।) उपस्थितप्रियासमागमस्यापि किमिदमत्यर्थमुत्ताम्यति मे मन:। अथवा

तीव्र: स्मरसंतापो न तथादौ बाधते यथासन्ने।
तपति प्रावृषि नितरामभ्यर्णजलागमो दिवस:॥

(1) রা—উৎকণ্ঠার সহিত, স্বগত উপস্থিত প্রিয়াসঙ্গমেও আমার মনঃ কেন উৎকণ্ঠিত হইতেছে? অথবা তীব্র কামদাহ প্রিয়জনের অনুপস্থিতিতে যেরূপ সমাগমে সেরূপ ক্লেশকর হয় না। আসন্নজলপাত দিবসই বর্ষাকালে অত্যন্ত তাপ দিয়া থাকে।

(2) K—(Anxiously, aside) Why is my heart so agitated, though an interview with my sweet heart is near? Or the flame of love does not burn so before as it does, when the beloved is near. In the rainy season that day is sultry, in which it will rain.

(3) तीव्र: स्मरसन्ताप: यथा आसन्ने तथादौ न बाधते। अभ्यर्णजलागमो दिवस: प्रावृषि नितरां तपति।

(4) तीव्र तीक्ष्ण: स्मरसन्तापो मदनदाह: यथासन्ने समीपवर्त्तिनि प्रियजन इति शेष:। तथादौ प्रियजनलाभात् पूर्व्वस्मिन्। न बाधते क्लेशयति। अभ्यर्ण: निकटवर्त्ती जलस्यागमो यस्य स तथोक्त:। आसन्नसलिलपातो दिवस: प्रावृषि वर्षासु नितरामत्यर्थं तपति दहति।

(5) कामो मिलितप्रायप्रियं जनमधिकं पीड़यति यथा वर्षासु आसन्नजलपातो दिवस:।

(6) अभ्यर्णः = अभि + अर्द्द + क्तः। अभेश्चाविदूर्य्य इति (७।२।२५) अर्द्देतेर्निष्ठायां नेट् सामीप्ये अर्थे। अन्यत्र तु अभ्यर्द्दितो बालः पीड़ित इत्यर्थः। अर्द्दति। आनर्द्द। आर्द्दीत्। अर्दिष्यति अर्द्यते। आर्दि अर्दित्वा। अर्दितुम्। प्रावृषि—प्र + वृ + क्विप्। तस्याम्। नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वाविति (६।३।११६) पूर्वपदस्य दीर्घः। स्त्रियां प्रावृट् स्त्रियां वर्षा अपीत्यमरः।

(7) उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अपीत्यमरः।

(8) तीव्रेण स्मरसन्तापेन...वाध्यते...तप्यते...अभ्यर्णजलागमेन...दिवसेन।

(9) आर्य्या।

(10) प्रतिवस्तूपमालङ्कृतिः। वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मतेति लक्षणात्।

(11) अत्रः कास्यन्यमानामितिरिति लक्षणादत्र क्रम-नाम-नाटकीयाङ्गारम्भः।

विदू—(आकर्ण्य।) भोदि साअरिए, एसो क्खु पिअवअस्सो तुमं ज्जेव्व उद्दिसिअ उक्कण्ठाणिब्भरं मन्तेदि। ता चिट्ठ तुमं। णिवेदेमि से तुह्मागमणं। (वासवदत्ता शिरः संज्ञां ददाति। राजानमुपसृत्य)। भो वअस्स दिट्ठिआ वड्ढसि, एसा क्खु मए आणीदा साअरिआ। (क)

राजा। (सहर्षं सहसोत्थाय) क्वासौ क्वासौ।

विदू। (सभ्रूभङ्गम्) णं एसा। (ख)॥

(क) भवति सागरिके, एष खलु प्रियवयस्यस्त्वामेवोद्दिश्योत्कण्ठानिर्भरं मन्त्रयते। तत्तिष्ठ त्वम्। निवेदयाम्यस्मै तवागमनम्। भो वयस्य, दिष्ट्या वर्धसे। एषा खलु मयानीता सागरिका।

(ख) नन्वेषा।

(1) वि—(श्रवणपूर्ब्बक) माननीया सागरিকে, এই প্রিয় বয়স্য আপনার উদ্দেশ্যে উৎকণ্ঠার সহিত আলাপ করিতেছেন। অপেক্ষা করুন। আপনার আগমন ইহাঁকে

জানাইতেছি (বাসবদত্তা কর্তৃক শিরঃকম্পনে অনুমতি, রাজার নিকট গমনপূর্ব্বক) ভাগ্যে বয়স্য তোমার উন্নতি হউক। সাগরিকাকে আনিয়াছি।

রা—(সহর্ষে সহসা উত্থানপূর্ব্বক) কোথায় সে, কোথায় সে ?

বি—(ভ্রূভঙ্গের সহিত) এই যে।

(2) J—(Listening) Respected *Sagarika*, here is the dear friend muttering anxiously for you. Wait. I announce your arrival. (The queen nods her assent and he goes to the king). O friend may you prosper by luck. Here is *Sagarika* fetched by me.

K—(Joyfully and rising abruptly) Where is she? Where is she?

J—(Frowning) Well here.

(3) उत्कण्ठानिर्भरमुत्कण्ठया निर्भरमत्यर्थं यथा तथा।

"रागे त्वलब्धविषये वेदना महती तु या।

संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः" इति।

अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरमित्यमरः। = much or excessively.

राजा—(उपसृत्य।) प्रिये सागरिके,

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ

रम्भागर्भनिभं तवोरुयुगलं बाहू मृणालोपमौ।

इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-

मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय॥

(1) রাজা—(নিকটে আগমন পূর্ব্বক) প্রিয়ে সাগরিকে, তোমার মুখ চন্দ্র, চক্ষুর্দ্বয় উৎপল, কর পদ্মতুল্য, ঊরুদ্বয় কদলীমধ্যসদৃশ, ভুজ মৃণালনিভ। আহ্লাদকরসমস্তশরীরে এস, এস, নিঃশঙ্ক হর্ষের সহিত আমাকে আলিঙ্গন করিয়া আমার কামসন্তপ্ত অঙ্গগুলিকে শীতল কর।

(2) K—(Coming near) My dear *Sagarika*, your face is like the moon, eyes like lilies, hands like lotuses, your thighs are like the middle parts of the plantain trees, arms as cool as lotus roots. O, one possessing all delicate limbs, come, come and joyfully embracing me without any fear, cool my body suffering from burning love.

(3) तव मुखं शीतांशुः। दृशौ उत्पले। करौ पद्मानुकारौ। तव ऊरुयुगलं रम्भागर्भनिभम्। बाहू मृणालोपमौ। इति आह्लादकराखिलाङ्गि त्वम् एहि एहि। रभसात् मां निःशङ्क मालिङ्ग्य अनङ्गतापविधुराणि अङ्गानि निर्वापय।

(4) प्रिये सागरिके तव मुख मानमं शीता अंशवो यस्य स शीतांशु श्चन्द्रः। दृशौ नयने उत्पले कुवलये। करौ हस्तौ पद्मे अनुकुरुत इति कर्मण्यण्। पद्मानुकारौ पङ्कजतुल्यौ। तव ऊरुयुगलं ऊरुद्वयं रम्भागर्भनिभं कदलीमध्यसदृशम्। बाहू भुजौ मृणालोपमौ बिससदृशौ। इति आह्लादकराणि आनन्ददायीनि अखिलाङ्गानि समस्तशरीरांगानि यस्याः सा तथोक्ता तत्सम्बुद्धौ। हे प्रीतिकरसमस्तदेहे! त्वमेह्येहि आगच्छागच्छ। चापले द्वे भवत इति वक्तव्यात् संभ्रमे द्वित्वम्। रभसात् हर्षात्। रभसो वेगहर्षयो रिति हेमचन्द्रः। मां निःशङ्कं निर्भयमालिङ्ग्याश्लिष्य अनङ्गताप-विधुराणि कामदाहविकलानि ममेतिशेषः। अङ्गानि अवयवान् निर्वापय शीतलीकुरु। अङ्गं प्रतीकोऽवयवोऽपघन इत्यमरः।

(5) उत्तप्तदेहस्य शीतलवस्तुसंयोगः सुखाय। त्वञ्च सर्वथा शीतलशरीरा। अतो मां निर्भरं निर्भयमालिङ्ग्य मम कामतापपीडितं देहं शीतलीकुरु।

(6) रम्भागर्भनिभम् = रम्भागर्भस्य निभेव प्रभेव निभा यस्य तत्। नि + भा + अङ्। अथवा आतश्चोपसर्गे इति कः (३।१।१३६) निभातीति निभः। निभादय उत्तरपदे सदृशवचना भवन्ति। रम्भागर्भेण तुल्यमित्यस्वपदविग्रहे तत्पुरुषः। अतएव स्युरुत्तर-पदे त्वमी। निभसङ्काशनीकाशप्रतीकाशोपमादय इत्यमरः। तेन नित्यसमास इति केचित्। निर्वापय = निर् + वा + (पुक्) णिच् + लोट् सिप्। अर्त्तिह्रीव्लीरीक्नूयीक्ष्मा-य्यातां पुग्णाविति णिचि पुगागमः।

(7) What is the distinction between उत्पल and पद्म? स्यादि-न्दीवर मुत्पलम्। नीलोत्पलं कुवलय मिति राजीव मरविन्दञ्च पद्मं पङ्कजमित्यत इतिच हलायुधः। उत्पलं कुशभूरुहे। इन्दीवरे मांसशून्येपीति। संख्याजयोः पद्ममि भविन्दाविति च हेमचन्द्रः। Hence according to हलायुध, कुवलय and इन्दीवर appear to be different. But उत्पल and कुवलय, according to अमरसिंह, are identical whereas इन्दीवर appears to be different

from कुवलय i. e. स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च। इन्दीवरञ्च नीलेऽस्मि-न्निति। वा पुंसि पद्मं नलिनं मरविन्दं महोत्पल मिति चामरः। So according to some, उत्पल, is a blue lotus and according to others it is a water lily. Of course पद्म is an ordinary lotus and hence different from उत्पल। c. f. कुवलयदलनीली कोकिला बालचूते इति। "नीलेन्दीवरशङ्कया नयनयोर्बन्धूक बुद्ध्याधरे" इति च।

(8) शीतांशुना मुखेन। उत्पलाभ्यां दृग्भ्याम्। पद्मानुकाराभ्यां कराभ्याम्। ...निभेन ऊरुयुगलेन। बाहुभ्यां मृणालोपमाभ्याम्। ईयतामीयताम्। अङ्गानि त्वया निर्वाप्यन्ताम्।

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) उपमारूपकयोः सङ्करः।

(11) क्रमो नाम नाटकीयो गर्भसन्धिः। पार्थनाख्याभङ्गमिति विश्वनाथः।

वास। (सवाष्पमपवार्य्य) कञ्चणमाले एव्वं सम्रं मन्तेदि अज्जउत्तो, पुणोवि कहं मं आलविस्सदि त्ति अहो अच्चरीअं। (क)

काञ्च। (अपवार्य्य) भट्टिणि एव्वं णेदं किं उण अवरं माहसिआण पूरिसाण ण दुक्करं सम्भावीअदि। (ख)

विदू। (भोदि साअरिए कीस वीसद्धा भविअ पिअ-वअस्सं ण आलावेसि, अज्ज वि ताए णिच्चकट्टाए देवीए वासवदत्ताए दुव्वअणेहिं कडुइदाइं सोत्ताइं सम्पदं सुहावेदु तुह महुरवअणोवस्सासो।) (ग)

(क) काञ्चनमाले, एवं स्वयं मन्त्रयत आर्यपुत्रः। पुनरपि मां कथमालपिष्यतीत्यहो आश्चर्यम्।

(ख) भर्त्ति, एवमिदम्। किं पुनरपर साहसिकानां पुरुषाणां न दुष्कर मभाव्यते।

(ग) भर्व्वति सागरिके कस्मादविस्रब्धा भूत्वा प्रियवयस्यं नालपसि। अद्यापि तस्या नित्यरुष्टाया देव्या वासवदत्ताया दुर्व्वचनैः कटूकृतानि श्रोत्राणि साम्प्रतं सुखयतु तव मधुरवचनोपन्यासः।

(1) বা—(সবাষ্প ও জনান্তিকে) কাঞ্চনমালে আর্য্যপুত্র নিজেই এইরূপ বলিতেছেন; আশ্চর্য্য আবার আমার সঙ্গেও প্রেমালাপ হইবে।

কা—(জনান্তিকে) ভর্ত্তি, তাই বটে। সাহসিক পুরুষের নিকট কোন্ দুষ্কর নীচ কর্ম্ম অসম্ভব?

বি—মাননীয় সাগরিকে পূর্ণ বিশ্বাসে প্রিয় বয়স্যের সহিত আলাপ করিতেছেন না কেন? আপনার মধুর বাক্যে, সেই নিত্যরুষ্টা মহিষী বাসবদত্তার দুর্ব্বাক্যপীড়িত কর্ণ শীতল হউক।

(2) Q—(With tears and aside to the maid) O girl, my husband himself speaks so! and he will again court me! O Strange!

M—(Aside to the queen) Just so, mistress. There is nothing so low and difficult that it may not be expected from such impudently daring persons.

J—Respected *Sagarika*, why do you not talk confidingly with my dear friend? Let your melodious utterances now regale my ears always grated with the course words of that constantly ill-tempered queen.

(3) अपरम्=अश्रेष्ठं=प्राकृतं=नीचम्। साहसिकानाम्=अविमृश्यकारिणाम्। सहस्+ठक्। सहसा अतर्कितं वर्त्तन्ते कार्य्ये निविशन्ते इति साहसिकाः। तेषाम्। ओजःसहोऽम्भसा वर्त्तते इति ठक् (४।४।२७)। विस्रब्धा=विश्वासवती। वि+स्रन्भ्+क्तः+टाप्। दन्त्यसकारयुक्तोऽपि। लुङि अस्रभत् अस्रम्भिष्ट। द्युतादित्वात्। विस्रम्भः केलिकलहे विश्वासे प्रणये वधे इति हेमचन्द्रः।

वास—(अपवार्य्य सरोषस्मितम्।) हञ्जे काञ्चणमाले, अहं ईदिसी कडुअभासिणी। अज्जवसन्तओ उण पिअंवदो। (क)

काञ्च—(अपवार्याङ्गुल्या तर्जयन्ती ।) हदास, सुमरिस्ससि एदं वअणम् । (ख)

विदू—(विलोक्य ।) भो वअस्स, पेक्ख पेक्ख । एसो क्खु कुविदकामिणीकवोलसण्णिहो पुव्वदिसं पआसअन्तो उदिदो भअवं मिअलञ्छणो । (ग)

(क) हञ्जे काञ्चनमाले, अहमीदृशी कटुभाषिणी । आर्य्यो वसन्तकः पुनः प्रियंवदः ।

(ख) हताश, स्मरिष्यस्येतद्वचनम् ।

(ग) भो वयस्य, प्रेक्षस्व प्रेक्षस्व । एष खलु कुपितकामिनीकपोलसंनिभः पूर्वदिशं प्रकाशयन्नुदितो भगवान्मृगलाञ्छनः ।

(১) গা—(সরোষহাস্যে, জনান্তিকে) ওলো কাঞ্চনমালে, আমি এরূপ কটুভাষিণী। আর বসন্তক প্রিয়ংবদ ।

কা—(জনান্তিকে অঙ্গুলি দ্বারা তর্জন পূর্ব্বক) হতাশ, এই বাক্য স্মরণ করিতে হইবে।

বি—(দর্শন পূর্ব্বক) ও হে বয়স্য, দেখ, দেখ, কুপিতকামিনীকপোলতুল্য ভগবান্ চন্দ্র পূর্ব্বদিক বিভাসিত করিয়া উদিত হইতেছেন ।

(2) G—(Aside to the maid, with anger and smile) O girl, I am thus a scold and the worthy Basantaka is complementary !

M—(Aside to the jester, threatening him with her forefinger) O wretch, you shall have to remember this statement.

J. (Looking) O friend, see, see, the moon like the cheek of an angry lady, is rising and illuminating the eastern quarter.

(3) प्रियवदः = मधुरभाषी । प्रिय + वद + खच् । प्रियं वदतीति प्रियवशे वदः खजिति खच् । अरुर्द्विषदजन्तस्य मुम् । उवाद । वदिष्यति । अवादीत् । उद्यते । अवादि । उदितम् । वदितुम् । उदित्वा ।

राजा—(निरूप्य सस्पृहम् ।) प्रिये, पश्य पश्य ।

आरुह्य शैलशिखरं त्वद्वदनापहृतकान्तिसर्वस्वः ॥

प्रतिकर्तुमिवोर्ध्वकरः स्थितः पुरस्तान्निशानाथः॥

ननु प्रिये, किं न दर्शितमनेनोद्गच्छता जडत्वम्। कुतः

(1) রা—(নিরূপণপূর্ব্বক সস্পৃহভাবে) প্রিয়ে, দেখ, দেখ, ত্বন্মুখহৃতকান্তি-সর্ব্বস্ব চন্দ্র শৈলাগ্রে আরোহণ পূর্ব্বক প্রতিকারার্থই যেন অগ্রে উর্দ্ধকর হইয়া রহিয়াছেন। প্রিয়ে, সমুদিত চন্দ্র কর্ত্তৃক জড়ত্ব প্রদর্শিত হইতেছে না কি! কেননা—

(2) K—(With observation and longing)My dear, see, see, robbed of all the wealth of beauty by your face, the moon stands in the front, on the top of the eastern mountain, with his hands (rays) uplifted as if for revenge. Well my dear, does not this rising moon betray foolishness (snowy state)? Since—

(3) त्वद्दनापहृतकान्तिसर्वस्वः निशानाथः शैलशिखरमारुह्य प्रतिकर्तुमिवोर्ध्वकरः पुरस्तात् स्थितः।

(4) तव वदनेन मुखेनापहृतं कान्तेः शोभायाः सर्वस्वं सकलसम्पत्तिः यस्य स तथोक्तः। त्वदाननापहृतसर्वशोभः। निशानाथश्चन्द्रः। शैलशिखरं पर्वताग्रमारुह्य प्रतिकर्त्तुं वैरनिर्य्यातनायेत्यर्थः। इव ऊर्द्धकरऊर्द्धबाहुरुद्गतकिरणश्च। पुरस्तादग्रे स्थितः। जड़त्वं मूर्खत्वं हिमयुक्तत्वञ्च। जड़ो मूर्खे हिमाघ्रात इति हेमचन्द्रः।

(5) त्वन्मुखहृतकान्ति श्चन्द्रः पुनरात्मकान्तिलाभाय इव शैलाग्रे ऊर्द्धकरःस्थितः।

(6) आरुह्य=आ+रुह+ल्यप्। रोहति। रुरोह। रोक्ष्यति। अरुचत्। रुह्यते। अरोहि। रुह्यात्। रूढ़म्। रोढुम्। रूढ्वा।

(8) ..... सर्वस्वेन...ऊर्द्धकरेण स्थितं निशानाथेन।

(9) आर्य्या।

(10) उत्प्रेक्षानुप्राणितकाव्यलिङ्गालङ्कारः।

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं

वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम्।

वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते

दर्पः स्यादमृतेन चेदिह तवाप्यस्त्येव बिम्बाधरे॥

(1) তোমার মুখচন্দ্র পদ্মের শোভা পরাজয় (বিনাশ) করে নাকি? নয়নানন্দ বিধান করে নাকি? দর্শন মাত্র কামের (সমুদ্রের) বৃদ্ধি করে নাকি? অমৃত হেতু যদি দর্প থাকে, তবে তাহাও তোমার এই বিম্বাধরে আছে। অতএব তোমার মুখচন্দ্র বিদ্যমান থাকিতে এই যে অন্য চন্দ্র উদিত হইতেছে তাহা জড়ত্বের প্রকাশক মাত্র।

(2) Does not this other moon reveal foolishness (snowy state) by her rise, when your moonlike face is present? Does it not destroy (exceed) the beauty of the lotus? charm the eyes? Does not love (the ocean) grow (swell) by its sight. If there be any boasting of nectar, it is also to be found in your *bimba*-like lips.

(3) (तव वक्त्रेन्दुः) पद्मस्य रुचि न हन्ति किम? नयनानन्दं विधत्ते न किम्? आलोकमात्रेण वा झषकेतनस्य वृद्धिं कुरुते न किम्? अमृतेन दर्पः स्याच्चेद् इह तव विम्बाधरे (तद्) अपि अस्त्येव। (अतः) तव वक्त्रेन्दौ सति यदपरः अयं शीतांशुरुज्जृम्भते (तदनेन जडत्वं दर्शितमेव।)

(4) पद्मस्य पङ्कजस्य। रुचिं कान्तिं न। हन्ति पराजयते पक्षे नाशयति किम्। तव वक्त्रेन्दुरिति शेषः। हन्त्येवेत्यर्थः। तथा नयनानन्दं चक्षुःप्रीतिं। विधत्ते ददाति। न किम? विधत्त एव। आलोक एव आलोकमात्रं मयूरव्यंसकादयश्चेति तत्पुरुषः। तेन दर्शनमात्रेण। वा अथवा। झषो मीनः केतनं चिह्नं यस्य स तथोक्तस्तस्य कामस्य पक्षे समुद्रस्य। वृद्धिं आधिक्यं पक्षे स्फीतत्वं। न कुरुते विदधाति किम्? कुरुते एव। अमृतेन सुधया दर्पः गर्वः। स्याद्भवेच्चेद् यदि। तर्हि इह अस्मिन तव विम्बाधरे। तदिति शेषः। अपि अस्ति वर्त्तत एव। अतएव वक्त्रमेवेन्दुस्तस्मिन्। सति विद्यमाने। यदपरः अन्यः अयं पुरोदृष्टः। शीतांशुश्चन्द्र उज्जृम्भते प्रकाशते। तदनेन जड़त्वं दर्शितमेवेति पूर्वेणान्वयः। यच्छब्दस्योत्तरवाक्यगतत्वे न तच्छब्दापेक्षत्वम्। अतस्तदनुपादानेऽपि न न्यूनपदत्वदोषः।

(5) चन्द्रस्पर्द्धि तव मुखं पद्मकान्तेर्विजयं नयनानन्दस्य विधानं दर्शनमात्रेण कामस्य वर्द्धनं करोति। अतस्तस्मिन् वर्त्तमाने अन्यस्य चन्द्रस्योदयः जड़त्वस्य दर्शनायैव। "मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुने"ति भावः।

(6) विधत्ते कुरुते च — कथमात्मनेपदम्? क्रियाफलस्याकर्त्रभिप्रायत्वात्स्वरितञितः कर्त्रभिप्रायेऽक्रियाफल इत्यस्य प्राप्तिः।

"क्रियाप्रवृत्तावाख्याता कैश्चित् स्वार्थपराश्रता।
असती वा सती वापि विवक्षितनिबन्धनेति ।१॥

भर्तृहरिव्यवस्थयाधुना पाणिनीये आत्मनेपदपरस्मैपदयो विवक्षापरतन्त्रत्वमेव। तथाहि असती वेत्यनेन कमलवनोद्घाटनं कुर्वते य इत्यादयः प्रयोगाः समर्थिताः। तत्रापि स्वार्थताविवक्षायाः मन्थवादिनि प्रौढमनोरमाशब्दकौस्तुभयोर् भट्टोजिः। अतएव कविषु—वसुनाऽत्रोपरिग हंसमण्डलद्युतिजिषा, जिष्णुरभ (ष्टु) तोषवारण मिति माघः (१३।२१)। सन्दर्शनं लोक गुर्गरमोघं तवात्मयोनेरिव किं न धत्तइति भारविः (३।७) लक्ष्मीमाक्रष्टुकामाइव कमलवनोद्घाटनं कुर्वते ये इति सूर्य्यशतके। एकैव मूर्तिर्बिभिदे त्रिधा सेति नरपतिकुलभूत्यै गर्भमाधत्त राज्ञीति च कालिदासः। अहमिव निवसामि याहि राधामनुनय मद्वचनेन इति जयदेवः। तथापि जिष्णुः स भवज्जिगीषया तनोति गर्भं गुणसम्पदा यश इति च भारविः। काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोशलेन्द्राइति च कालिदासः। With regard to the परस्मैपद or आत्मनेपद, there is no relaxation any where, of the rule स्वरितञितः कर्त्रभिप्राये क्रियाफले (1. 3. 72), in the statements of कात्यायन or पतञ्जलि। Hence the instances where this Rule is found not to be rigidly followed, appear to smack of inaccuracy. Nevertheless हरि, the commentator of the महाभाष्य who is supposed to be the highest authority below the भाष्य कार. has put a कारिका quoted above, making such uses depend on विवक्षा। This is now accepted as the authority for such cases by the followers of पाणिनि। बिम्बाधरे=बिम्बसदृशः अधर स्तस्मिन्। समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्चेति तत्पुरुषः। यदाह वामनः (अलङ्कारवृत्तौ) बिम्बाधर इति वृत्तौ मध्यमपदलोपिन्यामिति। बिम्बाकारः अधर इति कातन्त्रपरिशिष्टटीकायां गोपीनाथः। केचित्तु बिम्बमिवाधर-इति विग्रहमाहुः। तत्रापि तुल्यार्थकेन इवशब्देन समासः। ततस्तस्य लोपेन शाकपार्थिवादित्वम्। न चोपमानानि सामान्यवचनैरित्यनेनात्र समासः। अधरशब्दस्य

सामान्यवचनत्वाभावात्। नाप्युपमितं व्याघ्रादिभिरित्युपमितसमास स्तस्मिन् हि अधरविम्बमिति स्यात्। तथाहि विम्बाधरं स्पृशसि चेद् भ्रमरः प्रियायाइति शाकुन्तलम्। मोहं तावदयञ्च तन्वि तनुतां विम्बाधरो रागवानिति जयदेवः। पक्षे पल्लवोपममिति साम्यसपक्षं दृष्टवत्यधरविम्बमभीष्ट इति माघः (१०।५३)। इमां दधाराधर विम्बलोलामिति नैषधीये (७।५२)। विम्बं तु प्रतिविम्बे स्यात् मण्डले विम्बिकाफल इति हेमचन्द्रः। विम्बस्तु प्रतिविम्बे स्यात् मण्डलं पुंनपुंसकम्। विम्बिकायाः फले क्लीव कृकलासे पुनः पुमानिति मेदिनी। The विम्ब is *Bryonia grandis* and bears a red fruit. In Bengali, it is called तेलाकुच। In विम्बाधर the समास is मध्यपदलोपि तत्पुरुष and not उपमान तत्पुरुष as अधर is not an adjective word , nor उपमित तत्पुरुष in which case अधर precedes विम्ब। No doubt मल्लिनाथ appears to adopt its मयूरव्यंसकादित्व (vide स्फुरन्त मुत्पप्लु मयूखजालिनम् &c. &c. भारवि 14. 58) but inserts इव in the विग्रह which evidently leads to उपमानाद्यघटित उपमानसमास, thereby destroying its मयूरव्यंसकादि state. Nor is इव inserted in the विग्रह of such as मयूरव्यंसकः, छात्रव्यंसकः & &...

वक्त्रेन्दौ = भावे सप्तमी। अथवा सति पदस्य विशेषणत्वभावे "षष्ठी चानादरे" इति सप्तमी (२।३।३८)। वक्त्रमेव इन्दुरिति तस्मिन्। मयूरव्यंसकादयश्चेति तत्पुरुषः। सच रूपकरूपः।

(7) रुचिः स्त्री दीप्तौ शोभायामभिष्वङ्गाभिलाषयोरिति मेदिनी।

(8) रुचि हन्यते।...नयनानन्दो विधीयते। वृद्धिः क्रियते। अपरेण शीतांशुना उज्जृम्भते। दर्पेण भूयते...भूयते।

(9) शार्दूलविक्रीडितं वृत्तम।

(10) रूपकालङ्कारः। एवं हि अलङ्कारसर्वस्वकारादयः। काव्यप्रकाशकारादिमते तु प्रतीपविशेषः। आक्षेप इत्यन्ये।

(12) "वक्त्रे चन्द्रमसि स्थिते किमपरः शीतांशुरुज्जृम्भते" इति रसगङ्गाधरं धृतःपाठः। मम्मटभट्टस्तु "वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः" इति पपाठ।

वास—(सरोषमवगुण्ठनपटमपनीय।) अज्जउत्त, सच्चं एव्व अहं साअरिआ। तुमं उण साअरिओक्खित्तहिअओ सव्वं एव्व साअरिआमअं पेक्खसि। (क)

राजा—(दृष्ट्वा सवैलक्ष्यम्। अपवार्य।) हा धिक् कष्टम्। कथं देवी वासवदत्ता। वयस्य, किमेतत्।

विदू—(सविषादम्।) भो वअस्स, किं अवरं। अम्हाणं जीविदसंसओ जादो एसो। (ख)

राजा—(उपविश्याञ्जलिं बद्ध्वा।) प्रिये वासवदत्ते, प्रसीद प्रसीद।

(क) आर्यपुत्र, सत्यमेवाहं सागरिका। त्वं पुनः सागरिकोत्क्षिप्तहृदयः सर्वमेव सागरिकामयं प्रेक्षसे।

(ख) भो वयस्य, किमपरम्। अस्माकं जीवितसंशयो जात एषः।

(1) বা—(সরোষে অবগুণ্ঠন অপনয়ন পূর্ব্বক) আর্য্যপুত্র, আমি যথার্থই সাগরিকা। তুমি সাগরিকাবিহ্বলহৃদয় সকলই সাগরিকাময় দেখিতেছ।

রা—(সবিস্ময়ে দর্শনপূর্ব্বক, জনান্তিকে) হায় ধিক্, কষ্ট! এই যে মহিষী বাসবদত্তা? বয়স্য, ব্যাপার কি?

বি—(সবিষাদে) ওহে বন্ধো! আর কি? আমাদের জীবনসংশয় উপস্থিত।

রা—(উপবেশন ও অঞ্জলিবন্ধন পূর্ব্বক) প্রিয়ে বাসবদত্তে, প্রসন্না হও, প্রসন্না হও।

(2) Q—(Throwing the veil with anger) Husband, I am really *Sagarika* : fascinated at heart by her you fancy everything identified with *Sagarika* !

K—(Seeing with wonder and aside to the jester) O fie, pity.—The queen !—Friend, what is this ?

J—(Sorrowfully) What else, friend, but that our future existence is doubtful.

K—(Sitting with joined hands) My dear, Pardon, Pardon.

(3) जीवितसंशयः = प्राणसन्देहः।

वास—(तदभिमुखमश्रूणि निपातयन्ती।) अज्जउत्त, मा एव्वं भण। अस्सगदाइं एदाइं अक्खराइं। (क)

विदू—(आत्मगतम्।) किं दाणिं एत्थ विरअइस्सं। भोदु। एव्वं दाव। (प्रकाशम्।) भोदि, महाणुभावा क्खु तुमं। ता खमीअदु दाव एक्को अवराहो पिअवअस्सस्स। (ख)

वास—अज्ज वसन्तअ, णं पढमसंगमे विग्घं करन्तीए मएज्जेव्व एदस्स अवरद्धं ण अज्जउत्तेण। (ग)

(क) आर्य्यपुत्र, मैवं भण। अन्यगतान्येतान्यक्षराणि।

(ख) किमिदानीमत्र विरचयिष्यामि। भवतु। एवं तावत्। भवति, महानुभावा खलु त्वम्। तत् क्षम्यतां तावदेकोऽपराधः प्रियवयस्यस्य।

(ग) आर्य्य वसन्तक, ननु प्रथमसंगमे विघ्नं कुर्वन्त्या मयैवैतस्यापराद्धं नार्य्यपुत्रेण।

(1) বা—(রাজার সম্মুখে অশ্রুপাত পূর্ব্বক) আর্য্যপুত্র, এরূপ বলা নিষ্প্রয়োজন। কথা গুলি অন্যকে লক্ষ্য করিয়া বলা হইয়াছে।

বি—(স্বগত) এখন কি বক্তব্য ঠিক করিব?—হউক,—এই বলি (প্রকাশে) মাননীয়ে, আপনি মহানুভাবা, প্রিয় বয়স্যের এই এক অপরাধ ক্ষমা করুন।

বা—আর্য্য বসন্তক, প্রথম সঙ্গমে বাধা দিয়া আমিই আর্য্যপুত্রের নিকট অপরাধ করিয়াছি।—ইনি করেন নাই।

(2) Q—(Shedding tears near the king) Husband, do not say thus to me, these words are meant for another.

J—(Aside) What shall I now invent?—let it be.—Thus. (To the queen) O respected Lady. You are noble-minded. So forgive this one fault only, of my dear friend.

Q—Respected *Basantaka.* It is I who have given offence by causing obstruction in the first union and not my husband.

(3) अन्यगतानि = अन्यां प्रति उद्दिष्टानि। अन्यां गतानि। द्वितीया तत्पुरुषः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति भाष्यकारेष्ट्या पुंवद्भावः। अक्षराणि = कथाः। अपराद्धम् = अपराधः कृतः। अप + राध + क्तः। राध्यति। रराध। राद्धा। रात्स्यति। अरात्सीत्। अराधि। राद्धुम्। राद्धा। अथं स्वादिश्च। विरचयिष्यामि = उद्भावयिष्यामि। रचयति। अररचत्। अरचि।

राजा—एवं प्रत्यक्षदृष्टव्यलीकः किं ब्रवीमि। तथापि विज्ञापयामि।

आताम्रतामपनयामि विलक्ष एष
लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना।
कोपोपरागजनितां तु मुखेन्दुबिम्बे
हर्तुं क्षमो यदि परं करुणा मयि स्यात्॥

(इति पादयोः पतति।)

(1) রা—মৎকৃত অপ্রিয় কার্য্য প্রত্যক্ষে দৃষ্ট হইয়াছে। কি বলিব ? তথাপি বলিতেছি—হে মহিষি, বিস্ময়াকুল (নির্লজ্জ) আমি শিরোদেশ দ্বারা তোমার চরণের লাক্ষারাগ দূর করিতেছি। অতঃপর যদি আমার প্রতি দয়া কর তবে তোমার মুখেন্দুমণ্ডলের ক্রোধোপপ্লব-জনিত লৌহিত্যও দূর করিতে সমর্থ হইব। (পাদে পতন)।

(2) K—Thus detected in commiting a wicked thing, what can I say ? Yet I say, O queen, though surprized (or shameless) I am wiping off the red dye of lac, from your feet, with my head. If you then favour me, I shall be able to remove, from your moon-like face, the flush caused by the disastrous anger (eclipse) (falls at her feet).

(3) देवि एष विलक्षः (विलज्जः) मूर्ध्ना तव चरणयो लाक्षाकृतामाताम्रतामपनयामि। परन्तु यदि मयि करुणा स्यात् मुखेन्दुबिम्बे कोपोपरागजनिताम् (आताम्रतां) हर्तुं क्षमः।

(4) प्रत्यक्षदृष्टव्यलीकः = प्रत्यक्षं यथा तथा दृष्टं व्यलीकं अप्रियकार्य्यं यस्य

सः। व्यलीकं त्वङ्गवैलक्ष्याप्रियकार्य्येषु पीडने इति हेमचन्द्रः। व्यलीकमपराधः स्यादिति हलायुधः।' आताम्रेति। हे देवि मद्दिषि एष विलक्षः विस्मयान्वितः। विलज्ज इति वा पाठः। अहं मूर्ध्ना शिरसा तव चरणयोः पादयोः लाक्षाकृतामलक्तकजनितामाताम्रतां लौहित्य मपनयामि दूरीकरोमि। परन्तु अनन्तरन् यदि मयि करुणा दया तवेति शेषः स्यात् तर्हि इन्दोर्विम्बं मण्डलम् इन्दुविम्बम्। मुखमेवेन्दुविम्बमिति मयूरव्यंसकादित्वात् तत्पुरुषः। तस्मिन् मुखचन्द्रमण्डले कोप एव उपरागः उपप्लवः पक्षे राहुसंस्पर्शः। तेन जनितामुत्पादिताम्। उच्यते राहुसंस्पर्श उपराग उपप्लवइति हलायुधः। रोषोपप्लवघटितामाताम्रतामिति शेषः। हर्त्तु मपनेतुं क्षमः शक्तो भविष्यामीति शेषः।

(5) आदौ शिरसा तवालक्तकभूषितौ पादौ रञ्जनशून्यौ करोमि। ततस्तवाननस्थ कोपरक्तमाननं प्रकृतिस्थं विधास्ये।

(6) क्षमः = क्षम् + अच्। इन्हिक्षमिभ्यां वक्तव्यमिति णप्रत्ययस्तु कर्मोपपदे स्यात्। अयं भ्वादौ आत्मनेपदी। दिवादौ परस्मैपदी। "अपितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा।" क्षमते। चक्षमे। क्षमिष्यते क्षंस्यते। अक्षमिष्ट अक्षंस्त। क्षाम्यते चक्षमि। क्षान्तः। क्षममाणः। क्षमित्वा क्षान्त्वा। क्षमितुं क्षन्तुम्। ऊदित्वादिट्। पक्षे क्षाम्यति। क्षाम्यम्।

(7) विलक्षो विस्मयान्वित इत्यमरः। कारुण्यं करुणा घृणा कृपा दयानुकम्पा स्यादित्यमरः।

(8) आताम्रता अपनीयते...विलक्षेण एतेन...लाक्षाकृता...क्षमेण...करुणया भूयेत।

(9) वसन्ततिलकं वृत्तम्।

(10) रूपकालङ्कारः।

(11) अत्राभिवलं नाम नाटकीयो गर्भसन्धिः।

वास। (हस्तेन वारयन्ती) अज्जउत्त उट्ठेहि उट्ठेहि, णिसज्जो क्खु सो अणो जो अज्जउत्तस्स ईदिसं हिअअं

जाणिअ पुणो वि कुप्पदि, ता सुहं चिट्ठदु अज्जउत्तो, अहं गमिस्सं (इति गन्तुमिच्छति)। (क)

काञ्च। भट्टिणि करेहि पसादं, एव्वं चरणपड़िअं महाराअं उज्झिअ गदाए अवस्सं पच्चाद्दावेण होदव्वं। (ख)

वास। अवेहि अपण्डिदे किं एत्थ पच्चाद्दावस्स कारणं, ता एहि गच्छह्म (इति निष्क्रान्ते)। (ग)

(क) आर्य्यपुत्र, उत्तिष्ठोत्तिष्ठ। निर्लज्ज: खल्वेष जनो य आर्य्यपुत्रस्येदृशं हृदयं ज्ञात्वा पुनरपि कुप्यति। तत् सुखं तिष्ठत्वार्य्यपुत्र:। अहं गमिष्यामि।

(ख) भर्त्रि कुरु प्रसादम्। एवं चरणपतितं महाराजमुज्झित्वा गताया अवश्यं पश्चात्तापेन भवितव्यम्।

(ग) अपेह्यपण्डिते, किमत्र पश्चात्तापस्य कारणम्। तदेहि गच्छाव:। (इति निष्क्रान्ते)।

(১) বা—(হস্তদ্বারা রাজার চরণে পতন নিবারণপূর্ব্বক) আর্য্যপুত্র, উঠুন, উঠুন। আর্য্যপুত্রের হৃদয় এরূপ জানিয়া আবারও কোপ করা নির্লজ্জতা বটে। আর্য্যপুত্র সুখে থাকুন। আমি যাইতেছি। (গমনোদ্যতা)।

কা—ভর্ত্রি, অনুগ্রহ করুন। চরণপতিত মহারাজকে ছাড়িয়া গেলে অবশ্য পশ্চাত্তাপ ঘটিবে।

বা—দূর হ মূর্খা। এস্থলে পশ্চাত্তাপের কি কারণ আছে? এস, যাই। (উভয়ের গমন)।

(2) Q—(Stopping the King from falling at her feet, with her hands) Rise, rise, husband. It is impudent to be angry when your heart is known to be such. Stay happily. I depart (Going).

M.—Be kind, mistress. Repentance is sure to ensue if you forsake the king, thus fallen at your feet.

Q.—Be off, fool, what may be the reason of repentance here? Come, let us go. (Exeunt).

(3) अपेहि = दूरीभव। उज्झित्वा = त्यक्त्वा। उज्झति। उज्झाञ्चकार &c.।

राजा—देवि, प्रसीद प्रसीद। ('आताम्रतामपनयामि' इति पुनः पठति।)

विदू—भो, उट्ठेहि। गदा सा वासवदत्ता देवी। ता कीस एत्थ अरण्णरुदिदं करेसि। (क)

राजा—(मुखमुन्नमय्य।) कथमकृत्वैव प्रसादं गता देवी।

विदू—न किदो कहं पसादो जं अज्जवि अक्खदसरीरा चिट्ठम्ह। (ख)

(क) भोः, उत्तिष्ठ। गता वासवदत्ता देवी। तत्किमत्रारण्यरुदितं करोषि।

(ख) न कृतं कथं प्रसादो यदद्याप्यक्षतशरीरास्तिष्ठामः।

(1) রা—রাজ্ঞি, প্রসন্ন হও, প্রসন্ন হও। (আতাম্রতা ইত্যাদির পুনরুক্তি)

বি—ওহে, উঠ। সেই দেবী বাসবদত্তা চলিয়া গিয়াছেন। আর অরণ্যে রোদন কর কেন ?

রা—(মুখ তুলিয়া) সে কি অনুগ্রহ বিনাই যে দেবী গেলেন ?

বি—অনুগ্রহ করে নাই কিসে ? এখনও অক্ষত শরীরে আছি।

(2) K.—Queen, pardon, pardon. (Speaks again 'the red dye &c.)

J.—Well, get up. The queen is gone. So why are you crying in the wilderness ?

K.—(Looking up) Why, the queen is gone and no favour has been shown ?

J—Why is no favour shown ? We are still with uninjured bodies !

(3) अरण्यरुदितम् = वृथा प्रार्थना, निष्फलदुःखनिवेदनम्। अरण्ये वने रुदितं रोदनं क्रन्दनम्। सप्तमीसमासः। उन्नमय्य = उत् + नम् + णिच् = ल्यप्। अमन्तत्वात् मित्वम्। ल्यपि लघुपूर्व्वादिति (६।४।५६) णेरयादेशः।

राजा—धिङ् मूर्ख, किमेवमुपहससि माम्। ननु त्वत्कृत एवायमापतितोऽस्माकमनर्थक्रमः। यतः

समारूढा प्रीतिः प्रणयबहुमानादनुदिनं
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति॥

(1) রা—ধিক্ মূর্খ। আমাকে উপহাস করিতেছ কেন? তোমাকর্তৃকই ত আমার এই সকল অনর্থ উপস্থিত হইয়াছে। যেহেতু—

অনুদিন প্রতি সমাদরে প্রীতি বর্দ্ধিত হইয়াছিল। অদ্য আমার এই অকার্য্য দর্শনে অসহিষ্ণু প্রিয়া নিশ্চিত প্রাণত্যাগ করিবে। বিশুদ্ধ প্রণয়ের স্খলন অসহ্য।

(2) K—Fie, fool, why are you taunting me? These awkward things befalling me, are of your making; as the love with daily endearments has been firm, detecting me in this first unpleasant work, my beloved wife, unable to bear it, will surely commit suicide today. The slips of deep love are truly unbearable.

(3) अनुदिनं प्रणयबहुमानात् प्रीतिः समारूढा। अद्य खलु मया कृतमिदमकृतपूर्वं व्यलीकं वीक्ष्य असौ प्रिया असहना स्फुटं जीवितं मुञ्चति। प्रकृष्टस्य हि प्रेम्णः स्खलितमविषह्यं भवति।

(4) आपतितः=समागतः। अनर्थक्रमः=विपत्समूहः। अनिष्टाक्रमणं वा। क्रमस्त्वनुक्रमे शक्तौ कम्पे चाक्रमणेऽपि चेति मेदिनी। समेति। अनुदिनं प्रतिदिनं प्रणयस्य प्रेम्णः बहुमानात् अत्यन्तादरात् प्रीतिः स्नेहः समारूढा समधिका जाता। अद्य खलु मया कृतमनुष्ठितमिदमकृतपूर्वमननुष्ठितपूर्वं व्यलीकमकार्य्यं वीक्ष्य दृष्ट्वा असौ प्रिया वासवदत्ता असहना अक्षमा सती स्फुटं निश्चितं जीवितं प्राणान् मुञ्चति मोक्ष्यतीत्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानवद्वेति भविष्यति लट्। हि यतः प्रकृष्टस्योत्तमस्य प्रेम्णः प्रणयस्य स्खलितं पतनं भ्रंशः इति यावत्। अविषह्यं भवति।

(5) ममेदृशेनाकार्य्येण प्रिया प्रतिदिनं वर्द्धितायाः प्रीतेः पतनं मत्वा नूनं प्राणांस्त्यक्ष्यति। प्रकृष्टप्रेमभङ्गः सर्वथा न सहनीयः।

(6) अनुदिनम् = दिनं दिनमनु । अव्ययं विभक्तीत्यादिनाव्ययीभावः (२।१।६) अज्ञातपूर्वम् = पूर्वं ज्ञातमिति सुप्सुपेति समासः । न ज्ञातपूर्वमित्यज्ञातपूर्वम् । प्रिया = प्री + कः + टाप् । प्रीणातीति । इगुपधज्ञाप्रीकिरः क इति कः । प्रीणाति प्रीणीते । पिप्राय पिप्रिये । प्रेष्यति-ते । अप्रैषीत् अप्रेष्ट । प्रीतम् । प्रीणत् प्रीणानम् । प्रेतुम् । प्रीत्वा । प्रीयते । अप्रायि । अयं दिवादिश्चात्मनेपदी । प्रकाममप्रीयत यज्वनां प्रिय इति माघः । अविषह्यम् = न विषह्यम् । वि + सह + यत् । परिनिविभ्यः सेवसितसयसिव सहस्तुट्स्तुस्वञ्जामिति षत्वम् ।

स्खलितम् = भावे क्तः । स्खलति । चस्खाल । अस्खालीत् ।

(8) समारूढया…प्रीत्या…प्रियया मुच्यते…असहनया अमुया स्खलितेन अविषह्येण भूयते ।

(9) शिखरिणीवृत्तम् ।

(10) अर्थान्तरन्यासालङ्कारः । भवेत् सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । तत् साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुन इति लक्षणात् ।

(11) अत्रानुमानं नाम गर्भसन्धिः ।

विदू—भोः, रुट्ठा देवी । दाव ण जाणीअदि किं करिस्सदित्ति । साअरिआए उण जीविदं दुक्करंत्ति तक्केमि । (क)

राजा—वयस्य, अहमप्येवं चिन्तयामि । हा प्रिये सागरिके ।

(ततः प्रविशति वासवदत्तावेषधारिणी सागरिका)

साग—(सोद्वेगम् ।) दिट्ठिआ इमिणा विरइदेण देवी-वेसेण इमादो संगीदसालादो णिक्कमन्ती ण केणावि लक्खिदह्मि । ता दाणिं एत्थ किं करिस्सं । (इति सास्रं चिन्तयति ।) (ख)

(क) भो रुष्टा देवी तावन्न ज्ञायते किं करिष्यतीति, सागरिकायाः पुनर्जीवितं दुष्करमिति तर्कयामि।

(ख) दिष्ट्या अनेन विरचितेन देवीवेशेन अस्याः सङ्गीतशालातो निष्क्रामन्ती न केनापि लक्षितास्मि, तदिदानीमत्र किं करिष्यामि।

(1) বি—ওহে রুষ্টা দেবী কি করিবেন জানি না। কিন্তু আমার বোধ হয় সাগরিকার জীবন দুষ্কর।

রা—বয়স্য, আমিও তাহাই ভাবিতেছি। হা প্রিয়ে সাগরিকে।

(বাসবদত্তাবেশধারিণী সাগরিকার প্রবেশ)

সা—(উদ্বেগের সহিত) ভাগ্যে এই বিরচিত-রাজ্ঞীপরিচ্ছদের সহিত সঙ্গীতশালা হইতে নিষ্ক্রমণের পর কেহও আমাকে লক্ষ্য করে নাই। এখন কি করি? (অশ্রুপাত ও চিন্তা)

(2) J—Well, it is not known what the angry queen will do but I think *Sagarika's* life is not easy.

K—I too think so, friend. Dear *Sagarika.*

(ENTER SAGARIKA DISGUISED AS THE QUEEN.)

S—(Anxiously) Luckily I was not observed by any one while coming away from this music hall with the queen's dress on. What shall I now do here?

(3) जीवितं=प्राणधारणम्। निष्क्रामन्ती=आगच्छन्ती।

विदू। भोः किं मूढो विअ चिट्ठसि, चिन्तेहि एत्थ पडिआरं। (क)

राजा—वयस्य, तदेव चिन्तयामि। देवीप्रसादं मुक्त्वा नान्यमुपायं पश्यामि। तदेहि। तत्रैव गच्छावः।

(इति परिक्रामतः।)

साग—(सास्रं विमृश्य।)(वरं दाणिं सअं जेव्व अत्ताणअं उब्बन्धिअ उवरदा भविस्सं। ण उण जाणिदसंकेतवुत्तन्ता

सुसंगदा विअ देवीए परिभूदा चिट्ठिस्सं। ता जाव अहं असोअपादवदले गदुअ जधासमीहिदं करिस्सं। (इति परिक्रामति।) (ख))

विदू—(आकर्ण्य।) चिट्ठ दाव चिट्ठ। भोः, पदसद्दो सुणीअदि। जाणामि कदापि गहिदपच्चादावा पुणोवि देवी आअदा भवे। (ग)

राजा—वयस्य, महानुभावा खलु देवी। कदाचिदेवमपि स्यात्। तत्त्वरितं निरूपय।

क) भोः, किं मूढ इव तिष्ठसि। चिन्तयाव प्रतीकारम्।

(ख) वरमिदानीं स्वयमेवात्मानमुद्बध्योपरता भविष्यामि न पुनर्ज्ञातसंकेतवृत्तान्ता सुसंगतेव देव्या परिभूता तिष्ठामि। तद्यावदहमशोकपादपतले गत्वा यथा समीहितं करिष्यामि।

(ग) तिष्ठ तावत्तिष्ठ। भोः, पदशब्दः श्रूयते। जानामि कदापि गृहीतपश्चात्तापा पुनरपि देव्यागता भवेत्।

(1) বি—ওহে মূর্খের ন্যায় রহিলে যে? এবিষয়ে প্রতিকার চিন্তা কর।

রা—বয়স্য তাহাই ভাবিতেছি। মহিষীর অনুগ্রহ ব্যতীত অন্য উপায় দেখি না। এস, সেখানে যাই (পরিক্রমণ)।

সা—(অশ্রুপাত ও চিন্তা) বরং এখন উদ্বন্ধনে প্রাণত্যাগ করিব। তথাপি জ্ঞাত-সঙ্কেতবৃত্তান্তা মহিষী কর্তৃক অপমানিতা সুসঙ্গতার ন্যায় থাকিব না। অতএব অশোক-বৃক্ষতলে যাইয়া অভিলষিত কার্য্য সম্পন্ন করি (পরিক্রমণ)।

বি—(শ্রবণ পূর্ব্বক) অপেক্ষা কর। পদশব্দ শুনা যাইতেছে। হয়ত প্রাপ্তানুতাপা রাজ্ঞী আবারও আসিতে পারেন।

রা—বয়স্য, মহিষী মহানুভাবা, তাহা সম্ভব বটে, শীঘ্র নিরূপণ কর।

(2) J—Well, why do you fumble like a fool? Devise some remedy.

K—Yes, friend, I am thinking of that. I see no means except the queen's favour. Come, we shall go to the queen. (Walking).

S—(Thinking with tears) Better I shall now die by committing suicide than live like *Susangata* insulted by the queen, after the matter of assignation was known. So I go under the *Asoka* tree (*Jonesia asoca*) and do what I intend. (Walking.)

I—(Listening) Wait a bit. Treading sounds are heard. The repentant queen may call again.

K—The queen is truly magnanimous. It may perhaps turn so. Find out quickly.

(3) प्रतीकारम् = उपायम्। मुक्ता = वर्जयित्वा। मुञ्चति-ते। मुमोच मुमुचे। मोक्ष्यति-ते। अमुचत् अमुक्त। मुच्यते। अमोचि। मुक्तम्। मुञ्चत् मुञ्चमानम्। मोक्तुम्। वरम् = ईषत् प्रियम्। देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिय इत्यमरः। उद्बध्य = उद् + बन्ध् + ल्यप्। बध्नाति। बबन्ध। बन्धा। भन्त्स्यति। बध्नातु। अबध्नात्। बध्नीयात्। बध्यात्। अभान्त्सीत्। अभन्त्स्यत्। बध्यते। अबन्धि। बद्धम्। बध्नत्। बन्धुम्। बद्धा। उपरता = मृता। उप + रम् + क्त + टाप्। विभाषाकर्मकादिति वात्मनेपदम्। (१।३।८५)। उपरमति उपरमते वा। परिभूता = अवमानिता।

विदू—जं भवं आणवेदित्ति। (इति निष्क्रामति। (क)

साग। (उपसृत्य) ता जाए इमाए माहवीलदाए पासं विरइअ असोअपादवे अप्पाणअं उव्वन्धिअ वावादइस्सं। (इति लतापाशं रचयन्ती) हा ताद हा अम्ब, एसा दाणिं अहं अणाहा असरणा विवज्जामि मन्दभाइणी (इति कण्ठे लतापाशमर्पयति)। (ख)

विदू। (विलोक्य) का उण एसा, कहं देवी वासवदत्ता। (ससम्भ्रममुच्चैः) भो वअस्स परित्ताहि परित्ताहि, एसा क्खु देवी वासवदत्ता अप्पाणअं उव्वन्धिअ वावादेदि। (ग)

राजा। (ससम्भ्रममुपसृत्य) वयस्य क्वासौ क्वासौ।
विदू। णं ऐसा। (घ)

(क) यद्भवानाज्ञापयतीति।

(ख) मधावदनया माधवीलतया पाशं विरच्यास्मिन्नशोकपादप आत्मानमुद्बध्य व्यापादयिष्यामि। हा तात, हा अम्ब, एषेदानीमहमनाथाशरणा विपद्ये मन्दभागिनी।

(ग) का पुनरेषा। कथं देवी वासवदत्ता। भो वयस्य परित्रायस्व परित्रायस्व। एषा खलु देवी वासवदत्ता आत्मानमुद्बध्य व्यापादयति।

(घ) ननु एषा।

(1) বি—যেরূপ আজ্ঞা (গমন)।

সা—(আগমনপূর্ব্বক) এই মাধবীলতা দ্বারা বন্ধননির্ম্মাণপূর্ব্বক অশোকবৃক্ষে নিজকে উদ্বন্ধ করিয়া মরিব (লতা পাশ নির্ম্মাণ)। হা পিতঃ। হা মাতঃ। অনাথা অনাশ্রয় মন্দভাগিনী আমি মরিতেছি (কণ্ঠে পাশ প্রদান।)

বি—(দর্শনপূর্ব্বক) এ আবার কে? এই যে দেবী বাসবদত্তা। (সভয়ে উচ্চৈঃস্বরে) ওহে বয়স্য, পরিত্রাণ কর, পরিত্রাণ কর। দেবী বাসবদত্তা উদ্বন্ধনে মরিতেছেন!

রা—(সবেগে আগমনপূর্ব্বক) কোথায়, কোথায়?

বি—এই যে!

(2) J—As you command (Goes).

S—(Coming) Making a halter of this *Jasmin* creeper, I shall hang myself on this *ashka* tree (Prepares a halter). O father, O mother, this helpless, unprotected and unforunate one is dying (Fastens the noose on her neck).

J—(Looking) Who is this? Well, the queen! (With fright and aloud) Rescue, rescue, O friend. The queen is hanging herself to death.

K—(Coming quickly) Where is she, where is she?

J—Well, here.

(3) व्यापादयिष्यामि=विनाशयिष्यामि। वि+आङ्+पद+णिच्+लट् मिप्। विपद्ये=म्रिये। पद्यते। पेदे। पत्स्यते। अपादि। पद्यते। अपादि। पन्नम्। पद्यमान पत्तुम्। हा अम्ब!=अम्बार्थनद्योर् ह्रस्व इति सम्बुद्धौ ह्रस्वः।

राजा—(कण्ठात्पाशमपनयन्।) अयि साहसकारिणि, किमिदमकार्यं क्रियते।

मम कण्ठगताः प्राणाः पाशे कण्ठस्थिते तव।
अतः स्वार्थप्रयत्नोऽयं त्यज्यतां साहसं प्रिये॥

(1) রা—(কণ্ঠ হইতে বন্ধন মোচনপূর্ব্বক) অয়ি সাহসিকি! এই অকার্য্য কেন করা হইতেছে? প্রিয়ে, তোমারি কণ্ঠগত এই বন্ধনরজ্জু দ্বারা আমার প্রাণ কণ্ঠাগত হইতেছে। অতএব তোমার মরণ নিবারণ চেষ্টা স্বার্থেই বটে। সাহস ত্যাগকর।

(2) K—(Removing the halter) O daring one! Why this wrong thing is attempted? With this halter, O dear, on your neck, my life is about to depart. So this obstruction is for self. Give up the rash attempt.

(3) प्रिये पाशे तव कण्ठस्थिते मम प्राणाः कण्ठगताः। अतः अयं स्वार्थप्रयत्नः। साहसं त्यज्यताम्।

(4) हे प्रिये प्रणयिनि पाशे बन्धने तव कण्ठस्थिते गलस्थिते सति मम प्राणाः जीवितं कण्ठगताः गमनोन्मुखा इत्यर्थः। अभूवन्निति शेषः। अतः अयं त्वन्मरण-वारणाय कण्ठबन्धनमोचनरूपः उद्यम इत्यर्थः। स्वार्थे निजार्थे प्रयत्नः आत्मप्रयोजन-कानुष्ठानमित्यर्थः। साहसं बलात्कारकृतकार्य्यं। साहसन्तु बलात्कारकृतकार्य्ये दमे पिचेति मेदिनी। त्यज्यतां परित्यज्यताम्। (कश्चित्तु अयं साहसं स्वार्थप्रयत्न स्त्यज्यतामित्यन्वयमाह। साहसमिति पदस्य तव साहसात्मक इत्यर्थः।)

(5) उद्बन्धनयुक्तायां त्वयि मत्प्राणा निर्गमोन्मुखाः। अतस्त्वां वारयन्नात्महितायैव यते।

(8) कण्ठगतैः प्राणैः....स्वार्थप्रयत्नेनानेन। त्यज...।

(9) अनुष्टुप्।

(10) असङ्गतिर्नामालङ्कृतिः। भिन्नदेशतयात्यन्तं कार्य्यकारणभूतयोः। युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिरिति लक्षणात्।

राग। (राजानं दृष्ट्वा) अम्मो कधं एसो भट्टा।

(सहर्षमात्मगतम्) जं सच्चं एणं पेक्खिअ पुणो वि मे जीविदाहिलासो संवुत्तो, अधवा एणं पेक्खिअ कदत्था भविअ सुहेण अप्पाणअं उव्वन्धिअ जीविदं परिच्चइस्सं। (प्रकाशम्) मुञ्चदु मुञ्चदु मं भट्टा, पराहीणो क्खु अअं जणो ण उण ईदिसं अवसरं मरिदुं पावेदि, तुमं पि देवीए मा अप्पाणं अवराहिणं करेसि (इति पुनः कण्ठे पाशं दातु-मिच्छति)। (क)

(क) अहो कथमेष भर्त्ता। यत् सत्यमेनं प्रेक्ष्य पुनरपि मे जीविताभिलाषः संवृत्तः। अथवा एनं प्रेक्ष्य कृतार्था भूत्वा सुखेनात्मानमुद्बध्य जीवितं परित्यक्ष्यामि। मुञ्चतु मुञ्चतु मां भर्त्ता। पराधीनः खल्वयं जनः न पुनरीदृशमवसरं मर्त्तुं प्राप्नोति। त्वमपि देव्या मा आत्मानमपराधिनं कुरु।

(1) সা—(রাজাকে দেখিয়া) এই যে মহারাজ! (সহর্ষে স্বগত) সত্যই যে ইঁহাকে দেখিয়া আবারও জীবনে অভিলাষ হইতেছে। অথবা ইঁহার দর্শনে কৃতার্থা, সুখে উদ্বন্ধনে জীবন ত্যাগ করিব। (প্রকাশ্যে) মহারাজ, আমাকে ছেড়ে দিন, ছেড়ে দিন্। আমি পরাধীন। মরিতে আর এরূপ সুযোগ পাইব না। আপনি ও রাজ্ঞীর নিকট নিজকে অপরাধী করিবেন না। (পুনর্ব্বার কণ্ঠে পাশবন্ধনের ইচ্ছা)।

(2) Sa—(Seeing the king) Lo, this is the king. (Joyfully aside) Alas, his sight inspires me again with the love of life. Very well, happy to see him, I shall now hang myself with pleasure. (To the king) Release me, Sire, release me, I am not free and shall get no such opportunity again to die. You too must not make yourself faithless to the queen. (Wishes again to put the halter on her neck.)

(3) संवृत्तः = जातः। परित्यक्ष्यामि = विहास्यामि = मोक्ष्यामि। परि + त्यज + लृट् मिप्। त्यजति। तत्याज। अत्याक्षीत्। त्यज्यते। अत्याजि। त्यक्तः। त्यक्तुम्। त्यक्त्वा। मा कुरु = On such application of लोट्, remarks वैयाकरणाः:—

"कथं मा भवतु तस्य पापं मा भविष्यतीत्यसाधुरेवायम्। केचिदाहुरङ्दिपरो मा शब्दो विद्यते। तस्यायं प्रयोग इति"—काशिका। भट्टोजि also says—"मायं माङ्। किन्तु माशब्दः। cf :—पाणौ मा कुरु चूतसायकं मम्तुं मा चापमारोपयेति जयदेवः। The objection is to the use of लोट्, लट्, &c...; as with माङ्, only लुङ् shall be used to indicate whatever tense is intended and no other लकार is admissible, माङि लुङ् being the Rule (३।३।१७५) which enjoins the व्यवस्था सर्वलकाराणामपवादः। They justify it by considering मा as another निपात and not माङ्।

राजा—(निरूप्य सहर्षम्।) कथं प्रिया मे सागरिका।

(इति कण्ठात्पाशमाक्षिप्य।)

अलमलमतिमात्रं साहसेनामुना ते

त्वरितमयि विमुञ्च त्वं लतापाशमेनम्।

चलितमपि निरोद्धुं जीवितं जीवितेशे

क्षणमिह मम कण्ठे बाहुपाशं निधेहि। ६३॥

(इति बाहुपाशमाक्षिप्य कण्ठे गृहीत्वा स्पर्शसुखमभिनीय विदूषकं प्रति।)

सखे, इयमनभ्रा वृष्टिः।

(1) रा—(निरূপণ পূর্ব্বক সহর্ষে) এই যে আমার প্রিয়া সাগরিকা। (কণ্ঠ হইতে বন্ধন টানিয়া ফেলিয়া) অয়ি প্রাণেশ্বরি তোমার অতিমাত্র সাহসের প্রয়োজন নাই। এই লতাবন্ধন সত্বর পরিত্যাগ কর। আমার এই গমনোন্মুখপ্রাণ রোধ করিবার জন্ত ক্ষণকাল কণ্ঠে বাহুপাশ অর্পণ কর। (বাহুপাশ কণ্ঠে গ্রহণপূর্ব্বক স্পর্শসুখলাভের সহিত বিদূষকের প্রতি) বন্ধো, এ যে মেঘশূন্ত বর্ষণ!

(2) K—(Finding joyfully) Well, this is my dear *Sagarika*, (Snatching the noose away from her neck) O the mistress of my soul, no need of that rash deed on your part. Throw this halter away and fasten your arms on my neck for a short time,

to arrest my fleeting life. (Putting her arms round his neck and feeling pleasure, to the jester) Friend, this is a downpour without a cloud.

(3) अयि जीवितेशि ! अमुना ते साहसेनातिमात्रम् अलमलम्। त्वं त्वरितमेनं लतापाशं मुञ्च। मम चलितमपि जीवितं निरोद्धुमिह कण्ठे बाहुपाशं नन्तं निधेहि।

(4) अयि जीवितस्य प्राणानामीशि अधीश्वरि ! अमुना पाशबन्धनरूपेण ते तव साहसेन बलात्कारकृतकार्य्येण अतिमात्रमत्यर्थमलमलं न प्रयोजनम्। अलं भूषण पर्य्याप्तिशक्तिवारणवाचकमित्यमरः। चापले द्वे भवत इति वक्तव्यात् संभ्रमे द्वित्वम्। त्वं त्वरितं द्रुतमेनं लतापाशं वल्लीबन्धनं मुञ्च त्यज। मम चलितं गमनोन्मुखमपि जीवितं प्राणान् निरोद्धुं स्तम्भयितुमिह अस्मिन् मम कण्ठे चणं क्षणकालं बाहुपाशं भुजबन्धनं निधेहि स्थापय। अनभ्रा = मेघशून्या।

(5) अतिमात्रमविमृश्यकारणं विहाय लतापाशञ्च छित्त्वा मम प्रस्थानोन्मुखप्राणावलम्बनाय अस्मिन् कण्ठे भुजपाशं बधान।

(6) साहसेन...साध्यं नाप्नोति गम्यमानक्रियायाः करणे तृतीया। गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिकेति नियमात्।

अतिमात्रम् = इति निपातः। अथवा अति मात्रा यस्मिन्।

त्वरितम् = त्वर + क्तः। पक्षे तूर्णम्।

चलितम् = आदिकर्मणि क्तः। आदिकर्मणि निष्ठा वक्तव्येति (३।२।१०२)।

निरोद्धुम् = नि + रुध् + तुमुन्। रुणद्धि रुन्धे। रुरोध रुरुधे। रोत्स्यति-ते। अरुधत् अरौत्सीत् अरुद्ध। रुन्ध्यात् रुन्धानम्। रुद्धम्। रुध्यते अरोधि। कर्मकर्त्तरि अरुद्ध। रुद्धा।

(8) विमुच्यतां त्वया...लतापाशः अयम्...बाहुपाशः निधीयताम्।

(9) मालिनीवृत्तम्।

(11) अत्र सम्भ्रमो नाम भावः। तथाहि आदरातिशयाच्चेतस्यावेगः सम्भ्रमो मत इति सरस्वतीकण्ठाभरणे।

विदू—भोः, एव्वं णेदं। जइ अआलवादावली भविअ ण आआदि देवी वासवदत्ता। (क) (ततः प्रविशति वासवदत्ता काञ्चनमाला च।)

वास—हञ्जे कञ्चनमाले, तं तहा चरणणिवडिदं अज्ज उत्तं अवधीरिअ आअच्छन्तीए मए अदिणिट्ठुरं किदं। ता दाणिं सअं ज्जेव्व गदुअ अज्जउत्तं अणुणइस्सं। (ख)

काञ्च—को अस्सो देवी वज्जिअ एव्वं भणिदुं जाणादि। वरं सो एव्व देवो दुज्जणो होदु। ण उण देवी। ता एदु एदु देवी। (ग) (इति परिक्रामतः।)

राजा—अयि मुग्धेः, किमद्यापि मध्यस्थतया वयं विफल-मनोरथाः क्रियामहे।

काञ्च—(कर्णं दत्वा।) भट्टिणि, जह समीवे एसो भट्टा मन्तेदि तह तक्केमि तुमं ज्जेव्व अणुणेदुं आअच्छदि। ता उवसप्पदु भट्टिणी। (घ)

(क) भोः, एवं न्विदम्। यद्यकालवातावली भूत्वा नायाति देवी वासवदत्ता।

(ख) अयि काञ्चनमालि तं तथा चरणनिपतितमार्य्यपुत्रमवधीरयित्वा आगच्छन्त्या मया अतिनिष्ठुरं कृतं, तदिदानीं स्वयमेव गत्वा आर्य्यपुत्रमनुनेष्यामि।

(ग) कोऽन्यो देवीं वर्ज्जयित्वा एवं भणितुं जानाति। वरं स एव देवो दुर्ज्जनो भवतु। न पुनर्देवी। तदेतु एतु देवी।

(घ) भर्त्रि, यथा समीप एष भर्ता मन्त्रयते तथा तर्कयामि त्वामेवानुनेतुमागच्छति। तदुपसर्पतु भर्त्री।

(1) বি—তা বটে, যদি বাসবদত্তা অকালবাতাবর্ত্তী হইয়া না আসেন।

(বাসবদত্তা ও কাঞ্চনমালার প্রবেশ।)

বা—ওলো কাঞ্চনমালে, চরণপতিত আর্য্যপুত্রকে অবহেলনপূর্ব্বক আসিয়া অতি নিষ্ঠুর কার্য্য করিয়াছি। এখন নিজেই যাইয়া তাঁহাকে অনুনয় করিব।

কা—দেবী ভিন্ন আর কে এরূপ বলিতে জানে? বরং মহারাজই দুর্জ্জন হউন, কিন্তু রাজ্ঞীর তাহা হওয়া উচিত নহে। অতএব আসুন (উভয়ের পরিক্রমণ)।

রা—অয়ি সুন্দরি, এখন পর্য্যন্তও কেন ঔদাসীন্য দ্বারা আমাকে বিকলমনোরথ করিতেছ?

কা—(শ্রবণপূর্ব্বক) ভর্ত্রি, মহারাজ নিকটেই কথা বলিতেছেন। বোধ হয় আপনাকে অনুনয় করার জন্য আসিতেছেন। আপনি আসুন।

(2) J—O yes it is; but if the queen does not appear like a sudden squall (Enter the queen and her maid).

Q—O wench, I have acted very cruelly by coming away, after disregarding my husband fallen at my feet. I shall now go back myself and entreat him.

M—Who else but the queen would say this? Rather the king be wicked, than your majesty. So come mistress. (They proceed)

K—O charming one! why am I still baffled with your indifference.

M—(Listening) Mistress, His majesty is talking by, I think he is coming to entreat you. So go near, Madame.

(3) अकालवातावर्त्ती = असामयिकवात्या। अवधीर्य्य = अवहेलितं कृत्वा = उपेक्ष्य। अव अवधारिरिव धातुः। ततः क्त्वा। अवधीर्य्य इति वा संक्षेतम्। The form अवधीर्य्य occurs in माघ and नैषध and in this अव is उपसर्ग and धीरि the root. मध्यस्थतया = औदासीन्येन = with indifference. क्रियामहे = कृ कर्म्मणि लट् महिङ्। मुग्धे = सुन्दरि, मूढ़े वा, Beautiful or simple. मुग्धस्तु सुन्दरे मूढ़े इति मेदिनी।

वास। (सहर्षम्) ता अलअक्खिदा एव्व पुढदो गदुअ कण्ठे गेह्निअ पसादइस्सं। (क)

विदू। भोदि साअरिए वीसद्धा भविअ पिअवअस्सं आलावेहि। (ख)

वास। (आकर्ण्य सविषादम्) कञ्चणमाले कधं सा साअरिआ वि एत्थ एव्व चिट्ठदि, ता सुणिस्सं दाव, पच्छा उवसप्पिस्सं। (इति तथा करोति।) (ग)

साग। भट्टा किं एदिणा अलीअदाक्खिण्णेण, जीविदादो वि अधिअवल्लहाए देवीए पुणो वि अत्ताणअं अवराहिणं किं करेसि। (घ)

(क) तदलक्षितैव पृष्ठतो गत्वा कण्ठे गृहीत्वा प्रसादयिष्यामि।

(ख) भवति सागरिके, विश्रब्धा भूत्वा प्रियवयस्यमालप।

(ग) काञ्चनमाले, कथं सा सागरिकाप्यत्रैव तिष्ठति। तच्छृणुमस्तावत्। पश्चादुपसर्पिष्यामि।

(घ) भर्त्तः, किमेतेनालीकदाक्षिण्येन। जीवितादप्यधिकवल्लभाया देव्याः पुनरप्यात्मानमपराधिनं किं करोषि।

(1) वा—(সহর্ষে) অলক্ষিতে পৃষ্ঠের দিকে যাইয়া কণ্ঠে গ্রহণ পূর্ব্বক প্রসন্ন করিব।

বি—মাননীয়া সাগরিকে, অতি বিশ্বাসে প্রিয়বয়স্যের সহিত আলাপ করুন।

বা—(শ্রবণ পূর্ব্বক সবিষাদে) কাঞ্চনমালে, সেই সাগরিকাও এখানেই আছে। আগে শুনি, পশ্চাৎ নিকটে যাইব (শ্রবণ)।

সা—মহারাজ এই মিথ্যানুরাগ প্রদর্শনের প্রয়োজন কি? প্রাণাপেক্ষা সমধিকপ্রিয়া মহিষীর নিকট নিজকে অপরাধী করিতেছেন কেন?

(2) Q—(Joyfully) Going unperceived to his back, I shall take him by the neck and thus please him.

J—Respected *Sagarika*, talk confidingly with my dear friend.

Q—(Hearing and sorrowfully) Girl, why, that *Sagarika* too is here, I shall overhear and then go near. (Overhears).

S—Sire, what is the use of this false affection? Why are you making yourself again faithless to the queen who is dearer to you than your own life?

(3) उपसर्प्स्यामि = समीप गमिष्यामि। सर्पति। ससर्प। सर्प्ता स्रप्ता। सर्प्स्यति स्रप्स्यति। सर्पेत्। असर्पत्। सर्पेत। सृप्यात्। असृपत्। असर्पिष्यत असप्स्यत्। सृप्यते। असर्पि। सर्पम्। सर्पेत्। सृप्त्वा। सर्प्तुम् स्रप्तुम्। लुङि तु एकमेव रूपम्। गिरिमसृपद्रामो लिप्सुर्जनकसम्भवामिति भट्टिः। स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वक्तव्यमिति वार्त्तिके (३।१।४४) सृपेः पाठस्त्वनार्षत्वादुपेक्ष्यः। अतोऽस्मात्पक्षे न अस्राप्सीत् इत्यादिकमपाणिनीयम्। "प्राचा त्वस्राप्सीदसार्प्सीदिति सिद्धवदुदाहृतम् तत् प्रामादिकम्। कृषमृशेति वार्त्तिकमध्ये सृपेः प्रक्षेपोऽपि प्रामादिक एवेत्यवधेयम्" इति प्रौढमनोरमा। "प्रक्रियाकौमुद्यां प्रकृतवार्त्तिके सृपिमपि प्रक्षिप्य अस्राप्सीदसार्प्सीदित्यपि रूपद्वयमुदाहृतम्। तत् अप्रामाणिकत्वादुपेक्ष्यम्।" इति तत्त्वबोधिनी। अलीकदाक्षिण्येन = मिथ्याछन्दानुवर्त्तनेन = मिथ्यामनोरञ्जनेन मिथ्यानुरागप्रकाशनेन = with false humouring। दक्षिणो दक्षिणोद्भूत सरलच्छन्दवर्त्तिष्विति मेदिनी। अलीकमप्रिये भाले वितथे इति हेमचन्द्रः। अधिकवल्लभाया: = अधिकप्रियायाः। दयितं वल्लभं प्रियमित्यमरः।

राजा—अयि, मिथ्यावादिनी खल्वसि। कुतः

श्वासोत्कम्पिनि कम्पितं कुचयुगे मौने प्रियं भाषितं
वक्त्रेऽस्याः कुटिलीकृतभ्रुणि तथा यातं मया पादयोः।
इत्थं नः सहजाभिजात्यजनिता सेवैव देव्याः परं
प्रेमाबन्धविवर्द्धिताधिकरसा प्रीतिस्तु या सा त्वयि॥

(1) রাজা—অয়ি মিথ্যা বলিতেছ, কেন না,—ইহার (বাসবদত্তার) কুচযুগ শ্বাসদ্বারা উৎকম্পিত হইলে আমিও কম্পিত হই। ইনি মৌনে থাকিলে, প্রিয়বাক্য বলি। ইহার মুখ কুটিলীকৃতভ্রু হইলে আমি পদে পতিত হই। এই প্রকার মহিষীর সম্বন্ধে আমার সেবা কেবল স্বাভাবিক সৎকুলোদ্ভবজনিতা। কিন্তু তোমার প্রতি গাঢ়প্রেমবিবর্দ্ধিতা প্রীতি অধিকানুরাগা হইয়াছে।

(2) K—O you are telling fibs, since—if her breasts shake

with breathing, I shake ; if she keeps silent, I talk sweet words ; if she frowns, I fall at her feet and thus my attendance to her is only owing to her natural high birth, but the regard I feel for you, is full of attention produced from deep love.

(3) अस्याः श्वासोत्कम्पिनि कुचयुगे मया कम्पितम्। मौने प्रियं भाषितम्। तथा वक्त्रे कुटिलीकृतभ्रुणि पादयोः यातम्। इत्थं देव्याः नः सेवा परं सहजाभि-जात्यजनितैव। त्वयि तु या प्रीतिः सा प्रेमाबन्धविवर्द्धिताधिकरसा।

(4) अस्याः वासवदत्तायाः। श्वासेन उत्कम्पिनि प्रवेपिनि श्वासचले कुचयुगे स्तनद्वये, मया कम्पितं वेपितम्। तथा तस्याः मौने निर्वचनावस्थायां। मया प्रियं मधुरं भाषितम्। तथा अस्याः वक्त्रे आनने अकुटिले कुटिले सम्पद्यमाने कृते ते भ्रुवौ यस्मिन् तत् तथोक्तं तस्मिन् वक्रीकृतभ्रुवि। कृतेत्यादिषु भाषितपुंस्कं पुंवद् गालवस्येति (७।१।७४) विभाषा नुम्। सति। यस्य भावेन भावलक्षणमिति सप्तमी। मया पादयोः चरणयोर्यातं गतं पतितमित्यर्थः। इत्थमनेन प्रकारेण। देव्याः महिष्याः। नः अस्माकम्। उभयप्राप्तौ कर्मणीत्यत्र (२।३।६६) शेषे विभाषेति वक्तव्यात् कर्त्तरि षष्ठी सेवा शुश्रूषा परं केवलं। परः श्रेष्ठारिदूरान्योत्तरे क्लीबन्तु केवले इति मेदिनी। अभि-जातस्य भावः आभिजात्यं। गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ्। सहजायत इति सहजं स्वाभाविकम्। सहजेनाभिजात्येन जनिता। नैसर्गिककौलीन्योत्पादिता एव ध्रुवम्। अभिजातः कुलीनः स्यादिति हलायुधः। त्वयि तु किन्तु। या प्रीतिः स्नेहः सन्तोषो वा सा प्रेम्नः प्रणयस्य आबन्धेन गाढतया विवर्द्धित उपचितः अधिकः रसः अनुरागः यस्याः सा तथोक्ता। प्रणयगाढत्वोपचिताधिकानुरागा। भवतीति शेषः। रसः स्वादे जले वीर्य्ये शृङ्गारादौ विषे द्रवे। बोले रागे देहधातौ तिक्तादौ पारदेपि चेति हेमचन्द्रः।

(5) श्वासकम्पितस्तनायां मौनावलम्बिन्यां क्रुद्धायाञ्च देव्यां वासवदत्तायां मया यानि कम्पनप्रियभाषणपादपतनानि अनुष्ठीयन्ते तानि तस्याः सत्कुलसम्भवत्वोत्-पादितानि। त्वयि प्रीतिस्तु प्रकृतप्रणयोपचितभावा।

(6) कम्पितम्=कम्प+क्तः। कम्पते। चकम्पे। कम्पिष्यते। अकम्पिष्ट।

(7) मौने=मुनि+अण्। तस्मिन्। इगन्ताच्च लघुपूर्वादित्यण् (५।१।१३१)

मुने भावः कर्म वेति । गुणवाचक words ending in इक् which is preceded by a लघु vowel, takes अण् instead of ष्यञ्, in the sense of भाव or कर्म ।

कुटिलीकृतभ्रुणि = पक्षे कुटिलीकृतभ्रुवि ।

(S) कम्पितवान्···भाषितवान्...यातवान् अहम्...जनितया...सेवया...रसग्र प्रोत्या यया तया... ।

(9) शार्दूलविक्रीडितं वृत्तम् ।

वास—(उपसृत्य सरोषम् ।) अज्जउत्त, जुत्तं एदम् ; सरिसं एदम् । (क)

राजा—(दृष्ट्वा सवैलक्ष्यम् ।) देवि, न खल्वकारणे मामुपालब्धुमर्हसि । त्वामेव मत्वा वेषसादृश्याद् विप्रलब्धा वयमिहागताः । तत् क्षम्यताम् । (इति पादयोः पतति ।)

वास—(सरोषम् ।) अज्जउत्त, उट्ठेहि उट्ठेहि । किं अज्जवि महजाभिजादाए सेवाए दुक्खं अणुभवीअदि । (ख)

राजा—(स्वगतम् ।) किमेतदपि श्रुतं देव्या । तत् सर्वथा देवीप्रसादनोपायं प्रति निराशीभूताः स्मः । (इत्यधोमुखस्तिष्ठति ।)

विदू—(भोदि, तुमं किल अत्ताणअं उब्बन्धिअ वावादेमि त्ति वेससारिस्समोहिदेण मए पिअवअस्सो एत्थ आणीदो । जइ मम वअणं ण पत्तिआअसि ता पेक्ख इमं लदापासम् । (इति लतापाशं दर्शयति ।) (ग))

(क) आर्यपुत्र, युक्तमेतत् । सदृशमेतत् ।

(খ) আর্য্যপুত্র উত্তিষ্ঠ উত্তিষ্ঠ, কিমদ্যাপি সহজাভিজাতয়া সেবয়া দুঃখমনুভূয়তে।

(গ) ভবতি ত্বং কিল আত্মানমুদ্বধ্য ব্যাপাদয়সীতি বেশসাদৃশ্যেন মোহিতেন ময়া প্রিয়বয়স্যোঽত্রানীতঃ, যদি মম বচনং ন প্রত্যেষি তৎ প্রেক্ষস্ব ইমং লতাপাশম্।

(1) রা—(নিকটে আগমন পূর্ব্বক সরোষে) আর্য্যপুত্র, ইহা যুক্ত বটে, সদৃশ বটে।

রা—(দর্শন পূর্ব্বক বিস্ময়ান্বিতভাবে) মহিষি, অকারণে আমাকে তিরস্কার করিও না। বেশ সাদৃশ্যে প্রতারিত হইয়া তোমাকে মনে করিয়াই আমি এখানে আসিয়াছি। ক্ষমা কর। (পায়ে পতন।)

রা—(সরোষে) আর্য্যপুত্র উঠুন উঠুন। সহজাভিজাত সেবা দ্বারা এখনও কষ্ট অনুভব করিতেছেন কেন?

রা—(স্বগত) এই যে, ইহাও দেবী শুনিয়াছে; ইহার প্রসাদনের একেবারেই আর আশা নাই (অধোবদন)।

বি—মাননীয়ে, আপনি উদ্বন্ধনে নিজকে বিনাশ করিতেছেন বুঝিয়া বেশসাদৃশ্যমোহিত আমি প্রিয় বয়স্যকে এখানে আনিয়াছি। আমার বাক্যে বিশ্বাস না হইলে এই লতাপাশ দেখুন (লতাপাশ প্রদর্শন।)

(2) Q—(Coming near angrily) Husband, this is proper, this is just indeed !

K—(Looking with wonder) Queen, do not censure me without any cause. Deceived by the dress, I mistook you and came here. Pardon (Falls at her feet).

Q—(Angrily) Husband, rise, rise, why are you still aggrieved with attendance naturally proper ?

K—(Aside) This too has been overheard. So I am thoroughly hopeless in reobtaining her favour (Hangs down his head).

J—O respected lady, having mistaken by the similarity of dress that you were dying by hanging yourself, I brought my dear friend here. If you do not trust my words, just see the halter. (Shows the same).

(3) উপালব্ধুম্ = দুর্ব্বদিতুম্ = তিরস্কর্ত্তুম্ = নিন্দিতুম্। বিপ্রলব্ধাঃ = বঞ্চিতাঃ। বিধেয়বিশেষণত্বাদেকত্বেপি অস্মদো বহুত্বং ন দোষায়। সহজাভিজাতয়া = স্বভাবন্যায্যয়া।

अभिजातः कुलीने स्यात् न्याय्यपण्डितयोरपीति मेदिनी। व्यापादयसि = निहंसि = मारयसि। मोहितेन = जनितभ्रमेण। प्रत्येमि = विश्वसिमि। प्रति + इण + लट् मिप्।

वास। (सकोपम्) हञ्जे कञ्चणमाले एदेण एव्व लदापासेण बन्धिअ गेह्न एदं बह्मणं। दुव्विणीदकण्णआं अ अग्गदो करेहि। (क)

काञ्च—जं देवी आणवेदि। (लतापाशेन वसन्तकं गले बद्धा ताडयति।) हदास। अणुभव दाव अत्तणो अविणअस्स फलं। देवीए दुव्वअणेण कडुइदाइं सोत्ताइं त्ति सुमरेहि तं वअणं। साअरिए, तुमं पि अग्गदो होहि। (ख)

साग—(स्वगतम्) अकिदपुण्णाए मए मरिदुं वि अत्तणो इच्छाए ण पारिदं। (ग)

विदू—(सविषादम्) भो वअस्स, सुमरेहि मं अणाधं देवीए बन्धणादो विवज्जन्तं। (इति राजानमालोकयति। वासवदत्ता राजानमालोकयन्ती सागरिकां वसन्तकं च गृहीत्वा काञ्चनमालया सह निष्क्रान्ता।) (घ)

(क) अयि काञ्चनमाले एतेनैव लतापाशेन बद्धा गृहाणैनं ब्राह्मणं दुर्विनीत-कन्यकाञ्चाग्रतः कुरु।

(ख) यद्देव्याज्ञापयतीति। हताश, अनुभव तावदात्मनोऽविनयस्य फलम्। देव्या दुर्वचनेन कटूकृतानि श्रोत्राणीति स्मर तद्वचनम्। सागरिके, त्वमप्यग्रतो भव।

(ग) अकृतपुण्यया मया मर्तुमप्यात्मन इच्छया न पारितम्।

(घ) भो वयस्य, स्मर मामनाथं देव्या बन्धनाद्विपद्यमानम्।

(1) বা—(সকোপে) ওলো কাঞ্চনমালে, এই ব্রাহ্মণকে লতাপাশে বন্ধন করিয়া নেও—আর এই দুর্বিনীত কন্যাটাকেও অগ্রে কর।

কা—দেবীর যেরূপ আজ্ঞা (লতাপাশে বিদূষককে বন্ধন ও তাড়ন) হতাশ, নিজের অবিনয়ের ফল অনুভব কর। "দেবীর বাক্যে কর্ণ জ্বলিয়াছে" কথা মনে কর। সাগরিকে, তুমিও চল।

সা—(স্বগত) অকৃতপুণ্যা আমি নিজের ইচ্ছায় মরিতেও পারিলাম না।

বি—(সবিষাদে) ওহে বন্ধো, রাজ্ঞীর বন্ধনে ম্রিয়মাণ অনাথ আমাকে মনে করিও। (রাজাকে দর্শন। রাজাকে দর্শনকারিণী সাগরিকা, বিদূষক ও কাঞ্চনমালার সহিত বাসবদত্তা নিস্ক্রান্তা)

(2) Q—(Angrily) O *Kanchanama'a*, secure this *Brahmin* with this creeper noose and take him away. And make this hussy go on before you.

M—As the queen directs. (Ties down the jester and beats him). Wretch, bear the consequence of your impertinence. Remember "your ears were tingling with the queen's coarse words" You too *Sagarika*, move on.

S—(Aside) Impious as I am I cannot die, even, of my own accord.

J—(Sorrowfully) O friend, remember me who am helpless and dying as bound down under the queen's orders. (Looks at the king. Exit the queen with the maid, jester and *Sagarika* eyeing the king.)

(3) दुर्विनीतकन्यकाम् = दुर्विनीता कुत्सिता कन्या ताम्। कुत्सितइति कन्। केऽण इति ह्रस्वः। कन्या + कन् + टाप्। भट्टोजिमते कन्याशब्दः चिपकादौ पठितः। गोपतिमते न। भाष्यकाशिकयोरपि न दृष्टः। कटूकृतानि = कटु + च्वि + कृ + क्तः। तानि। च्वौचेति दीर्घः (७।४।२६)। मर्तुम् = मृ + तुमुन्। म्रियते। ममार। मर्त्ता। मरिष्यति। म्रियताम्। अम्रियत। म्रियेत। मृषीष्ट। अमृत। अमरिष्यत्। म्रियते। अमारि। मृतः। म्रियमाणः। मृत्वा। विपद्यमानम् = म्रियमाणम्। वि + पद् + शानच्। तम्।

राजा—(सखेदम्।) कष्टं भोः कष्टम्।
किं देव्याः कृतदीर्घरोषमुषितस्निग्धस्मितं तन्मुखं

त्रस्तां सागरिकां सुसंभृतरुषा संतर्ज्यमानां तथा।
बद्धा नीतमितो वसन्तकमहं किं चिन्तयामीत्यहो
सर्वाकारकृतव्यथः क्षणमपि प्राप्नोमि नो निर्वृतिम्॥

तत्किमिदानीमिह स्थितेन प्रयोजनम्। देवीमेव प्रसादयितुमभ्यन्तरं प्रविशामि।

(इति निष्क्रान्ताः सर्वे।)

इति संकेतो नाम तृतीयोऽङ्कः।

(1) রা.—(সখেদে) হায় কষ্ট ! অহো, দেবীর প্রবলরোষাপহৃত স্মিত মুখ, তাঁহার ক্রোধে ক্রোধ তিরস্কৃতা ভীতা সাগরিকা এবং সংযত ও নীত বসন্তক, প্রত্যেকেই আমার চিন্তার বিষয় হইতেছে এবং সকলেরই আকৃতিতে ব্যথিত হইয়া ক্ষণকালও সুখলাভ করিতেছি না। অতএব এখানে থাকার আর প্রয়োজন নাই। দেবীকেই প্রসন্না করিবার জন্য অন্তঃপুরে প্রবেশ করি। (নিষ্ক্রান্ত।)

ইতি সঙ্কেত নামক তৃতীয় অঙ্ক।

(2) K—(Sorrowfully) O pity. Alas, the queen's sweetly smiling face now flushed with anger, the rebuked and frightened *Sagarika*, as well as the restrained and removed *Basantaka*, are now the objects of my thought. Pained by their looks, I am unable to get any comfort even for a short time. So what is the good of staying here: I go to the inner apartment to regain the queen's favour. (Exit) The end of Act III.

(3) किं देव्याः तत् कृतदीर्घरोषमुषितस्निग्धस्मितं मुखं सुसम्भृतरुषा तथा सन्तर्ज्यमानां त्रस्तां सागरिकां किं बद्धा इतो नीतं वसन्तकं चिन्तयामीत्यहं सर्वाकारकृतव्यथः अहो क्षणमपि निर्वृतिं नो प्राप्नोमि।

(4) किमिति वितर्के। देव्या महिष्या वासवदत्तायास्तत् प्राक्दृष्टं कृतेन दीर्घेण प्रबलेन रोषेण क्रोधेन मुषितमपहृतं स्निग्धं मनोहरं स्मितमीषद्धसनं यस्मात् तत् तथोक्तम्। विहितप्रबलकोपहृतमनोहरमृदुहास्यम्। मुखमाननम्। अथवा सुसंभृता

मन्मथक्रमचिता रुट् क्रोधो यया सा तथोक्ता तया विवर्द्धितकोपया। (क्रमोद्गतकर्षेति पाठे क्रमेण आनुपूर्व्येण उद्गता उद्दीपिता रुट् यस्यास्तया क्रमोद्दीपितक्रोधया) मन्तर्ज्ज्यमानां भर्त्स्यमानाम् अतएव वस्तां भीतां सागरिकामुत किं बद्धा सयम्य इतः स्थानात् स्थानात् नीतं वसन्तकं चिन्तयामि मनसि करोमि इति अहं सर्वेषां देवी-सागरिकावसन्तकानाम् आकारै राकृतिभिः कृता व्यथा कष्टं यस्य स तथोक्तः सकलाकृतिजनितकष्टः। अहो क्षणं स्वल्पमपि निर्वृतिं स्वस्थितिं सुखमिति यावत्। निर्वृतिः स्वस्थितावस्तंगमने च सुखेस्त्रियामिति मेदिनी। नो न प्राप्नोमि लभे।

(5) कोपकृतचिह्नितं देवीमुखं तिरस्कृता भीता सागरिका पाशबद्धो नीतो वसन्तकश्च मम चिन्ताविषयः। सर्वेषामाकृतिभिर्दुःखितोऽहं क्षणं न किञ्चिदपि शर्म लभे।

(6) मुषितम्=मुष+क्तः। मुष स्तेये इति क्र्यादिः। सेट् च। कथन्तर्हि मुष्टं प्रतिग्राहयता समय पात्रीकृतो दस्युरिवासि येनेति शाकुन्तलम्। चिन्त्यमेव। अथवा आदितश्चेति सूत्रे (७।२।१६) काशिका—"चकारोऽनुक्तसमुच्चयार्थः। आश्वस्तः। वान्तः इति"। तथाहि सैन्यरेणुमुषितार्कदीधितिरिति रघौ। निरङ्कुशा हि कवयः।

मन्तर्ज्यमानाम्=सम्+तर्ज+णिच+कर्मणि शानच्। ताम्। तर्जयते। अवतर्जन। चौरादिकः। आकुस्मीयत्वादात्मनेपदी। तर्जयन्निव केतुभिरिति रघौ राक्षसो तर्जयत् सततमिति भट्टौ च (१७।१६) कथं परस्मैपदम्? आदि हेतुमणिचोति भट्टिः।

(8) मुखं...वस्ता सागरिका सन्तर्ज्यमाना...नीतो वसन्तकः...मया चिन्त्यते... व्यथेन प्राप्यते निर्वृतिः।

(9) शार्दूलविक्रीडितं वृत्तम्।

इति सङ्केतो नाम तृतीयोऽङ्कः।

चतुर्थोऽङ्कः ।

प्रवेशकः ।

(ततः प्रविशति रत्नमालामादाय सास्रा सुसंगता ।)

सुसं—(सकरुणं निश्वस्य ।) हा पिअसहि साअरिए, हा लज्जालुए, हा सहीअणवच्छले, हा उदारसीले, हा सोम्मदंसणे, कहिं गदासि । देहि मे पडिवअणं । (इति रोदिति । ऊर्द्धमवलोक्य निश्वस्य च ।) हंहो देव्वहदअ, अकरुण, असामण्णरूवसोहा तादिसी तुए जइ णिम्मिदा ता कीस उण ईदिसं अवत्थन्तरं पाविदा । इयं च रअणमाला जीविदणिरासाए ताए कस्सवि बम्हणस्स हत्थे पडिवादेहित्ति भणिअ मम हत्थे समप्पिदा । ता जाव कंपि बम्हणं अण्णेसामि । (नेपथ्याभिमुखमवलोक्य ।) अए, कहं एसो क्खु बम्हणो वसन्तओ इध एव्व आअच्छदि । ता इमस्सिं एव्व पडिवादइस्सं । (क)

(क) हा प्रियसखि सागरिके, हा लज्जालुके, हा सखीजनवत्सले, हा उदारशीले हा सौम्यदर्शने, क्व गतासि । देहि मे प्रतिवचनम् । हंहो दैवहतक, अकरुण । असामान्यरूपशोभा तादृशी त्वया यदि निर्मिता तत्कस्मात्पुनरीदृशमवस्थान्तरं प्रापिता । इयं च रत्नमाला जीवितनिराशया तया कस्यापि ब्राह्मणस्य हस्ते प्रतिपादयेति भणित्वा मम हस्ते समर्पिता । तद्यावत्कमपि ब्राह्मणमन्विष्यामि । अये, कथमेष खलु ब्राह्मणो वसन्तक इहैवागच्छति तदस्मा एव प्रतिपादयिष्यामि ।

চতুর্থ অঙ্ক। প্রবেশক (অন্তঃপুর)

(রত্নমালা হস্তে অশ্রুযুক্তা সুসঙ্গতার প্রবেশ)

(1) সু—(সকরুণ নিশ্বাসের সহিত।)—হায় প্রিয় সখি সাগরিকে, হায় লজ্জাশীলে সখীজনবৎসলে, সরলচরিত্রে, হায় সৌম্যদর্শনে কোথায় গেলে? বল। (রোদন, উর্দ্ধে অবলোকন ও নিশ্বাস ত্যাগ) রে নষ্ট দৈব! নির্দ্দয়! এই অসামান্যরূপশালিনী অঙ্গনা নির্ম্মিতা হইয়া কেন অন্যদশা প্রাপিতা হইল? প্রাণধারণে নিরাশ হইয়া সে আমার হাতে এই রত্নমালা প্রদান পূর্ব্বক বলিয়াছে একজন ব্রাহ্মণকে ইহা দিও। অতএব কোন ব্রাহ্মণকে খুঁজিতে হইবে। (নেপথ্যে দৃষ্টি) এই যে বসন্তকই আসিতেছে। ইহাকেই রত্নমালা অর্পণ করিব।

ACT IV. PRELUDE. SCENE—HAREM.

(ENTER *Soosangata* WITH A PEARL NECKLACE, SHEDDING TEARS)

(2) Soo—(Sighing pitifully) O my dear friend *Sagarika*, So coy and affectionate to your companions, so frank and beautiful, where are you? respond to me? (Weeping, looking up and sighing) O cruel, wicked fate! why have you created such an extra-ordinary beauty and then reduced her to such a state? She gave this necklace to me with a request that it was to be presented to a *Brahmin*. So I shall have to get one. (Looking within). Here comes *Basantaka*. I shall hand it over to him.

(3) लज्जालुके = लज्जाशीले। केचित्तु लज्जाशीले इत्येव संस्कृतमाहुः For its derivation, some give लस्ज् + आलुच् and others लज्जा + आलु। But to support this, no Rule in the अष्टाध्यायी or in the उणादिसूत्र commented on by उज्ज्वलदत्त is to be found. Others take it under मृगय्वादयश्च (उण्, १।३७) i.e लज्जा + ला + कुः। Then कन्। हंहो = आमन्त्रणे निपातोऽयम्। अद्रेत्यामन्त्रणे हंहो भो भो इति च कथ्यते इति हलायुधः। प्रतिपादय = देहि।

(ततः प्रविशति हृष्टो वसन्तकः।)

वस—ही ही। भो भोः, अज्ज क्खु पिअवअस्सेण पसादिदाए तत्तभोदीए वासवदत्ताए बन्धणादो मोचिअ सहत्थदिण्णेहिं मोदअलड्डुआहिं उदरं मे सुपूरिदं किदं।

अस्सं च। एदं पट्टंसुअजुअलं कस्साभरणं अ दिस्सं। ता जाव दाणिं पिअवअस्सं पेक्खिस्सं। (इति परिक्रामति।) (क)

सुसं—(रुदती सहसोपसृत्य।) अज्ज वसन्तअ, चिट्ठ दाव तुमं मुहुत्तअं। (ख)

विदू—(दृष्ट्वा।) कधं सुसंगदा। सुसंगदे, एत्थ किं णिमित्तं रोदिअदि। ण क्खु साअरिआए अच्चाहिदं किंपि संवुत्तम्। (ग)

(क) हीं हीं। भो भोः, अद्य खलु प्रियवयस्येन प्रसादितया तत्रभवत्या वासवदत्तया बन्धनान्मोचयित्वा स्वहस्तदत्तमिष्टान्नमोदकलड्डुकाभिरुदरं मे सुपूरितं कृतम्। अन्यच्च। एतत्पट्टांशुकयुगलं कर्णाभरणं च दत्तम्। तद्यावदिदानीं प्रियवयस्यं प्रेक्षिष्ये।

(ख) आर्य्य वसन्तक, तिष्ठ तावत्त्वं मुहूर्त्तम्।

(ग) कथं सुसंगता। सुसंगते, अत्र किंनिमित्तं रुद्यते। न खलु सागरिकाया अत्याहितं किमपि संवृत्तम्।

(অথ বিদূষকের প্রবেশ।)

(1) বি—হাঁ হাঁ। ভো ভোঃ। আজ প্রিয়বয়স্য কর্তৃক প্রসাদিত মহিষী বাসবদত্তা বন্ধনমোচনপূর্ব্বক স্বহস্তদত্ত লাড়ু মোয়ার সহিত আমার উদর পূর্ণ করিয়াছেন। এই পট্টবস্ত্রদ্বয় আর কর্ণালঙ্কারও পাইয়াছি। এখন বয়স্যকে দেখিতে হয়। (পরিক্রমণ)।

সু—(রোদন ও সহসা নিকটে গমন) আর্য্য বসন্তক, কিছুক্ষণ অপেক্ষা করুন।

বি—(দর্শনপূর্ব্বক) কে, সুসঙ্গতা? সুসঙ্গতে, কাঁদিতেছ কেন? সাগরিকার কোনও অত্যাহিত নয় ত?

(ENTER THE JESTER FULL OF GLEE.)

(2) J—O, O, having me released from custody, the respected queen appeased by my royal friend, has regaled me with all sorts of sweetmeats from her own fair hands and presented me also with silk cloths and ear-rings. So I shall now see my friend (Moving).

Soo—(Weeping and coming near) Respected *Basantaka*, wait a little.

J—(Looking) It is *Soosangata*. *Soosangata*, why do you weep? Has anything disastrous happened to *Sagarika*?

(3) अत्याहितम् = जीवनापेक्षकर्म = some deed depending on life or death. अत्याहितं महाभीतौ जीवनापेक्षकर्मणीति मेदिनी।

सुसं। अज्ज वसन्तअ, अहं ज्जेव्व णिवेदइस्सं। सा क्खु तवस्सिणी देवीए उज्जइणिं पेसिदेत्ति जणप्पवादं कदुअ उवत्थिदे अड्ढरत्ते ण जाणीअदि कहिं णीदेत्ति। (क)

विदू। (सोद्वेगम्) भोदि साअरिए, हा असामण्णरूअ-मोहे, हा मिदुभासिणि, कहिं सिं दाणिं देहि मे पडिव-अणं, अदिणिग्घिणं देवीए किदं। (ख)

सुसं। अज्ज वसन्तअ, एसा क्खु रअणमाला ताए जीविदणिरासाए अज्जवसन्तअस्स हत्थे पडिवादेहि त्ति भणिअ मम हत्थ समप्पिदा, ता णं गेह्णदु अज्जो एदम्। (ग)

विदू। (सास्रं सकरुणं कर्णौ पिधाय) भोदि, कधं मम ईदिसे पत्थावे एदं गेह्णिदुं हत्थो पसरदि (इत्युभौ रुदितः)। (घ)

(क) आर्य वसन्तक, अहमेव निवेदयिष्यामि। सा खलु तपस्विनी देव्या उज्जयिनीं प्रेषितेति जनप्रवादं कृत्वा उपस्थितेऽर्द्धरात्रे न ज्ञायते क्व नीतेति।

(ख) भवति सागरिके, हा असामान्यरूपशोभे, हा मृदुभाषिणि, क्वासीदानीम्। देहि मे प्रतिवचनम्। अतिनिर्घृणं देव्या कृतम्।

(গ) আর্য্য বসন্তক, এষা খলু রত্নমালা তয়া জীবিতনিরাশয়া আর্য্যবসন্তকস্য হস্তে প্রতিপাদয়েতি ভণিত্বা মম হস্তে সমর্পিতা, তন্নন গৃহ্নাতু আর্য্য এনাম্।

(ঘ) ভবতি, কথং মম ঈদৃশে প্রস্তাবে ইমাং গৃহীতুং হস্তঃ প্রসরতি।

(1) সু—আর্য্য বসন্তক, আমি বলিতেছি। নিরুপায়া সাগরিকা "উজ্জয়িনীতে প্রেরিত হইয়াছে" এই জনরব রটাইয়া রাজ্ঞী অর্দ্ধরাত্রে তাহাকে কোথায় নিয়াছেন জানি না।

বি—(উদ্বেগের সহিত) হায় মাননীয়ে, অসামান্যরূপশালিনি, মধুরভাষিণি সাগরিকে তুমি কোথায়? উত্তর দাও। রাজ্ঞীর কার্য্য অতিনিষ্ঠুর হইয়াছে।

সু—আর্য্য বসন্তক, এই রত্নমালা জীবিতনিরাশা সাগরিকা কর্তৃক আপনাকে প্রদান করার জন্য আমার হস্তে অর্পিত হইয়াছে। অতএব গ্রহণ করুন।

বি—(সাশ্রু ও সদয়ভাবে কর্ণাচ্ছাদন পূর্ব্বক) এরূপ ব্যাপারে ইহা গ্রহণের জন্য আমি কিরূপে হস্ত প্রসারণ করিব (উভয়ের রোদন)।

2,—Soo—Sir, I shall tell you. That poor *Sagarika* was spirited away in the midnight, nobody knows where, by the queen, circulating a rumour of her despatch to Ujjein.

J—(Anxiously) O *Sagarika*, so fair, so sweet-tongued, where are you? respond to me. The queen has acted very cruelly indeed.

Soo—Sir, despaired of life, *Sagarika* gave this necklace to me to present you with. So accept it, Sir.

J—(With tears and pitifully closing his ears) O good one, how can I extend my hand to recieve it under such circumstances (both weep).

(3) तपस्विनी = दीना = अनुकम्पनीया। अर्द्धरात्रे = निशीथे। अर्द्धरात्रनिशीथौ द्वावित्यमरः। रात्रेरर्द्धं तस्मिन्नित्येकदेशितत्पुरुषः। अर्द्ध नपुंसकमिति। अहः सर्व्वैकदेशसंख्यातपुण्याच्च रात्रेरित्यच् प्रत्ययः समासान्तः। रात्राह्नाहाः पुंसीति पुंस्त्वम्।

जनप्रवादं = किंवदन्तीम्। भ्रान्त्वा = उद्भ्राम्य। अतिनिष्ठुरं = अतिनिष्ठुरम्। अनुक्रोशः कृपा घृणा दया च करुणा घृणेति हलायुधः।

सुसं—(अञ्जलिं बद्ध्वा।) ताए एव्व अणुग्गहं करन्तो अङ्गीकरेदु एदं अज्जो। (क)

विदू।* (विचिन्त्य) अहवा उवणेहि। जेण इमाए ज्जेव साअरिआविरहक्कण्ठिदं पिअवअस्सं विणोदेमि।

(सुसंगता वसन्तकस्य हस्ते रत्नमालां ददाति।)

(गृहीत्वा निरूप्य सविस्मयम्) भोदि, कुदो उण ईदिसस्स अलंकारस्स समागमो। (ख)

सुसं। अज्ज मएवि कोदूहलेण सा पुच्छिदाएव्व आसी। (ग)

विदू। तदो ताए किं भणिदम्। (घ)

(क) तस्या एवानुग्रहं कुर्वन्नङ्गीकरोत्विमामार्य्यः।

(ख) अथवा उपनय। येनैतयैव सागरिकाविरहोत्कण्ठितं प्रियवयस्यं विनोदयामि। भवति, कुतः पुनरीदृशस्यालंकारस्य समागमः।

(ग) आर्य्य मयापि कौतूहलेन सा पृष्टैवासीत्।

(घ) ततस्तया किं भणितम्।

(1) सु—(কৃতকরপুটে) তাহাকেই অনুগ্রহ করিবার জন্য আপনি ইহা গ্রহণ করুন।

বি—(চিন্তাপূর্ব্বক) অথবা দেও। সাগরিকাবিরহোৎকণ্ঠিত প্রিয়বয়স্যকে ইহা দ্বারা শান্ত করিব। (সুসঙ্গতা হইতে রত্নমালা গ্রহণ পূর্ব্বক নিরূপণ করিয়া বিস্ময়ের সহিত) মাননীয়ে, ঈদৃশ অলঙ্কারের কোথা হইতে প্রাপ্তি সম্ভব ?

সু—আর্য্য, আমিও ইহা কৌতূহলহেতু তাহাকে জিজ্ঞাসা করিয়াছিলাম।

বি—সে কি বলিয়াছে ?

(2) Soo.—(With joined palms) Sir, accept it as a favour to her.

J.—(Thinking) Or bring it. I shall console with it my dear friend the king, suffering from her separation. (Taking and looking at it with surprize)? O good one, whence could such an ornament be procured ?

Soo.—I too, sir, asked her, as it excited my curiosity.

J.—What did she reply ?

(3) अङ्गीकरोतु=स्वीकरोतु। ग्रंथे प्रथम इति प्रथमः पुरुषः।

सुसं। तदो सा उद्धं पेक्खिअ दीहं णिस्ससिअ, सुसङ्गदे किं दाणिं तव इमाए कधाए त्ति भणिअ, रोदिदुं पउत्ता। (क)

विदू। णं कधिदं एव्व ताए सामण्णजणदुल्लहेण इमिणा परिच्छदेण सव्वधा महाभिजणसमुप्पणाए ताए होदव्वं। सुसङ्गदे, पिअवअस्सो दाणिं कहिं। (ख)

सुसं। अज्ज एसो क्खु भट्टा देवीभवणादो णिक्कमिअ फढ़िअसिलामण्डवं गदो, ता गच्छदु अज्जो, अहं वि देवीए वासवदत्ताए परिचारिणी भविस्सं। (इति निष्क्रान्तौ) (ग)

इति प्रवेशकः।

(क) ततः सा ऊर्द्धं प्रेक्ष्य दीर्घं निश्वस्य, सुसङ्गते किमिदानीं तवानया कथया इति भणित्वा रोदितुं प्रवृत्ता।

(ख) ननु कथितमेव तया सामान्यजनदुर्लभेनानेन परिच्छदेन सर्व्वथा महाभिजनसमुत्पन्नया तया भवितव्यम्। सुसङ्गते, प्रियवयस्य इदानीं क।

(ग) आर्य्य एष खलु भर्त्ता देवीभवनान्निष्क्रम्य स्फटिकशिलामण्डपं गतः, तद्गच्छत्वार्य्यः, अहमपि देव्या वासवदत्तायाः परिचारिणी भविष्यामि।

(1) সু—তখন সে ঊর্দ্ধে দৃষ্টিপূর্ব্বক দীর্ঘনিশ্বাস ত্যাগ করিয়া "সুসঙ্গতে, তোমার এই কথায় প্রয়োজন কি?" বলিয়া রোদনে প্রবৃত্তা হইয়াছিল।

বি—তবে বলাই হইয়াছে যে ইতরজনদুর্ল্লভ এই অলঙ্কারের অধিকারিণী সে উৎকৃষ্টকুলসম্ভূতা। সুসঙ্গতে, প্রিয় বয়স্য এখন কোথায়?

সু—আর্য্য, এইমাত্র মহারাজ রাজ্ঞীর গৃহ হইতে ফটিকশিলাগৃহে গেলেন। আপনি যান। আমিও দেবী বাসবদত্তার পরিচারিণী হইব। (উভয়ে নিষ্ক্রান্ত)

ইতি প্রবেশক।

(2) Soo.—She then looked up and sighed and began to weep, saying "O *Soosangata*, what will you do now with that story ?"

J.—So she had in fact indicated her noble birth, being the owner of this ornament rare to any ordinary people. *Soosangata*, where is now my dear friend ?

Soo.—Sir, the king has just left the queen's house and gone to the crystal palace. So go, sir. I too shall be a servant to the queen (exeunt).

THE END OF THE PRELUDE TO ACT IV.

(3) महाभिजनसमुत्पन्नया = उत्कृष्टकुलजातया। सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ इत्यमरः। अभिजनः = कुलम् = race or lineage.

इति प्रवेशकः।

चतुर्थोऽङ्कः

(ततः प्रविशत्यासनस्थो राजा।)

राजा। (विचिन्त्य)

सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकं
वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः।
प्रत्यासत्तिमुपागता न हि तथा देवी रुदत्या यथा
प्रक्षाल्येव तयैव वाष्पसलिलैः कोपोऽपनीतः स्वयम्॥

(আসনস্থ রাজার প্রবেশ)

(1) রাজা—(চিন্তাপূর্ব্বক) রোদনপরায়ণা রাজ্ঞী নিজেই চক্ষুর্জলে যেমন কোপ প্রক্ষালন করিয়াছে; সব্যাজ শপথ, প্রিয়বাক্য, অত্যন্তচিত্তানুবর্ত্তন, বিস্ময়বিশ্রিত পাদপতন অথবা পুনঃপুনঃ সখীবাক্য দ্বারা কিন্তু তেমন প্রসন্নতা লাভ করে নাই।

(2) K.—(Thinking) Deceitful vows, sweet speeches, extreme humourings, fallings at her feet with full wonder, or repeated recommendations of her companions, could not relieve the queen of her anger as her own weeping did.

(3) सव्याजैः शपथैः, प्रियेण वचसा अधिकं चित्तानुवृत्त्या, परेण वैलक्ष्येण पादपतनैः, मुहुः सखीनां वाक्यैः देवी तथा न हि प्रत्यासत्तिमुपगता यथा रुदत्या तयैव स्वयं वाष्पसलिलैः प्रक्षाल्येव कोपः अपनीतः ।

(4) सव्याजैश्छलयुक्तैः । शपथैः शपनैः । प्रियेण मधुरेण । वचसा वाक्येन । तथा अधिकं पूर्णं यथा तथा चित्तानुवृत्त्या मनोऽनुसरणेन । तथा परेण अत्यन्तेन । वैलक्ष्येण विस्मयेन सह । पादपतनैः । मुहुः पुनः पुनः । सखीनां सहचरीणां । वाक्यैर्वचनैश्च । देवी महिषी वासवदत्ता । नहि तथा । प्रत्यासत्तिं सामीप्यं सन्निधिं मयि अनुग्रहमित्यर्थः । उपागता प्राप्ता । यथा रुदत्या क्रन्दन्त्या तयैव । स्वयमात्मना । वाष्पसलिलैः नेत्रजलैः । प्रक्षाल्य प्रमृज्य इव । कोपः क्रोधः । अपनीतः दूरीकृतः ।

(5) छलजशपथादिभिर्महिषी न प्रसन्ना एव । स्वयमेव तु रोदनात् परं निष्कोपा जाता ।

(6) वैलक्ष्येण=सह युक्तेऽप्रधाने इति तृतीया । प्रत्यासत्तिम्=प्रति + आ + सद् + क्तिन् । ताम् सीदति । ससाद । सत्स्यति । असदत् । सद्यते । असादि । सत्तुम् । सन्नम् । सीदत् । सत्त्वा । रुदत्या=रुद् + शतृ + ङीप् । तथा । भ्रमं-रुदन्ती मकरन्दविन्दुनेत्यादिकल्पमाध्वेव । अथवा गणकार्य्यमनित्यमिति समूर्षो घटादित्वेऽपि मित्त्वात इति सौढव्यम् । रोदिति । रुरोद । रोदिष्यति । अरुदत् अरोदीत् । रुदितम् । रुदित्वा । रोदितुम् । रुद्यते । अरोदि ।

(8) उपगतया...देव्या...रुदती...सा...कोपमपनीतवती ।

(9) शार्दूलविक्रीडितं वृत्तम् ।

(10) अत्र समाधिर्नामालङ्कारः । रुदितरूपेण साधनान्तरेण देव्याः कोपशान्त्या प्रसादनात् । स च प्रक्षाल्येवेत्युत्प्रेक्षानुजीविता । तथाहि समाधिः सुकरं कार्य्यं कारणान्तरयोगत इति लक्षणम् ।

(11) विरोधप्रशमनं शक्तिरिति लक्षणादेव शक्तिर्नाम नाटकीयावमर्शाङ्गविशेषः। विरोधश्च मानोत्थः। स्त्रीणामीर्ष्याकृतो मानः कोपोन्यासङ्गिनि प्रिय इति दशरूपके। तन्निरासोपायाश्च प्रसङ्गतः कथिताः। ते च षड् यथा तत्रैव।

साम्ना भेदेन दानेन नत्युपेक्षा रसान्तरैः।
तत्र प्रियवचः साम भेदस्तत् सख्युपार्जनम्।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः।
सामादौ तु परिक्षीणे स्यादुपेक्षाऽवधोरणम्।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरमिति।

(12) प्रत्यापत्तिमुपागतेति दशरूपकस्थः पाठः। मान्तिमित्यर्थः।

(सोत्कण्ठं निश्वस्य) तावदिदानीं देव्यां प्रसादितायां सागरिकाचिन्तैव केवलं मां बाधते। कुतः

अम्भोजगर्भसुकुमारतनुस्तदासौ
कण्ठग्रहे प्रथमरागघने विलीय।
सद्यःपतन्मदनमार्गणरन्ध्रमार्गै-
र्मन्ये मम प्रियतमा हृदयं प्रविष्टा॥

(विचिन्त्य)। योऽपि मे विश्रान्तिस्थानं वसन्तकः सोऽपि देव्या संयतः। तत्कस्याग्रतो वाष्पमोक्षं करिष्ये। (इति निश्वसिति)

(1) (উৎকণ্ঠার সহিত নিশ্বাসত্যাগপূর্ব্বক)—দেবীপ্রসাদনের পর এখন কেবল সাগরিকার চিন্তাই আমাকে কষ্ট দিতেছে। যে হেতু—পঙ্কজগর্ভকোমলদেহা আমার সেই প্রিয়তমা বোধ হয় প্রেমের প্রথম গাঢ়ালিঙ্গনে বিলীন হইয়া সদ্যঃপ্রবিষ্টপুষ্পশর-রন্ধ্র পথে সে সময়ে হৃদয়ে প্রবেশ করিয়াছে।—(চিন্তাপূর্ব্বক) আমার বিশ্রান্তিস্থান বসন্তকও দেবীকর্ত্তৃক আবদ্ধ। কাহার নিকট কাঁদিব? (নিশ্বাসত্যাগ)

(2) (Anxiously sighing) Now that the queen is conciliated, I am pained with the thought of *Sagarika*; since,—it seems that

my beloved *Sagarika*, with a body as soft as the interior of a lotus, melting while first embraced with deep love, entered into my heart, through the openings made by the arrows of the god of love, all falling at once.—(Thinking)—My only confidant *Basantaka* too, is confined by the queen. So before whom shall I shed tears? (Sighs)

(3) अम्भोजगर्भसुकुमारतनुरसौ मम प्रियतमा प्रथमरागघने कण्ठग्रहे विलीय सद्यः पतन्मदनमार्गणरन्ध्रमार्गैस्तदा हृदयं प्रविष्टा मन्ये।

(4) अम्भोजस्य पद्मस्य गर्भ इव सुकुमारा कोमला तनुः यस्याः सा तथोक्ता पद्माभ्यन्तरपेलवदेहा। असौ मम प्रियतमा सागरिका। प्रथमरागघने आदि-प्रेमगाढे। कण्ठग्रहे कण्ठालिङ्गने विलीय द्रवीभूय सद्यः सपदि। सद्यः सपदि तत्क्षण इत्यमरः। पततां प्रविशतां मदनमार्गणानां कामशराणां रन्ध्राणि छिद्राणि एव मार्गाः पन्थानस्तैः तदा तस्मिन् काले हृदयं चित्तं प्रविष्टा गता इति मन्ये तर्कयामि। बाष्पमोक्षम् अश्रुमोचनम्।

(5) पङ्कजकोमला प्रियतमा प्रथमप्रणयगाढालिङ्गनेन विलीना सती तदा कामशरप्रवेशपथेन मम चित्तं प्रविवेशेति मन्ये।

(6) विलीय = वि + ली + ल्यप्। विभाषा लीयतेरिति ल्यपि वा आत्वम् (६।१।५१)। पक्षे विलाय। सद्यः = समानेऽह्नि। सद्यः परुदित्यादिना (५।३।२२) समानशब्दात् द्यःप्रत्ययेन निपातने सिद्धम्।

विश्रान्तिस्थानं = क्लान्तिहरणाधार इति यावत्। क्वचित् विश्रामस्थानम् इति पाठः। तत्र कथं विश्रामः? विपूर्वात् श्राम्यतेर्घञि तु विश्रम एव स्यात्। नोदात्तोपदेशस्य मान्तस्यानाचमेरिति (७।३।३४) जित्युपधावृद्धिनिषेधात्। विश्रमार्थमुपगूढमजस्रमिति माघः। (१०।८८) व्यतरन्नरणाय विश्रममिति नैषधीये (२।८०)। अविश्रमं यावदिदं शरीरं पतत्यवश्यं परिणामदुर्वहमिति (कातन्त्रटीकायां त्रिलोचनधृतम्)। कथन्तर्हि— विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुरिति शाकुन्तले। नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोरिति मेघदूते—विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्य्यो रस

इत्यु त्तरचरिते—यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्राम इति द्वितीयपर्दंश ? अपाणिनीयमेव। मम्मट-हरदत्त-भट्टोजि-प्रभृतयस्तु विश्रान्तिं लभतामिति पाठं कल्पयन्ति। एवञ्च द्वितीयपदेशे सास्य विश्रान्ति रिति पठनीयम्। तथाच काशिका— "सूर्यविश्रामा भूमिरितेॖवमादिकं प्रयोगमन्याय्यमेव मन्यन्ते इति।" The word विश्राम cannot be formed against the Rule 7. 3. 74 which means that the मकारान्त roots that are asserted as उदात्त in the धातुपाठ, shall not have their अकार in the उपधा lengthened under ञित् or णित् affix in कृत् or चिण्। विश्राम is to be therefore replaced by विश्रान्ति।

(7) रागोऽनुरक्तौ मात्सर्य्ये क्लेशादौ लोहितादिषिति शाश्वतः।

(8) ...तन्व्या...अमुया...मन्यते...प्रियतमया...प्रविष्टया... ।

(9) वसन्ततिलकं वृत्तम्।

(10) उत्प्रेक्षा।

(ततः प्रविशति विदूषकः।)

विदू। (परिक्रम्यावलोक्य च सविस्मयम्) (एसो क्खु णिरन्तरुक्कण्ठापरिक्खामंपि सलाहणिज्ज तणुं समुव्वहन्तो उदिदो दुदिआचन्दो विअ अहिअदरं सोहदि पिअवअस्सो। ता जाव णं उपसप्पामि।) (उपसृत्य) सोत्थि भवदे। भोः, दिट्ठिआ वड्ढसे। देवीहत्थगदेणावि मए पुणोवि एदेहिं अच्छीहिं जं दिट्ठोसि। (क)

राजा। (दृष्ट्वा सहर्षम्) अये, वसन्तकः प्राप्तः। सखे, परिष्वजस्व माम्।

विदू—(परिष्वज्य।) भो वअस्स, देवीए अणुग्गहीदोह्मि। (ख)

(ক) एष खलु निरन्तरोत्कण्ठापरिक्षामामपि श्लाघनीयां तनुं समुद्वहन्नुदितो द्वितीयाचन्द्र इवाधिकतरं शोभते प्रियवयस्यः। तद्यावदेनमुपसर्पामि। स्वस्ति भवते। भोः, दिष्ट्या वर्धसे। देवीहस्तगतेनापि मया पुनरप्येताभ्यामक्षिभ्यां यद्दृष्टोऽसि।

(খ) भो वयस्य, देव्यानुगृहीतोऽस्मि।

(বিদূষকের প্রবেশ)

(১) বি—(পরিক্রমণ, অবলোকন ও বিস্ময়ের সহিত) নিরন্তরোৎকণ্ঠাকৃশ তথাপি শ্লাঘনীয় শরীর ধারণপূর্ব্বক এই আমার প্রিয় বয়স্য সমুদিত দ্বিতীয়াচন্দ্রের ন্যায় শোভা পাইতেছেন, ইঁহার নিকটে যাই। (নিকটে গমন) তোমার শুভ। ওহে তোমার অভ্যুদয় হউক। রাজ্ঞীর হস্তগত হইয়াও আবার তোমাকে এই চক্ষে দেখিলাম।

রা—(দর্শনপূর্ব্বক সহর্ষে) এই যে বসন্তক উপস্থিত। সখে, আমাকে আলিঙ্গন কর।

বি—(আলিঙ্গনপূর্ব্বক) ওহে রাজ্ঞী দয়া করিয়াছেন।

(ENTER THE JESTER.)

(2)—J.—(Moving and looking with wonder) Yonder is my dear friend with a graceful body though emaciated from dejection. He looks like the rising moon of the second lunar day. I approach him. (Approaching) Blessings to you. O friend, may you prosper! These eyes have again the pleasure of beholding you, though I fell into the queen's clutches—

K.—(Looking with joy) O, *Basantaka* is come! Friend, embrace me.

J.—(Embracing) Well friend, the queen has been kind to me.

(3) निरन्तरोत्कण्ठापरिक्षामाम् = सततोद्वेगक्षीणाम्। निरन्तरमुत्कण्ठया परिक्षामाम्। परि+क्षै+क्तः। ताम्। क्षायति। चक्षौ। क्षास्यति। अक्षासीत्। क्षात्वा। क्षातुम्। क्षायत्। क्षामम्। "क्षायो मः" इति निष्ठातकारस्य मकारः। (৮।২।৫৩)। अक्षिभ्याम्—in प्राकृत, there is no dual number, hence अक्षि gets plural number in it.

भवते = नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्चेति चतुर्थी। परिष्वजस्व = आलिङ्ग। परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जामिति षत्वम्। स्वजते। सस्वजे सस्वञ्जे। स्वङ्क्ता। स्वङ्क्ष्यते। स्वजताम्। अस्वजत। स्वजेत। स्वङ्क्षीष्ट।

असङ्क्त। असञ्जत। सज्यते। असज्जि। सक्तः। सङ्क्तुम्। सक्ता सङ्क्ता। सजमानः।

राजा। वेषेणैव निवेदितस्ते देव्याः प्रसादः। तत्कथ्यतामिदानीं सागरिकायाः का वार्त्तेति। (विदूषकः सवैलक्ष्यमधोमुखस्तिष्ठति।)—वयस्य, किं न कथयसि।

विदू। अप्पिअं दे णिवेदिदुं ण पारेमि। (क)

राजा। (सोद्वेगं ससंभ्रमम्)। वयस्य, कथमप्रियम्। किं व्यक्तमेवोत्सृष्टं जीवितं तया। हा प्रिये सागरिके। (इति मोहं नाटयति)।

विदू। (ससंभ्रमम्)। समस्ससदु समस्ससदु पिअवअस्सो। (ख)

(क) अप्रियं ते निवेदयितुं न पारयामि।

(ख) समाश्वसितु समाश्वसितु प्रियवयस्यः।

(1) রা—পরিচ্ছদ দ্বারাই দেবীর অনুগ্রহ বুঝা যাইতেছে। এখন সাগরিকার সংবাদ কি বল। (বিদূষকের অধোমুখে অবস্থান) কথা বল না যে?

বি—তোমাকে অপ্রিয় বলিতে পারিতেছি না।

রা—(উদ্বেগ ও ভয়ের সহিত) অপ্রিয় কিরূপ? সত্যই কি তৎকর্ত্তৃক জীবন পরিত্যক্ত হইয়াছে? হায় প্রিয়ে সাগরিকে! (মোহ)

বি—(সভয়ে) আশ্বস্ত হও, প্রিয়বয়স্য, আশ্বস্ত হও।

(2) K.—It is perceived from the dress. Tell me now the news of *Sagarika*. (The jester bends down his head) Why do you not speak?

J.—I cannot inform you of any unpleasant tidings.

K.—(With anxiety and fear) Why unpleasant? Has she committed suicide? O beloved *Sagarika*! (Swoons)

J.—(With fear) Be calm, my friend, be calm.

(3) पारयामि=शक्नोमि। व्यक्तम्=स्फुटम्। उत्सृष्टम्=त्यक्तम्।

राजा। (समाश्वस्य सास्रम्)

प्राणाः परित्यजत काममदक्षिणं मां
रे दक्षिणा भवत मद्वचनं कुरुध्वम्।
शीघ्रं न यात यदि तन्मुषिताः स्थ मूढ़ा
याता सुदूरमधुना गजगामिनी सा॥

(1) রা—(সমাশ্বস্ত হইয়া অশ্রুর সহিত) রে প্রাণ! কুটিল আমাকে ত্যাগ কর। সরল (বা দক্ষিণদিগ্‌বর্ত্তী) হও। আমার বাক্য অনুষ্ঠান কর। রে মূঢ়! শীঘ্রগামী না হইলে বঞ্চিত হইবে। সেই গজগামিনী বহুদূরে গিয়াছে।

(2) K.—(Recovering and shedding tears) O life, leave me who am not frank. Be candid and act to my words. O fool, if you linger, you will be deceived. That lady with the gait of an elephant, has gone far enough.

(3) रे प्राणाः! अदक्षिणं मां कामं परित्यजत। दक्षिणा भवत। मद्वचनं कुरुध्वम्। रे मूढ़ाः! शीघ्रं यदि न यात तत् मुषिताः स्थ। सा गजगामिन्यधुना सुदूरं याता।

(4) रे प्राणाः जीवनम् अदक्षिणमसरलं मां कामं निश्चितं परित्यजत मुञ्चत। दक्षिणाः सरला मयि प्रसन्ना इत्यर्थः (अथवा दक्षिणदिग्यायिनो) भवत वर्त्तध्वम्। यमभवनस्य दक्षिणदिग्वर्त्तित्वात्। मद्वचनं ममादेशं कुरुध्वम् अनुतिष्ठत। शृणुध्वमित्यपपाठः। शृणोतेः परस्मैभाषत्वात्। (आत्मनेपदमिच्छन्ति परस्मैपदिनां क्वचिदित्यादि व्यवस्था लक्षार्थत्वाद्धेया।) रे मूढ़ा मूर्खाः प्राणाः! यदि शीघ्रं द्रुतं न यात गच्छत। तत् तर्हि मुषिताः वञ्चिताः स्थ भवथ। यतो गज इव गच्छतीति गजगामिनी। कर्त्तर्य्युपमाने इति णिनिः विरदगामिनी। सा सागरिका। अधुनास्मिन् काले। सुदूरमतिदूरं। याता गता। अतःपरं विलम्बने तत्सहचारित्वमचिरात्त्वया दुर्लभं भविष्यतीति भावः।

(5) हे प्राणा: कुटिलं मां विहाय दक्षिणा भूत्वा मद्वचनानुसारेण द्रुतं तामनुसरत। अन्यथा दूरवर्त्तिन्या तस्या आसादनस्य दुर्लभत्वाद् यूयं वञ्चिता भविष्यथ।

(8) ...परित्यज्य अदक्षिणः अहम्। दक्षिणैर्भूयताम्.. क्रियताम्। याप्यताम्। मुषितै:...स्थीयते। यातया गजगामिन्या तया।

(9) वसन्ततिलकं वृत्तम्।

(10) दीपककाव्यलिङ्गयो: सङ्कर:।

विदू। भो मा अस्सधा सम्भावेहि, सा क्खु तवस्सिणी देवीए उज्जइणिं पेसिदेत्ति सुणीअदि, अदो मए अप्पिअं त्ति भणिदम्। (क)

राजा। कथमुज्जयिनीं प्रेषिता। अहो निरनुरोधिता मयि देव्याः। वयस्य केन तवैतदाख्यातम्।

विदू। भो, सुसंगदाए। अस्सं च। मम हत्थे ताए केणावि कज्जेण इअं रअणमाला पेसिदा। (ख)

(क) भो मा अन्यथा सम्भावय। सा खलु तपस्विनी देव्योज्जयिनीं प्रेषितेति श्रूयते। अतो मयाप्रियमिति भणितम्।

(ख) भो:, सुसंगतया। अन्यच्च। मम हस्ते तया केनापि कार्य्येणेयं रत्नमाला प्रेषिता।

(1) বি—ওহে, অন্যরূপ মনে করিও না। সেই নিরুপায়া সাগরিকাকে রাজ্ঞী উজ্জয়িনীতে পাঠাইয়াছেন, শুনা যায়; তাই আমি অপ্রিয় বলিয়াছি।

রা—কি? উজ্জয়িনীতে প্রেরিতা হইয়াছে? হায়, আমার প্রতি রাজ্ঞীর অনিষ্টাচরণ? বয়স্য, কে তোমাকে ইহা বলিয়াছে?

বি—সুসঙ্গতা! আরও, সে কোন কার্য্যের জন্য আমার হাতে এই রত্নমালা প্রেরণ করিয়াছে।

(2) J.—Well, do not think otherwise. It is heard that, that poor lady has been sent to Ujjein. So I said unpleasant.

K.—What, sent to Ujjein? O the queen's opposition to me! Who has told you so, friend?

J.—*Soosangatá.* Besides, she has sent to my hand this pearl necklace for some purpose.

(3) निरनुरोधिता=अनुरोधशून्यता=अनिष्टाचरणम=want of regard.

राजा। किमपरं। मामाश्वासयितुम्। तद्वयस्य उपनय।

(विदूषक उपनयति।)

—(गृहीत्वा रत्नमालां निर्व्वर्ण्य हृदये निधाय।) अहह

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया।

तुल्यावस्था सखीवेयं तनुराश्वास्यते मम॥ ४॥

वयस्य, त्वं परिधत्स्वैनाम्। येन वयमेनामपि तावद्दृष्ट्वा धृतिं करिष्यामः।

(1) রা—আমাকে আশ্বাসিত করা ব্যতীত আর অন্য কার্য্য কি? বয়স্য, আনয়ন কর। (বিদূষক কর্তৃক আনয়ন, রাজার গ্রহণ ও দর্শন এবং রত্নমালা হৃদয়ে স্থাপন) অহো—তাহার কণ্ঠসংসর্গ পাইয়া প্রভ্রষ্টা এই রত্নমালা তুল্যাবস্থা সখীর ন্যায় আমার তনুকে আশ্বাসিতা করিতেছে। বয়স্য, তুমি ইহা ধারণ কর। ইহাকে দেখিয়াই প্রীতি (বা ধৈর্য্য) লাভ করিব।

(2) K.—What else except to console me? Fetch it friend. (The jester brings in the necklace, receiving and putting it on the breast) Oh?—My body is consoled, like a companion under equal circumstances, by this necklace, also fallen away from her body, having been once attached to it. Wear this, friend, and by observing it, I shall be contented (or patient).

(3) तस्याः कण्ठाश्लेषं समासाद्य प्रभ्रष्टयानया इयं मम तनु स्तुल्यावस्था सखीव आश्वास्यते।

(4) तस्याः सागरिकायाः कण्ठाश्लेषं गलसंसर्गं समासाद्य लब्ध्वा प्रभ्रष्टया पतितया अनया रत्नमालया इयं मम तनुः शरीरं तुल्या समाना अवस्था यस्याः सा

तथोक्ता समागदशा। आदौ सागरिकायाः आलिङ्गनं लब्ध्वा पश्चाद्गुतेत्यर्थः। सखीव सहचरीव आश्वास्यते स्थिरीक्रियते।

(5) उभे एव सागरिकाकण्ठमम्मिलिते। ततस्तयोरेकतरया अन्यतरा मम तनुः स्थिरीक्रियते।

(8) प्रभ्रष्टा इयं तुल्यावस्थां सखीमिव इमां तनुमाश्वासयति।

(9) अनुष्टुप्।

(10) उपमा।

विदू। जं भवं आणवेदि (इति कण्ठे परिदधाति) (क)

राजा। (सास्रम् निश्वस्य) वयस्य दुर्लभं पुनर्दर्शनं प्रियायाः।

विदू। (सभयम् दिशोऽवलोक्य) भो मा एव्वं उच्चं मन्तेहि, कदावि कोवि देवीए एत्थ-सञ्चरेदि। (ख)

ततः प्रविशति वेत्रहस्ता वसुन्धरा।

वसु। (अपसृत्य) जअदु जअदु भट्टा। एसो क्खु रुमण्णदो भाइणेओ विजअवम्मा किं पि निवेदिदुं दुआरे चिट्ठदि। (ग)

राजा। वसुन्धरे अविलम्बितं प्रवेशय।

वसु। जं देवो आणवेदि (इति निष्क्रम्य विजयवर्म्मणा सह पुनः प्रविश्य च) विजअवम्म एसो क्खु भट्टा, ता उपसप्पदु अज्जो णं। (घ)

(क) यद्भवानाज्ञापयति।

(ख) भो मा एवमुच्चैर्मन्त्रयस्व, कदापि कोऽपि देव्या अत्र सञ्चरति।

(ग) जयति जयति भर्त्ता। एष खलु रुमण्वतो भागिनेयो विजयवर्म्मा किमपि निवेदयितुं द्वारे तिष्ठति।

(घ) यद्देव आज्ञापयति। विजयवर्म्मन् एष खलु भर्त्ता। तदुपसर्पतु आर्य्य एनम्।

(1) বি—যেরূপ তোমার অনুমতি (কণ্ঠে ধারণ)।

রা—(অশ্রুর সহিত নিশ্বাস ত্যাগ পূর্ব্বক) বন্ধো, প্রিয়ার পুনর্দর্শন দুর্লভ বটে।

বি—(সভয়ে, সকলদিক্ দর্শন পূর্ব্বক) ওহে এরূপ উচ্চৈঃস্বরে বলিও না। হয়ত দেবীর কোনও পরিজন এস্থলে সঞ্চরণ করিতে পারে।

(বেত্রহস্তে দৌবারিকীর প্রবেশ)

দৌ—(আগমন পূর্ব্বক) মহারাজের জয়। রুমণ্বানের ভাগিনেয় বিজয়বর্ম্মা কিছু নিবেদন করার জন্য দ্বারে উপস্থিত।

রা—বসুন্ধরে, শীঘ্র তাহাকে প্রেরণ কর।

দৌ—যে আজ্ঞা মহারাজ। (গমন ও বিজয়বর্ম্মার সহিত পুনঃপ্রবেশ।) বিজয়বর্ম্মন্, এই মহারাজ। নিকটে গমন করুন, মহাশয়।

(2) J.—I obey you. (Puts on his neck.)

K.—(With tears sighing) Friend, it is hard to see my beloved again.

J.—(Looking round with fear) Do not talk so loud. There may be some creature of the queen here.

(ENTER THE WARDER BEARING A CANE.)

W.—(Coming near) Victory to the king. *Bejoy Barman Roomannat's* sister's son, is at the door, wishing to submit something.

K.—Send him in, soon.

W.—As your Majesty commands. (Going and reentering with *Bejoy Barman*) *Bejoy Barman*, this is the king. Go to him, sir.

(3) সঞ্চরতি=ভ্রমতি। ভাগিনেয়:=ভগিনীপুত্র:। স্ত্রীভ্যো ঢগিতি ভগিনীশব্দাদ্ ঢক্।

विज। (उपसृत्य) जयतु जयतु देव:। देव, दिष्ट्या वर्धसे रुमण्वतो विजयेन।

राजा। (सपरितोषम्) विजयवर्मन्, अपि जिता: कोसला:।

विज। देवस्य प्रभावेण।

राजा। साधु रुमण्वन्, साधु। अचिरात्सम्प्रयोजन-

मनुष्ठितम्। विजयवर्मन्, तत्कथय कथाम्। अतिविस्तरतः श्रोतुमिच्छामि।

विज। देव, श्रूयताम्। वयमितो देवादेशात्कतिपयैरेवाहोभिरनेककरितुरगपत्तिदुर्निवारेण महता बलसमूहेन गत्वा विन्ध्यदुर्गावस्थितस्य कोसलनृपतेर्द्वारमवष्टभ्य सेनाः समावेशयितुमारब्धवन्तः।

(1) বিজয়বর্ম্মা—(আগমনপূর্ব্বক) মহারাজের জয়। মহারাজ, রুমণ্বানের বিজয় হইয়াছে। আপনারই অভ্যুদয়।

রা—(পরিতোষের সহিত) বিজয়বর্ম্মন্, কোশলজয় হইয়াছে?

বিজ—মহারাজের প্রভাবেই বটে।

রা—ভাল, রুমণ্বান্, ভাল। অবিলম্বেই বিপুল কার্য্য সম্পাদিত হইয়াছে। বিজয়বর্ম্মন্, সব বল, সবিস্তর শুনিতে চাই।

বিজ—মহারাজ, শুনুন। আমরা এখান হইতে মহারাজের আদেশে কয়েকদিনের মধ্যেই বহুগজাশ্বপদাতিদুর্নিবার প্রবল সৈন্যসহ গমন করিয়া বিন্ধ্যদুর্গস্থ কোশলরাজের দ্বার রোধপূর্ব্বক সেনাসমাবেশ করিতে প্রবৃত্ত হই।

(2) Bejoy—(Coming near) Victory to the King. Prosperity to your Majesty through the conquest of your general.

K.—(Joyfully) *Bejoy Barman*, is *Kosal* conquered?

Be.—Yes, through your Majesty's power.

K.—Well done, *Roomanwan*, well done. A great deed has been achieved, within a short time. Tell me the news. I wish to hear it fully.

Be.—Please to listen your Majesty. Marching from hence under your orders, we commenced, within a few days, to encamp our force and besiege the King of *Kosola*, in the *Bindhya* fort, with a grand invincible force, composed of many elephants, horse and foot.

(3) 'कोसलाः—तदस्मिन्' संख्याप्रमाणत्वादिति (११२१५३) जनपदवाचिनां लिङ्गवचनयोः सर्व्वावस्थित्वादबहुलम्। The ancient Rules लुपियुक्तवद्व्यक्ति-

वचने and जनपदे लुप् are rejected by 1.2.53 asserting that the words indicating जनपद get, by nature, plural number and fixed gender and no rule is necessary for the purpose. कोशल is modern Oude.

अतिविस्तरत:=ल्यब् लोपे कर्मण्यधिकरणे चेति वाच्यात् पञ्चम्यास्तसिल् । अति विस्तरमधिकृत्येत्यर्थ:=अति + वि + स्तृ + अप् । प्रथने वावशब्दे इति न घञ् । *i.e*, the root स्तृञ् preceded by वि takes घञ् in the sense of प्रथन (*i.e.*, extension) provided it be not of words e. g: पटस्य विस्तार: । पचे विस्तरो वचसाम् । अहोभि:=अपवर्गे इति तृतीया ।

अनेककरितुरगपत्तिदुर्निवारेण=बहुगजाश्वपदातिदुर्जयेन । न एकमनेकम् । नञ्तत्पुरुष: । करिणश्च तुरगाश्च पत्तिश्चेति करितुरगपत्ति । द्वन्द्वश्च प्राणितूर्य-सेनाङ्गानामिति क्लीवैकवचनम् । पातितैरथनागाश्वैरमरैश्च वसन्धरेति त्वार्ष: प्रयोग: । अनेकञ्च करितुरगपत्ति च तेन दुर्निवार स्तेन ।

बलसमूहेन=सैन्यसमूहेन । अवष्टभ्य=आश्रित्य अवलम्ब्येत्यर्थ: । अवष्टम्भ: सुवर्णे च स्तम्भप्रारम्भयोरपीति विश्व: । अव + स्तन्भ् + ल्यप् । अवाच्चालम्बनाविदूर्य्ययोरिति षत्वम् । स्तभ्नाति स्तभ्नोति । तस्तम्भ । स्तम्भिष्यन्ति । अस्तभत् अस्तम्भीत् । स्तभ्यते । अस्तम्भि । स्तभ्यम् । स्तभ्नुवत् स्तभ्नत् । स्तम्भित्वा स्तब्ध्वा । स्तम्भितुम् ।

राजा । ततस्तत: ।

विज । तत: कोसलेश्वरोऽप्यतिदर्पात्परिभवमसहमानो हास्तिकप्रायमशेषमात्मसैन्यं सज्जीकृतवान् ।

विदू । भो, लहुं लहुं आचक्ख । वेवदि मे हिअ-अम् । (क)

राजा । ततस्तत: ।

(क) भो लघु लघु आचक्ष्व, वेपते मे हृदयम् ।

(1) ग्रा—तार पर, तार पर ?

বিজ—তারপর কোশলেশ্বরও অপমান সহ্য না করিয়া অতিদর্পে হস্তিবহুল বহু সৈন্য সজ্জিত করেন।

বি—ওহে, শীঘ্র শীঘ্র বল, আমার হৃদয় কাঁপিতেছে।

রা—তার পর, তার পর?

(2) K.—Proceed.
Be.—Then the king of *Kosal* too, in extreme pride, unable to bear the insult, prepared a great force full of elephants.
J.—Well, finish quickly. My heart trembles!
K.—Then, then?

(3) हास्तिकप्रायम=गजसमूहबहुलम्। हस्तिन्+ठक्=हास्तिकम्। अचित्त-हस्तिधेनोष्ठगिति ठक् (४।२।४७)। तेन प्रायं बहुलम्। प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोरिति हेमचन्द्रः।

सज्जीकृतवान्=षस्ज् गताविति भ्वादेरच् सज्जः कृतोद्यमः। ततः सज्ज+च्वि+क्त+क्तवतुः। सज्जति सज्जते। ससज्ज ससज्जे। असज्जीत् असज्जिष्ट। भाष्यकार-प्रयोगप्रामाण्यादात्मनेपदमपि। "हेतुमति चेति सूत्रे यदभिप्रायो सज्जते इति भाष्य-प्रयोगादयमात्मनेपद्यपि। अतोऽस्यात्मनेपदं दूषयन्तो वर्द्धमानधीरस्वाम्यादय एव दुष्टा" इति धातुवृत्तौ माधवः (सायनाचार्य्यः)।

आचक्ष्व=ब्रूहि। आङ्+चक्ष्+लोट् सिप्।

विजय। कृतनिश्चयश्चासौ
योद्धुं निर्गत्य विन्ध्यादभवदभिमुखस्तत्क्षणं दिग्विभागान्
विन्ध्येनेवापरेण द्विपपतिपृतनापीड़बन्धेन रुन्धन्।
वेगाद्बाणान्विमुञ्चन्नथ समदगजोत्पिष्टपत्तिर्निपत्य
प्रत्यायाद्वाञ्छितासिद्विगुणितरभसस्तं रुमण्वान् क्षणेन॥

(1) বিজ—কৃতনিশ্চয় সেই কোশলেশ্বর বিন্ধ্য দুর্গ হইতে নির্গত হইয়া দ্বিতীয় বিন্ধ্যের ন্যায় প্রধান প্রধান গজ ও সৈন্যগণের শিরোমাল্য স্থাপনপূর্ব্বক দিগ্‌ভাগ রোধ করিয়া যুদ্ধার্থ অগ্রবর্ত্তী হইলেন। সগর্ব্বগজনিহতসৈনিক রুমণ্বান্‌ও বাণবিমোচন-পূর্ব্বক সবেগে আগমন করিয়া অভিলষিতলাভে দ্বিগুণিত বলের সহিত ক্ষণকাল মধ্যে তাঁহার নিকটস্থ হইল।

(2) Be—The king of *Kosal* coming out from his fort in the *Bindhya* and covering the quarter, like another *Bindhya* hill, with the positions of the head-dresses of his soldiers and elephants, advanced to fight. Then our general too, whose soldiers were being crushed by proud elephants, throwing his arrows, swiftly overtook him with doubled motion, on finding what he had wanted.

(3) कृतनिश्चयोऽसौ विन्ध्याद् निर्गत्य तत्क्षणमपरेण विन्ध्येन इव द्विपपतिपृतनापीडवन्धेन दिग्विभागान् रुन्धन् योद्धुमभिमुखोऽभवत्। अथ बाणान् विमुञ्चन् समदगजोत्पिष्टपत्तिः रुमण्वान् वेगाद् निपत्य वाञ्छितासिद्विगुणिततरभसः क्षणेन तं प्रत्यायात्।

(4) कृतनिश्चयः स्थिरसंकल्पः असौ कोशलेश्वरः विन्ध्याद् विन्ध्यस्थादात्मदुर्गादित्यर्थः। निर्गत्य वहिर्यात्वा। तत्क्षणं तदानीमपरेण द्वितीयेन विन्ध्येन इव तन्नामधेयेन पर्वतेनेव द्विपानां हस्तिनां पतीनां श्रेष्ठानां पृतनानां सेनानाञ्च। आपीडानां शेखराणां शिरःस्थितमाल्यानामिति यावत्। आपीडशेखरोत्तंसाः शिरसि स्रज इति हलायुधः। वन्धेन धारणेन। दिग्विभागान् दिगंशान्। रुन्धन् प्रच्छादयन् योद्धुं संग्रामयितुं रणायेत्यर्थः। अभिमुखः अग्रवर्त्ती। अभवत् अतिष्ठत्। अथ तदनन्तरं बाणान् शरान् विमुञ्चन् निक्षिपन् समदैः सगर्वैर्गजैर्हस्तिभिरुत्पिष्टा विनाशिता पत्तिः सेना यस्य स तथोक्तः। गर्व्वयुक्तनागनिहतसैन्यः। रुमण्वान्। वेगाज्जवात्। निपत्यागम्य। वाञ्छितस्याभिलषितस्य कोशलपतेरित्यर्थः आप्त्या लाभेन द्विगुणितो रभसो वेगो यस्य स तथोक्तः। इष्टलाभद्विगुणितवेगः क्षणेन स्वल्पकालेन। तं कोशलपतिं। प्रत्यायात् प्रागच्छत्।

(5) कोशलेश्वरः आत्मगजसैन्यशिरश्चूडासन्निवेशेन दिङ्मण्डलमावृत्य युद्धायागतः सस्मार। रुमण्वानपि तत्प्राप्तिवर्द्धितवेगः शरान् निक्षिपन् जवेन तं प्राप।

(6) उत्पिष्टा = उत् + पिष् + क्तः + टाप्। पिनष्टि। पिपेष। पेष्टा। पेक्ष्यति। पिनष्टु। अपिनट्। पिंष्यात्। पिष्यात्। अपिषत्। अपेक्ष्यत्। पिष्यते। अपेषि। पिष्ट्वा। पेष्टुम्। पिंषत्।

पत्तिः = पद् + क्तिः। औणादिकः। पदातिरित्यर्थः। प्रत्यायात् = प्रति + आ + या + लङ् तिप्।

(7) ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूरित्यमरः।

(8) अभूयत....अभिमुखेन....वध्यता....विमुखता....पत्तिना...प्रत्यायायत... रभसेन सः...रुमण्वता।

(9) स्रग्धराछन्दम्।

(10) उपमा।

(11) द्विपपतिपृतनापीड़बन्धेनेति द्विपपतीनां हस्तिपतीनां पृतनानां पत्तीनाम् आ सम्यक् पीड़ा परस्परसङ्घर्षो यस्मिन् तादृशेन बन्धेन निवेशनेनेति केचित्। अन्ये च द्विरदपतिघटापीड़बन्धेनेति पठन्ति। तत्र द्विरदानां पतीनां घटानां समूहानाम् आपीडबन्धेनेत्यर्थः। वेगादवाप्तान् विमुञ्चन् समदगजघटीतृपिष्टपत्ति-निंपत्य प्रत्यैच्छदिति च पाठः। तत्र प्रत्यैच्छत् प्रत्यगच्छदित्यर्थः। करिणां घटना घटेत्यमरः। घटा=गजयूथम्=troop of elephants.

अपिच।

अस्तव्यस्तशिरस्त्रशस्त्रकषणैः कृत्तोत्तमाङ्गे क्षणं

व्यूढास्रक्सरिति स्वनत्प्रहरणे वर्म्मोद्वलद्वह्निनि।

आहूयाजिमुखे स कोशलपतिर्भग्ने प्रधाने बले—

राजा। कथमस्मदीयान्यपि बलानि भग्नानि।

विजय। एकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः॥

विदू। जेदु जेदु भवं, जिदं अह्मेहिं (इति नृत्यति)। (क)

(क) जयतु जयतु भवान्। जितमस्माभिः।

(1) আরও—নিক্ষিপ্তবিচলিতকিরীটশস্ত্রাঘাতে ছিন্নোত্তমাঙ্গ, ক্ষণকালের জন্য বিন্যস্তরুধিরনদীক, শব্দায়মানাস্ত্র, কবচনির্গতানল, যুদ্ধমুখে প্রধান বল বিনাশিত হইলে, সেই—

রা—সেকি? আমাদের সৈন্যও বিনাশিত হইয়াছে?

বিজ—মত্তগজস্থিত কোশলপতি এক রুমণ্বান্ কর্ত্তৃক বাণশত দ্বারা হত হইল।

বি—মহারাজের জয়, আমাদের জয় (নৃত্য)।

(2) Besides, when the superior force was destroyed in the battle, in which fire flashed from the armours, the weapon clashed, torrents of blood ran for a time, and deranging the helmets the heads were cut off by the weapons which were scattered,—

K.—Well, our forces too were demolished?

Be.—Our general alone, challenging the king of *Kosal* on a maddened elephant, killed him with hundreds of arrows.

J.—Victory to the king, we have conquered. (Dances)

(3) अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः कृत्तोत्तमाङ्गे क्षणं व्यूढासृक्सरिति स्वनत्प्रहरणे वर्मोच्छलद्वह्निनि आजिमुखे प्रधाने बले भग्ने एकेन एव रुमण्वता आहूय शरशतैर्मत्तद्विपस्थः स कोशलपतिर्हतः ।

(4) व्यस्तानि विपरीतानि शिरस्त्राणि किरीटानि यैः तानि व्यस्तशिरस्त्राणि । अस्त्राणि च व्यस्तशिरस्त्राणि च अस्त्रव्यस्तशिरस्त्राणि । तानि च शस्त्राणि चेति तेषां कषणैः आघातैः कृत्तानि छिन्नानि उत्तमाङ्गानि शिरांसि यस्मिन् तत् तथोक्तं तस्मिन् । छिन्नशिरस्के । क्षणं स्वल्पकालं व्यूढा विन्यस्ता । व्यूढौ विन्यस्तसंहतावित्यमरः । असृजां रुधिराणां सरित्नदी यस्मिन् तत् तथोक्तं तत्र । प्रवाहितरक्तस्रोतोवहे । स्वनन्ति ध्वनन्ति प्रहरणानि अस्त्राणि यस्मिन् तत् तथोक्तं । तस्मिन् । शब्दायमानास्त्रे । वर्मभ्यः कवचेभ्यः उच्छलन् उद्गच्छन् वह्निरनलः यस्मिन् तत् तथोक्तं तस्मिन् । कवचनिर्गच्छदनले । आजिमुखे युद्धारम्भे । मुखं तु वदने मुख्यारम्भे द्वाराभ्युपाययोरिति यादवः । प्रधाने श्रेष्ठे । बले सैन्ये । भग्ने निहते सति । एकेनासहायेनैव रुमण्वता । आहूय स्पर्द्धित्वा । शरशतैर्वाणशतैर्मत्तद्विपस्थः । सः कोशलपतिः । हतः विनाशितः ।

(5) अस्त्राघातविच्छिन्नशिरस्के रक्तनदीप्रवाहसमन्विते कवचोद्गतानले समरमुखे श्रेष्ठसैन्यविनिपातात् परमेक एव रुमण्वान् मत्तगजस्थं कोशलपतिं जघान ।

(6) कषणैः—कष्+ल्युट् । तैः । कष हिंसार्थे भ्वादिः । कषति । अकषीत् अकाषीत् । कृत्तानि=कृत्+क्तः । तानि । Vide note (12) under कण्ठे कृत्तावशेषम् &c....Act II. उच्छलन्=vide note (6) under the stanza परिक्षामं पीनस्तनजघनेति Act II. व्यूढा=वि+वह+क्तः+टाप् ।

असृक् = दैवादिकादस्यतेरौणादिक ऋक्प्रत्ययः। असृक् असृजी असृञ्जि प्रथमायाम्। असृञ्जि असानि वा शसि। पद्दन्नित्यादिना (६।१।६३) असादेशो वा असन्नादेशः। तृतीयायाम् असृजा अस्ना असृग्भ्याम् असभ्यामित्यादि।

उत्तमाङ्गानि = उत्तमानि अङ्गानि। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैरिति तत्पुरुषः।

आहूय = आङ् + ह्वेञ् + ल्यप्। स्पर्द्धायामाङ इति आह्वयते। अन्यत्र पुत्रमाह्वयति। जुहाव जुहुवे। ह्वाता। ह्वास्यति-ते। ह्वयतु-ताम्। अह्वयत्-त। ह्वयेत्-त। हूयात् ह्वासीष्ट। अह्वत् अह्वत अह्वास्त। अह्वास्यत्-त। हूयते। अह्वायि। हूत्वा। ह्वातुम्। हूतम्। ह्वयत् ह्वयमानम्।

(7) रुधिरेऽसृगित्यमरः।

(8) तं कोशलपतिमेकः...रुमण्वान् मत्तद्विपस्थं हतवान्।

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) अनुप्रासः।

राजा। साधु कोसलपते, साधु। मृत्युरपि ते श्लाघ्यः। यस्य हि रिपवोऽपि पुरुषकारमेवं वर्णयन्ति। ततस्ततः।

विज। देव, ततो रुमण्वानपि कोसलेषु मद्भ्रातरं ज्यायांसं जयवर्माणं स्थापयित्वा प्रहारव्रणितहास्तिकप्रायमशेषसैन्यमनुवर्त्तमानः शनैःशनैरागच्छत्येव।

राजा। वसुंधरे, उच्यतां यौगन्धरायणः। प्रदर्श्यतां मत्प्रसादस्य विभव इति।

वसु। जं देवो आणवेदित्ति। (इति विजयवर्मणा सह निष्क्रान्ता) (क)

(क) यदेव आज्ञापयतीति।

(১) রা—সাধু, কোশলপতে, সাধু। মৃত্যুও তোমার শ্লাঘ্য। শত্রুরাও তোমার পুরুষকার বর্ণনা করিতেছে। তার পর, তার পর?

বিজ—মহারাজ, তারপর রুমণ্বান্ কোশল দেশে আমার অগ্রজ ভ্রাতা জয়বর্ম্মাকে স্থাপন করিয়া, প্রহারক্ষত হস্তিসমূহবহুল অশেষ সৈন্যসহ ধীরে ধীরে আসিতেছেন।

রা—বসুন্ধরে, যৌগন্ধরায়ণকে বল, আমার অনুগ্রহের বিভব প্রদর্শিত হউক।

দৌ—মহারাজের যেরূপ আজ্ঞা (বিজয়বর্ম্মার সহিত প্রস্থান)

(2) K.—Excellent, O *Kosal*, excellent, your death even is glorious as your enemies too applaud your prowess. What then?

Be.—O King, then the general, quartering my elder brother *Joy Barman* in *Kosal*, is slowly returning, following the large army with many wounded elephants.

K.—Warder, tell the minister to show him the wealth of my favour.

W.—As your Majesty commands (Exit with *Bejoy Barman*).

(3) পুরুষকারম্=বীরত্বম্। জ্যায়াংসম্=বৃদ্ধ+ঈয়সুন্। তম্। প্রশস্যস্য শ্রঃ ... রতিশয়েন বৃদ্ধঃ। বৃদ্ধস্য চেতি (৫।৩।৬২) জ্যাদেশঃ। জ্যায়ান্। পক্ষে বর্ষীয়ান্। স্ত্রিয়াং জ্যায়সী। বিভবঃ=শক্তিঃ। The statement of the king, সাধু কোশলপতে &c. made here, has been much admired by some scholars.

(ततः प्रविशति काञ्चनमाला।)

काञ्च। आणत्तह्मि देवीए। जह गच्छ हञ्जे कञ्चणमाले, एदं ऐन्दजालिअं अज्जउत्तस्स दंसेहि। (इति परिक्रम्यावलोक्य च) एसो क्खु भट्टा। ता जाव णं उवसप्पामि। (उपसृत्य) जेदु जेदु भट्टा। भट्टा, देवी विण्णवेदि। एसो क्खु उज्जयिणीदो सम्बरसिद्धि णाम ऐन्दजालिओ आअदो ता पेक्खदु भट्टा। (क)

राजा। अस्ति नः कौतुकमैन्द्रजालिके। ततः शीघ्रं प्रवेशय।

काञ्च। ज भट्टा आणवेदित्ति। (इति निष्क्रम्य पिच्छिकाहस्तेनैन्द्रजालिकेन सह प्रविशति।) एदु एदु अज्जो। (ऐन्द्रजालिकः परिक्रामति।) एसो भट्टा। ता उपसप्पदु अज्जो।

(क) आज्ञप्तास्मि देव्या यथा गच्छ काञ्चनमाले इममैन्द्रजालिकमार्य्यपुत्रस्य दर्शयेति। एष खलु भर्त्ता। तदुपावदैनमुपसर्पामि। जयतु जयतु भर्त्ता। भर्त्तं देवी विज्ञापयति, एष खलु उज्जयिनीतः संवरसिद्धिर्नाम ऐन्द्रजालिक आगतः, तत् प्रेक्षतां भर्त्ता।

(ख) यद्भर्त्ता आज्ञापयति। एतु एतु आर्य्यः। एष भर्त्ता, तदुपसर्पतु आर्य्यः।

(কাঞ্চনমালার প্রবেশ)

(1) কাঞ্চ—রাজ্ঞী আদেশ করিয়াছেন যে ওলো কাঞ্চনমালে, এই ঐন্দ্রজালিককে আর্য্যপুত্রের সমীপে যাইয়া দেখাও। (পরিক্রমণ ও অবলোকন) এই যে মহারাজ। নিকটে যাই (নিকটে গমন)। মহারাজের জয় হউক। মহারাজ, রাজ্ঞী নিবেদন করিতেছেন উজ্জয়িনী হইতে সম্বরসিদ্ধি নামক ঐন্দ্রজালিক আসিয়াছে। তাহাকে মহারাজ দেখুন।

রা—ঐন্দ্রজালিকে কৌতূহল আছে বটে, সত্বর আনয়ন কর।

কাঞ্চ—যে আজ্ঞা মহারাজ (প্রস্থান ও পিচ্ছিকাহস্ত ঐন্দ্রজালিকসহ পুনঃ প্রবেশ) আসুন মহাশয়। (ঐন্দ্রজালিকের আগমন) এই মহারাজ। নিকটে আসুন, মহাশয়!

(ENTER A MAID)

(2) Maid—I am directed by the queen to show a magician to the king. (Moving and looking) Here is the king. I go to him. (Coming near) Victory to the king. Your majesty, the queen submits—'here is a magician named *sambarsiddhi* come from Ujjein. May your majesty be pleased to see him.'

K.—I have some curiosity for a magician. So bring him soon.

Maid—As the king commands. (Goes and re-enters with a magician bearing a bundle of peacock feathers.) Here, here, sir (The magician moves.) This is the king. Go to him, sir.

(3) ऐन्द्रजालिक:=इन्द्रजालेन दीव्यतीति इन्द्रजाल+ठक्। तेन दीव्यति खनति जयति जितमिति ठक् (४।४।२)। यद्वा इन्द्रजालं शिल्पमस्येति शिल्पमिति ठक् (४।४।५५)। पिच्छिका—पिच्छ+क+टाप्। अल्प इति कः। प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुप इतीत्। पिच्छबर्हे नपुंसकमित्यमरः। मयूरपुच्छसमूह इत्यर्थः।

ऐन्द्र। (उपसृत्य) जअदु जअदु भट्टा।
(पिच्छिकां भ्रमयित्वा बहुधा हास्यं कृत्वा)—

पणमत चलने इन्दस्स इन्दजाल त्ति लद्धणामस्स।
तह एव्व अज्ज असुरस्स सम्बरस्स सुपरिट्ठिदजसस्स॥

देव किं—

(धरणीए मिअङ्को आआसे महिहरो जले जलणो।
मज्झह्मम्मि पओसो सिज्जउ तह देहि आणत्तिं॥)

अहवा—

किं जम्पिदेण बहुणा जं जं हिअएण महसि संदिट्ठुं।
तं तं दंसेमि अहं गुरुणो मन्तप्पहावेण॥ (क)

(क) जयति जयति भर्ता।

प्रणमत चरणौ इन्द्रस्य इन्द्रजालेति लब्धनाम्नः।
तथैवाद्य असुरस्य संवरस्य सुप्रतिष्ठितयशसः॥

देव, किं

धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः।
मध्याह्ने प्रदोषस्तावत् सिद्ध्यतु देह्याज्ञप्तिम्॥

अथवा—

किं जल्पितेन बहुना यत् यत् हृदयेन वाञ्छसि संद्रष्टुम्।
तत् तत् दर्शयामि अहं गुरोर्मन्त्रप्रभावेण॥

(1) ঐ—(নিকটে আগমনপূর্ব্বক) মহারাজের জয়। (পিচ্ছিকা সঞ্চালন ও হাস্য) ইন্দ্রজাল শব্দে যাহার নাম পাওয়া যায়, সেই ইন্দ্রের চরণে প্রণাম কর। তদ্রূপ সুপ্রতিষ্ঠিত-যশাঃ সম্বরাসুরের চরণেও অগ্র প্রণাম কর। মহারাজ,—পৃথিবীতে চন্দ্র, আকাশে পর্ব্বত, জলে অনল, মধ্যাহ্নে প্রদোষ ঘটিবে কি? আজ্ঞা করুন। অথবা অনেক কথায় প্রয়োজন কি, মনে মনে যাহা দেখিতে ইচ্ছা করেন, গুরুমন্ত্রবলে তাহা সকলই দেখাইতেছি।

(2) M.—(Coming near) Victory to the king. (Moving the bundle of feathers and laughing) Bow to the feet of Indra whose name occurs in the word meaning Indra's net, and so also of the demon *Sambar* of the established fame. O king, pass orders if the moon on the earth, mountain in the sky, fire in the water, or twilight in the noon, is to happen ;—or it is useless to talk much, whatever you wish at heart to see, I will show in the name of the power of my preceptor.

(3) इन्द्रजालेति=अत्र वर्णसमवायमात्रविवक्षितत्वादर्थाभावेन प्रातिपदिकत्वाभावात् निपातयोगे प्रथमा। अथवा इन्द्रजालमिति संस्कृतम्। संवरी=माया-शीलोऽसुरविशेषः। कृष्णपुत्त्रेण प्रद्युम्नेन हत इति भागवती कथा। तथाहि संवरारिर्मनसिज इत्यमरः।

मध्याह्ने = मध्यमह्नः इति सर्व्वैकदेशः अह्ना समस्यते। संख्याविसाय-पूर्व्वस्याह्नस्याहन्नन्यतरस्यां ङाविति (६।३।११०) ज्ञापकात्। एकदेशितत्पुरुषः। अह्नोऽह्न एतेभ्य इत्यह्नादेशः (५।४।८८)। रात्राह्नाहाः पुंसीति पुंस्त्वम्। तस्मिन्। कर्म्मधारये तु मध्याह्न इति स्यात्। The Rule (2.2.1) for एकदेशि समास does not contain मध्य. Still by the Rule 6.3.11.0, in ङि optionally the forms सायाह्ने, सायाहनि, सायाह्नि are obtained. This is an indication that the word अहन् can be compounded in एकदेशि तत्पुरुष with any of its parts. So मध्य, when a part, can also be compounded with it, as the word साय, meaning अन्त्यभाग, is. अह्नः साय इति।

विदू। भो वअस्स अवहिदो होहि। भो ईदिसो से अवहूओ जेण एव्वं सण्णावीअदि। (क)

राजा। भद्र तिष्ठ तावत्। काञ्चनमाले उच्यतां देवी, युष्मदीय एवायमैन्द्रजालिकः, विजनोऽप्ययमुद्देशस्तदागच्छ सहितावेव पश्यावः।

चेटी। जं भट्टा आणवेदि (इति निष्क्रम्य वासवदत्तया सह प्रविशति)। (ख)

वास। कञ्चणमाले उज्जइणीदो आअदो त्ति अत्थि मे तस्सिं इन्दजालिए वक्खवादो। (ग)

(क) भो वयस्य अवहितो भव। भो ईदृशोऽस्यावष्टम्भः येन एवं सम्भाव्यते।

(ख) यद्भर्त्ता आज्ञापयति।

(ग) काञ्चनमाले उज्जयिनीत आगत इति अस्ति मे तस्मिन्नैन्द्रजालिके पक्षपातः।

(১) বি—ওহে বন্ধো, অবধান কর। যেরূপ আরম্ভ করিতেছে তাহাতে সকলই সম্ভব বটে।

রা—ভদ্র, একটু অপেক্ষা কর। কাঞ্চনমালে, দেবীকে বল, ঐন্দ্রজালিক তাঁহারই। এই স্থানও জনশূন্য, অতএব একসঙ্গেই দেখিব!

কাঞ্চ—মহারাজের যেরূপ আজ্ঞা। (গমন ও বাসবদত্তার সহিত পুনঃপ্রবেশ।)

বাস—কাঞ্চনমালে, উজ্জয়িনী হইতে আগত, অতএব এই ঐন্দ্রজালিকে আমার পক্ষপাত হইতেছে।

(2) J.—Be attentive, friend. His commencement shows all possible.

K.—Good man, wait a bit. *Kanchanamala*, tell the queen that the magician is hers. This place is also lonely. So she may come and we shall see together.

Maid—As your majesty commands. (Goes and re-enters with the queen.)

Q.—*Kanchanamala*, I feel some partiality for this magician as he comes from Ujjein.

(3) अवस्थित:=अभिनिविष्ट:। अवष्टम्भ:=आरम्भ:। अवष्टम्भस्तु काञ्चने। संरम्भारम्भयो: स्तम्भे इति हेमचन्द्र:। सौष्ठवं वा। सौष्ठवं स्यादवष्टम्भ इति हलायुध:। अवष्टम्भ: सुवर्णे च स्तम्भप्रारम्भयोरपीति विश्वमेदिन्यौ। केचिद्गौर्जित्यार्थं केचिद्दम्भार्थमाहु:। वस्तुतस्तु "अवाद्यालम्बनाविदूर्य्ययो" रित्येव षत्वे निर्द्दिष्टे तयोरेकतरमवलम्ब्यैवास्यार्थस्य निर्णय:। अन्यथा षत्वं दुर्घटम्। युष्मदीय:=युष्मद्+छ:। पक्षे यौष्माक: यौष्माकीण:। उज्जयिनीनिवासिनां सम्बन्धी। उद्देश:=स्थानम्। पक्षपात:=दयोद्रेक:।

काञ्च। णादिउलबहुमाणो क्खु एसो देवीए। ता एदु एदु भट्टिणी। (इति परिक्रामत:।) भट्टिणि, एसो भट्टा। ता उपसप्पदु देवी। (क)

वास। (उपसृत्य) जेदु जेदु अज्जउत्तो। (ख)

राजा। देवि बहुतरमनेन गर्जितम्। तदिहस्थाविेव पश्यावस्तावत्। (वासवदत्तोपविशति)—भद्र, प्रस्तूयतां बहुविधमिन्द्रजालम्।

(क) ज्ञातिकुलबहुमान: खलु एष देव्या:, तदेतु एतु भर्त्रि, एष भर्त्ता। तदुपसर्पतु देवी।

(ख) जयतु जयतु आर्य्यपुत्र:।

(1) কাঞ্চ—ইহা দেবীর পিতৃকুলের জন্য যথেষ্ট আদর। ভর্ত্রি, আসুন (পরিক্রমণ) এই মহারাজ। নিকটে গমন করুন।

বাস—(নিকট গমন) আর্য্যপুত্রের জয়।

রাজা—রাজ্ঞি, এই ঐন্দ্রজালিক অনেক গর্জন করিয়াছে। এখানে থাকিয়াই দেখিব। (রাজ্ঞীর উপবেশন) ভদ্র, বহুবিধ ঐন্দ্রজাল আরম্ভ কর।

(2) Maid.—This is the queen's great regard for her father's people. Come, mistress. (Moving) Here is the king, go to him.

Q.—(Coming near) Victory to my husband.

K.—This man has boasted much, queen. Let us see now and here. (The queen sits) Sir, begin the different sorts of magic.

(3) ज्ञातिकुलबहुमानः = पितृवंशाधिकादरः। ज्ञातिः पितृसगोत्रयोरिति हेमचन्द्रः। ज्ञातिकुले बहुमान इति सप्तमीसमासः। कर्म्मणि चेति षष्ठीसमास-(२।२।१४) निषेधात्। प्रस्तूयताम्=आरभ्यताम्। उद्घात उक्तः प्रस्ताव इति हलायुधः। स्तौति स्तुते स्तुवीते स्तवीति। तुष्टाव तुष्टुवे। स्तोष्यति-ते। अस्तावीत् अस्तोष्ट। स्तूयते। अस्तावि। स्तुतम्। स्तुवत् स्तुवानम्। स्तुत्वा। स्तोतुम्।

गर्जितम्=गर्वेण व्यक्तम्। गर्जति। जगर्ज। गर्जिष्यति। अगर्जीत्। गर्ज्यते। अगर्जि। cf. :—गर्ज्ज गर्ज्ज क्षणं मूढ़! मधु यावत् पिबाम्यहम्। मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवता इति देवीमाहात्म्यम्।

ऐन्द्र। जं देवो आणवेदित्ति। (बहुविधं नाट्यं कृत्वा पिच्छिकां भ्रमयन्।)

हरिहरबम्हप्पमुहे देवे दंसेमि देवराअं च।
गअणे वि सिद्धचारणसुरबहुसत्थं च णच्चन्तं॥ (क)

(सर्वे सविस्मयं पश्यन्ति।)

राजा। (ऊर्ध्वं दृष्ट्वासनादवतरन्) आश्चर्यमाश्चर्यम्।

विदू। अच्चरिअं अच्चरिअम्। (ख)

(क) यद्देव आज्ञापयतीति।

हरिहरब्रह्मप्रमुखान्देवान्दर्शयामि देवराजं च।
गगनेऽपि सिद्धचारणसुरवधूसार्थं च नृत्यन्तम्॥ (१)

(ख) आश्चर्यमाश्चर्यम्।

(1) ঐন্দ্র—মহারাজের যেরূপ আদেশ। (বহুবিধ নাট্য ও পিচ্ছিকা ঘূর্ণন) হরিহর-ব্রহ্মপ্রমুখ দেবগণ, দেবরাজ ও আকাশে নর্ত্তনকারী সিদ্ধচারণদেববধূগণকে দেখাইতেছি। (সকলের বিস্ময়ে দর্শন)।

রা—(উর্দ্ধে দর্শনপূর্ব্বক আসনত্যাগ করিয়া) আশ্চর্য্য, আশ্চর্য্য !

বি—আশ্চর্য্য, আশ্চর্য্য।

(2) M.—As the king commands. (Acting differently and moving the feather bundle) I shall show the gods with the Creator, Preserver and Destroyer, and the celestial king and also the wives of the gods and demigods dancing in the sky. (All look with wonder.)

K.—(Looking up and descending from his seat) Strange, strange !

J.—Strange, strange !

(3) देवराजम् = इन्द्रम्। देवानां राजा। राजाहःसखिभ्यष्टजिति टच् समासान्तः। चारणाः=कुशीलवा नटा इत्यर्थः। Dancers, mimics, strolling actors or bards. सार्थम्=समूहम्। ऐन्द्रजालिकवाक्ये द्वौ श्लोकौ उद्गाथाछन्दसा द्वौ च गाथाच्छन्दसा ग्रथितौ। लक्षणे च यथा—"पूर्व्वद्धे यत्रार्द्धे मत्ता तौ सति सुभथ संभणिया। सो उग्गाहो मुणो पिङ्गलक इदिट्ट सहि मत्तङ्गी।" इति तथा—"पढमं बारहमत्ता बीए अट्ठारहेण संजुत्ता। अह पढमं तह तीअं दह पञ्च विभूसिया गाहा॥" इति। अतः प्राकृते या गाथा संस्कृते सार्य्या।

राजा। देवि, पश्य।

एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शंकरोऽयं
दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः। ९
एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये
नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः॥

(1) রা—হে রাজ্ঞি, আকাশে এই পদ্মস্থ ব্রহ্মা, এই চন্দ্রশেখর শঙ্কর, এই অসিশার্ঙ্গ-গদাচক্রধর দৈত্যসূদন বিষ্ণু, এই ঐরাবতস্থ ইন্দ্র ও অন্যান্য দেবগণ দেখ। এবং এই চলচরণশব্দায়মান-নূপুর দিব্যাঙ্গনারাও নৃত্য করিতেছে, দেখ।

K.—O queen, see here in the sky, this is the Creator on a lotus, this is the moon-crested God, this is the Preserver, the destroyer of demons, with his four arms with a bow, sword, mace and a disc. This is the heavenly king on his elephant, with other gods.

And here are the celestial maids dancing with noise from anklets on their moving feet.

(3) देवि पश्य व्योम्नि सरोजे एष ब्रह्मा अयं रजनिकरकलाशेखरः शंकरः असौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिर्दोर्भिर्दैत्यान्तकः। एषोपि ऐरावतस्थः त्रिदशपतिस्तथा अमी अन्ये देवाः एताश्च चलचरणरणन्नूपुरा दिव्यनार्यः नृत्यन्ति।

(4) हे देवि महिषि पश्य अवलोकय व्योम्नि आकाशे सरोजे पद्मे एष ब्रह्मा स्रष्टा आविर्भवतीति शेषः। अयं रजनिकरस्य चन्द्रस्य कला खण्डं शेखरे चूडायां यस्य स तथोक्तश्चन्द्रकलाचूडः शंकरः शिवः। असौ धनुश्च असिश्च धनुरसि इत्यत्र प्राणितूर्य्यसेनाङ्गानामिति क्लीवैकत्वं। तेन सह वर्त्तमानं सधनुरसि। तथा गदा च चक्रञ्च गदाचक्रम् इति च द्वन्द्वः। सधनुरसि च गदाचक्रञ्चेति कर्म्मधारयः। सधनुरसिगदाचक्रम्। तत् च चिह्नं यस्मिन् येषु ते तथोक्ताः। तैः धनुष्खड्गगदाचक्राङ्कैश्चतुर्भिः दोर्भिः बाहुभिः दैत्यान्तकः असुरसूदनः विष्णुरित्यर्थः। एषोपि ऐरावतस्थस्त्रिदशपतिरिन्द्रस्तथा अमी अन्ये अपरे देवाःसुराः। एताश्च चलेषु गमनशीलेषु चरणेषु रणन्तः स्वनन्तः नूपुरा मञ्जीरा यासां ताः तथोक्ताः। गमनशीलपादध्वनन्मञ्जीराः दिव्याः स्वर्गवासिन्यो नार्य्यः स्त्रियः सुराङ्गना इत्यर्थः नृत्यन्ति गात्रविक्षेपं कुर्व्वन्ति।

(5) ऐन्द्रजालिकमाहात्म्येन ब्रह्मादीनामाकाशेऽवस्थानं सुराङ्गनानां नर्त्तनञ्च दृश्यते।

(6) रजनीकरकलाशेखरः=सप्तमीविशेषणे बहुव्रीहाविति ज्ञापकाद् व्यधिकरणपदो बहुव्रीहिः। कमण्डलुपाणिं छात्रमद्राक्षीदिति भाष्यकारप्रयोगप्रामाण्यात् सप्तम्यन्तस्य परनिपातोऽपि साधुः। तस्य गड्वादित्वं वा। दोर्भिः=इत्थम्भूतलक्षणे इति तृतीया। भुजबाहू प्रवेष्टो दोरित्यमरः। साहचर्य्यात् पुंस्त्वम्। तथाच नैषधे— दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन् गुणमिति (१२।९७)। ककुद्दोषणी इति भाष्यकारप्रयोगात् क्लीवत्वमपि। समुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचर इति रघौ (१५।२३)। पद्दन्नित्यादिना (६।१।६३) शसादौ वा दोषन्नादेशः। पक्षे दोषभिः। अशिथिलपरिरम्भव्यापृतैकैकदोष्णोरित्युत्तरचरिते।

सधनुरसिगदाचक्रचिह्नैः=केचित्तु धनुषा सह वर्त्तमानमिति विग्रहन्ति। तत्र धनुषश्चेत्यनङ् प्राप्तिः स्यात् (५।४।१३२)। अथवा समासान्तस्यानित्यत्वं शरणीकर्त्तव्यम्।

खलावण्यार्थसाधृनधनुषमञ्जाय इणवदिति पुष्पदन्तप्रयोगे (महिम्न: स्तवे) यथा। एतश्च स्त्रिगपूतवीणाञ्जोध्वकुचिसौरनामनाम चेत्यत्र (६।२।१८७) अध्वन्शब्दग्रहणाद् ज्ञापकादिति इणिकारसौरदेवौ। प्रतेरंश्वादयस्तत्पुरुषे इत्यत्र (६।२।१९३) राजन्शब्दग्रहणाद् ज्ञापकादिति भट्टोजि:। त्रिदशपति:=तिस्रो दशा बाल्यकौमारयौवनानि येषामिति त्रिदशास्तेषां पति:। अथवा त्रिरावृत्ता दश परिमाणमेषामिति त्रिदशा। उभयत्र बहुव्रीहि: (२।२।२५, ५।४।७३)। समासेनैव सुजर्थस्याभिधानात् पुनर्न सुच्।

दिव्यनार्य:=दिव इमा दिव्या:। द्युप्रागपागुदक्प्रतीचो यदिति (४।२।१०१) यत्। ताश्च नार्यश्च। शार्ङ्गरवाद्यञो ङीनिति नृनरयोर् वृद्धिश्चेति वक्तव्याद्। नृ + ङीन्=नारी।

(8) एतेन...ब्रह्मणा...शेखरेण शंकरेणानेन...दैत्यान्तकेनामुना...एतेन...ऐरावतस्थेन.. त्रिदशपतिना....अमीभिर् देवै रन्यै: नृत्यते....एताभि:...नूपुराभि:.... नारीभि:।

(9) स्रग्धरावृत्तम्।

वास। अच्चरीअं अच्चरीअं। (क)

विदू। (अपवार्य) हा दासीए पुत्त इन्दजालिअ किं एदेहिं देवेहिं अच्छराहिं च दंसिदाहिं। जइ दे इमिणा परितुट्टेण कज्जं, ता दंसेहि साअरिअं। (ख)

तत: प्रविशति वसुन्धरा।

वसु। (राजानमुपसृत्य) जेदु जेदु भट्टा। अमच्चो जोअन्धराअणो विण्णवेदि, एसो क्खु विक्कमबाहुणा पधानमच्चो वसुभूदो अनुप्पेसिदो, ता परिहसि देव इमस्सिं एव्व सुन्दरमहुत्तए पेक्खिदुं, अहं पि कज्जसेसं समाप्पिअ आअदो ज्जेव्व त्ति। (ग)

(क) आश्चर्यमाश्चर्यम्।

(ख) हा दास्या: पुत्र ऐन्द्रजालिक किमेतैर्देवैरप्सरोभिश्च दर्शितै:। यदि ते अनेन परितुष्टेन कार्यं, तत् दर्शय सागरिकाम्।

(গ) জয়তু জয়তু ভর্ত্তা। অমাত্যো যৌগন্ধরায়ণো বিজ্ঞাপয়তি, এষ খলু বিক্রমবাহুনা প্রধানামাত্যো বসুভূতিরনুপ্রেষিতঃ। তদর্হসি দেবঃ অস্মিন্নেব সুন্দরমুহূর্ত্তে প্রেক্ষিতুম্। অহমপি কার্য্যশেষং সমাপ্য আগত এব ইতি।

(1) বাস—আশ্চয্য, আশ্চয্য।

বি—(জনান্তিকে) হা দাসীর বেটা ঐন্দ্রজালিক, দেবতা ও অপ্সরা দেখাইয়া ফল কি। যদি ইহাকে তুষ্ট করিতে হয়, সাগরিকাকে দেখা।

(দৌবারিকীর প্রবেশ)

দৌ—(রাজার সমীপে আগমন পূর্ব্বক) মহারাজের জয় হউক। অমাত্য যৌগন্ধরায়ণ নিবেদন করিতেছেন বিক্রমবাহু কর্ত্তৃক তদীয় প্রধান অমাত্য বসুভূতি প্রেরিত হইয়াছেন। এই উৎকৃষ্ট সময়েই মহারাজ তাঁহার সহিত সাক্ষাৎকার সম্পন্ন করুন। তিনিও অবশিষ্টকায্য সমাপ্ত হইলেই আসিবেন।

(2) Q.—Strange, Strange!

J.—(Aside) O bastardly magician, what is the use of showing these gods and nymphs? If you wish to gratify him, show *Sagarika.*

(ENTER THE WARDER)

W.—(Coming to the King) Victory to the king. The minister submits that the king of Ceylon has sent his prime minister. May he be interviewed in this auspicious moment. The minister too is almost come after finishing his works at hand.

(3) एतैः=प्राधान्यादैर्वैरित्यस्य विशेषणम्। पुमान् स्त्रियेति एकशेषो वा। अप्सरोभिः=स्त्रियां बहुष्वप्सरस इत्यमरः। नादिन्याक्रोशे पुत्रस्येति (८।४।४८) सूत्रे अप्सरःशब्दस्यैकवचने भाष्यकाररक्षिकादिभिः प्रयोगादेकवचनमपि साधु। तथाचोक्तम् "आपः सुमनसो वर्षा अप्सराः सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वे तूत्तरविकल्पमिति। सुन्दरमुहूर्त्ते=निर्द्दोषसमये। शुभक्षण इति यावत्।

वास। अज्जउत्त चिट्ठदु दाव इन्दजालं, मातुलकुलादो अज्जो अमच्चप्पधाणो वसुभूदी आअदो ता एदं दाव पेक्खदु अज्जउत्तो। (क)

राजा। यथाह देवी। (ऐन्द्रजालिकं प्रति) भद्र विश्रम्यतामिदानीम्।

ऐन्द्र। (पुनः पिच्छिकां भ्रमयित्वा) जं देवो आणवेदि (इति निष्क्रामन्) एक्को उण मह खेलणओ अवस्सं देवेण पेक्खिदव्वो। (ख)

राजा। भद्र द्रक्ष्यामः।

वास। कञ्चणमाले गच्छ तुमं देहि से पारितोसिअं। (ग)

चेटी। जं देवी आणवेदि (इति ऐन्द्रजालिकेन सह निष्क्रान्ता)। (घ)

(क) आर्य्यपुत्र तिष्ठतु तावदिन्द्रजालं, मातुलकुलात् आर्य्यः अमात्यप्रधानो वसुभूतिरागतस्तदिमं तावत् प्रेक्षतामार्य्यपुत्रः।

(ख) यद्देवआज्ञापयति। एकं पुनर्मम खेलनकमवश्यं देवेन प्रेक्षितव्यम्।

(ग) काञ्चनमाले, गच्छ त्वम्। देह्यस्य पारितोषिकम्।

(घ) यद्देव्याज्ञापयति।

(1) वास—আর্য্যপুত্র, এখন ইন্দ্রজাল ক্ষান্ত হউক। মাতুলকুল হইতে অমাত্য-প্রধান আর্য্য বসুভূতি আসিয়াছেন। তাঁহাকেই দর্শন করুন।

রা—রাজ্ঞীর যেরূপ ইচ্ছা। (ঐন্দ্রজালিকের প্রতি) ভদ্র এখন বিশ্রান্তি লাভ কর।

ঐন্দ্র—(পিচ্ছিকা ঘূর্ণনপূর্ব্বক) যে আজ্ঞা মহারাজ! (গমন সময়ে) কিন্তু আমার আরও একটা ক্রীড়া মহারাজকে দেখিতে হইবে।

রা—ভদ্র, দেখিব।

বাস—কাঞ্চনমালে, ইহাকে পারিতোষিক দাও।

কাঞ্চ—যেরূপ রাজ্ঞীর আদেশ (ঐন্দ্রজালিকের সহিত নিষ্ক্রান্তা)।

(2) Q.—Husband, let magic stop. My maternal uncle's prime minister has come. Please to recieve him.

K.—As the queen says. (To the magician) My good man, take rest for a while.

M.—(Turning the feather bundle) I obey the king. (Going) But one more play of mine must be seen by the king.

K.—Yes, I shall see.

Q.—*Kanchanmala*, go and give him rewards.

M.—As the queen directs. (Exit with the magician.)

(3) खेलनकं=क्रीडा। संज्ञायां कन्।

राजा—वसन्तक, प्रत्युद्गम्य प्रवेश्यतां वसुभूतिः।

विदू—जं भट्टा आणवेदित्ति। (इति निष्क्रान्तः।)

(ततः प्रविशति वसन्तकेन प्रत्युद्गम्यमानो वसुभूतिर्बाभ्रव्यश्च।)

एदु एदु अमच्चो। (क)

वसु। (समन्तादवलोक्य) अहो वत्सेश्वरस्यानुभावः। तथाहि।

आक्षिप्तो जयकुञ्जरेण तुरगान्निर्वर्णयन्वल्लभान्
संगीतध्वनिना हृतः क्षितिभृतां गोष्ठीषु तिष्ठन्क्षणम्।
सद्योविस्मृतसिंहलेश्वरविभवः कक्षाप्रदेशेऽप्यहो
द्वाःस्थेनैव कुतूहलेन महता ग्राम्यो यथाहं कृतः॥

(क) यद्भर्ताज्ञापयतीति। एतु एतु अमात्यः।

(1) রা—বসন্তক, প্রত্যুদ্গমন পূর্ব্বক বসুভূতিকে আনয়ন কর।

বি—যেরূপ মহারাজের আদেশ। (গমন ও প্রত্যুদ্গমনে বসুভূতি ও বাভ্রব্যের সহিত পুনঃ প্রবেশ) আসুন, অমাত্য, আসুন।

বসু—(চারিদিকে অবলোকন পূর্ব্বক) অহো বৎসেশ্বরের কি অপূর্ব্ব প্রভাব! যেহেতু জয়হস্তী কর্ত্তৃক আকৃষ্ট ও সঙ্গীতধ্বনিতে মোহিত হইয়া, প্রিয় অশ্বগুলিকে দর্শন ও ক্ষত্রিয়দের সভাতে কিছুকাল অপেক্ষা করিয়া, সদ্যঃ সিংহলেশ্বরের সম্পদ্ বিস্মরণপূর্ব্বক আমি প্রকোষ্ঠে দ্বারপাল কর্ত্তৃক কুতূহলের সহিত (অথবা দ্বারাগত কুতূহলদ্বারা) গ্রাম্য স্থিরীকৃত হইয়াছি।

(2) K.—Friend, go to welcome the Ceylon minister and bring him here.

J.—I obey the king. (Goes and re-enters in company with the Chamberlain and the Ceylon minister) The minister may please to come here.

Ceylon minister—(Looking round) O the power of the king of *Batsha*,—since,—attracted by the grand elephant, inspecting the stately steeds, charmed with songs and staying for a short time in the assembly of the kings his vassals, I forgot for the moment the the wealth of the king of Ceylon and was made a rustic, while in the entrance room, through curiosity, by the sentry (or through the curiosity which came to me when at the gate.)

(3) जयकुञ्जरेण आक्षिप्तः वल्लभान् तुरगान् निर्वर्णयन् सङ्गीतध्वनिना हृतः क्षितिभृतां गोष्ठीषु क्षणं तिष्ठन् सद्योविस्मृतसिंहलेश्वरविभवः अहं कक्षाप्रदेशेऽपि द्वाःस्थेनेव महता कुतूहलेन अहो ग्राम्यो यथा कृतः ।

(4) प्रत्युद्गम्य = प्रत्युद्याय = अग्रतो गत्वा । अनुभावः = तेजः । अनुभावः प्रभावः स्यादित्यमरः । आक्षिप्तेति । जयस्य प्राधान्यद्योतनार्थं रक्षितस्य कुञ्जरेण गजेन आक्षिप्त आकृष्टः । आक्षेपो भर्त्सनाकृष्टिकाव्यालङ्कृतिषु स्मृत इति मेदिनी । वल्लभान् प्रियान् तुरगान् अश्वान् निर्वर्णयन् पश्यन् । निर्वर्णनञ्च निध्यानं दर्शनालोकनेक्षणमित्यमरः । सङ्गीतध्वनिना गानशब्देन हृतः मोहितः । क्षितिभृतां राज्ञां गोष्ठीषु सभासु क्षणं स्वल्पकालं तिष्ठन् दण्डायमानः । सद्योविस्मृतसिंहलेश्वरविभवः तत्क्षणविस्मृतसिंहलनाथैश्वर्यः । अहं कक्षायाः प्रकोष्ठस्य प्रदेशे एकस्थानेऽपि द्वाःस्थेनेव दौवारिकेणेव । महता विपुलेन । कुतूहलेन हर्षेण । (अथवा द्वाःस्थेनेव द्वारसमागतेनेव महता कुतूहलेन अनुसन्धित्सया) अहो ग्राम्योऽदृष्टनगरादिकः अनभिज्ञः इत्यर्थः यथा इव । कृतः विहितः ।

(5) वत्सराजस्य वस्तुसम्पद्दर्शनेन विस्मृतसिंहलपतिसम्पदहं द्वाःस्थितेन कौतुकेनेव अनभिज्ञः कृतः ।

(6) द्वाःस्थेन = द्वार् + स्था + कः । तेन । सुपि स्थ इति कः । खर्परे शरि वा विसर्गलोपो वक्तव्य इति पक्षे द्वास्थेन द्वास् स्थेन इति वा । ग्राम्यः = ग्रामाद् यत् खञौ इति (४।२।९४) यत् । ग्रामे भवो ग्राम्यः । पक्षे ग्रामीणः ।

(7) समज्या परिषद् गोष्ठी सभेत्यमर:। कक्षा प्रकोष्ठे हर्म्यादेरित्यमर:।

(8) आविशम्...निर्वर्णयन्तम्... .हतम्....तिष्ठन्तम्.....विभवं मां द्रा:स्थ: (महान्...कुतूहल इति वा) ग्राम्यं कृतवान्।

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) गजतुरगादिवस्तुसम्पद्दर्शनादत्र उदात्तालङ्कार:। उदात्तं वस्तुन: सम्पदिति लक्षणात्।

बाभ्रव्य:—वसुभूते, अद्य खलु चिरात् स्वामिनं द्रक्ष्यामीति यत्सत्यमानन्दातिशयेन किमप्यवस्थान्तरमनुभवामि। कुत: ?

विवृद्धिं कम्पस्य प्रथयतितरां साध्वसवशा-
दविस्पष्टां दृष्टिं तिरयति पुनर्बाष्पसलिलै:।
स्खलद्वर्णां वाणीं जडयतितरां गद्‌गदतया
जराया: साहाय्यं मम हि परितोषोऽद्य कुरुते॥

(1) কঞ্চুকী—বহুকালের পর অদ্য প্রভুকে দেখিব, অতএব যথার্থই অত্যন্ত আহ্লাদে অবস্থান্তর অনুভব করিতেছি। যেহেতু—অদ্য আমার সন্তোষ, ভয়জনিত কম্পনের বৃদ্ধিবিধান, অশ্রুচ্ছাদিত দৃষ্টির তিরোধান ও গদ্‌গদতারুদ্ধ পতদক্ষর বাক্যের অস্পষ্টতা সম্পাদন করিয়া আমার বৃদ্ধাবস্থার সহায় হইয়াছে।

(2) I feel a change through pleasure as after a long time, I shall see again my master today ; it is causing a fearful trembling and is covering my weak sight with tears. So my old state is helped,—my words being inarticulate through the choking voice.

(3) परितोषो हि अद्य साध्वसवशात् कम्पस्य विवृद्धिं प्रथयतितरां पुन: बाष्पसलिलैरविस्पष्टां दृष्टिं तिरयति। गद्‌गदतया स्खलद्वर्णां वाणीं जडयतितराम्। मम जराया: साहाय्यं कुरुते।

(4) परितोष: आनन्द: हि यस्मात् साध्वसवशाद् भयहेतो: भयभावोचितादित्यर्थ:। कम्पस्य वार्द्धक्यकृतस्य चेति भाव:। विवृद्धिमाधिक्यं प्रथयतितरामतिशयेन प्रकटयति। पुनर्भूय: बाष्पसलिलै: नेत्रजलैरविस्पष्टा मम्प्रखरां दृष्टिं तिरयति प्रच्छादयति। गद्गदतया स्वररोधतया स्खलद्वर्णां गलदक्षरां वाणीं वाक्यं जडयतितरा-

मतिशयेनास्पष्टीकरोति । इत्थं मम जराया वार्द्धकस्य साहाय्यं सहायतां कुरुते विदधाति ।

(5) मम सर्वाङ्ग: अङ्ग कम्पवर्द्धनेन दृष्टिच्छादनेन वाक्यास्पष्टत्वसम्पादनेन च वृद्धत्वस्य साहाय्यं विधत्ते ।

(6) यदिति=सत्यमवस्थान्तरमनुभवामि यदद्य खलु हन्त्यामीति विपरिणामेनान्यथादुत्तरपदे स्थितत्वान्न तत्पदोपादानम् । अथवा इति यत् तस्मादित्याध्याहार्य्यम् ।

गद्गदतया=गद्गदस्य भाव: । तथा । गद्गद वाक्स्खलन इति कण्ड्वादि: । कण्ड्वादयस्तु द्विधा । धातव: प्रातिपदिकानि च ।

प्रथयतितराम्=प्रथ् + णिच् + लट् तिप् + तरप् + आमु । णिजन्ते लुङि अपप्रथत् । (७।४।९५) तिरयति=तिरस् + णिच् + लट् तिप् ।

(8) विहङ्गि: प्रथयतितराम् । अविस्पष्टा दृष्टि: तिर्य्यते । स्खलदक्षरा वाणी प्रथतेतराम् । परितोषेण क्रियते ।

(9) शिखरिणी वृत्तम् । (10) दीपकोऽलङ्कार: ।

विदू । (अग्रे भूत्वा) एदु एदु अमच्चो । (क).

वसु । (विदूषकस्य कण्ठे रत्नमालां दृष्ट्वापवार्य्य) बाभ्रव्य, जाने सैवेयं रत्नमाला या देवेन राजपुत्र्यै प्रस्थान-समये दत्तेति ।

बाभ्र । अमात्य, अस्ति साद्दृश्यम् । तत्किं वसन्तकादवगच्छामि प्रभवमस्या: ।

वसु । बाभ्रव्य मा मैवं, महति राजकुले रत्नबाहुल्यान्न दुर्लभो भूषणानां संवाद: (इति परिक्रामति) ।

विदू । (राजानमुद्दिश्य) एसो वच्छाधिवो ता उवसप्पदु अमच्चो । (ख)

বসু। (উপসৃত্য) জয়তি জয়তি দেবঃ।

রাজা। (উত্থায়) অভিবাদয়ে।

বসু। অতিশ্রেয়াংস্ত্বং ভূয়াঃ।

রাজা। আসনমাসনমার্য্যায়।

বিদু। (আসনমাদায়) ভো, এদমাসণম্। উববিসদু অমচ্চো। (গ) (বসুভূতিরুপবিশতি।)

(ক) এত্বেত্বমাত্যঃ।

(খ) এষ বত্সাধিপঃ। তদুপসর্পত্বমাত্যঃ।

(গ) ভোঃ, এতদাসনম্। উপবিশত্বমাত্যঃ।

(১) বি—(অগ্রে গমনপূর্ব্বক) আসুন, অমাত্য, আসুন।

বসু—(বিদূষকের কণ্ঠে রত্নমালা দেখিয়া জনান্তিকে) বাভ্রব্য, প্রস্থানকালে রাজপুত্রীকে মহারাজ যাহা দিয়াছিলেন এই ত সেই রত্নমালা!

কঞ্চু—অমাত্য, সাদৃশ্য আছে বটে, বসন্তক হইতে ইহার আগম-বৃত্তান্ত জানিব কি?

বসু—কখনও নহে। প্রধান রাজকুলে রত্নবাহুল্যনিবন্ধন ভূষণসাদৃশ্য দুর্লভ নহে। (পরিক্রমণ)।

বি—(রাজাকে দেখাইয়া) এই বৎসরাজ। অমাত্য নিকটে গমন করুন।

বসু—(নিকটে গমনপূর্ব্বক) মহারাজের জয়!

রা—(উত্থানপূর্ব্বক) অভিবাদন করিতেছি।

বসু—আপনি মঙ্গলযুক্ত হউন।

রা—মহাশয়ের জন্য আসন, আসন?

বি—(আসন গ্রহণপূর্ব্বক) এই আসন, অমাত্য উপবেশন করুন। (বসুভূতির উপবেশন)।

(2) J.—(Going in the front) Please to come this way, sir.

C. M.—(Seeing the necklace on the jester's neck, aside to the Chamberlain) Chamberlain, I know this necklace was given by our king to the princess on her departure.

Chamberlain—Minister, it is similar; shall I know its origin from the jester?

C. M.—Oh no, no. In this great palace, there are many gems and the similiarity of jewels cannot be unusual. (Moving)

J.—(Showing the king) This is the king of *Batsha.* Please approach, Sir.

C. M.—(Coming near) Victory to the king.

K.—(Rising) I salute.

C. M.—Be highly prosperous.

K.—A seat, a seat for the respected minister.

J.—(Taking a seat) Here is the seat. May the minister be pleased to sit. (The minister sits.)

(3) संवादः=साहश्यम्। अभिवादये = वन्दे। अतिश्रेयान् = अत्युन्नतः। अतिगतं श्रेयो यस्येति बहुव्रीहिः। ईयसश्चेति न कप् समासान्तः (५।४।१५६)। भूयाः=आशिषोऽहाः। आशिषि लिङ्।

कञ्चु। देव, बाभ्रव्यः प्रणमति।

राजा। (पृष्ठे हस्तं दत्वा) बाभ्रव्य, इत आस्यताम्।

कञ्चु। (उपविश्य) देवि, बाभ्रव्यः प्रणमति।

विदू। अमच्च, एसा देवी वासवदत्ती पणमदि। (क)

वास। अज्ज, पणमामि। (ख)

वसु। आयुष्मति, वत्सराजसदृशं पुत्रमाप्नुहि।

राजा। आर्य्य वसुभूते, अपि कुशलं तत्रभवतः सिंहलेश्वरस्य।

वसु। (ऊर्द्धमवलोक्य निःश्वस्य च) देव, न जाने किं विज्ञापयामि मन्दभाग्यः। (अधोमुखस्तिष्ठति।)

वास। (सविषादमात्मगतम्) हडी हडी। किं दाणिं वसुभूदी काधइस्सदि। (ग)

(ক) অমাত্য, এষা দেবী বাসবদত্তা প্রণমতি।

(খ) আর্য্য, প্রণমামি।

(গ) হা ধিক্! হা ধিক্। কিমিদানীং বসুভূতিঃ কথয়িষ্যতি।

(1) কঞ্চু—মহারাজ, বাভ্রব্য প্রণাম করিতেছে।

রা—(পৃষ্ঠে হস্তপ্রদানপূর্ব্বক) বাভ্রব্য এখানে বস।

কঞ্চু—(উপবেশন পূর্ব্বক) রাজ্ঞি, বাভ্রব্য প্রণাম করিতেছে

বি—অমাত্য, মহিষী বাসবদত্তা প্রণাম করিতেছেন।

বাস—আর্য্য, প্রণাম করিতেছি।

বসু—আয়ুষ্মতি! বৎসরাজের তুল্য পুত্র প্রাপ্ত হও

রা—আর্য্য বসুভূতে, পূজনীয় সিংহলেশ্বরের মঙ্গল ত?

বসু—(ঊর্দ্ধে দৃষ্টি ও নিশ্বাস ত্যাগ করিয়া) মহারাজ, মন্দভাগ্য আমি কি বলিব জানি না। (অধোমুখে অবস্থান।)

বাস—(সবিষাদে স্বগত) হায় ধিক্, এখন বসুভূতি না জানি কি বলিবে

(2) Cham.—O king, your, Chamberlain salutes you.

K.—(Patting) Chamberlain, sit here.

Ch.—(Sitting) O queen, the Chamberlain bows

J.—Minisier, the queen salutes you.

Q.—I salute, Sir.

C. M.—O long-living one, may you get a son like the king of *Batsha*

K.—Is the king of Ceylon all right, sir?

C. M.—(Looking up and sighing) O king, I do not know what to say, unfortunate as I am. (Hangs down his head).

Q.—(Sorrowfully aside) Alas, alas, what will now the minister say?

(3) আস্যতাম্=স্থীয়তাম্। আয়ুষ্মতি=দীর্ঘায়ুষ্কে। আয়ুস্+মতুপ্+ঙীপ্। তৎ সম্বুদ্ধৌ। তসৌ মত্বর্থে ইতি ভত্বা (১।৪।১৯) ন (অপদান্তত্বাৎ) ষত্বম্। আপ্নুহি=লভস্ব। আশিষি লোট্। কুশলং=রাজ্ঞী মহানুভাবত্বাদ্বৈবাহিকত্বাচ্চ কুশলপ্রশ্নেন রাজ্ঞোচিতঃ প্রশ্নঃ। অন্যথা রাজ্ঞঃ কুশলং পৃচ্ছেৎ অনবদ্যমনাময়মিতি অতিবিরোধঃ স্যাৎ।

तत्रभवत:—इतराभ्योऽपि दृश्यन्त इति (५।३।१४) सार्वविभक्तिकास्तसिलादय:। सूत्रे दृशिग्रहणं प्रायिकविध्यर्थम्। तेन भवदादिभिर्योगे एव एतद् स्यात्। सुप्सुपेति समास:। त्रल् can be used for सप्तमी only. But this Rule 5. 3. 14 makes it possible in place of any other विभक्ति as well, provided it is followed by such words as भवत्, दीर्घायुस् &c... This limitation is obtained from the word दृश्यन्ते in the Rule. In the case under discussion, त्रल् is used in the room of षष्ठी viz: तत्रभवत: instead of तस्यभवत:।

राजा। वसुभूते, कथय। किमिदं मां पर्याकुलयसि।

बाभ्र। (अपवार्य) चिरमपि स्थित्वा यत्कथनीयं तदिदानीमेव कथ्यताम्।

वसु। (सास्रम्) देव, न शक्यं निवेदयितुम्। तथाप्येष कथयामि मन्दभाग्य:। यासौ तत्रभवत: सिंहलेश्वरस्य दुहिता रत्नावली नामायुष्मती सिद्धादेशेनादिष्टा योऽस्या: पाणिग्रहणं करिष्यति स सार्वभौमो राजा भविष्यतीति।

राजा—ततस्तत:।

वसु—तत्प्रत्ययादार्यार्थं यौगन्धरायणेन बहुश: प्रार्थ्यमानापि सा सिंहलेश्वरेण वासवदत्तायाश्चित्तखेदं परिहरता न दत्ता।

(1) রা—বসুভূতে, বল, কেন আমাকে পর্য্যাকুল করিতেছ?

কঞ্চু—(জনান্তিকে) বিলম্ব করিয়া যাহা বলিতে হইবে তাহা এখনই বলুন।

বসু—(অশ্রু সহিত) মহারাজ, নিবেদন করা দুষ্কর। তথাপি মন্দভাগ্য আমি বলিতেছি। সিংহলপতির আয়ুষ্মতী রত্নাবলী নামে যে কন্যার সম্বন্ধে এক সিদ্ধ পুরুষ বলিয়াছিলেন, ইহার পাণিগ্রহীতা সর্ব্বভৌম রাজা হইবেন—

রা—তার পর, তার পর?

বসু—সেই বিশ্বাসে আপনার জন্য যৌগন্ধরায়ণ কর্ত্তৃক সে বহুবার প্রার্থ্যমানা হইয়াও, বাসবদত্তার চিত্তখেদ পরিহারেচ্ছায় সিংহলরাজকর্ত্তৃক আপনাকে দত্ত হয় নাই—

(2) K.—O minister, speak out, Why do you disquiet me?

Ch.—(Aside to the C. M.) Better say now what will have to be stated later.

C. M.—(With tears) O king, it is painful. Yet I say, unlucky as I am. That blessed daughter of the respected king of Ceylon, called *Ratnabali*, who was declared by a sage, to have been predestined to make her husband a universal emperor—

K.—Then, then?

C. M.—Was not, though repeatedly asked in marriage, for you, by your minister, betrothed to you, desiring thereby to avoid the jealousy of your queen—

(3) पर्य्याकुलयसि = चस्थिरं करोषि। सार्वभौम = सम्राट्। सर्वभूमेरीश्वर इति। तस्येश्वर इत्यण् (५।१।४२)।

राजा। (अपवार्य)। देवि, किमिदमिदानीमलीकं त्वदीयमातुलामात्यः कथयति।

वास। (विहस्य।) अज्जउत्त, ण आणामि को एत्थ अलिअं मन्तेदि। (क)

विदू। तदो किं संवुत्तं। (ख)

वसु। ततो लावणकेन वह्निना देवी दग्धेति वार्तामुत्पाद्य देवेन तदन्तिकं बाभ्रव्यः प्रहितः। पुनरपि सा प्रार्थिता च। ततस्तत्रभवता सिंहलेश्वरेण चिन्तितम्। देवेन सहास्माकं संबन्धलोपो मा भूदिति दत्ता सा रत्नावली देवाय प्रतिपादयितुमस्माभिरानीयमाना समुद्रे यानभङ्गान्निमग्ना। (इति रुदन्नधोमुखस्तिष्ठति।)

(क) आर्य्यपुत्र, न जानामि कोऽत्रालीकं मन्त्रयते।

(ख) ततः किं संवृत्तम्।

(1) রা—(জনান্তিকে) রাজ্ঞি, তোমার মাতুলমন্ত্রী মিথ্যা বলিতেছে কি?
বাস—(চিন্তাপূর্ব্বক) আর্য্যপুত্র, কে মিথ্যা বলিতেছে, জানি না।
বি—তার পর কি হইল?
বস্থ—তার পর লাবণকদাহে দেবী দগ্ধা হইয়াছেন এইরূপ জনরব তুলিয়া সিংহল-রাজের নিকট বাভ্রব্যকে প্রেরণপূর্ব্বক পুনর্ব্বার রত্নাবলী যাচিতা হয়। তৎপর আপনার সহিত সম্বন্ধলোপ নিবারণের ইচ্ছায় সিংহলরাজদত্তা, আপনার জন্য আমাদিগকর্ত্তৃক আনীতা, রত্নাবলী সমুদ্রে যানভঙ্গনিমগ্না—(রোদন ও অধোমুখে অবস্থান)।

(2) K.—(Aside to the queen) Queen, does your maternal uncle's minister now tell an untruth?
Q.—(Thinking) Husband, I do not know who is here telling it.
J.—What did then happen?
C.—Then raising a report that a conflagration at *Labanaka* killed the queen, your Chamberlain was sent and she was again asked for. Wishing to preserve a relation with you, the princess was now betrothed to you and while being brought away by us, she was drowned in the ocean by a shipwreck. (Weeps and hangs down his head.)

(3) अलीकम्=असत्यम्। अलीकमप्रियेपि स्याद् दिव्यसत्ये नपुंसकमिति मेदिनी। लावणकेन=लावणकप्रदेशे ज्वलितेन। लावणकप्रदेशश्च किल वत्सराजाधिकृत: मगधदेशप्रान्ते आसीत्। वा नामधेयस्येति वक्तव्याद् (१।१।७३), लावणक-शब्दाद् विकल्पेऽण्। पक्षे वृद्धत्वाच्छ:। cf: विधाय मूर्त्ति कपटेन वामनीमिति नैषधं। लावणक was a border-district near the kingdom of Magadha and it was under Udayan the king of *Batsha* (vide कथासरित्-सागर, Book III. Ch. 15). Here a palace was burned to ashes under a plot concerted between यौगन्धरायण, रुमण्वत् and गोपालक brother to वासवदत्ता। The reading also is "लावणकेन देवी दग्धा"। But its interpretation that लावणक was the name of an officer of वत्सराज or the name of a certain person or a trader in a city of Ceylon, does not agree with the कथासरित्सागर। Some also read "लावाणकेन वह्निना।" प्रहित:=प्रेरित:। हिनोति जिघाय। हेष्यति। अहैषीत्। हीयते। अहायि। हिन्वन्। हित्वा। हेतुम्।

वास। (सास्रम्) हा हदम्हि मन्दभाइणी। हा बहिणि रश्रणावलि, कहिं दाणिं सि। देहि मे पडिवश्रणं। (क)

राजा। समाश्वसिहि समाश्वसिहि। दुरवगाहा गतिर्दैवस्य। वाहनभङ्गपतितोत्थितौ नन्वेतावेव ते निदर्शनम्। (इति वसुभूतिबाभ्रव्यौ दर्शयति।)

वास। अज्जउत्त, जुज्जदि एव्वं। परं कुदो मम एत्तिश्रं भाश्रधेश्रं। (ख)

राजा। (अपवार्य) बाभ्रव्य, किमेवमिति सर्वथा नावगच्छामि।

बाभ्र। देव श्रूयताम्।

(क) हा हतास्मि मन्दभागिनी। हा भगिनि रत्नावलि, क्वेदानीमसि। देहि मे प्रतिवचनम्।

(ख) आर्य्यपुत्र युज्यते एवम्। परं कुतो ममैतद् भागधेयम्।

(1) वास—(अশ্রু সহিত) হায় মন্দভাগিনী আমি হতা হইয়াছি। হা ভগিনি রত্নাবলি! কোথায় তুমি, উত্তর দাও।

রা—সমাশ্বস্তা হও, সমাশ্বস্তা হও। দেবের গতি দুর্ব্বোধ। যানভঙ্গপতিতোত্থিত এই দুইজনই দৃষ্টান্ত। (বসুভূতি ও কঞ্চুকীকে প্রদর্শন।)

বাস—আর্য্যপুত্র, তা বটে। কিন্তু, আমার ভাগ্য এরূপ কি?

রা—(জনান্তিকে) বাভ্রব্য ইহা কি? একেবারেই বুঝিতেছি না।

কঞ্চু—দেব, শুনুন।

(2) Q.—(With tears) O, unlucky I am undone. O cousin, where are you? Respond to me.

K.—Be calm. The course of fate is inscrutable. These two, drowned and saved, are the instances before you (Points to the Ceylon minister and his own Chamberlain).

Q.—Just so, my husband, but how can my luck be so?

K.—(Aside to Chamberlain) Chamberlain, I do not understand the matter at all.

Ch.—O king, listen—

(3) दुरवगाहा = दुर्विभाव्या = दुःखेन निर्णेतव्या। दुर् + अव् + गाह् + खल् + टाप्। गाहते। जगाहे। गाहिष्यते, घाक्ष्यते। अगाहिष्ट, अगाढ़। गाह्यते। अगाहि। गाहितुम् गाढुम्। गाहित्वा गाढ्वा। गाढ़ः। गाहमानः। दैवस्य = भागधेयस्य।

वाहनभङ्गपतितोत्थितौ = वाहनस्य यानस्य भङ्गेन पूर्वं पतितौ पश्चादुत्थितौ। पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेति तत्पुरुषः। निदर्शनम् = दृष्टान्तः। भागधेयम् = दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरित्यमरः। रूपनामभागेभ्यो धेयो वाच्य इति धेयप्रत्ययः। अवगच्छामि = बुध्ये।

(नेपथ्ये महान् कलकलः।)

हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः।
कुर्वन् क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातै-
रेष प्लोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः॥

(1)—(নেপথ্যে অত্যন্ত কলকল) অন্তঃপুরে সহসা অগ্নি উপস্থিত। অঙ্গনাগণের ও উপবনের ঘন বৃক্ষাগ্রের দাহে উহার তীব্র তেজঃ প্রকাশিত হইতেছে। ধূমাবচ্ছিন্ন ক্রীড়াশৈল সজলমেঘকৃষ্ণ এবং শিখানিচয়ে প্রাসাদের হেমশৃঙ্গশোভার আবির্ভাব হইয়াছে।

(2) (A great noise within) A fire has blazed out, all on a sudden, in the inner apartment and has assumed the beauty of the golden tops of the palaces with its massive flames. It shows its strong power by scorching the tops of the thick garden trees and distressing the females and it has made with its smoke the hillock for sports like a black cloud full of water.

(3) धर्चिषां निचये हर्म्याणां हेमशृङ्गश्रियमादधान इव सान्द्रोद्यानद्रुमाग्रग्लपन पिशुनितात्यन्ततीव्राभितापः धूमपातैः क्रीड़ामहीध्रं सजलजलधरश्यामलं कुर्वन् प्लोषार्त्तयोषिज्जन एषः अग्निः इहान्तःपुरे सहसैवोत्थितः।

(4) अर्चिषां शिखानां निचयैः समूहैर्हर्म्याणां प्रासादानां हेमशृङ्गश्रियं स्वर्णाग्र-! शोभां। शोभार्थेऽपि प्रयुज्यन्ते लक्ष्मीश्रीकान्तिविभ्रमा इति हलायुधः। आदधान धारयन्निव। सान्द्राणां घनानामुद्यानस्योपवनस्य द्रुमाणां वृक्षाणामग्राणां ग्लपनेन दहनेन पिशुनितः सूचितः अत्यन्तं तीव्रः खरः सन्तापः येन स तथोक्तः। वनोपवन वृक्षाग्रदहनसूचितातितीक्ष्णसन्तापः। धूमपातैर्धूमप्रच्छादनैः क्रीडामहीध्रं विलासशैलं सजलजलधरश्यामलं ससलिलमेघकृष्णं। श्यामलः पिप्पले कृष्णे इति मेदिनी। कुर्वन् सम्पादयन्। प्लोषेण दाहेन आर्त्तः पीडितः योषिज्जनः रमणीगणः येन स तथोक्तः। दाहपीड़िताङ्गनाचयः। एषः अग्निरनल इह अस्मिन् अन्तःपुरे गृहान्ते सहसा अतर्कितमेव। उत्थितः आविर्भूतः।

(5) हर्म्याग्रस्वर्णकान्तिं गृह्णन् उपवनवृक्षाग्रान् दहन् क्रीडाशैलञ्च धूमयोगेन घनश्यामं कुर्वन् वह्निः सहसान्तःपुरे वनिताकुलं त्रासयन्नुपस्थितः।

(6) पिशुनितः=पिशुन इव आचरतीति पिशुनयति। पिशुन+णिच्+क्तः। पिशुनः सूचके खले इति हेमचन्द्रः। क्रीड़ामहीध्रं=क्रीड़ाया महीध्र इति षष्ठीसमासः अश्वघासादिवत्। प्रकृतिविकृतेरभावात्। तन्न। मही+धृ+कः। कप्रकरणे मूलविभुजादिभ्य उपसंख्यानमिति कः। महीं धरतीति।

प्लोषः=दाहः। प्लुषु दाहे भ्वादिः। सेट्। प्लोषति। दिवादिश्च। It is read twice in दिवादि, once सिध्यर्थ, (अप्लोषीत्) and again for अङ्, (अप्लुषत्) (3.1.55) in लुङ्। Another प्लुष is read in क्र्यादि। प्लुष्णाति। But भ्वादि takes the forms प्लोषित्वा, प्लुषित्वा and प्लुष्टः and प्लुष्टः।

आर्त्तः=आङ्+ऋ+क्तः=आङ्ऋतः। Why not like महर्षिः, joined in संहिता? उपसर्गादृतिधाताविति (6. 1. 91) वृद्धिः i. e. when a

,अकारादि root is preceded by अवर्णान्त उपसर्ग, आर् should be the result (and not अर्) of the संहिता।

ज्ञपनम्=ज्ञा+णिच्+ल्युट्। ज्ञाज्ञावमुवमाचेत्यनुपसर्गाद्वा मित्त्वे न पर्चं उपधादीर्घ:।

(8) आदधानेन... अभितापेन... कुर्वता... एतेन... अनेन... उत्थितम्... अग्निना।

(9) सग्धरावृत्तम्।

(10) उत्प्रेक्षा।

अपिच,

देवीदाहप्रवादोऽयं योऽभूल्लावणके पुरा।
करिष्यन्निव तत्सत्यमन्ताग्निरयमुत्थित:॥

(सर्वे संभ्रान्ता: पश्यन्ति।)

(1) আরও এই যে রাজ্ঞীদাহপ্রবাদ পূর্ব্বে লাবণকে হইয়াছিল তাহা যথার্থ করিবার জন্যই যেন অন্তঃপুরে অগ্নি আবির্ভূত হইয়াছে। (সকলের সভয়ে দর্শন)

(2) Besides—This fire has blazed out in the harem, to verify, as it were, the old rumour of the the queen's having been burnt to ashes at *Labanaka.* (All look afraid.)

(3) योऽयं देवीदाहप्रवाद: पुरा लावणके अभूत् तं सत्यं करिष्यन्निव अन्तायमग्नि-रुत्थित:।

(4) योऽयं देवीदाहप्रवाद: राज्ञीभस्मीभवनवार्त्ता पुरा पूर्वं लावणके वत्सराजाधिकृतप्रदेशविशेषे अभूत् तं सत्यं यथार्थं करिष्यन् विधास्यन्निव अन्तान्त:पुरे अयमग्निरनल: उत्थित आविर्भूत:।

(5) लावणके प्रचारितपूर्वां जनश्रुतिं यथार्थां विधास्यन्नयं वह्नि: शुद्धान्ते प्रज्वलित:।

(8) ...प्रवादेनानेन येन...अभावि...करिष्यताग्निनानेनोत्थितम्।

(9) अनुष्टुप्।

(10) उत्प्रेक्षा।

(11) अत्र विद्रवो नाम नाटकीयावमर्षाङ्गम्। विद्रवो वधबन्धादिरिति लक्षणात्।

(12) करिष्यन्निव तत् सत्यं मन्ये वह्निः समुत्थित इति वा पाठः।

राजा। कथमन्तःपुरेऽग्निः। (ससम्भ्रममुत्थाय) कथं देवी वासवदत्ता दग्धा।

वास। अज्जउत्तो परित्ताहि परित्ताहि। (क)

राजा। अये कथमतिसम्भ्रमात्पार्श्वस्थापि देवी नोपलक्षिता। (देव्याः पाणिं गृहीत्वा आलिङ्ग्य) देवि समाश्वसिहि समाश्वसिहि।

वास। अज्जउत्त, मए अत्तणो किदे ण भणिदम्। किं उण एसा क्खु मए णिग्घिणाए इध णिअडसंजमिदा साअरिआ विवज्जेदि। ता परित्ताअदु अज्जउत्तो। (ख)

राजा। कथं देवि, सागरिका विपद्यते। एष गच्छामि।

वसु। देव, किमिदमकारणमेव पतङ्गवृत्तिः क्रियते।

बाभ्र। देव, युक्तमाह वसुभूतिः।

विदू। (राजानमुत्तरीये गृहीत्वा) भो, मा क्खु साहसं करेहि। (ग)

(क) आर्य्यपुत्र परित्रायस्व परित्रायस्व।

(ख) आर्य्यपुत्र, मयात्मनः कृते न भणितम्। किं पुनरेषा खलु मया निर्घृणया इह निगड़संयमिता सागरिका विपद्यते। तत्परित्रायतामार्य्यपुत्रः।

(ग) भो मा खलु साहसं कुरु।

(1) रा—कि? अन्तःপুরে অগ্নি? (সত্বর উঠিয়া) রাজ্ঞী বাসবদত্তা দগ্ধা হইল?
বাস—আর্য্যপুত্র, রক্ষা করুন, রক্ষা করুন।
রা—এই যে পার্শ্বস্থা দেবী, অতি ত্বরাতে লক্ষ্য করি নাই। (রাজ্ঞীর হস্তগ্রহণ ও আলিঙ্গনপূর্ব্বক) রাজ্ঞি, সমাশ্বস্তা হও, সমাশ্বস্তা হও।

বাস—আর্য্যপুত্র আমি নিজের জন্য বলি না। কিন্তু নির্দ্দয়া আমি সাগরিকাকে শৃঙ্খলবদ্ধা করিয়াছি। সে এখানে মরিতেছে। আর্য্যপুত্র, রক্ষা করুন।

রা—কি রাজ্ঞি? সাগরিকা মরিতেছে? আমি যাইতেছি।

বসু—মহারাজ, অকারণে পতঙ্গবৃত্তি করিতেছেন কেন?

কঞ্চু—মহারাজ, বসুভূতি ভালই বলিয়াছেন।

বি—(রাজার বস্ত্রে ধরিয়া) ওহে, সাহস করিও না।

(2) K.—What? Fire in the harem? (Rising hastily) The queen is burned!

Q.—Husband, help, help.

K.—O, here is the queen by my side. I did not see owing to extreme haste. (Holding her hand and clasping) Be calm, queen, be calm.

Q.—Husband, I do not entreat for myself. But *Sagarika* fettered by my cruel self, is dying there. Rescue her, husband.

K.—Well, queen, *Sagarika* is dying? I go.

C. M.—O king, why are you uselessly imitating the fatal folly of the moth and rushing into the fire?

Ch.—The minister speaks rightly, sire.

J.—(Detaining the king in his cloth) Do not dare.

(3) दग्धा=भस्मीभूता। दह्+क्तः+टाप्। दहति। ददाह। धक्ष्यति। अधाक्षीत्। दह्यते। अदाहि। दग्धुम्। दग्ध्वा। अतिसम्भ्रमात्=अतित्वरया। निगड़संयमिता=शृङ्खलबन्धिता। पतङ्गवृत्तिः=शलभक्रिया, अग्निप्रवेशजन्यात् प्राणत्याग इत्यर्थः।

राजा। (उत्तरीयमाकर्षन्) अरे धिङ्मूर्ख सागरिका विपद्यते। किमद्यापि प्राणाः परिरक्ष्यन्ते। (ज्वलनप्रवेशं नाटयित्वा धूमाभिभवं नाटयति।)

विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम्।
विरहहुतभुजाहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि॥

(1) রা—(উত্তরীয় আকর্ষণপূর্ব্বক) ওরে মূর্খ ধিক্! সাগরিকা মরিতেছে, এখনও প্রাণ রাখিব? (অগ্নিতে প্রবেশ ও ধূম দ্বারা অভিভব)—অনল বিরত হও, বিরত হও, নিরন্তর ধূমজনন ত্যাগ কর। কেন শিখামণ্ডল প্রকাশ করিতেছ? কল্পান্তানলশিখ প্রিয়াবিরহানলেও আমি দগ্ধ হই নাই। তুমি আমার কি করিবে?

(2) K.—(Snatching away the cloth) Fie, fool! *Sagarika* is dying? Am I to save my life? (Enters into the fire and appears to be suffocated with smoke.) O fire, stop, stop. Do not produce smoke continually. Why do you shine so with flames! O, I have not been killed by the fire of separation from my sweet heart, the burning of which is like that of the fire destroying the universe. What can you do to me?

(3) वह्ने विरम विरम। धूमानुबन्धं मुञ्च। किमर्चिषां चक्रवालमुच्चैः प्रकटयसि? योऽहं प्रलयदहनभासा प्रियाया विरहहुतभुजा न दग्धः तस्य त्वं किं करोषि?

(4) हं वह्ने! अनल! विरम विरम। निवर्त्तस्व। चापलं हे भगवन् इति दिल्लम्। व्याङ्परिभ्यो रम इति परस्मैपदम्। धूमानुबन्धं सातत्येन धूमजननं मुञ्च त्यज। किं कथमर्चिषां ज्वालानां चक्रवालं मण्डलमुच्चैरत्यन्तं प्रकटयसि? प्रकाशयसि? योऽहं प्रलयदहनस्य कल्पान्ताग्नेः भा इव भा यस्य स तथोक्तः तेन कल्पान्तज्वलनमयूखेन। भाः प्रभावे मयूखे स्त्रीति मेदिनी। प्रियाया विरह एव हुतभुग् वह्निस्तेन विच्छेदाग्निना न दग्धः भस्मीभूतः। तस्य त्वं किं करोषि विदधासि? न किञ्चिदित्यर्थः।

(5) प्रियाविरहदहनमुक्तोऽहं वह्निना न दग्धव्यः। अतस्तस्य धूमोद्गारपरित्यागेन विराम एव श्रेयान्।

(8) विरम्यतां विरम्यतां मुच्यतां धूमानुबन्धः प्रकाश्यते...चक्रवालम्...विरहहुतभुग् यं मां न दग्धवान्...प्रलयदहनभाः...त्वया किं क्रियते?

(9) मालिनीवृत्तम्।

(10) रूपकालङ्कारः। स च काव्यलिङ्गानुप्राणितः।

(11) अत्र नाटकीय आवेगो वर्णितः।

(12) धमाकुलमिति वा पाठः।

वास। कधं मम दुक्खभाइणीए वअणादो एव्वं व्ववसिदं अज्जउत्तेण। ता किं मए ठ्ठिदाए। अहंपि अज्जउत्तं जेव्व अणुगमिस्सं। (क)

विदू। (परिक्रामन्नग्रतो भूत्वा) भोदि, अहंवि पधीवदेसको होमि। (ख)

वसु। कथं प्रविष्ट एव ज्वलनं वत्सराजः। तन्ममापि दृष्टराजपुत्रीविपत्तेर्युक्तमिहैवात्मानमाहुतीकर्तुम्।

कञ्चु। (सास्रम्) हा महाराज, किमिदमकारणमेव भरतकुलं संशयतुलामारोपितम्। अथवा किं प्रलापेन। अहमपि भक्तिसदृशमाचरामि।

(इति सर्वेऽग्निप्रवेशं नाटयन्ति।)

(क) कथं मम दुःखभागिन्या वचनेनैवं व्यवसितमार्य्यपुत्रेण। तत्किं मया स्थितया। अहमप्यार्य्यपुत्रमेवानुगमिष्यामि।

(ख) भवति, अहमपि पथ्युपदेशको भवामि।

(1) वास—দুঃখভাগিনী আমার কথায় আর্য্যপুত্র এইরূপ করিলেন! আমি কেন আর থাকি? আর্য্যপুত্রের অনুগমন করিব।

বি—(অগ্রে গমন পূর্ব্বক) মাননীয়ে, আমিও পথিপ্রদর্শক হইব।

বসু—বৎসরাজ যথার্থই অগ্নিতে প্রবেশ করিলেন! আমি রাজপুত্রীর মরণ দেখিয়াছি, আমারও এস্থলেই নিজকে আহুতি করা কর্ত্তব্য।

কঞ্চু—(অশ্রুর সহিত) হায়, মহারাজ, অকারণে কেন এই ভরতবংশ সন্দেহতুলাতে আরোপিত করিলেন? অথবা প্রলাপের প্রয়োজন নাই। আমিও শ্রদ্ধানুরূপ আচরণ করি। (সকলের অগ্নিতে প্রবেশ)

(2) Q.—Alas, my husband has done this for my unfortunate words. So why shall I stay? I too follow him.

J.—(Going in the front) Lady, I shall also be your guide.

C. M.—Well, the king has really rushed into the fire! I was a spectator of the princess' death. So it is better to sacrifice my life here.

Ch.—(With tears) O my king! Why have you thus needlessly imperiled the *Bharat* race? Or what is the use of raving? I also act in accordance with my regard to them. (All enters into the fire.)

(3) व्यवसितम्=अनुष्ठितम्। पथ्युपदेशक:=पथ: उपदेशक इति षष्ठीसमास:। तृजकाभ्यां कर्त्तरीति (२।२।१५) निषेधस्तु न। याजकादित्वात् (२।२।९)। अथवा, शेषषष्ठ्या: समास:। तथाहि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति। तत्कर्त्ता फलभुग् यत इति भीष्म: कुरूणां भयशोकहर्त्तेति। वस्तुतस्तु जनिकर्तु: प्रकृतिरिति तत्प्रयोजको हेतुश्चेति ज्ञापकादनित्योयं प्रतिषेध:। Under the Rule 2. 2. 15. there can be no षष्ठीसमास with कर्त्रर्थतृच् and अक। But they say, since the सूत्रकार himself has made such समास in जनिकर्तु: and तत्प्रयोजक:, this prohibition is not universal.

ज्वलनम्=अग्निम्। आहुतीकर्त्तुम् (आङ्+हु+क्तिन्=आहुति:। आहुति+च्वि+कृ+तुमुन्। च्वौ चेति दीर्घ:।)=आहुतिरूपेण अर्पयितुम्। जुहोति। जुहवाम्-आस,-बभूव-चकार, जुहाव। होष्यति। अहौषीत्। हूयते। अहावि। हुत्वा। होतुम्। जुहुत्।

संशयतुलाम् = सन्दिग्धावस्थां = विनाशोन्मुखदशाम्। प्रलापेन = निष्फलवाक्येन। भक्तिसदृशं=भक्त्यनुरूपम्।

राजा। (दक्षिणबाहुस्पन्दं निरूप्य) एतदवस्थस्य मम कुत एतत् फलम्। (अग्रतोऽवलोक्य सहर्षोद्वेगम्) कथमासन्नहुतवहा वर्तते सागरिका। तत् त्वरितमेनां संभावयामि।

(तत: प्रविशति निगड़संयता सागरिका।)

साग। (समन्तादवलोक्य) दिट्ठिआ समन्तदो पज्जलिदो हुदवहो अज्ज मे दु:क्खावसाणं करिस्सदि।

राजा। (त्वरितमुपगम्य) अयि प्रिये किमद्यापि मध्यस्थतया वर्त्तसे।

साग। (राजानं दृष्ट्वा आत्मगतम्) कधं अज्जउत्तो ता एदं पेक्खिअ पुणो वि मे जीविदासा संवुत्ता। (प्रकाशम्) भट्टा परित्ताहि परित्ताहि। (क)

(क) दिष्ट्या समन्तात्प्रज्वलितो हुतवहोऽद्य मे दुःखावसानं करिष्यति।

(ख) कथमार्य्यपुत्रः। तदेनं प्रेक्ष्य पुनरपि मे जीविताशा संवृत्ता। भर्तः, परित्रायस्व परित्रायस्व।

(1) रा—(দক্ষিণবাহুস্পন্দনানুভব পূর্ব্বক) এই অবস্থাতে কোথা হইতে এরূপ ফল ঘটিবে? (অগ্রে দর্শন ও হর্ষোদ্বেগের সহিত) এই যে সাগরিকা অগ্নির নিকটে। ইহাকে শীঘ্র আশ্বস্ত করি। (নিগড়সংযতা সাগরিকার প্রবেশ)

সা—(চারিদিকে অবলোকন পূর্ব্বক) সর্ব্বত্র প্রজ্বলিত অনল অদ্য ভাগ্যে আমার দুঃখের অবসান করিবে।

রা—(দ্রুত নিকটে আগমনপূর্ব্বক) অয়ি প্রিয়ে, এখনও যে উদাসীনা?

সা—(রাজাকে দর্শনপূর্ব্বক স্বগত) এই যে আর্য্যপুত্র, ইঁহাকে দেখিয়া আবারও জীবনের আশা হইতেছে। (প্রকাশ্যে) মহারাজ রক্ষা করুন, রক্ষা করুন।

(2) K.—(Feeling a throbbing sensation in the right arm) Whence will come its issue in this situation? (Seeing in front, with pleasure and fear) Here is *Sagarika* near the fire. Just I console her. (Enter *Sagarika* shackled).

S.—(Looking round) Luckily, the fire blazing on all sides, will terminate my sufferings.

K.—(Coming near hastily) Oh my dear, why are you still indifferent?

S.—(Seeing the king, aside) Why, my husband! His sight inspires me with the hope of life. (To the king) Sire, rescue, rescue.

(3) एतत्फलम्=स्त्रीलाभरूपं फलम्। तथाच—दक्षबाहुपरिस्पन्दे पुरुषो लभते स्त्रियमिति। समाश्वयामि=आश्वासयामि। मध्यस्थतया=औदासीन्येन।

राजा। भीरु, अलं भयेन।

मुहूर्तमपि सह्यतां बहुल एष धूमोद्गमो

(अग्रतोऽवलोक्य)

हहा धिगिदमंशुकं ज्वलति ते स्तनात्प्रच्युतम्।

(विलोक्य)

मुहुः स्खलसि किं (निपुणमवलोक्य)

कथं निगड़संयतासि ? द्रुतं

नयामि भवतीमितः प्रियतमेऽवलम्बस्व माम्॥

(1) रा—ভয়শীলে, ভয় নাই। এই পর্য্যাপ্ত ধূম কিয়ৎক্ষণ সহ্য কর। (অগ্রে দর্শন) হায় ধিক্, এই তোমার স্তনচ্যুত বস্ত্র জ্বলিতেছে। (দর্শনপূর্ব্বক) বার বার স্খলিতগতি হইতেছ কেন? (উত্তমরূপে দেখিয়া) সে কি! শৃঙ্খলবদ্ধা হইয়াছ? আমি তোমাকে দ্রুত এখান হইতে লইয়া যাইতেছি। প্রিয়তমে আমাকে ধর।

(2) K.—O frightened one, no need of fear. Just pass, for a short time, through, this profuse mass of smoke. (Looking in the front) Alas! the scarf fallen from your brest, is on fire (Looking) Why do you stumble so often? (Looking carefully) Why, you are shackled! I shall lead you away from this place. Cling to me, my dearest.

(3) एष बहुलः धूमोद्गमः मुहूर्त्तमपि सह्यताम्। हहा धिगिदं ते स्तनात् प्रच्युतम् अंशुकं ज्वलति। किं मुहुः स्खलसि? कथं निगड़संयतासि इतो भवतीं द्रुतं नयामि प्रियतमे मामवलम्बस्व।

(4) एष पुरोवर्त्ती बहुलः पर्य्याप्तः धूमोद्गमः धूमाविर्भावः मुहूर्त्तं क्षणमपि सह्यताम्। हहेति विस्मये निपातः। धिगिति कष्टे। इदं ते तव स्तनात् प्रच्युतं पतितमंशुकं वस्त्रं ज्वलति भस्मीभवति। किं कथं मुहुः पुनः पुनः स्खलसि गतिं विकलयसि? कथं निगड़संयता शृङ्खलबद्धा। निगड़ः पादबन्धन हिञ्जीरः

गच्छलोऽन्तुक इति कृतायुध:। असि भवसि। इत: अस्मात् स्थानात् भवतीं त्वां दूतं नयामि। प्रियतमे मामवलम्बस्व गृहाण।

(5) इदं पर्य्याप्तं धूमोद्रेकं क्षणं सहस्व। एतत्ते स्तनद्युतं वस्त्रं दह्यते। कथमसंबाधं न चलसि? अयि शृङ्खलबद्धासि। मामाश्रय। त्वां लघुस्मात् स्थानात् नयामि।

(8) सहस्व बहलमेतं धूमोद्गमम्। अनेनायकेन ज्वल्यते......प्रच्युतेन। म्वल्यते। निगडसंयतया। नीयते भवती। अहमेवावलम्ब्यै।

(9) पृथ्वीवृत्तम।

(कण्ठे गृहीत्वा निमीलिताक्ष: स्पर्शसुखं नाटयन्।) अहो, क्षणादपगतोऽयं मे संताप:। प्रिये, समाश्वसिहि समाश्वसिहि।

¹ व्यक्तं लग्नोऽपि भवतीं न धक्ष्यति हुताशन:।
यत: संतापमेवायं स्पर्शस्ते हरति प्रिये॥

(अक्षिणी समुन्मील्य निरीक्ष्य च) अहो महदाश्चर्यम्।

(1) (আলিঙ্গন, নেত্রনিমীলন ও স্পর্শসুখানুভব পূর্ব্বক) অহো, আমার সন্তাপ দূর হইল। প্রিয়ে, সমাশ্বস্তা হও, সমাশ্বস্তা হও। অগ্নি স্পর্শ করিয়াও নিশ্চয় তোমাকে দগ্ধ করিবে না। কারণ তোমার স্পর্শই সন্তাপ দূর করে।—(নেত্রোন্মীলন ও দর্শন পূর্ব্বক) অহো অত্যন্ত আশ্চর্য্য!

(2) (Embracing, closing the eyes and feeling pleasure) O, my suffering is off at once. My dear, be calm, be calm. The fire, though reaching, will not surely scorch you, as your touch removes the burning feeling.

(3) प्रिये, हुताशन: लग्नोऽपि भवतीं व्यक्तं न धक्ष्यति। यतोऽयं ते स्पर्श: सन्तापं हरत्येव।

(4) हे प्रिये, हुताशनोऽग्नि: लग्नोऽपि संयुक्तोऽपि भवतीं व्यक्तं निश्चितं न धक्ष्यति भस्मीकरिष्यति। यत: अयं ते स्पर्श: सन्तापं ग्लानिं हरति दूरीकरोत्येव हि।

(5) सन्तापहारिणीं त्वां कथमनलः सन्तापयिष्यति।

(6) लग्नः=लस्ज्+क्तः। लज्जते। ललज्जे। अलज्जिष्ट।

(8) अग्नेन...भवती...धक्ष्यते हुताशनेन। सन्तापः अनेन स्पर्शेन क्रियते।

(9) अनुष्टुप्।

क्वासौ गतो हुतवहस्तदवस्थमेत

दन्तःपुरं (वासवदत्तां दृष्ट्वा) कथमवन्तिनृपात्मजेयम्।

वास। (राज्ञः शरीरं परामृशन्ती सहर्षम्) दिट्ठिआ अक्खद·सरीरो अज्जउत्तो। (क)

राजा। बाभ्रव्य एष।

बाभ्र। विजयतां महाराजः। देव दिष्ट्या वर्द्धसे. पुनरुच्छ्वसिताः स्मः।

राजा। वसुभूतिरयं।

वसु। देव दिष्ट्या वर्द्धसे।

राजा। वयस्यः।

विदू। जेदु जेदु भवं। (ख)

राजा। (विचिन्त्य सवितर्कम्)

स्वप्ने मतिर्भ्रमति किं न्विदमिन्द्रजालम्॥

(क) दिष्ट्या अचतशरीर आर्य्यपुत्रः।

(ख) जयतु जयतु भवान्। (श्लोकस्त्वेवं पाठ्यः—

क्वासौ गतो हुतवहस्तदवस्थमेत·

दन्तःपुरं, कथमवन्तिनृपात्मजेयम्।

बाभ्रव्य एष, वसुभूतिरयं, वयस्यः,

स्वप्ने मतिर्भ्रमति किन्विदमिन्द्रजालम्॥ इति।)

(1) অগ্নি কোথায় গেল ?—অন্তঃপুর পূর্ব্বাবস্থই বটে !—(বাসবদত্তাকে দেখিয়া)

এই যে অবন্তিরাজকন্যা!—এই বাভ্রব্য!—ইনি বসুভূতি—এই বয়স্য!—মনঃ স্বপ্নে ভ্রমণ করিতেছে কি? অথবা ইহা ইন্দ্রজাল।

বাস—(রাজার শরীর স্পর্শ করিয়া সহর্ষে) ভাগ্যে আর্য্যপুত্র অক্ষত শরীরে আছেন।

কঞ্চু—মহারাজের জয়। মহারাজ মঙ্গল হউক। আমরা আবার বাঁচিলাম।

বসু—মহারাজের মঙ্গল হউক।

বি—আপনার জয়।

(2) Where is the fire? The harem is as it was. (Seeing the queen) This is the king of Ujjein's daughter? Here is the Chamberlain,--here the Ceylon minister and this is my friend! Does my mind move in dream? But it is magic.

Q.—(Touching the king's body and joyfully) Luckily my husband is unhurt.

Ch.—O king, may you prosper. We are revived!

C. M.—Prosperity to you, king.

J.—Victory to you.

(3) असौ=हुतवहः क्व गतः। एतदन्तःपुरं तदवस्थम्। कथमियमवन्तिनृपात्मजा? एष बाभ्रव्यः। अयं वसुभूतिः। वयस्यः। मतिः स्वप्ने भ्रमति किम्? इदन्तु इन्द्रजालम्।

(4) असौ हुतवहोऽग्निः क्वः गतः। एतदन्तःपुरं तदवस्थं पूर्वावस्थमेव। कथमियमवन्तिनृपात्मजा? उज्जयिनीराजपुत्री वासवदत्तेत्यर्थः। एष बाभ्रव्यः कञ्चुकी। अयं वसुभूतिः सिंहलेश्वरामात्यः। वयस्यः विदूषकः अयमिति शेषः। मतिर्मनः स्वप्ने भ्रमति चलति किम्? इदं नु भोः इन्द्रजालं माया। उच्छ्वसिताः प्राप्तजीवनाः।

(5) अनलोऽन्तर्हितः। अन्तःपुरञ्च यथावस्थम्। वासवदत्तादीनामत्र स्थितिः अतीव विभ्रमो किम्? नहीदं मायोद्भावनमेव।

हुतवहः=हुतस्य वहः। वहतीति पचाद्यच्। क्व=किम्+अत्। किमोऽदिति (५।३।१२) बलपवादः अत्प्रत्ययः।

(8) अमुना गतेन (गतं वा) हुतवहेन। एतेन तदवस्थेन अन्तःपुरेण।...नृपात्मजया अनया। बाभ्रव्येण एतेन। अनेन वसुभूतिना। वयस्येन। मत्या भ्रम्यते। अनेन इन्द्रजालेन।

(9) वसन्ततिलकं वृत्तम्।

विदू। भो मा संदेहं करेहि, इन्द्रजालं क्खु एदं। भणिदं तेण दासीए उत्तेण इन्दजालिएण, जह अवस्सं एव्व देवेण मह एक्को खेड़णओ दट्टव्वो त्ति, ता तं ज्जेव्व एदं। (क)

राजा। देवि, त्वद्वचनादियमस्माभिरिहानीता सागरिका।

वास। (विहस्य) अज्जउत्त, जाणिदं दे सव्वम्। (ख)

वसु। (सागरिकां दृष्ट्वापवार्य) बाभ्रव्य, सुसदृशीयं राजपुत्र्या।

बाभ्र। अमात्य, ममाप्येतदेव मनसि वर्तते।

वसु। (प्रकाशं राजानमुद्दिश्य) देव, कुत इयं कन्यका।

राजा। देवी जानाति।

(क) भो मा सन्देहं कुरु, इन्द्रजालं खलु इदम्। भणितं तेन दास्याः पुत्रेण ऐन्द्रजालिकेन, यथा अवश्यमेव देवेन मम एकं खेलनकं द्रष्टव्यमिति, तत् तदेवेदम्।

(ख) आर्यपुत्र, ज्ञातं ते सर्वम्।

(1) বি—ওহে সন্দেহ করিও না। ইহা ইন্দ্রজালই বটে। সেই দাসীর বেটা ঐন্দ্রজালিক বলিয়াছিল, অবশ্য মহারাজ কর্তৃক আমার আর একটা খেলা দেখিতে হইবে। ইহা তাই।

রা—রাজ্ঞি, তোমার কথায় সাগরিকা আনীতা হইয়াছে।

বাস—(হাস্যপূর্ব্বক) আর্য্যপুত্র সকলই জানিয়াছেন।

বসু—(সাগরিকাকে দেখিয়া জনান্তিকে) বাভ্রব্য, ইনি রাজপুত্রীর সুসদৃশী।

কঞ্চু—অমাত্য, আমিও তাহাই মনে করিতেছি।

বসু—(রাজার প্রতি) মহারাজ, এই কন্যা কোথা হইতে পাইয়াছেন?

রা—রাজ্ঞী জানে।

(2) J.—Well, do not doubt. This is magic. It was said by that bastardly magician that the king should see another play of his. This is it.

K.—Queen, *Sagarika* has been brought here under your words.

Q.—(Laughing) You know all, husband.

C. M.—(Seeing *Sagarika*, aside to the chamberlain) Chamberlain, she is very like the princess !

Ch.—I too think so, minister.

C. M.—(To the king) O king, whence this girl ?

K.—The queen knows.

(3) राजपुत्र्या=तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति तृतीया। पक्षे षष्ठी। अवाक्ष्निर्नोऽननुसन्धानं नाम रसदोषः मम्मटविश्वनाथादिभिरुक्तः। बाभ्रव्याग-मने सागरिकायाः विस्मृतिः।

वसु। देवि, कुतः पुनरियं कन्यका।

वास। अमच्च। एसा क्खु सामरदो पाविदेत्ति भणिअ अमच्चजोअन्धराअणेन मम हत्थे णिक्खित्ता। अदो एव्व साअरिअत्ति सद्दाईअदि। (क)

राजा। (स्वगतम्) कथं यौगन्धरायणेन न्यस्ता। कथ-मसौ ममानिवेद्य किंचित्करिष्यति।

वसु। (अपवार्य) बाभ्रव्य, यथा सुसदृशी वसन्तकस्य कण्ठे रत्नमाला, अस्या अपि सागरात्प्राप्तिः, तथा व्यक्तं सिंहलेश्वरस्य दुहिता रत्नावलीयम्। (इत्युपसृत्य प्रकाशम्।) आयुष्मति रत्नावलि राजपुत्रि, त्वमीदृशीमवस्थां गतासि।

(क) अमात्य, एषा खलु सागरतः प्राप्तेति भणित्वामात्ययौगन्धरायणेन मम हस्ते निक्षिप्ता। अतएव सागरिकेति शब्द्यते।

(1) বসু—দেবি, এই কন্যা কোথা হইতে ?

বাস—অমাত্য, সাগর হইতে প্রাপ্তা বলিয়া অমাত্য যৌগন্ধরায়ণ ইহাকে আমার হস্তে নিক্ষেপ করিয়াছেন। অতএব ইহাকে সাগরিকা বলা হয়।

রা—(স্বগত) যৌগন্ধরায়ণ কর্ত্তৃক ন্যস্তা ? আমাকে না বলিয়া সে কার্য্য করে ?

বসু—(জনান্তিকে) বাভ্রব্য, বসন্তকের কণ্ঠে সুসদৃশী রত্নমালা, ইঁহার সাগর হইতে প্রাপ্তি ; অতএব নিশ্চিত ইনি সিংহলেশ্বরকন্যা রত্নাবলী। (নিকটে আগমন ও প্রকাশে) আয়ুষ্মতি রাজকন্যে রত্নাবলি, আপনি এইরূপ অবস্থা প্রাপ্ত হইয়াছেন !

(2) C. M.—O Queen, whence this girl?

Q.—She was given to me by our minister saying that she was rescued from the sea. So we call her the maid from the sea.

K.—(Aside) Well, given by our minister ! Does he act without my knowledge ?

C. M.—(Aside) Chamberlain, the necklace with the jester is similar, she too is got from the sea. So clearly she is *Ratnabali*, the king of Ceylon's daughter. (Coming near and to *Sagarika*) O blessed princess *Ratnabali*, are you in this state !

(3) शब्दाते = कथ्यते । शब्द + णिच् + कर्मणि लट् त । तत् करोतीति णिज-पीष्यत इति न्यासकारः । ननु शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इति क्यङ् । तव हि कर्मणि शब्दाय्यते इति स्यात । कर्त्तरि शब्दयति । अशशब्दत् ।

साग। (वसुभूतिं दृष्ट्वा सास्रम्) कधं अमच्चो वसुभूदी। (क)

वसु। हा हतोऽस्मि मन्दभाग्यः। (इति भूमौ पतति)

साग। हा हदह्मि मन्दभाइणी। हा ताद, हा अम्ब, कहिं सि। देहि मे पडिवअणम्। (इत्यात्मानं पातयन्ती मोहमुपगता।) (ख)

वास। (ससम्भ्रमम्) कच्चुइ इयं सा मम बहिणिआ रअणावली। (ग)

कञ्चु। देवि इयमेव सा।

वास। (रत्नावलीमालिङ्ग्य) बहिणि समस्सस समस्सस। (घ)

(ক) কথমমাত্যো বসুভূতিঃ।

(খ) হা হতাস্মি মন্দভাগিনী। হা তাত, হা অম্ব, ক্বাসি। দেহি মে প্রতিবচনম্।

(গ) কঞ্চুকিন্ ইয়ং সা মম ভগিনী রত্নাবলী।

(ঘ) ভগিনি সমাশ্বসিহি সমাশ্বসিহি।

(1) সা—(বসুভূতিকে দেখিয়া অশ্রুর সহিত) এই যে অমাত্য বসুভূতি।

বসু—হায়, মন্দভাগ্য আমি হত হইয়াছি। (ভূমিতে পতন।)

সা—হায়, মন্দভাগিনী আমি হতা হইয়াছি। হায় পিতঃ, হা মাতঃ, তোমরা কোথায়? উত্তর দাও (পতিতা ও মোহপ্রাপ্তা)।

বাস—(সবেগে) কঞ্চুকিন্, এই আমার সেই ভগিনী রত্নাবলী?

কঞ্চু—আজ্ঞে হাঁ।

বাস—(রত্নাবলীকে আলিঙ্গন পূর্ব্বক) ভগিনি, সমাশ্বস্তা হও, সমাশ্বস্তা হও।

(2) Sa.—(Seeing the minister, with tears) Why, this is the minister!

C. M.—Alas, I am undone, unfortunate as I am. (Falls down)

Sa.—Alas, I am undone, O father, O mother, where are you? Respond to me. (Falls down and swoons.)

Q.—Chamberlain, is this my cousin, *Ratnabali*?

Ch.—Yes.

Q.—(Embracing *Ratnabali*) Cousin, be calm, calm.

(3) সা=শ্রুতপূর্ব্বা।

राजा। कथमुदात्तवंशप्रभवस्य सिंहलेश्वरस्य विक्रमबाहोरात्मजेयम्।

विदू। (रत्नमालां दृष्ट्वा स्वगतम्) पढमं एव्व जाणिदं मए, ण हु सामण्णजणस्स ईदिसो परिच्छदो होदि त्ति। (क)

वसु। (उत्थाय) राजपुत्रि समाश्वसिहि समाश्वसिहि, नन्वियं ज्यायसी ते भगिनी दुःखमास्ते, तत्परिष्वजस्वैनाम्।

रत्नावली। (समाश्वस्य राजानं तिर्य्यगवलोक्य स्वगतम्)

किदावराधा क्खु अहं देवीए ण सक्कणोमि मुहं दंसिदुं (इत्यधोमुखी तिष्ठति)। (ख)

(क) प्रथममेव ज्ञातं मया न खलु सामान्यजनस्येदृश: परिच्छदो भवतीति।

(ख) कृतापराधा खल्वहम्। देव्या न शक्नोमि मुखं दर्शयितुम्।

(1) রা—কি, ইনি মহাকুলসম্ভূত সিংহলরাজ বিক্রমবাহুর কন্যা!

বি—(রত্নমালা দর্শনপূর্ব্বক স্বগত) আমি প্রথমেই বুঝিয়াছি, ঈদৃশ অলঙ্কার সামান্য জনের হইতে পারে না।

বসু—(উঠিয়া) রাজপুত্রি, সমাশ্বস্তা হও। এই তোমার বড় ভগিনী দুঃখে আছেন; অতএব ইঁহাকে আলিঙ্গন কর।

রত্না—(সমাশ্বস্তা হইয়া, রাজাকে অপাঙ্গে দর্শনপূর্ব্বক স্বগত) আমি দেবীর নিকট কৃতাপরাধা। মুখ দেখাইতে পারিতেছি না (অধোমুখী)।

(2) K.—Well, she is a daughter of *Bikramabahu*, the king of Ceylon, who is of noble birth !

J.—(Looking at the necklace, aside) I knew it first. This ornament cannot be the property of a common person.

C. M.—(Rising) Princess, be comforted. This your elder cousin is in grief Embrace her

Ratna.—(Being calm, looking at the king askance, aside) I have offended the queen and am ashamed to show her my face. (Hangs down her head)

(3) उदात्तवंशप्रभवस्य=महाकुलोद्भवस्य। उदात्तो दातृमहतो हृद्येऽपि स्वरभिद्यपीति हेमचन्द्र:। ज्यायसी=वर्षीयसी=अधिकवयस्का। वृद्ध+ईयसुन्+ङीप्। दु:खम्=यथा तथेति क्रियाविशेषणम्।

वास। (सास्रं बाहू प्रसार्य) एहि अदिणिट्ठुरे पिअवहिणि, दाणिं एहि। सिणेहं दंसेहि। (इति कण्ठे गृह्णाति। रत्नावली स्खलितं नाटयति। अपवार्य) अज्जउत्त, लज्जेमि अहं इमिणा अत्तणो णिसंसत्तणेण। ता लहुं अवणेहि से एदं बन्धणं। (क)

राजा। (सपरितोषम्) यथाह देवी। (इति सागरिकाया बन्धनमपनयति।)

वास। अज्जउत्त, अमच्चजोगंधरायणेन एत्तिअं कालं दुज्जणीकिदह्मि। जेण जाणन्तेणवि ण मे णिवेदिदं। (ख)

(क) एहि अतिनिष्ठुरे प्रियभगिनि इदानीमेहि। स्नेहं दर्शय। आर्य्यपुत्र लज्जे अहमनेनात्मनो नृशंसत्वेन। तत्त्वरं अपनयास्या इदं बन्धनम्।

(ख) आर्य्यपुत्र अमात्ययौगन्धरायणेन एतावन्तं कालं दुर्ज्जनीकृतास्मि, येन जानतापि न मे निवेदितम्।

(1) বাস—(অশ্রুর সহিত বাহু প্রসারণ পূর্ব্বক) এস, অতিনিষ্ঠুর প্রিয়ভগিনি, এখন এস ; স্নেহ দেখাও। (কণ্ঠে গ্রহণ—রত্নাবলীর স্খলন—জনান্তিকে) আর্য্যপুত্র, আমার এই নৃশংসতাতে লজ্জা পাইতেছি। ইহার বন্ধন শীঘ্র মোচন করুন।

রা—(পরিতোষের সহিত) মহিষীর যেরূপ বাক্য। (সাগরিকার বন্ধন মোচন)

বাস—আর্য্যপুত্র, অমাত্য যৌগন্ধরায়ণ জানিয়াও আমাকে বলে নাই। এতকাল তৎকর্ত্তৃকই দুর্জ্জনরূপে পরিণতা হইয়াছি।

(2) Q.—(With tears and extending her arms) O very cruel cousin, come now and show your love. Embraces—*Sagarika* stumbles—aside to the king) Husband, I am ashamed of this cruelty of mine. • Please undo her fetters soon.

K.—(Joyfully) As the queen says. (Removes her shackles.)

Q.—Husband, I was not informed by the minister who had known all these. So he made me a wicked person so long.

(3) नृशंसत्वेन = क्रूराचरणेन। दुर्ज्जनीकृता = खलीकृता = रत्नावल्यां निष्ठुराचारेत्युपपादिता।

(ततः प्रविशति यौगन्धरायणः।)

यौग—

देव्या मद्वचनात्तथाभ्युपगतः पत्युर्वियोगो महान्
सा देवान्यकलत्रसंघटनया दुःखं परं प्रापिता।

तस्याः प्रीतिमयं करिष्यति जगत्स्वामित्वलाभः प्रभोः
सत्यं दर्शयितुं तथापि वदनं शक्नोमि नो लज्जया॥

(যৌগন্ধরায়ণের প্রবেশ)

যৌগ—আমার বাক্যে দেবীর অত্যন্ত ভর্তৃবিচ্ছেদ ও পতির অন্যকলত্রসংঘটন দ্বারা দুঃখ ঘটিয়াছে। নৃপ সার্ব্বভৌম হইলে তাঁহার প্রীতি হইবে সত্য, কিন্তু তথাপি আমি লজ্জাতে মুখ দেখাইতে পারিতেছি না।

ENTER THE MINISTER.

(2) Mi.—For my words, the queen has got a great separation from her husband. She has also been aggrieved as the king has taken another wife through me. Though the universal empire of her husband will please her, I am ashamed to show my face.

(3) तथा मद्वचनाद्देव्या महान् पत्युर्वियोगः अभ्युपगतः। सा देवान्यकलत्रसंघटनया मया दुःखं प्रापिता। प्रभोरयं जगत्स्वामित्वलाभः तस्याः प्रीतिं सत्यं करिष्यति तथापि लज्जया वदनं दर्शयितुं न शक्नोमि।

(4) तथा तत्प्रकारेण पूर्वं यथा कथितं तथेत्यर्थः मद्वचनात् मम वाक्यात् देव्या राज्ञ्या महान् गुरुः पत्युर्भर्त्तुः वियोगः विच्छेदः अभ्युपगतः लब्धः। वनितान्तरसद्भावात् ऊढ़पूर्वानादरेणेत्यर्थः। देवस्य नृपस्य अन्यत् कलत्रं भार्य्या। कलत्रं श्रोणिभार्य्ययोरित्यमरः। तस्य सघटनया संयोजनया। सा वासवदत्ता मया दुःखं कष्टं प्रापिता गमिता। प्रभोः नृपस्यायं जगत्स्वामित्वलाभः सार्वभौमत्वफलं। लाभोधिकं फलमित्यमरः। तस्या देव्याः प्रीतिं सन्तोषं सत्यं ध्रुवं करिष्यति जनयिष्यति तथापि लज्जया व्रीडया वदनं मुखं दर्शयितुं न शक्नोमि पारयामि।

(5) देव्याः पतिविच्छेदं घटयता सपत्नीयोजनेन च दुःखं ददता मया तस्या भर्त्तुः सार्व्वभौमत्वे सम्पादितेपि तस्यै मुखप्रदर्शनं कर्त्तुं न शक्यते।

(6) सा— दुहादिन्यादि-बुद्धि-भक्षार्थ-शब्दकर्म्मकव्यतिरिक्तानां गत्यर्थादीनां धातूनां प्रयोज्यकर्म्मणि क्तादयः स्युः। तथाहि—

"गौणे कर्म्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्म्मणाञ्च निजेच्छया॥

प्रयोज्यकर्मण्यन्येषां ण्यन्तानामिह निश्चितः।
सकृत्यक्तखलर्थानां प्रयोगो भाष्यपारगैः॥"

इति शब्दकौस्तुभे भट्टोजिः।

जगत्स्वामित्वलाभः=जगत्स्वामित्वस्य लाभः फलं। ननु प्राप्तिः। शेषषष्ठ्या समासः। प्राप्त्यर्थेतु कर्मणि चेति उभयप्राप्तित्वात् समास एव न घटते (२।२।१४)। पयःपानं भुजङ्गानां केवलं विषवर्द्धनमित्यादौ कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखमिति (३।३।११६) कर्मण्युपपदे भावे ल्युटि नित्यसमासः। अतएवाह श्रीपतिः "अर्थेहा दरिद्राणां, पायसभोजिका विप्राणां, चौरपिपासा कुमाराणामिति। नेयं नियमार्था षष्ठीति समासः स्यादेव।" इति। अत्रार्थमीहेति शेषषष्ठ्या समासः। ततः दरिद्राणामिति सम्बन्धः। तथा अत्रापि। ननु उभयप्राप्तौ कर्मणीति नियमितया षष्ठ्या। शक्नोति=शक्+लट् तिप्। शशाक। शक्ष्यति। अशकत्। अशाकि। शक्तुम्। शक्ता। शक्तम्। शक्तवत्।' अयं दिवादावुभयपदी। अयं पटः प्रावरितुं न शक्यते इति मृच्छकटिके।

(7) अभ्युपगतः=स्वीकृत इत्यर्थस्तु ग्रन्थान्तरसंवादाप्यत्र न समीचीनः प्रतिभाति।

(8) देवी अभ्युपगतवती वियोगं महान्तम्। तां दुःखम् अहं प्रापितवान्। प्रीतिरनेन करिष्यते (कारिष्यते वा)...लाभेन शक्यते।

(9) शार्दूलविक्रीडितं वृत्तम्।

अथवा किं क्रियते। ईदृशमत्यन्तमाननीयेष्वपि निरनुरोधवृत्ति स्वामिभक्तिव्रतम्। (निरूप्य) अयं देवो महाराजः। यावदुपसर्पामि। (उपसृत्य) जयतु जयतु देवः। (पादयोर्निपत्य) देव, क्षम्यतां यन्मयानिवेद्य कृतम्।

राजा। कथय किमनिवेद्य कृतम्।

यौग। करोत्वासनपरिग्रहं देवः। सर्वं विज्ञापयामि। (सर्वे राज्ञा सह यथास्थानमुपविशन्ति) देव, श्रूयताम्। येयं

सिंहलेश्वरस्य दुहिता सा सिद्धेनादिष्टा यथा योऽस्याः पाणिग्रहणं करिष्यति स सार्वभौमो राजा भविष्यति। ततस्तत्प्रत्ययादस्माभिः स्वामिनोऽर्थे बहुशः प्रार्थ्यमानेनापि सिंहलेश्वरेण देव्या वासवदत्तायाश्चित्तखेदं परिहरता यदा न दत्ता—

राजा। तदा किम्।

यौग। (सलज्जम्) तदा लावणकेन वह्निना देवी दग्धेति प्रसिद्धिमुत्पाद्य तदन्तिकं बाभ्रव्यः प्रहितः।

(১) অথবা কি করা যায়? স্বামিভক্তিতে অত্যন্ত মাননীয় জনের সম্বন্ধেও অপরাধাদিলঙ্ঘনমূলক। (নিরূপণ পূর্ব্বক) এই মহারাজ। নিকটে যাই। (আগমন পূর্ব্বক) মহারাজের জয়। (পাদে পতন) মহারাজ, যাহা না জানাইয়া করিয়াছি, ক্ষমা করুন।

র।—কি না জানাইয়া করিয়াছ, বল।

যৌগ—মহারাজ, আসন গ্রহণ করুন। সকল বলিতেছি। (সকলের যথাস্থানে উপবেশন) মহারাজ, শুনুন,—এই যে সিংহলরাজকন্যা ইনি সিদ্ধ কর্ত্তৃক আদিষ্টা হইয়াছিলেন যে ইঁহার স্বামী সম্রাট্ হইবেন। তদ্বিশ্বাসে আপনার জন্য পুনঃ পুনঃ প্রার্থ্যমান হইয়াও, দেবী বাসবদত্তার চিত্তখেদপরিহারকামনায় সিংহলরাজকর্ত্তৃক যখন ইনি দত্তা হইলেন না—

রা—তার পর?

যৌগ—(লজ্জার সহিত) তখন লাবণকপ্রদেশে প্রজ্বলিত অগ্নিতে বাসবদত্তা দগ্ধা হইয়াছেন ঘোষণা করিয়া তাঁহার সমীপে বাভ্রব্যকে প্রেরণ করি।

(2) Or what else can be done? No heed can be paid to any consideration whatever, in the avowed devotion to one's master. (Finding) This is the king, I go to him. (Coming near) Victory to the king. (Kneeling) Pardon me, O king, for what has been done without informing you.

K.—Tell me what has been done?

Mi.—Please to take your seat. I shall describe all. (All sit)

O king, listen. A sage predicted of this daughter of the king of Ceylon that her husband shall be an emperor. Believing in that, I asked her in marriage for you, repeatedly. But Ceylon, desirous of avoiding the queen's jealousy, did not betroth her to you.

K.—What then?

Mi.—(Bashfully) I then circulated a report that the queen was burnt in the fire at *Labanaka* and sent the Chamberlain again to Ceylon.

(3) अत्यन्तमाननीयेषु=अत्यन्तानां माननीया स्त्र्विति षष्ठीसमास:। कर्म्मधारये तु कृत्यतुल्याख्या अजात्येति (२।१।६८) माननीयशब्दस्य पूर्व्वनिपात: स्यात्। तथ्य सत्कृत्यशालिन इति भट्टिप्रयोगेऽपि सतां कृत्यमिति षष्ठीसमास एव। यत्तु नागेशेनाव सन्महदित्यादिना बाहुलकात् पक्षान्तरे समास उनुयक्तं तत् पदमञ्जरीशब्दकौस्तुभादिमहाग्रन्थविरोधादपेत्यम्। एवमेव परमपूज्यपरमाराध्यादिषु।

निरनुरोधवृत्ति=निर्नास्ति अनुरोध: यस्यां सा च वृत्तिर्व्यवहारो यस्मिन्निति तत =अनुरोधादिलङ्घनमूलकम्।

प्रार्थ्यमानेन=गौणे कर्मणि दुह्यादेरिति गौणकर्म्मण: अभिहितत्वम्। प्र + अर्थ + णिच् + यक् + शानच्। अर्थयते। आर्त्थयत। आर्थ्यते। आर्थि। चुरादिरदन्त:। आत्मनेपदी। प्रसिद्धिं=घोषणाम्=जनरवम्।

राजा। यौगन्धरायण, तत: परं श्रुतं मया। अथेयं देवीहस्ते किमित्यनुचिन्त्य स्थापिता।

विदू। भो, अणाचक्खिदोवि एदस्स अभिप्पाओ मए जाणिदो एव्व। जह अन्तेउरगदा अन्तेउरगदस्स सुहेण णअणपधं गमिस्सदित्ति। (क)

राजा। यौगन्धरायण, गृहीतस्तेऽभिप्रायो वसन्तकेन।

यौग। यदाज्ञापयति देव:।

राजा। ऐन्द्रजालिकवृत्तान्तोऽपि मन्ये त्वत्प्रयोग एव।

यौग। अन्यथान्त:पुरे बद्धाया अस्या: कुतो देवेन दर्शनम्। अदृष्टायाश्च वसुभूतिना कुत: परिज्ञानम्। (विहस्य) परिज्ञातायाश्च भगिन्या: संप्रति यथा करणीयं तत्र देवी प्रमाणम्।

(ख) भी: अनाख्यातोऽपि एतस्याभिप्रायो मया ज्ञात एव, यथा अन्त:पुरगता अन्त:पुरगतस्य भवित नयनपथं गमिष्यतीति।

(1) রা—যৌগন্ধরায়ণ, অবশিষ্ট আমি শুনিয়াছি। ইহাকে দেবীর হস্তে দেওয়া হইয়াছিল কেন?

বি—ওহে, না বলিলেও তাহা বুঝা যায়। অন্তঃপুরস্থিতা অনায়াসেই অন্তঃপুরগত তোমার নয়নপথে পতিতা হইবে।

রা—যৌগন্ধরায়ণ - বসন্তকই তোমার উদ্দেশ্য বুঝিয়াছে?

যৌগ—আজ্ঞে হাঁ।

রা—ঐন্দ্রজালিক ব্যাপারও বোধ হয় তোমারই ক্রিয়া?

যৌগ—অন্যথা অন্তঃপুরবদ্ধা ইঁহাকে আপনি দেখিতেন কি? না দেখিলে বসুভূতিই বা কি প্রকারে পরিচয় করিত? (হাস্যপূর্ব্বক) পরিচিতা ভগিনীর সম্বন্ধে এখন কি কর্ত্তব্য রাজ্ঞীই তাহার কর্ত্রী।

(2) K.—Minister, I have heard the rest. But why did you put her into the queen's hands?

J.—Well, it is understood though not expressed. Being in the harem, she will easily fall in your view as you move there.

K.—Minister, I think the jester understands your purpose.

Mi.—Yes, your majesty.

K.—I think also the matter with the magician is of your doing?

Mi.—Otherwise how could your majesty again see her confined in the harem and the Ceylon minister recognise her? (Laughing) Now that her cousin is known, it lies with the queen to do whatever is to be done with her.

(3) तत्र देवी प्रमाणम्=तद्विषये राज्ञी एव कर्त्री। उद्देश्यविधेयभावेनान्वय:।

वास। (सविस्मयम्) अज्ज अमच्च, फुडं एव्व किं ण भणासि। अज्जउत्ते पडिवादेहि रअनावलीत्ति। (क)

विदू। भोदि, सुट्ठु तुए जाणिओ एत्तिओ अमच्चस्स अभिप्पाओ। (ख)

वास। (हस्तौ प्रसार्य्य) एहि रअणावलि, एहि। किं पि दाणिं मे बहिणिआअणुरूवं होदु। (इति रत्नावलीं स्वकीयैराभरणैरलंकृत्य हस्ते गृहीत्वा राजानमुपसृत्य) देव पडिच्छ एदं रअणावलीं। (ग)

राजा। (सहर्षं हस्तौ प्रसार्य्य) को देव्याः प्रसादो न बहु मन्यते। (इति सागरिकां गृह्णाति।)

वास। अज्जउत्त, दूरे क्खु एदाए णातिउलम्। ता तह करेदु जह बन्धुजणं ण सुमरेदि। (इति समर्पयति।) (घ)

(क) आर्य्य अमात्य, स्फुटमेव किं न भणसि आर्य्यपुत्रे प्रतिपादय रत्नावलीमिति।

(ख) भवति, सुष्ठु त्वया ज्ञात एतावानमात्यस्याभिप्रायः।

(ग) एहि रत्नावलि, एहि। किमपीदानीं मे भगिन्यनुरूपं भवतु। देव, प्रतीच्छैतां रत्नावलीम्।

(घ) आर्यपुत्र, दूरे खलु तस्या ज्ञातिकुलम्। तत्तथा कुरु यथा बन्धुजनं न स्मरति।

(1) वास—(সস্মিতে) মন্ত্রিমহাশয়, পরিষ্কাররূপে বলিলেই হয় রত্নাবলীকে আর্য্যপুত্রে সমর্পণ কর।

বি—রাজ্ঞি, আপনি বেশ বুঝেছেন। ইহাই অমাত্যের অভিপ্রায়।

বাস—(হস্তপ্রসারণ পূর্ব্বক) এস, রত্নাবলি, এস। এখন আমার ভগিনীর অনুরূপ কিছু হউক। (স্বকীয়াভরণে রত্নাবলীকে অলঙ্কৃতা করিয়া রাজার নিকট গমনপূর্ব্বক) মহারাজ, এই রত্নাবলীকে গ্রহণ করুন।

রা—(সহর্ষে হস্তপ্রসারণ পূর্ব্বক) কে দেবীর অনুগ্রহকে অত্যন্ত আদর না করে। (সাগরিকাকে গ্রহণ)

বাস—আর্য্যপুত্র, ইহার পিতৃকুল দূরে। যাহাতে বন্ধুজনকে স্মরণ না করে তাহা করিবেন। (সাগরিকাকে সমর্পণ)

(2) Q.—(Smiling) O respected minister, why do you not plainly say "Marry *Ratnabali* to your husband ?"

J.—Lady, you have accurately guessed. That is the minister's design.

Q.—(Extending her arms) Come, come, *Ratnabali*, let there be now something becoming my cousin. (Taking and adorning her with her own ornaments, to the king.) O king, accept this *Ratnabali*.

K.—(Joyfully extending his arms) Who does not think much of the queen's favour. (Takes *Sagarika*.)

Q.—Husband, her paternal friends are at a distance. Please to treat her so that she may not have cause to remember them. (Offers *Sagarika*.)

(3) स्फुटं = व्यक्तम। प्रतिपादय = समर्पय। प्रतीच्छ = गृहाण। किमपि इदानीम् &c. = पूर्व्वं निगडबन्धनादिकं यत् कृतं तद्दीर्घाया सपत्न्यनुरूपमासीत्। अधुना यत् करिष्यते तद्भगिन्यनुरूपं भविष्यतीत्यर्थः।

राजा। यथाज्ञापयति देवी।

विदू। (सहर्षं नृत्यति) ही ही भो जअदु जअदु भवं, पुहवी क्खु दाणिं हत्थगदा पिअवअस्सस्स। (क)

वसु। राजपुत्त्रि वासवदत्तां प्रणमिनाच्चय।

बाभ्र। देवि, स्थाने देवीशब्दमुद्वहसि। (वासवदत्ता रत्नावलीमालिङ्ग्य देवीशब्देन प्रसादं करोति।)—इदानीं सफलपरिश्रमोऽस्मि संवृत्तः।

यौग। देव, तदुच्यतां किं ते भूयः प्रियमुपकरोमि।

(ক) জয়তি জয়তি ভবান্, পৃথিবী খল্বিদানীং হস্তগতা প্রিয়বয়স্যস্য।

(1) রা - রাজ্ঞীর যেরূপ বাক্য।

বি—(সহর্ষে নৃত্য) হী হী ভোঃ ভোঃ। আপনার জয়। এখন পৃথিবী বন্ধুর হস্তগতা হইল।

বসু—রাজপুত্রি, বাসবদত্তাকে প্রণাম দ্বারা অর্চনা কর। (রত্নাবলীর তথা করণ।)

কঞ্চু—দেবি, উপযুক্ত রূপেই দেবী নাম ধারণ করিয়াছেন (বাসবদত্তা কর্তৃক রত্নাবলীকে আলিঙ্গনপূর্ব্বক দেবী সম্বোধনে অনুগ্রহ প্রকাশ) এখন সফলপরিশ্রম হইলাম।

যৌগ—মহারাজ, বলুন এখন আপনার আর কি প্রিয় করিব ?

(2) K —As th · queen directs—

V.—(Joyfully dancing) Ho, ho, victory to you. The whole earth is now under the power of my dear friend.

C. M.—Princess, bow and pay your respect to the queen. (*Ratnavali* bows)

Ch.—Queen, you deservedly bear your title. (The queen embracing *Ratnabali* shows favour in calling her a queen) Now I have obtained success.

Mi.—O king, tell me what more good shall I do to you ?

(3) স্থানে=যুক্তম্। যুক্তে দ্বে সাম্প্রতং স্থানে ইত্যমরঃ। অব্যয়মেতৎ। উদ্বহসি =ধারয়সি। ভূয়ঃ=বহু+ঈয়সুন্। বহোর্লোপো ভূ চ বহোরিতি (৬।৪।১৫৮) প্রত্যয়স্যাদির্লোপঃ ভ্বাদেশশ্চ।

राजा। किमतःपरमपि प्रियमस्ति। यतः—

नीतो विक्रमबाहुरात्मसमतां, प्राप्तेयमुर्व्वीतले

सारं सागरिका ससागरमहीप्राप्त्येकहेतुः प्रिया।

देवी प्रीतिमुपागता च भगिनीलाभाज्जिताः कोशलाः

किं नास्ति त्वयि सत्यमात्यवृषभे यस्मै करोमि स्पृहाम्॥

(1) রা—ইহার পরও কি প্রিয় হইতে পারে ? যে হেতু—বিক্রমবাহুকে আত্মতুল্য করা হইল। পৃথিবীর ধন স্বরূপ ও সসাগরমহীলাভের একমাত্রহেতু সাগরিকাকে পাইলাম। মহিষীও ভগিনীলাভে সন্তুষ্টা। কোশল জিত হইয়াছে। অতএব অমাত্য-শ্রেষ্ঠ তুমি থাকাতে আমার কি না আছে যে অন্য বস্তুতে স্পৃহা করিব ?

(2) K.—Is there anything more gratifying? Since,—The king of Ceylon is made a relation, the beloved *Sagarika* the wealth of this earth and the cause of her possession with the seas, is obtained. My queen is glad for recovering her cousin. *Kosal* is conquered. So what is wanting that I shall desire when I have a great minister like yourself?

(3) विक्रमबाहुरात्मसमतां नीतः। इयमुर्व्वीतलं सारं ससागरमहीप्राप्तिरेक-हेतुः प्रिया सागरिका प्राप्ता। देवी च भगिनीलाभात् प्रीतिमुपागता। कोशला जिताः। अमात्यवृषभ त्वयि सति किं नास्ति यस्मै स्पृहां करोमि।

(4) विक्रमबाहुः सिंहलराजः आत्मसमतां विवाहसम्बन्धस्थापनेन निजतुल्यतां नीतः प्रापितः। इयमुर्व्वीतलं पृथिव्याः सारं धनं धनतुल्येत्यर्थः। सारो मज्जास्थि-रांशयोः। बलं श्रेष्ठे च सारन्तु द्रविणन्याय्यवारिष्विति हेमचन्द्रः। सागरेण सह वर्त्तमानायाः मह्याः प्राप्तेरेकः श्रेष्ठः हेतुः कारणम्। ससमुद्रपृथ्वीलाभप्रधानकारण-स्वरूपेत्यर्थः। प्रिया सागरिका प्राप्ता लब्धा। च किञ्च देवी महिषी भगिनीलाभात् प्रीतिं सन्तोषमुपागता प्राप्ता। कोशला जनपदाश्च जिताः पराभूताः। अमात्यो वृषभ इवेत्युपमिततत्पुरुषः तस्मिन् मन्त्रिश्रेष्ठे त्वयि सति विद्यमाने किं न अस्ति विद्यते यस्मै स्पृहामभिलाषं करोमि। न किञ्चिन्मम स्पृहार्हमस्तीत्यर्थः। स्पृहेरीप्सित इति (१।४।३६) चतुर्थी।

(5) विक्रमबाहोः समतया, भूधनलाभस्वरूपायाः सागरिकायाश्च लाभेन राज्ञीसन्तोषेण कोशलजयेन च मया सर्व्वमेव लब्धम्। त्वयि मन्त्रिश्रेष्ठे विद्यमाने न किञ्चिदपि ममानधिगतं वर्त्तते यस्मै स्पृहयामि।

(6) सति = वर्त्तमाने। अस् + शतृ = सत्। पुंसि सन्। तस्मिन्। अस्ति। बभूव। भविष्यति। अभूत्। भूयते। अभावि। भूतम्। सत्। भवितुम्। भूत्वा।

(7) सारम् = अजहल्लिङ्गत्वात् क्लीवम्।

(8) नीतवान् · विक्रमबाहुम्...प्राप्तवानिमां सागरिकाम्...हेतुम् प्रियाम्। देव्या प्रीतिरुपागता। जितवान् कोशलान्...किं न भूयते...क्रियते स्पृहा।

(9) शार्दूलविक्रीडितं वृत्तम्।

(10) अत्र भाषणं नाम नाटकीयनिर्वहणसन्धिः। मानाद्याप्तिश्च भाषणमिति लक्षणात्। धृतिर्नाम भावश्च। तथाहि—अभीष्टार्थस्य सम्प्राप्तौ स्पृहापर्य्याप्तता धृतिरिति सरस्वतीकण्ठाभरणे।

तथापीदमस्तु।

उर्व्वीमुद्दामसस्यां जनयतु विसृजन्वासवो वृष्टिमिष्टा-
मिष्टैस्त्रैपिष्टपानां विदधतु विधिवत् प्रीणनं विप्रमुख्याः।
आकल्पान्तञ्च भूयात् समुपचितसुखः सङ्गमः सज्जनानां
निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुर्जया वज्रलेपाः॥

(इति निष्क्रान्ताः सर्वे)

इति ऐन्द्रजालिको नाम चतुर्थोऽङ्कः। इति श्रीरत्नावली नाटिका समाप्ता।

(1) তথাপি ইহা হউক—ইন্দ্র অভিলষিতবৃষ্টিদানপূর্ব্বক পৃথিবীকে পর্য্যাপ্তশস্যা এবং প্রধান ব্রাহ্মণেরা যজ্ঞ দ্বারা বিধিবৎ দেবদিগের প্রীতবিধান করুন। সাধুদের সঙ্গম ও প্রলয় পর্য্যন্ত বর্দ্ধিতসুখ হউক। দুর্জ্জয় বজ্রলেপসদৃশ খলবাক্য সম্পূর্ণরূপে অন্তর্হিত হউক। (নিষ্ক্রান্ত)।

ইতি চতুর্থ অঙ্ক। ইতি রত্নাবলী নাটিকা সমাপ্তা।

(2) Yet let it be,—may the God of heaven make the earth full of corn with the desired rains. Let the great Brahmins duly please the gods with sacrificial rites. May also the union of good people be full of happiness till the end of the world and may the irresistible and deeply wounding words of the wicked, fully disappear. (Exeunt omnes)

The end of Act IV. The Finish.

(3) वासव इष्टां वृष्टिं विसृजन् उर्व्वीमुद्दामसस्यां जनयतु। विप्रमुख्या विधिवदिष्टैः त्रैपिष्टपानां प्रीणनं विदधतु। सज्जनानाञ्च सङ्गमः आकल्पान्तं समुपचितसुखः भूयात्। दुर्जया वज्रलेपाः पिशुनजनगिरः निःशेषं शान्तिं यान्तु।

(4) वासव इन्द्र इष्टां वाञ्छितां वृष्टिं वर्षणं विसृजन् ददत् उर्व्वीं पृथिवीं उद्दामानि असंयतानि सस्यानि यस्यां सा तथोक्ता तां समधिकसस्यां जनयतु

करोतु। विप्रेषु ब्राह्मणेषु मुख्याः श्रेष्ठा विधिवत् नियमानुसारेण इष्टैर्यज्ञैः त्रैपिष्टपानां स्वर्गसम्बन्धिनां देवानामित्यर्थः प्रीणनं सन्तोषं विदधतु सम्पादयन्तु। सज्जनानां साधूनां तु अपिच सङ्गमः मिलनम् आकल्पान्तं प्रलयपर्य्यन्तं। संवर्त्तः प्रलयः कल्प इत्यमरः। यथा तथा समुपचितसुखः वर्द्धितसुखः भयात भवतु। आशिषि लिङ्। दुर्जया दुरभिभवनीया वज्रस्य कुलिशस्य लेपः लेपनं सम्पर्क इति यावत्। इव लेपो यासां तास्तथोक्ताः अशनिचिह्नकठिनाः। लेपः प्रलेपे अशनावित्ति मेदिनी। पिशुनजनगिरः खलजनोक्तवाचः निःशेष सम्पूर्णं शान्तिं विरामं यान्तु लभन्ताम्। अन्ते काव्यस्य नित्यत्वात् कर्थादाशियमलसामित्यन्त द्वारणांस्वनिर्द्देशात काव्यान्ते आशीरुक्ता।

(५) इन्द्रो वर्षणेन पृथ्वीं शस्यशालिनीं करोतु। ब्राह्मणा देवान प्रीणयन्तु। सज्जना सुखेन सततं मिलन्तु। दुरपनेयाणि खलवचनानि च सर्वयान्तद्धेताम्।

(6 जनयतु—वृषयुधनशशनेऽप्रद्रमुर्धा गुणिति परस्मैपदम। अजीजनत्। अजिजनत् अजनि अजनिष्ट।

इष्टाम्=इष+क्तः। ताम्। इच्छति। इयेष। एषिष्यति। ऐषीत। इष्यते। एषितुम एष्टुम। एषित्वा इष्ट्वा। इच्छन।

इष्टैः—यज् क्तः भावे। तैः। यजति ते इयाज ईजे। यक्ष्यति ते। अयाक्षीत् अयष्ट। इज्यते। अयाजि। यष्टुम। इष्ट्वा। यजन यजमानम्।

त्रैपिष्टपानाम्=त्रिविष्टप अण्। त्रिपिष्टपानामिमं। तेषाम्।

प्रीणनम्=प्री+णिच्+ल्युट्। धूञ्प्रीञोर्नुगवक्तव्यमिति णिचि नुगागमः।

आकल्पान्तम्=कल्पस्यान्त. कल्पान्तः। आ कल्पान्तादित्याङ् मर्थ्यादाभिविध्योरित्यव्ययीभावः। कालाध्वनोरत्यन्तसंयोग इति द्वितीया।

(7) सुरलोको द्योदिवो द्वे स्त्रियां क्लीवे त्रिपिष्टपमित्यमरः।

(8) उर्वी उद्दामशस्या जन्यतां विसृज्यता वासवेन। विधीयतां प्रीणनं विप्रमुख्यैः अविषीष्ट (भाविषीष्ट वा) समुपचितसुखेन सङ्गमेण। यायतां शान्तिः पिशुनजनगीर्भिः दुर्जयाभिर्वज्रलेपाभिः। (9) स्रग्धरावृत्तम्।

इति ऐन्द्रजालिको नाम चतुर्थोऽङ्कः।

इति श्रीश्रीशचन्द्रचक्रवर्त्तिभट्टाचार्य्यकृतं रत्नावलीप्रदीपनं नाम रत्नावलीविवरणं समाप्तम्।

APPENDIX.

UNIVERSITY AND OTHER QUESTIONS.

MADRAS UNIVERSITY.

M. A. EXAMINATION, 1899.

Thursday, January 19, 2 to 5 P. M. Text Books.

... ...

VI. What is the बीज of रत्नावली? Trace its development through the various Acts. Explain with all the allusions, the following verse. Show to what stage of development of the बीज it belongs.

"किं देव्या: कृतदीर्घरोषमुषितस्निग्धस्मितं तन्मुख...

... ... नो निर्वृतिम् ॥"

VII. Explain fully in Sanskrit the following passages, giving the contexts.

(1) "पुर: पूर्वामिव स्थगयति ततोऽन्यामिव दिशं

... . हरकण्ठद्युतिहर: ॥

(2) "दुल्लहजणाणुराओ लज्जा गरुई ... मरणं सरणं ण एक्कं ॥"

Friday, January 20, 10 A.M. to 1 P.M.

I Translate into English :—

(5) "प्रसीदेति ब्रूयामिदमसति कोपे न घटते
... ... न वेद्मि प्रियतमे ॥"

(6) वसन्तकः—(सपरितोषम्) ही ही भोः भोः अच्चरिअं अच्चरिअं। कोसम्बिरज्जलाहेणावि ण तादिसो पिअवअस्सस्स हिअअपरितोसो जादिसो मम सआसादो अज्ज पिअवअणं सुनिअ भविस्सदित्ति तक्केमि ता जाव गदुअ पिअ वअस्स णिवेदइस्सं।"

II. What is विष्कम्भक? What object does it serve in a drama? What others serve the same purpose? Differentiate between the विष्कम्भक and the latter.

... ...

THE PANJAB UNIVERSITY.

PRAJNA EXAMINATION.

April, 1901. Paper II.

Examiner—Pandit Balaki Ram Sastrin—

I (क) प्रत्यग्रमज्जनविशेषविविक्तकान्तिः &c. ... ... (1)

(ख) नष्टं वर्षवरैर्मनुष्य गणनाभावाद् &c. ... . (2)

(ग) अश्वानं नैकचक्रः &c ... ...

मन्याक्रष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपङ्क्तिं

व्याक्रष्यावस्थितोस्म &c. ... ... (3)

(घ) विश्रद्धं कम्पस्य &c. ... ... (4)

समासोद्घाटनपूर्वकं सप्रकरणञ्च व्याख्यायन्तामेते श्लोकाः। कुत्र किं वृत्तम्? कश्चालंकारः इत्यपि सलक्षणं लिख्यताम्।

II. "ततस्तया भणितम्। अद्य खलु देव्या चित्रफलकवृत्तान्तातिशङ्कितया सागरिकां मम हस्ते समर्पयन्त्या &c. &c. ... माधवीलतामण्डपे तया सह भर्त्तुः सङ्गमो भविष्यति।"

वक्तृश्रोतृनामनिर्द्देशपुरःसरं यथावसरं व्याख्यायतामिदं गद्यम्। अपिच कोऽसौ चित्रफलकवृत्तान्तः? का च शङ्का? इत्यपि प्रकटीक्रियताम्।

III. "दुल्लहजणाणुराओ लज्जा गरुई &c... "

प्राकृतपद्यमिदं संस्कृतं परिणमय्य टीकाम्। केन कदा कम् प्रत्युक्तमिदमित्यपि लिख्यताम्।

IV. "देवीदाहप्रवादोऽयं योऽभल्लावणके परो।

कश्यिष्यन्निव तं सत्यमचाग्निरयमुत्थितः॥"

पद्यमिदं वाच्यान्तरेण गद्यं परिवर्त्तनीयम्। कोऽसौ देवीदाहप्रवादः? केन कथं प्रकाशितश्च? किं तत्र तत्त्वम्। तत् फलञ्च किं सञ्जातम्? कथञ्चाग्निः समुत्थितः? कथञ्चोपशमं गतः? अपि च कस्मिन् द्रव्ये "अग्रे" रत्नभावः? कथञ्च? तस्य किं लक्षणम्? कति च भेदाः? सर्वं सविचार्य्य लिख्यताम्।

V. मज्जनम्। दामिनः। रथः। गद्गदः। नेपथ्यम्। उत्थित इत्येतेषु पदेषु प्रकृतिप्रत्ययौ विभज्य प्रदर्शयितव्यौ।

VI. "रत्नावली नाटिका" कस्मिन् काव्यभेदे कथमन्तर्भवितुमर्हति? रत्नावलीति विशेषणञ्च नाटिकायां कथं संगच्छते? अस्याश्च को नेता? किंलक्षणकश्च सः? का नायिका सागरिका वासवदत्ता वा? सोपपत्तिकं लिख्यताम्।

VII. नान्दी प्रस्तावना सूत्रधार विदूषक कञ्चुकिनां कानि लक्षणानि? रत्नावल्याश्च कीदृशी प्रस्तावना? तल्लक्षणे चात्र संगमयितव्यम्।

VIII. स्वगतम्। प्रकाशम्। अपवार्य्य इत्येतेषां के नाट्याभिमता अर्थाः?

पण्डितसमाजाधीनपरीक्षा।

रत्नावलीप्रश्नाः।

(१) मातृभाषयानूद्यताम्—

"अस्तं प्राप्तमस्तमभासि नभसः पारं प्रयाते रवौ

&c. &c. ... ... विरहे द्विवोचन्तं ॥"

(२) व्याख्यायताम्—

"प्राणाः परित्यजत काममदक्षिणं मा

&c. &c. ... ... गजगामिनी सा।"

(५) रत्नावलीनाटिकायाः कः प्रणेता? कीदृशी वात्र किंवदन्ती?

(६) रत्नावलीवर्णितवृत्तान्तः समाहारः क्व कथं वा कविनोपनिबद्धः? उद्धृयतां कविवाक्यम्। स्वयं वा लिख्यतां तद्वर्णनम्। (अस्योत्तरार्थं— "नीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले सारं सागरिकेत्यादि श्लोकः चतुर्थाङ्कपरिसमाप्तौ द्रष्टव्यः)।

शु[illegible]पत्रम् ।

पृष्ठाया[illegible]	पङ्क्तौ	[illegible]शुद्धम्	शुद्धम्
2[illegible]	11	पर[illegible]र्त्तिकार्य्यातुरूप	परवर्त्तिकार्य्यानुरूप
28[illegible]	12	त्वय[illegible]	त्वया
42	5	सम + [illegible]म् + क्त:	सम् + तन् + क्त:
[illegible]4	5	अनङ्ग	अनङ्गं
127	8	प्रणव:	प्रणव:
208	11	w..itiag	wa..ing
253	2	कार्य्य	कार्य्यं
299	6	यांषाकौष:	यौषाकौष:

NOTICE.

BY THE SAME EDITOR.

(1) The **Kumara Sambhava** (कुमारसम्भव) Cantos I-VIII. edited with the commentary (सञ्जीवनी) by Mallinatha and another Sanskrit commentary named **धीररश्मिका** composed in 1750 A.D. and with translation into Bengali and English and annotations in English and Sanskrit. Rs. 4/-, or 5s 4d

(2) The **MudraRakshasa** (मुद्राराक्षस)— a Sanskrit Drama by विशाखदत्त—edited with an original Sanskrit commentary, Bengali and English translations and annotations in English and Sanskrit. Second edition. Rs. 3/8. or 4s. 8d.

(3) The समाप्तिमिनन्दनम्— a Sanskrit poem with English translation. As 4. Foreign 4d.

(4) The **Bhasha-Vritti** (भाषावृत्ति) by पुरुषोत्तमदेव, a commentary on Panini's Grammar edited with annotations in Sanskrit and English. Rs 6 - or 8s.

(5) The **Kasika-Vivarana-Panjika** or **the Nyasa** (काशिका-विवरण-पञ्जिका वा न्यास) by Jinendra Buddhi (जिनेन्द्रबुद्धि) edited with occasional notes in Sanskrit and English, Vol. I. (containing the first four Adhyayas) Rs. 8/12 or 11s. 8d. Vol II. (In the press, containing the last four Adhyayas) Rs. 8/12 or 11s. 8d.

(6) The **Dhatu-Prodeepa** (धातुप्रदीप) a commentary on Panini's Dhatu-Patha (धातुपाठ) by Maitreya Rakshita edited with annotations. (In the press).

To be had of Chief booksellers of Calcutta, Dacca, and the Varendra Research Society, Rajshahi, Bengal.